अनात्मगत (anātma-gata) *adj.* belonging to the non-self or the insentient कर्त्रादिसंनिधिबलेन तवापि कर्तृभोक्तृप्रमातृवपुरापतति भ्रमेण। तद्बुद्धिसंश्रयमनात्मगतं प्रतीचि शुद्धेऽपि पश्यसि SaṁkṣeŚā. 3. 81 (ii. 195. 10)

अनात्मगतत्व (anātmagata-tva) *n.* the state of pertaining to what is different from the self तस्या (व्यवस्थायाः) अनात्मगतत्वादात्मैक्येनाविरोधात्। न ह्याकाशैक्यं घटादिभेदेन विरुध्यते IṣṭaSi. 354.7.

अनात्मगुणग्राहिन् (anātmaguṇa-grāhin) *adj.* cognising the qualities of what is different from the self बाह्येनानात्मगुणग्राहिणा एकैकेन प्रतिनियतेनेन्द्रियेण ··· ग्राह्याः ··· गुणा गन्धादयः Kiraṇā. 36. 17.

अनात्मगुणत्व (anātmaguṇa-tva) *n* the state of being the quality of the non-self आत्मनस्तेषां च ज्ञेयत्वे, अनात्मत्वमनात्मगुणत्वम् ··· च घटादिवत्तद्गुणवत् ··· स्यात् IṣṭaSi. 91. 17.

अनात्मग्राहित्व (anātmagrāhi-tva) *n.* the state of being that which cognises something other than itself बाह्यं नास्तीति निषेधयतावश्यं बाह्यं बुद्धावारोपयितव्यम् ··· तस्मात् ··· अवश्यं विज्ञानानामनात्मग्राहित्वं बलादभ्युपगन्तव्यम् ŚāstrDī. 56. 2 (*on* i. 1.5) (YuktiSneha. स्वभिन्नबाह्यनीलादिपदार्थग्राहित्वम्)

अनात्मघातिन् (an-ātmaghātin) *adj.* who does not destroy himself ज्ञात्वा ज्ञात्वा च गङ्गायां यः पञ्चत्वमवाप्नुयात्। अनात्मघाती स्वर्गी स्यान्नरकान् स न पश्यति SkandP. iv. 28. 120.

अनात्मचिन्तन (anātma-cintana) *n.* **I** thought of what is other than the self अनात्मचिन्तनं त्यक्त्वा कश्मलं दुःखकारणम्। चिन्तयात्मानमानन्दरूपं यन्मुक्तिकारणम् ViveCū. 381; **II** speculation about what is different from the self त्रिवृत्कुर्वत उपदेशात् ···। पञ्चीकृतपञ्चमहाभूतानीति च भाष्यकारवचनम्। तस्मादलमनेनानात्मचिन्तनेन SiddhāBi. 103. 3.

अनात्मचिन्ता (anātma-cintā) *f.* thought of what is different from the self तस्यां (अविद्यायाम्) निवर्तितायां कामादिदोषानुपपत्तेरनात्मचिन्तानुपपत्तिः, पारिशेष्यादात्मचिन्तैव BṛĀraUBh. 106. 12 (*on* i. 4. 7); श्रवणादीननुवदन्ति वचांसि तद्गतप्राशस्त्यलक्षणया तेषु रुचिमुत्पाद्यानात्मचिन्तायामरुचिं कुर्वन्ति VedāntKa. 78.13 (*on* i. 1. 4)

अनात्मज (an-ātmaja) *adj.* **1** who has no son न पुत्रफलभोक्ता हि राजर्षे पात्यते दिवः। न याति नरकं घोरं यत्र गच्छन्त्यनात्मजाः MahāBhā. v. 116. 8; स एवं भवनिर्विण्णः सर्वगुप्ताभिधं गुरुम्। ययौ ···। दीक्षां जग्राह तत्पार्श्वे सम्यक् तां प्रत्यपालयत्।··· अनात्मज इवात्मजम् TriṣaŚaPuC. iv. 3. 8; **2A** not produced from the self इह खलु भो मातृजश्चायं गर्भः ···। नेति भरद्वाजः (अमातृ)जश्चायं गर्भः अपितृजश्चानात्मजश्च BhelaS. 89. 21 (4.6); **2B** (anātma-ja) arisen from what is other than the self कर्मजान्···विद्धि तान् सर्वान् अनात्मजान् GītāBh. (Śaṅ.) 141. 13 (*on* 4.32)

अनात्मजात (anātma-jāta) *n.* group or collection of what are different from the self, all that is insentient अनेनात्मना ज्ञातेन ··· एतत्सर्वमनात्मजातम् ··· जानाति BṛĀraUBh. 115. 13 (*on* i. 4. 7); स (सूर्यः) हि तस्यैव भासा सर्वमन्यदनात्मजातं प्रकाशयति MuṇḍUBh. 341. 2 (*on* ii. 2.11); अतस्सर्वस्यानात्मजातस्यासत्त्वेऽपि बाधकज्ञानसंभवात् ··· संसारभ्रमोऽपि ब्रह्मज्ञानान्निवर्तत एव IṣṭaSi. 83. 1; 171.10.

अनात्मज्ञ (anātma-jña) *adj.* [*f.* -ā] **Ai** who does not know the self चलचित्तमनात्मानम् (v. l. अनात्मज्ञम्) इन्द्रियाणां वशानुगम्। अर्थाः समतिवर्तन्ते MahāBhā. v. 36. 38; अनात्मज्ञो भवान् Bṛha. 233. 6 (*on* i. 1. 5); इतरस्तु अनात्मज्ञः ··· पुनर्देहजालमाविशति ChāndoUBh. 384. 10 (*on* vi. 8. 6); अज्ञश्च अनात्मज्ञश्च ··· विनश्यति GītāBh.(Śaṅ.) 146. 7 (*on* 4.40); 92.6 (*on* 3. 16); 120. 9 (*on* 4. 15); रजसः प्रवर्तकस्य विक्षेपकस्य तमसश्चावरण· प्रधानस्य विवेकज्ञानप्रतिबन्धकस्य निद्रालस्यादिसमुद्भवस्य कार्येण ··· अनात्मज्ञासुर· संपत्तिमतां चित्ते न भातीत्याशयः LalitāTriBh. 342. 3 (*on* 51); अथवा 'अज्ञा' अनात्मज्ञाः शास्त्रानवगतात्मतत्त्वा अपि तदुपासनापराः ManuBh. i. 527. 15 (*on* 6.84); अनात्मज्ञस्तथैवायं सम्यक् श्रुत्यावबोधितः NaiṣkaSi. 190. 8; दारुमूर्तिः। यस्यात्युपास्ति श्रुतिराह मुक्तिप्रदामनात्मज्ञविमोहितानाम् SkandP. ii(2). 21.2; YogVā. v. 50. 54; अनात्मज्ञस्य कृपणत्वात्मघ्नत्वादियोगनिन्दाश्रवणाच्च ब्रह्मजिज्ञासा कर्तव्या VedāntKau. 4. 10 (*on* i. 1.1); GoviBh. 185. 5 (*on* iii. 1. 7); **Aii** who does not recognize the existence of the self

हेयोपादेयतत्त्वस्य सोपायस्य किलेदृशः । प्रवक्तेति धिगनात्मज्ञन् NyāyVi. 2.391 (Vivaraṇa न जानाति नोपैति); **Bi** who does not know oneself or one's own position, foolish कञ्चुकी — मा तावदनात्मज्ञे । देवेनैवं निषिद्धेऽपि मधूत्सवे चूतकलिकाभङ्गमारभसे Śāk. 6.3(2); कथं कार्यविनिमयेन मयि व्यवहरत्यनात्मज्ञः Mālavikā. 1.7(2); हा धिक् पुंश्चलि अनात्मज्ञे यया त्वया ममास्मिन् ··· शिरसि चरणौ न्यस्तः PādaTā. 3.13; आः पाप क्रोधोपहत दुरात्मन्ननात्मज्ञ ··· त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुमभिलषसि HarṣaC. 17.2; यदयमुद्याने ··· अनात्मज्ञामात्मनाटकीयां रमयन्तिकाम् ··· सुमनोभिरलमकार्षीत् DaśKuC. 70.22; कथमेते तपस्विपक्षपातादनात्मज्ञा वासवपुरःसरा दिवौकसोऽपि मत्सरेण विक्षोभ्यन्ते MahāvīC 6.24(2); अमी ··· पुत्रा हरिशिखादयः।··· वस्तुन्यल्पेऽप्यनात्मज्ञाः ··· । प्रभुमेव जिघांसन्ति BṛKathāŚloSaṁ. 6.31; 17.77; कविभिस्तैरनात्मज्ञैर्बुद्धिरायास्यते वृथा BṛKathāŚloSaṁ. 24.3; AnarghaRā. 4.54(4); अहो बलीयाननात्मज्ञानामवलेपः SubhaDha. 4.17(4); सर्वथा धिङ्माम् ··· अनात्मज्ञन् ··· असमीहितकारिणम् TilaMañ. 150.9; 382.5; धर्मफलमनुभवतोऽप्यधर्मानुष्ठानमनात्मज्ञस्य NītiVā. 1.33; CaṇḍaKau. 3.28(4); मरुभूतिरनात्मज्ञः क्षीबोऽतिकुपितोऽब्रवीत् KathāSaSāg. vii. 6.33; xii. 35.141; xvii. 1.71; अनात्मज्ञ धिगेतत्ते कुकर्मेति महीभुजा । तर्जितः RājTa.(Ka.) 3.34; 8.2878; स्वमृत्यवे कृतमिदमनात्मज्ञेन रौद्रिणा TriṣaŚaPuC. iv. 3.118; PāṇḍaC. 13.883; अनात्मज्ञेन केनेह तवाज्ञाखण्डनं कृतम् MalliC. 8.460; विधिर्मैव दुर्बुद्धिः स्वप्रजायां विडम्बितः । तन्मन्ये मय्यनात्मज्ञः सोऽयमेवं व्यवस्यति MohaRāPa. 5.55; PārśvC. 5.212; अनात्मज्ञ धराधीश, कस्ते मिथ्याग्रहोऽलगत् PrabhāC. 35.13; PrabaCin. 78.29; KumāDeC.(So.) 12.6; KumāPraPra. 52.20; अनात्मज्ञम् ··· मातुलं नृपम् । हन्तुं मनो न वलते कारुण्यप्रवणं मम KaṁVa. 6.41; सोऽपि कश्चिदनात्मज्ञः सुग्रीव इव भास्करिः AdbhuDa. 6.9, 6.23(9); **Bii** (cognition) which does not cognise itself मिथ्याज्ञानमनात्मज्ञं मैत्र्यादिप्रतिरोधतः NyāyVi. 2.447 (Vivaraṇa अनात्मज्ञम् आत्मवेदनविमुखं ज्ञानम्)

अनात्मज्ञता (anātmajña-tā) *f.* **Ai** the state of being one who knows what is not the self (i.e. the primordial matter) यद्यनात्मैव प्रधानं सच्छब्दवाच्यम्, 'स आत्मा तत्त्वमसि' इतीहोपदिष्टं स्यात्, स तदुपदेशश्रवणादनात्मज्ञतया तन्निष्ठो मा भूदिति, मुख्यमात्मानमुपदिदिक्षु शास्त्रं तस्य हेयत्वं ब्रूयात् BrahmSūBh.(Śaṅ.) 45.10 (*on* i. 1.8); **Aii** the state of being one who does not know the self एवमात्मविदः ··· आत्मज्ञाननिष्ठतया आत्मा रक्षितव्य इत्येष वेदार्थः । अथेतरस्य अनात्मज्ञतयात्मग्रहणाशक्तस्य इदमुपदिशति मन्त्रः ĪśopBh. 7.11 (*on* 2); नारदः ··· सनत्कुमारम् ··· । उपसद्य चोवाच, भगवन्ननात्मज्ञताजनितशोकसागरपारमुत्तारयतु मां भगवानिति Bhām. 198.11 (*on* i. 3.8); **B** the state of being one who does not know oneself, foolishness अहो दुरात्मनः क्षत्रियबटोरनात्मज्ञता MahāvīC. 2.27(2); अनात्मज्ञता हि पुंसामात्मनिधनमापादयति । यदहमात्मप्रशंसापरवशः परमेश्वरमपि सामान्यवृत्त्या पर्यजीगणम् PārvPa. 2.12(11)

अनात्मज्ञत्व (anātmajña-tva) *n.* the state of being one who does not know the self नारदः देवर्षिः कृतकर्तव्यः सर्वविद्योऽपि सन् अनात्मज्ञत्वात् शुशोचैव ChāndoUBh. 415.17 (*on* vii. 1.0); केवलकर्मिणामनात्मज्ञत्वाद्विद्यावद्भोगोपकरणत्वं युक्तमेव ।··· अनात्मज्ञत्वेन देवभोगोपकरणत्वं 'पशुरेव स देवानाम्' इति श्रुतिर्दर्शयति VedāntKau. 260.6 (*on* iii. 1.7)

अनात्मज्ञनिन्दापरा (anātmajñanindā-parā) *adj.* (*f.*) relating to the censure of one who does not know the self श्रुत्यात्महननिषेधात् कथमेतदिति चेत् ···। सा श्रुतिरनात्मज्ञनिन्दापरेति शांकरभाष्येऽभिधानात् VīraMi.(Tīrtha.) 346.8.

अनात्मज्ञविषय (anātmajña-viṣaya) *adj.* referring to one who does not know the self अतोऽनात्मज्ञविषय एव धर्माधर्मादिलक्षणस्संसारः न आत्मज्ञस्य KāṭhUBh. 133.10 (*on* 2.19)

अनात्मज्ञान (an-ātmajñāna) *adj.* not having the knowledge of the self तस्मादनात्मज्ञानविलसितमिदम् Bṛha. 230.9 (*on* i. 1.5); *n.* (anātma-jñāna) knowledge of what is different from the self अनात्मज्ञानसिद्ध्यर्थमविद्यानात्मनीष्यताम् IṣṭaSi. 214.9; प्रकृतसद्वस्तुनिष्ठस्य तत्साक्षात्कारवतः (पुरुषस्य) श्रुया मोक्षोपदेशात् अनात्मज्ञानाच्च मोक्षानभ्युपगमात् PrakaVi. 97.18; आत्मानात्मविवेकार्थमनात्मज्ञानस्यावश्यकत्वात् NyāySu.(Ja.) 120A.9 (*on* i. 1.5); अनात्मज्ञानं प्रति ··· विरोधित्वं स्वीक्रियते GuruCandr. i. 362.19; (द्वितीयाद्वै भयं भवति) द्वितीयात् अनात्मज्ञानात् LaCandr. 430.43.

अनात्मज्ञोक्ति (anātmajñokti) *f.* statement regarding one who does not know the self असुर्या इति श्रुतिस्तु प्रकरणादात्महशब्देनानात्मज्ञोक्तेरविद्वन्निन्दार्थेतीशावास्यभाष्ये व्याख्यातं शंकराचार्यैः TristhaSe. 52.13.

अनात्मतत्त्व (anātma-tattva) *n.* the principle different from the self अनात्मतत्त्वमन्वेति ह्यात्मासङ्गोऽगुणोऽद्वयः BṛĀraUBhVā. i. 4.945 = i. 4.1364; न हि प्रमाणान्तरबाधितस्य याथार्थ्यमङ्गीक्रियते महद्भिः । पुत्रादिशून्यान्तमनात्मतत्त्वमित्येव विस्पष्टमतस्तुजातम् SarvaVeSāSaṁ. 580.

अनात्मतन्त्रा (an-ātmatantrā) *adj.* (*f.*) not self-dependent, dependent त्रिभुवनविजयश्रियः सपत्नीं जनयतु को भवतीमनात्मतन्त्राम् AnarghaRā. 3.58 (comm. अनात्मतन्त्रां पराधीनाम्)

अनात्मतस् (anātma-tas) *adv.* from the point of view of being not the self यः कश्चिद् भदन्त शारिपुत्र इमं प्रतीत्यसमुत्पादं भगवता सम्यक् प्रणीतमेवं यथाभूतं सम्यक् प्रज्ञया···पश्यति ··· दुःखतः शून्यतः अनात्मतः समनुपश्यति न स पूर्वान्तं प्रतिसरति ĀryaŚāS. 18.12; सोऽहं स्वफलापान्यदेशं विपादनात्मतः AbhidhK. 7.18 (AbhidhKoBh. सर्वधर्माननात्मतो भावनात् सर्वधर्मा अनात्मान इति)

अनात्मता (anātma-tā) *f.* **Ai** the state of being different from the self, the state of being insentient स्वात्मबुद्धिमपेक्ष्यासौ विधीनां स्यात्प्रयोजकः । जात्यादिः शववत्तेन तद्वज्ञानात्मतान्यथा UpadeSā. 241.5; सन्तु काममनात्मधर्मा ममत्वादयो यथोक्तन्यायबलादनात्मतयैव च तेषु व्यवहारात् NaiṣkaSi. 68.5; योऽयमन्वयव्यतिरेकाभ्यामनात्मतयोत्सारितोऽहंकारो वाक्यार्थप्रतिपत्तये सोऽयं विपरीतार्थः संवृत्तः NaiṣkaSi 77.6; ब्रह्म अन्यत्, अहं चान्य इति भ्रान्त्या भेदं मन्वानस्य ब्रह्मास्मीति प्रत्यग्ब्रह्मणोरब्रह्मानात्मतानिरासेन एकैव श्रुत्या बोध्यते IṣṭaSi. 27.15; पुंसां तदद्वयत्वे (भेददृश्यत्वे) अनात्मताज्ञत्वे स्याम IṣṭaSi. 352.22; अचेतनत्वाद् भूतानां देहेन्द्रियगणस्य च । लक्तगर्वैस्तु चार्वाकैरभ्युपेया ह्यनात्मता ĪśānŚiPa. ii. 1.37; **Aii** the nature of non-self (being regarded as the self) आत्मलाभः परो लाभ इति शास्त्रोपपत्तयः । अलाभोऽन्यात्मलाभस्तु त्वजेत्तस्मादनात्मतान् UpadeSā. 286.44; नैते स्वरूपं विदुरात्मनस्ते ह्यजादयोऽनात्मतया गृहीताः BhāgP. x. 40.3; **Aiii** the state of not having a soul or the life principle शीतात्पुष्पफलावाप्तिः स्पर्शात्कार्श्यं रसात्स्थितिः । अपि वृक्षस्य दृश्यन्त इति नानात्मता भवेत् AnuVyā. 32A.3 (*on* 2.2); शरीरविशेषात् स्थावराणामनात्मता न सिद्ध्येत् NyāySu.(Ja.) 417A.2 (*on* ii. 2.10); **Bi** the state of not being (knowledge) itself अनात्मालम्बनत्वं तु स्वाभाविकमेव, अनात्मतया नीलादीनां प्रतिभासनात् TātpaṬ.(U.) 210.13 (*on* 7.65); 202.17 (*on* 7.33); नीलमिदमहं गृह्णामीत्यादिषु ह्यनात्मतया नीलादयः प्रतिभासन्ते न पुनर्नील एव केवलः स्वप्रकाशः तथा प्रतिभासाभावात् YuktiSneha. 52.28 (*on* i. 1.5); 52.32 (*on* i. 1.5); **Bii** the state of not having control over oneself रोगाः प्रभवन्ति देहिनाम् । भिषग्विशेषाहितमोहतोऽपि वा तथातुरानात्मतयापचारतः KalyāKā. 22.2.

अनात्मताभिमान (anātmatābhimāna) *m.* notion of being the non-self व्यपोहिते व्यामोहे स्थितेऽपि ··· शरीरादौ अनात्मताभिमानपुरःसर एवात्मताभिमाने घटादौ च प्रकाशमान एवानात्मताभिमाने···न तत्त्वतो व्यामोहः ··· प्रत्यभिज्ञातात्मस्वरूपस्य PratyabhiVi. ii. 146.5 (*on* ii. 3.17); तत्र समाधिकाले अनात्मताभिमानः व्युत्थानकाले अवश्यकार्यव्यवहृतिवशेन आत्मताभिमान इति क्रमो ज्ञेयः Bhāsk. ii. 146.15 (*on* ii. 3.17)

अनात्मतारूप (anātmatā-rūpa) *n.* the nature of not being the self ब्रह्मणोऽनात्मतारूपमब्रह्मत्वं तथात्मनः । अज्ञानलक्षणं शास्त्राज्ज्ञानं हन्ति समुत्थितद BṛĀraUBhVā.(Sambandha.) 903.

अनात्मत्व (anātma-tva) *n.* **i** the state of being no soul स्वयमनात्मत्वादनात्मा AbhidhKoBh. 400.15 (*on* 7.13); **ii** the state of being different from the self, the state of not being (identical with) the self आगच्छतामपगच्छतां चावयवानामागमापायधर्मवत्त्वादेव अनात्मत्वं शरीरादिवत् BrahmSūBh.(Śaṅ.) 407.17 (*on* ii. 2.35); प्रकृतं पुरुषमात्मेत्याह, अतश्च अनात्मत्वमितरेषां विवक्षितमिति गम्यते BrahmSūBh.(Śaṅ.) 637.3 (*on* iii. 3.15); बाह्येष्वर्थेष्वनाम(? त्म)त्वात्पुनः शङ्का भवेदपि BṛĀraUBhVā.(Sambandha.) 901; अनात्मत्वमतः सिद्धं प्राणादेः करणोक्तितः BṛĀraUBhVā. iii. 4.70; आत्मनोऽन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः । अनात्मत्वेऽस्य किं तैः स्यादात्मत्वे त्वन्यधीहुतिः TaiUBhāVā. 58.10(2); नामरूपात्मकं कार्यमनात्मत्वात् स्वतो ह्यसत् TaiUBhāVā. 125.11(2); प्रमेयस्य चेदंरूपतया पराङ्मुखत्वादनात्मत्वात् PañcePā. 18.1 (*on* i. 1.1); अत्रापरत्वं भावानामनात्मत्वेन भासनात् ĪśvaPraSū. iii. 1.5 (Bhāsk. इदंतया भासनात्); एकरूपायामप्यनुभूतौ विक्रियाविषयत्वभेदानात्मत्वासुखित्वपूर्वापरान्तर्बहिर्नावदिग्विभागायुचातिनीचादिभ्रमान् जनयति IṣṭaSi. 36.4; 91.17; 208.7; 342.21; कर्तृत्वे ह्यात्मनोऽहंप्रत्ययगोचरत्वेऽपि देहस्येव अनात्मत्वपराधीनत्वजडत्वादिप्रसङ्गो दुर्निवारः ĀtmaSi. 26.11; अनात्मत्वाच्चैष त आत्मेति श्रुतेरनुपपत्तेर्न प्रधानस्यान्तर्यामिता Bhām. 180.16 (*on* i. 2.18); शरीरेन्द्रियमनःस्वात्माभिमानस्तेषामनात्मत्वस्य प्रत्यक्षसिद्धत्वात् Kiraṇā. 267.9; यदुक्तं विषयत्वे युष्मत्प्रत्ययविषयत्वापत्तिः ततश्चानात्मत्वमिति VedāntKa. 20.20 (*on* i. 1.1); न चैवं दुःखादि अपि नित्यमनुमेयं, तस्य अनात्मत्वेन अनित्यत्वावधा(रणा)त् TarkSaṁ.(Ā.) 111.5; 124.12; आत्मत्वम् — पुरुषार्थप्रतिसंबन्धित्वम्, देहं प्रति

नियन्तृतया व्यापित्वं वा, तदभावोऽनात्मत्वम् ŚrutaPra. iA. 110. 15 (*on* i. 1.1); iA. 158.18 (*on* i. 1.1); तत्रेन्द्रियादीनां देहव्यतिरिक्तानामनात्मत्वं सुप्रतिपाद्यम् NyāyKu. 105.5; तेषाम् (सुखादीनाम्) अपि संविद्व्यतिरेकस्यानात्मत्वस्य च… त्वस्याप्यपरित्यागात् ŚatDū. 120.11; ज्ञानम् … स्वप्रकाशमिति चेन्न अनात्मत्वात्, घटवत् NyāySu.(Ja.) 278A. 6 (*on* ii. 1.2); किमिदं जडत्वं नाम। ज्ञानानाधारत्वं वा। अनात्मत्वं वा Vāda. 48. 7; एतेषां पुत्रादीनां शून्यपर्यन्तानामनात्मत्वमुच्यते VedāntSā.(Sa.) 19. 18; जडत्वमप्यज्ञातृत्वं वा … अनात्मत्वं वा, पराभिप्रेतं वा Nyāyāmṛ. 68B. 8; 13A. 9; 384B. 9; 385A. 7; 577B. 5; 631A. 5; एतेन देहमारभ्य केवलशोक्तृपर्यन्तानाम् … अनात्मत्वं प्रतिज्ञातं भवति SiddhāBi. 16. 1; एवमानन्दभिन्नस्वरूपमनात्मत्वमनुपपाद्यम् AdvaiSi. 312. 4; 295. 1; प्रकृतेः कार्यभूतानि मनः पञ्चेन्द्रियाणि च।… अनात्मत्वेन जानाति यदा सोऽपि महात्मकः BṛBrahmaS. ii. 2. 35; न त्वानन्दमयः शुद्धः।… मयटो विकारार्थत्वात्, अनात्मत्वेन निर्णीतान्नमयप्राणमयमनोमयविज्ञानमयप्रायपाठाच्च SiddhāTa. 14.6; धर्मस्य शुभकर्मसंस्काराकारस्यानात्मत्वेन(? अपि) रूपरहितत्वेन चक्षुराद्यग्राह्यत्वादसंनिकृष्टत्वम् SarvaMaSaṁ. 8.11; **iii** the state of not being that किमेते (परत्वापरत्वादयः) समवायित्वेन असमवायित्वेन निमित्तत्वेन वा कालमनुमापयेयुः। नाद्यः, तस्य अनात्मत्वात् TarkSaṁ.(Ā.) 48.9; **iv** the state of not having the soul or life-principle वृक्षादीनामनात्मत्वे हस्त्यादीनामपि तदुपपादनमनुचितम् NyāySu.(Ja.) 416B.1 (*on* ii. 2. 10); 416B. 6 (*on* ii. 2.10)

अनात्मत्वख्यापन (anātmatva-khyāpana) *n.* declaration of not being the self अतः स्वापेऽप्यनुपरतव्यापारस्य प्राणस्याचेतनत्वेनानात्मत्वख्यापनमपेक्षितम् ŚrutaPra. ii. 139. 16 (*on* i. 4. 18)

अनात्मत्वदृष्टि (anātmatva-dṛṣṭi) *f.* recognition of not being the self आत्मानात्मविवेकसाक्षात्कारादनात्मत्वदृष्ट्या … (विषयेषु) अलंबुद्धिः परं वैराग्यम् YogSā. 26. 9(2)

अनात्मत्वनिवृत्त्यर्थम् (anātmatvanivṛttyartham) *adv.* for the sake of rejection of not being the self आत्मेत्यवेत्यवधारणमनात्मत्वनिवृत्त्यर्थम् BrahmSūBh (Ma.) 53B. 3 (*on* iii. 3. 7)

अनात्मत्वप्रतिपत्ति (anātmatva-pratipatti) *f.* perception of not being the self एवं मर्त्यत्वमात्मनो यदविद्यया अनात्मत्वप्रतिपत्तिः KenUBh. 43. 6 (*on* 2. 4)

अनात्मत्वप्रतिबद्धत्व (anātmatvapratibaddha-tva) *n.* the state of being invariably connected with being what is different from the self न चाप्रत्यक्षा संविदिति स्फुटो व्यभिचारः, ऐन्द्रियकत्वमनात्मत्वप्रतिबद्धत्वाद्विरुद्धता ĀtmaSi. 43.6.

अनात्मत्वप्रसक्ति (anātmatva-prasakti) *f.* undesired contingency of being what is different from the self न च कुम्भादिवद् दृष्टिरात्मनोऽव्यतिरेकतः। अनात्मत्वप्रसक्तिः स्याद् द्रष्टृदृश्यप्रभेदतः BṛĀraUBhVā. iii. 2. 104.

अनात्मत्वप्रसङ्ग (anātmatva-prasaṅga) *m.* undesired contingency of being what is different from the self न च (आत्मा) संवेद्यः, कर्मत्वे कर्तृव्यतिरेकप्रसङ्गात् अनात्मत्वप्रसङ्गाच्च BrahmSi. 4. 11; न च आत्मा प्रत्यक्षज्ञानप्रमेयः, घटादिवदनात्मत्वप्रसङ्गात् IṣṭaSi. 65. 22; 89.16; VivaPraSaṁ. 70. 15; आत्मान्तरसमवायाभ्युपगमे तु ज्ञेयस्यात्मनोऽनात्मत्वप्रसङ्गः Bhām. 19. 15 (*on* i. 1. 1); 22.2 (*on* i. 1. 1); न द्वौ प्रत्यगात्मानौ संभवतः प्रमाणाभावात्, वस्तुतः परिच्छिन्नतयानात्मत्वप्रसङ्गात् PrakaVi. 196. 24.

अनात्मत्वप्रसिद्धि (anātmatva-prasiddhi) *f.* establishment of being what is different from the self दृश्यत्वाद् घटवद्देहः प्राणादेः करणत्वतः। अनात्मत्वप्रसिद्धिः स्याल्लिङ्गपिण्डात्मनोरतः BṛĀraUBhVā. iii. 4. 71; ब्रह्मणोऽपि ज्ञानात्प्रागात्मत्वाप्रसिद्धेरनात्मत्वप्रसिद्धेश्च भ्रान्त्या, शब्दो ब्रह्मेत्युक्ते परागेव ब्रह्म उत्तमज्ञो मन्यते न तु प्रत्यक् IṣṭaSi. 176. 4.

अनात्मत्वभ्रान्ति (anātmatva-bhrānti) *f.* illusion of being what is different from the self वेदेऽपि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादौ सत्यज्ञानानन्दानन्तात्मशब्दा अनृतजडदुःखान्तवत्त्वानात्मत्वभ्रान्तिनिवृत्तिद्वारा लक्ष्ये ब्रह्मणि पर्यवस्यन्ति TattvPradī.(Ci.) 111. 11.

अनात्मत्ववारण (anātmatva-vāraṇa) *n.* rejection of being what is different from the self तत्पदं प्रकृतार्थं स्यात्त्वंपदं प्रत्यगात्मनि। नीलोत्पलवदेताभ्यां दुःख्यनात्मत्ववारणे NaiṣkaSi. 109. 4.

अनात्मत्वव्याप्त (anātmatva-vyāpta) *adj.* pervaded by (i.e. invariably associated with) not being the self अनात्मत्वव्याप्तं जडत्वं संविदि व्यावर्तमानमनात्मत्वमपि हि संविदो व्यावर्तयति BrahmSūBh.(Rā.) 26. 5 (*on* i. 1. 1); अनात्मत्वव्याप्तम्। व्याप्तमिति कर्तरि क्तः — व्यापकमित्यर्थः ŚrutaPra. iA. 109. 10 (*on* i. 1. 1)

अनात्मत्वसंकीर्तन (anātmatva-saṅkīrtana) *n.* statement of being what is different from the self न हि उपक्रमे आत्मत्वसंकीर्तनम् अनात्मत्वसंकीर्तनम् वा अस्ति BrahmSūBh.(Śaṅ.) 642. 18 (*on* iii. 3. 17)

अनात्मत्वसाक्षात्करण (anātmatva-sākṣātkaraṇa) *n.* intuitive perception of being what is different from the self सिद्धायां विवेकख्यातिनिष्ठायां विवेकख्यातेरप्यनात्मत्वसाक्षात्करणात् तत्फलसिद्धेश्च तत्रापि वैराग्यं भवति YogVār. *on* 1. 2.

अनात्मत्वसाधक (anātmatva-sādhaka) *adj.* which establishes being what is different from the self अहंप्रत्ययगोचरत्वमनात्मत्वसाधकं देहस्यैवेति यदुक्तम्, तदयुक्तम् ŚrutaPra. iA. 159. 13 (*on* i. 1.1)

अनात्मत्वसामानाधिकरण्य (anātmatva-sāmānādhikaraṇya) *n.* co-referentiality with being what is different from the self घटत्वेति। अनात्मत्वसामानाधिकरण्यविशिष्टघटत्वेत्यर्थः LaCandr. 819. 36.

अनात्मत्वसिद्धि (anātmatva-siddhi) *f.* establishment of being what is different from the self आत्मनिरपेक्षत्वमप्यसिद्धम् … घटादिवदनात्मत्वसिद्धेः ŚatDū. 120. 14.

अनात्मत्वसूचन (anātmatva-sūcana) *n.* indication of being what is different from the self केवलचिति व्यभिचारोक्त्या सत्यत्वसूचनेन वैषयिकानन्दादेः केवलचिदन्यस्यानात्मत्वसूचनेनासिद्धितादवस्थ्यं सूचितम् LaCandr. 296. 5.

अनात्मत्वहेतु (anātmatva-hetu) *m.* the probans in the form of being what is different from the self न च विश्वात्यन्ताभावे व्यभिचारः, तस्याधिकरणस्वरूपत्वे अनात्मत्वहेतोरेवाभावात् AdvaiSi. 421. 13; अनात्मत्वहेतुस्तु जडत्वहेतुव्याख्यानेनैव व्याख्यातः AdvaiSi. 422.7.

अनात्मत्वादि (anātmatvādi) *adj.* the state of being what is different from the self etc. अहंप्रत्ययगोचरत्वे आत्मनोऽभ्युपगम्यमाने देहस्येव जडत्वपराक्त्वानात्मत्वादिप्रसङ्गो दुष्परिहरः BrahmSūBh.(Rā.) 26. 16 (*on* i. 1.1); अनात्मत्वादिप्रसञ्जकं कर्तृत्वं किं प्रयत्नाधारत्वम् ŚrutaPra. iA. 159. 16 (*on* i. 1.1); ŚatDū. 127. 19; अननुगतानां घटपटादीनां चलनादौ…द्रव्यत्वादौ… अनात्मत्वादौ च … आत्मनश्च सदर्थेऽनध्यासात् Nyāyāmṛ. 81A. 9; 235B. 9; अनात्मत्वादिदोषदर्शनात् तत्फलसिद्धेश्च विवेकख्यात्यां विरक्तम्…चित्तं तामपि ख्यातिं निरुणद्धि YogVār. *on* 1.2.

अनात्मत्वाननुभूतित्वप्रयोजक (anātmatvānanubhūtitva-prayojaka) *adj.* leading to non-selfness and non-consciousness यदि तु गगनकुसुमस्य(?स्या)सत्त्वमेव अनात्मत्वाननुभूतित्वप्रयोजकमास्थीयेत आस्थीयतां तर्हि घटादेरप्यसंविदाश्रयत्वाज्ञानाविरोधित्वयोरेव तत्प्रयोजकत्वम् ĀtmaSi. 23.22.

अनात्मत्वापत्ति (anātmatvāpatti) *f.* undesired contingency of being what is different from the self भेदे जीवादीश्वरस्यानात्मत्वापत्तिश्च अहमनुभवेऽप्रकाशमानस्य घटादिवदनात्मत्वात् BhedaDhi. 59. 2; अकर्त्रभोक्तृपरमानन्दब्रह्मरूपतामात्मनो दर्शयन्ति। युक्तयश्च — विकारिणः परिच्छिन्नत्वेनानात्मत्वापत्तेः SiddhāBi. 33.3.

अनात्मत्वापादन (anātmatvāpādana) *n.* undesired contingency being what is different from the self नाप्यसावनुभाव्यः। अनुभवस्यैव स्वतःसिध्यतोऽप्यस्य स्वपरसंवेद्यत्वाभ्युपगमात् वेद्यत्वेऽनात्मत्वापादनम् ĀtmaSi. 23. 20.

अनात्मत्वाभिधान (anātmatvābhidhāna) *n.* statement of being what is different from the self श्रुत्यैव चात्मान्तरकथनेनानात्मत्वाभिधानात् न तथा आनन्दमयादन्योऽन्यतर आत्मोपदिष्टः PrakaVi. 107. 25.

अनात्मत्वायोग (anātmatvāyoga) *m.* impossibility of being what is different from the self न चानात्मनो ब्रह्मत्वं युक्तम्, घटादिवदचेतनत्वात् - चेतनत्वेऽप्यात्मनोऽभेदात् ब्रह्मणोऽनात्मत्वायोगात् IṣṭaSi. 175. 15.

अनात्मत्वावच्छेद (anātmatvāvaccheda) *m.* delimitation by being what is different from the self अनात्मत्वावच्छेदेनैवात्मज्ञानविरोधित्वकल्पनात् GuruCandr. i. 166.22.

अनात्मत्वाविशेष (anātmatvāviśeṣa) *m.* non-difference from being what is not that (individual) itself न गवान्तरेऽपि गोशब्दविकल्पौ प्रवर्तेयाताम् अश्वादिवदनात्मत्वाविशेषात् ĀtmaTaVi. 382. 5.

अनात्मदर्शन (anātma-darśana) *n.* perception of what is different from the self यत्तावत् स्वाभाविकं परागेवानात्मदर्शनं तदात्मदर्शनस्य प्रतिबन्धकारणम् KāṭhUBh. 150.17 (*on* 4. 2); लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् विदेत्यादिनानात्मदर्शने निन्दा ŚāstrDī. 110.8 (*on* i. 1.5); आत्मदर्शनस्य स्वतःसिद्धत्वेऽप्यनात्मदर्शनवारणाय निरोधाभ्यासः JīvanVi. 108. 19.

अनात्मदर्शित्व (anātmadarśi-tva) *n.* the state of being that which perceives what is different from the self इयं विवेकबुद्धिः … यद्यात्मनि कूटस्थत्वव्याघातोऽनात्मदर्शित्वात् NaiṣkaSi. 181. 12.

अनात्मदर्शिन् (anātmadarś-in) *adj.* **1** who perceives (the self in) what is not the self अनात्मदर्शिनो ह्यनात्मविषयः कामः TaiUBh. 222. 3 (*on* 1.11); **2** (**an-ātmadarśin**) who does not perceive the

self अनात्मदर्शिनो हि तद्व्यतिरिक्तवस्त्वन्तरेप्सोः ··· शरीररोगमनु रुज्यते, सर्वात्मदर्शिनस्तु तदसंभवः BṛĀraUBh. 633.5 (*on* iv. 4.12); अनात्मदर्शिनो मुमुक्षुत्वव्याघातात् ĀtmaTaVi. 814.13.

अनात्मदृष्टि (an-ātmadṛṣṭi) *f.* **A** non-perception of the self अनात्मदृष्टेरविवेकनिद्रामहम् ··· गतः ŚukRaU. 259.19 (3.9); **B** (anātmadṛṣṭi) **Bi** view regarding the non-self (i.e. the world) (as real) आत्मदर्शनफलमुक्त्वानात्मदृष्टौ दोषदर्शकं वाक्यमवतारयति VedāntKa. 217.18 (*on* i. 4.19); **Bii** perception of what is different from the self लोके अज्ञानातिरिक्तमनात्मदृष्टिकारणं नास्ति SiddhāTa. 58.3.

अनात्मदृष्टिसृष्टि (anātmadṛṣṭi-sṛṣṭi) *f.* creation of (illusory) perception of what is other than the self अनात्मदृष्टिसृष्टेरनवसानप्रसङ्गात् SiddhāTa. 58.16.

अनात्मद्रुह् (an-ātmadruh) *f.* absence of harm to oneself अनात्मद्रुहा प्रीत्युत्पादः सम्यक्संकल्पजः कामः BālaKrī. i. 13.11 (*on* 1.7)

अनात्मधर्म (anātma-dharma) *m.* **1** attribute of something other than the self अविद्या अनागन्तुकापि ऊपरवत् अनात्मधर्मः BṛĀraUBh. 288.16 (*on* ii. 3.6); BṛĀraUBhVā. ii. 3.124; आत्मा तु निष्क्रियो निर्गुणः ··· अनात्मधर्मानात्मन्यध्यस्याभिमन्यते कर्ता भोक्ता ···इति ŚvetāUBh. 232.16 (*on* 6.12); क आत्मा कस्त्वनात्मा च किमु लक्षणमेतयोः। आत्मन्यनात्मधर्माणामारोपः क्रियते कथम् SarvaVeSāSaṁ. 275; सन्तु काममनात्मधर्मा ममत्वादयः NaiṣkaSi. 68.5; सुखदुःखे चानात्मधर्मौ ĀtmaSi. 66.9; VivaPraSaṁ. 14.17; Nyāyāmṛ. 380B.5; कर्तृत्वं यद्यनात्मधर्मः स्यात् कथमात्मनि भासेत AdvaiSi. 607.1; **2** (an-ātmadharma) not an attribute of the self सुष्टूक्तं सामान्यादीनां त्रयाणामकार्यत्वमिति। अकारणत्वमात्मधर्मेतरकार्यापेक्षया (v.l. अनात्मधर्मापेक्षया GOS. Ed., 22.3) Kiraṇā. 31.17.

अनात्मधर्मत्व (anātmadharma-tva) *n.* **i** the state of being an attribute or property of the non-self स्वयंज्योतिरात्मा स एषः ··· अनात्मधर्मत्वप्रतिपादनद्वारेण मोक्षितः परमात्मभावमापादितः BṛĀraUBh. 642.12 (*on* iv. 4.22); अहं ब्रह्मास्मीति श्रुतेश्चानात्मधर्मत्वमयुक्तम् NaiṣkaSi. 68.7; प्रियशिरस्त्वादीनामनात्मधर्मत्वाद् ज्ञानानन्दादीनामात्मस्वरूपनिरूपणधर्मत्वाच्च तेषामेव सर्वत्रोपसंहारः VedāntDī. 174.20 (*on* iii. 3.17); प्राणादिविवेकार्थमुपक्रमे जीववर्णनं स्वप्नादेर्व्यभिचारित्वादनात्मधर्मत्वार्थं मध्ये निर्देशः VedāntKa. 194.15 (*on* i. 3.42); निर्गुणत्वादात्मनः कर्मणोऽनात्मधर्मत्वम् SāṁkhyaSūVṛ. 11.9 (*on* 1.16); न विहितनिषिद्धकर्मणापि पुरुषस्य बन्धः। कर्मणामनात्मधर्मत्वात् SāṁkhyaPraBh. 12.8 (*on* 1.16); कर्तृत्वादेरनात्मधर्मत्वम् ··· वक्ष्यामः AdvaiSi. 601.16; **ii** the state of not being the attribute or property of the self बुद्धेरनात्मधर्मत्वमनुमानात् प्रसिध्यति NaiṣkaSi. 92.2; न खलु परमार्थतः पुण्यपापद्वैतमवतिष्ठते, उभयत्राप्यनात्मधर्मत्वाविशेषत्वात् TattvPradī.(A.) 97.12 (*on* 1.77)

अनात्मधी (anātma-dhī) *f.* knowledge of what is not the self बाध्यत्वेनैव मा बुद्धेर्निष्ठिता भूदनात्मधीः BṛĀraUBhVā. i. 4.844; ध्वान्तादिवस्मरे प्रत्यक्चैतन्यात्मैकनिष्ठिते। प्रत्यर्थिनि स्थितेऽनात्मधियां स्यात् सत्यता कुतः BṛĀraUBhVā. i. 4.1456; iv. 3.1286; सौख्यं यदत्र विजितेन्द्रियशत्रुदर्पः प्राप्नोति ··· अनात्मधिया विलभ्यं किं तद्दुरन्तविषयानलतप्तचित्तः SubhāRaSaṁ. 94; सप्रत्यवायो ह्यहमित्यनात्मधीरज्ञप्रसिद्धा न तु तत्त्वदर्शिनः AdhyāRā. vii. 5.23; स्त्रीपुत्रादिद्वितीयज्ञानस्यैव दुःखहेतुत्वं द्वितीयादित्युत्या अनूदितम्, न त्वनात्मधीमात्रस्य LaCandr. 431.18.

अनात्मन् (an-ātmán) *adj.* **1** soul-less देवाश्च वा असुराश्च ··· त उभय एवानात्मान आसुर्मर्त्या ह्यासुरनात्मा हि मर्त्यः ŚatBr. II. ii 2.8; ŚatBr.(K.) I. ii. 2.6; अचाक्षुषः शब्दोऽनित्योऽनात्मा वेति PramāVāSvopVṛ. 44.33; **2** who has not mastered or conquered his mind, destitute of self-control तस्यात्मानं संत्यजतो लोका नश्यन्त्यनात्मनः MahāBhā. iii. 30.11 (BhārBhāDī. अनात्मनः अजितचित्तस्य); चलचित्तमनात्मानमिन्द्रियाणां वशानुगम्। अर्थाः समतिवर्तन्ते MahāBhā. v. 36.38 (BhārArthaPra. अवशीकृतात्मानम्); अनात्मनि श्रुतं नष्टं नष्टं श्रुतमनग्निकम् MahāBhā. v. App. I. 1(15); अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् MahāBhā. vi. 28.6 = BhagGī. 6.6 (Śaṅ., Ma. अजितात्मनः; Rā. अजितमनसः); नामहापुरुषः कश्चिन्नानात्मा ··· । महतीं धुरमादत्त MahāBhā. xii. 82.23; संज्ञाभाषान्तरज्ञाश्च स्त्रियस्तेषामनात्मसु। चारघातप्रमादार्थं प्रयोज्या बन्धुवाहनाः ArthŚā. i. 306.3 (2.27); योऽनात्मनां दुरुदयो भगवान् प्रतीतः BhāgP. iii. 15.50 (Śrīdhara अजितेन्द्रियाणाम्); अनात्मनः सर्वतोऽपि भयमस्ति गृहेष्वपि BrahmP. 167.27; **3** not having discretion, senseless, stupid मैथुने द्वादशपणः तिर्यग्योनिष्वनात्मनः ArthŚā. ii. 181.11 (4.13); भवद्भिः प्राकृतैरिवानात्मभिः AvantiKa. 50.15; अनात्मनस्तेऽहं भार्या भ्रात्रावमानिता KīcaVa. 3.14 (comm. युधिष्ठिरपक्षे ··· अनात्मनः निर्बुद्धेर्निष्प्रयत्नस्य वा); **4** not having control over oneself, not independent, KīcaVa. 3.14 (comm. हे विराट, ··· तव किंभूतस्य अनात्मनः कीचकपरतन्त्रस्य भार्यापरतन्त्रस्य वा)

अनात्मन् (án-ātman) *m.* [AltGr. II. i. App. 33] **A** the trunkless one आत्मने स्वाहानात्मने स्वाहा TaiS. VII. v. 12.2; **Bi** (body, senses, physical matter etc.) other than the soul or self अहं ममेति यो भावो देहाक्षादावनात्मनि। अध्यासोऽयम् AdhyāU. 1; विषं दृष्ट्वामृतं दृष्ट्वा विषं त्यजति बुद्धिमान्। आत्मानमपि दृष्ट्वाहमनात्मानं त्यजाम्यहम् ĀtmaBoU. 17; SvātmPra. 13; अनात्मेति प्रसङ्गो वा ह्यनात्मेति मनोऽपि वा। अनात्मेति जगद्वापि नास्ति नास्तीति निश्चिनु ··· केवलं ब्रह्ममात्रत्वं नास्त्यनात्मेति निश्चिनु TejoBiU. 5.15; प्रत्यक् चितिः। सैवात्मा ततोऽन्यदसत्यमनात्मा BahvṛU. 650.21; अविवेयमनात्मन्यात्मभावनात्।··· अनात्मन्यात्मभावेन छिन्न इव रोदिति MahāU. 4(128); आत्मेश्वरोऽनात्मनो देहादीनात्मत्वेनाभिमन्यते SarvaSāU. 1; स्वयमनात्मत्वादनात्मा AbhidhKoBh. 400.15 (*on* 7.13); रूपमनात्मा यावद्विज्ञानमनात्मा AbhidhKoBh. 464.5 (*on* 9.0); तमो नामाष्टसु प्रकृतिष्वव्यक्तबुद्ध्यहंकारपञ्चतन्मात्रसंज्ञितास्वनात्मस्वात्माभिमानः TattvSa.(12) 131.16; अहमिति ···। अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः ViṣṇuP. ii. 13.86; श्रूयतामविद्यायाः स्वरूपं कुलनन्दन। अनात्मन्यात्मबुद्धिर्या चास्वे स्वमिति या मतिः ViṣṇuP. vi. 7.11; ĀtmaSi. 32.15; अनात्मन्यात्मविज्ञानमस्वे स्वमिति मूढता MārkP. 44.25; मिथ्याज्ञानम् ··· आत्मनि तावत् नास्तीति, अनात्मनि आत्मेति NyāyBh. 8.6 (*on* i. 1.2); आत्मसामान्यं चानात्मनो ब्रुवता आत्माभ्युपगतो भवति NyāyVār. 340.16 (*on* iii. 1.1); नानात्मनापि प्रत्यक्षबाधात् SāṁkhyaPraSū. 5.62; साक्षाद्धेतुत्वं मन्वानेन 'अनात्मन्यप्यहंशब्दोऽस्ति' इति प्रदर्शितम् Bṛha. 237.7 (*on* i. 1.5); 64.1 (*on* i. 1.5); 216.8 (*on* i. 1.5); अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या YogSū. 2.5 = YogSā. 31.19(2); दृश्यते चात्मन एव सतो देहादिसंघातेऽनात्मन्यात्मत्वाभिनिवेशः BrahmSūBh.(Śaṅ.) 40.8 (*on* i. 1.5); यदि चाज्ञस्य सतो मुमुक्षोरचेतनमनात्मानमात्मेत्युपदिशेत् प्रमाणभूतं शास्त्रम् BrahmSūBh.(Śaṅ.) 43.14 (*on* i. 1.7); शास्त्रं लोकबुद्धिमनुसरत्, अन्नमयं शरीरमनात्मानमत्यन्तमूढानामात्मत्वेन प्रसिद्धमनूद्य ··· पूर्वेण पूर्वेण समानमुत्तरमुत्तरमनात्मानमात्मेति ग्राहयत् BrahmSūBh.(Śaṅ.) 53.4 (*on* i. 1.2); 45.9 (*on* i. 1.8); 56.10 (*on* i. 1.17); 61.15 (*on* i. 1.19); 148.9 (*on* i. 3.2); ममात्मा भद्रसेन इति सर्वार्थकारिण्यनात्मनि आत्मोपचारः ChāndoUBh. 351.4 (*on* vi. 2.4); सुखदुःखरागद्वेषमोहादि च कादाचित्कत्वात् नखलोमादिवदनात्मा ChāndoUBh. 514.15 (*on* viii. 8.2); बाह्याकारविशेषेष्वनात्मसु आत्मभाविता बुद्धिः TaiUBh. 238.11 (*on* 2.1); असंनिकृष्टविषये ह्यनात्मन्याशंसनम्, न तत् स्वात्मनि संभवति BṛĀraUBh. 76.9 (*on* i. 3.28); नाम रूपं कर्म चेति अनात्मैव न आत्मा BṛĀraUBh. 208.11 (*on* i. 6.1); आत्मानात्मनोः ··· मूर्तामूर्तयोरपि तथा संभवात् ··· कृशोऽहमिति देहात्मनोरध्यासानुभवात् ŚvetāUBh. 54.28 (*on* 1.0); 83.11 (*on* 1.4); 116.2 (*on* 1.12); एवमात्मानात्मनोः सदसतोः उभयोरपि दृष्टः ··· निर्णयः GītāBh.(Śaṅ.) 29.1 (*on* 2.16); अविदुषां हि फलहेत्वोः अनात्मनोः आत्मदर्शनम् GītāBh.(Śaṅ.) 365.7 (*on* 13.2); आत्मा ···अनात्मनि देहादावात्मभावमापन्नः SanatBh. 173.13 (*on* 1.0); मिथ्याज्ञानम् अनात्मन्यात्माभिमानः SanatBh. 178.16 (*on* 1.4); 180.3 (*on* 1.5); 260.16 (*on* 2.39); स्वमायया सर्वेषामनात्मस्वात्माभिमानं ददाति ViṣṇuSaBh. 104.1 (*on* 93); तेनैव स्वरूपेण अनात्मनः अस्तित्वम् UpadeSā. 102.2; 140.1; 325.40; अनात्मा विषयश्चेति प्रतिपाद्यो न कस्यचित् SarvaSiSaṁ. 12.48; 10.10; भवाननात्मनो धर्मानात्मन्यारोप्य शोचति SarvaVeSāSaṁ. 270; क आत्मा कस्त्वनात्मा च किमु लक्षणमेतयोः SarvaVeSāSaṁ. 275; 456; यत आदाविदं वृत्तमज्ञाना(?दा)नमनात्मनि। तस्मात्तत् ··· प्रजास्वद्यापि दृश्यते BṛĀraUBhVā. i. 3.239; अनात्मा नात्मरूपेण प्रत्यक्त्वात् सिद्धिमर्हति BṛĀraUBhVā. i. 4.658; न किंचित् स्यात् परिज्ञातं नानात्मातः प्रसिसित्सितः BṛĀraUBhVā. i. 4.972; अनात्मेतीह यद्भाति तदविद्याविजृम्भितम् TaiUBhāVā. 79.5(2); 146.17(2); बाढं प्राप्तं परं ब्रह्म नानात्माप्नोति येन तत् TaiUBhāVā. 153.17(2); आत्मानात्मा च···प्रत्यक्षादिप्रमाणतः। सिद्धस्तयोरनात्मा तु सर्वत्रैवात्मपूर्वकः NaiṣkaSi. 178.6; 62.8; PañcPā. 75.20 (*on* i. 1.1); कहंकर्ताप्यनात्मा IṣṭaSi. 174.13; 24.19; 28.21; 31.12; 193.4; 213.15; (अविद्या) अनात्मनो न सा युक्ता तथानात्मा विना न हि IṣṭaSi. 207.19; ParaS. 2.45; LakṣmīT. 12.21; आत्मानात्मस्थितिलौकौ बन्धमोक्षौ सहेतुकौ। आगमस्य निगद्यन्ते पदार्थास्तत्त्ववेदिभिः YaśasCam. ii. 279.9; यथा जले चन्द्रमसः कम्पादिः तत्कृतो गुणः। दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः BhāgP. iii. 7.11; सति कर्मण्यविद्यायां बन्धः कर्मण्यनात्मनः BhāgP. iv. 29.78; नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः। अनात्मस्वदृशोः BhāgP. xi. 28.10; मनइन्द्रियासुगणाननात्मनः स्वयमात्मान्तर्यामी प्रचोदयति BhāgP. xii. 6.69; अनात्मन्यात्मविज्ञानं तस्माद्दुःखं तथेतरत् KūrmaP. 455.13 (2.2) = SāṁkhyaPraBh. 26.1 (*on* 1.55); अनात्मन्यात्मबुद्धिर्या आत्मस्वमिति या मतिः AgniP. 378.15; अनात्मन्यात्मग्रहोऽ-

इमस्मीति मोहोऽहंकार इति TātpaṬ.(Vā.) 639.20 (*on* iv. 2.1); नन्वनात्मन्यर्थेऽकिंचित्करं विज्ञानं कथमर्थप्रकाशकम् TātpaṬ.(Vā.) 66?.12 (*on* iv. 2.33); अविरुद्धः प्रत्यगात्मन्यप्यनात्मनां बुद्ध्यादीनामध्यासः Bhām. 24.11 (*on* i. 1.1); 130.15 (*on* i. 1.5); अष्टस्वव्यक्तमहदहंकारपञ्चतन्मात्रेष्वनात्मस्वात्मबुद्धिः अविद्या तमः SāṁkhyaTaKau. 419.5 (*on* 48); याः खल्वनात्मनः प्रकृतिमहदहङ्का(? दहंका)-रादीनात्मेत्यभिमन्यमानस्य वैराग्ये सति तुष्टयस्ता बाह्याः—आत्मज्ञानाभावे सत्यनात्मानमधिकृत्य प्रवृत्तेः SāṁkhyaTaKau. 432.2 (*on* 50); विकारेषु … अनात्मस्वात्मख्यातिस्तौष्टिकानां वैराग्यसंपन्नानाम् TattvVai. 23.15 (*on* 1.19); तयोरात्मानात्मनोरनात्मन्यात्मज्ञानलक्षणाविद्यापादिता यैकात्मता TattvVai. 64.16 (*on* 2.6); 14.12 (*on* 1.8); अविद्या मोह(:) अनात्मन्यात्माभिमानः RājMār. 23.20; LiṅgaP. i. 9.8; अनात्मन्यात्मविज्ञानं सा ते माया जनार्दन BrahmP. 203.11; अनात्मनि शरीरादावात्मबुद्धिस्तु या भवेत्। सैव माया AdhyāRā. iii. 4.21; देहोऽप्यनात्मा पृथिवीविकारजः AdhyāRā. v. 4.19; vi. 10.37; गण्डस्योपरि महानयं स्फोटः। यदनात्मन्यपि देहप्राणादावात्ममानित्वम् ParamāSā. 31; 39; पूर्वत्र प्राणमयादिष्वनात्मस्वात्मशब्दान्वयदर्शनात् BrahmSūBh.(Rā.) 627.23 (*on* iii. 3.17) = ŚrīkarBh. 356.22 (*on* iii. 3.17); सः … कर्म कुर्वन्नपि अनात्मन्यात्माभिमानेन न लिप्यते GītāBh.(Rā.) 294.3 (*on* 5.7); अनात्मनि प्रकृतावात्मसंकल्पः संन्यस्तः GītāBh.(Rā.) 323.3 (*on* 6.2); अनात्मन्यात्माभिमानरूपमज्ञानम् GītāBh.(Rā.) 599.15 (*on* 15.3); Aparā. 1006.12 (*on* 3.152); अनृतजडदुःखानात्मद्वैतविरोधिसत्यज्ञानानन्दानन्ताद्वयलक्षणं ब्रह्मैव … युक्तम् TattvPradī.(Ci.) 399.14; आत्मैव सन्ननात्मेव … ईयते BrahmSūBh.(Ma.) 7A.2 (*on* i. 1.6); 5A.4 (*on* i. 1.6); यदनात्मा तन्न प्रत्यक् यथा घटः ŚrutaPra. iA. 147.12 (*on* i. 1.1); ii. 155.17 (*on* i. 4.22); अनात्मनश्च अनित्यत्वाव्यभिचारात् … नित्यद्रव्यत्वस्य च अनात्मनि असिद्धत्वात् TarkSaṁ.(Ā.) 74.12; पूर्वत्रानात्मनि प्राणादावात्मशब्दान्वयदर्शनात् VedāntPāSau. 309.21 (*on* iii. 3.17); VedāntKau. 310.1 (*on* iii. 3.17); आत्मज्ञानद्वारा भगवत्प्राप्तिप्रतिबन्धकः देहेन्द्रियमनोबुद्धिषु अनात्मस्वात्माध्यवसायः VedāntRaMañ. 4.10 (134.16); न ह्यनात्मानं प्रत्युपदिश्यते ŚatDū. 121.17; 148.13; भवदनभिमतोऽनात्मना वेद्यतादिः TattvMu. 3.48; NyāySiA. 193.15; आत्मानात्मनोरभेदायोग्यत्वमवसेयम् SarvaDaSaṁ. 16.153; 11.79; 15.300; पाषाणादिरनात्मा VivaPraSaṁ. 11.7; JīvanVi. 150.19; अनात्मजीवात्मनोर्विषयत्वानुपपत्तावपीश्वरस्य तदुपपत्तेः NyāySu.(Ja.) 13B.5 (*on* i. 1.1); अनात्मनि शरीरादावात्मत्वारोपे सति NyāySu.(Ja.) 18B.1 (*on* i. 1.1); आत्मानात्मनोरितरेतराध्याससमर्थनाय … प्रमाणान्तरमादर्शितम् NyāySu.(Ja.) 26B.9 (*on* i. 1.1); स्यान्नूनं वृक्षादीन् अनात्मन आत्मानधिष्ठितानाह क्षपणकः NyāySu.(Ja.) 416A.4 (*on* ii. 2.10); 56B.4 (*on* i. 1.1); 63B.4 (*on* i. 1.1); 329A.10 (*on* ii. 2.2); 400B.10 (*on* ii. 2.7); पुत्रादिशून्यपर्यन्तमखिलमनात्मैव VedāntSā.(Sa.) 20.8; अनात्मा घटः अनात्मा पटः Nyāyāmṛ. 81B.6; आत्मानात्मनोश्च तात्त्विकभेदे अनात्मा स्वावृत्तिधर्माधिकरणप्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदाधिकरणम् Nyāyāmṛ. 584B.7; श्रीशंकरोऽनात्मभ्यो विवेकेनात्मानम् … बोधयितुं दशश्लोकीं प्रणिनाय। नन्विदंकारास्पदेभ्योऽनात्मभ्यो विवेकेनाहंकारास्पदमात्मानं सर्वोऽपि लोकोऽहमस्मीति प्रत्येति SiddhāBi. 2.1; आत्मनि वानात्माध्यस्यते अनात्मनि वा आत्मा SiddhāBi. 26.2; 70.4; षोडशपदार्थतत्त्वज्ञानादनात्मनि देहादावात्मभ्रान्तिप्रभृतीनां मिथ्याज्ञानानां निवृत्तिः SarvaMaSaṁ. 26.22; तेन चात्मानात्मनोर्लोकप्रसिद्ध्यनुसारेण मुख्यगौणपुरुषार्थत्वरूपं तत्त्वमालोच्य ŚivārkaMaDī. i. 547.28 (*on* i. 4.19); आत्मन्यात्मत्वज्ञानाभावोऽनात्मन्यात्मत्वज्ञानं च आणवमलपदवाच्यत्वेन प्रसिद्ध बद्धः LalitāSaBh. 43.11 (*on* 75); 95.10 (*on* 129); सन्ति हि त्रिविधाः पशवः। तत्रानात्मन्यात्मताज्ञानस्वरूपाणवमलमात्रेण युक्तो विज्ञानकेवलः LalitāSaBh. 61.21 (*on* 94); 94.18 (*on* 129); अणुर्नामाज्ञानम् … देहादावनात्मन्यात्मज्ञानं च SetuBa. 250.17; **Bii** individual self, other than the Supreme Self हृदि ह्येष आत्मेति एतदन्यस्वभावेऽप्यात्मशब्दप्रयोगात्कथं सोऽनात्मेत्यत आह। अनात्मनीति TattvPrakā. 13B.1 (*on* i. 1.6); **Biii** other than oneself उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः स्यादनुत्तरः। एषां विपर्यये श्रेष्ठे दूरानात्मोत्तमाः पराः AmaK. 2717; **C** not (the knowledge) itself नानात्मनः संवेदनं भवति नीलवित्तौ पीतवत् Kāśi. ii. 100.2 (*on* 5(3).20); न ह्यनात्मनः संवेदनं संभवति … अनात्मनोऽसंबद्धस्यैव च ग्रहणमुपेतव्यम् NyāyRa. 325.8 (*on* 5(3).199); न ह्यनात्मनो नीलस्य पीतवद्वेद्यता संभवति ŚāstrDī. 52.18 (*on* i. 1.5); **D** what is different from the real nature (of thing) यदि विनैव बाधकप्रत्ययेनावभासितस्यान्यथात्वम्, तदात्मावभासेऽपि अनात्मैवात्मवत् स्यात् … अपि च विपर्ययज्ञानेऽप्यनात्मान एव नीलपीतादयः तथावभासनात् TātpaṬ.(U.) 259.9 (*on* 5(3).72); शुक्तिकोदाहरणेन संप्रयुक्तस्यानात्मा रजतम् … निरञ्जनस्य चैतन्यस्यास्मदर्थेऽनिदमंशस्यानात्मा तदवभास्यत्वेन युष्मदर्थलक्षणापन्नोऽहंकारोऽध्यस्तः PañcPā. 14.2 (*on* i. 1.1); अथ कोऽयमगौर्नाम। किमेकस्य गोस्वलक्षणस्यानात्मा आहोस्वित्तद्गतधर्मविरही ĀtmaTaVi. 381.3; [Inst.] *adv.* not willingly स्यादत्र नासौ कुलसत्त्वयोगात् काषायमादाय विहास्यतीति। अनात्मनादाय गृहोन्मुखस्य पुनर्विमोक्तुं क इवास्ति दोषः Saund. 6.48; [Loc.] when the word *ātman* is not used (i. e. when a verb is not used reflexively) न प्राणिन्यणिचो णिजन्तस्य।… अनात्मन्यनाध्याने (अनात्मनीति किम्? हन्त्यात्मानम्। घातयत्यात्मा। आरोहयत्यात्मानं हस्ती) ŚākaṭāVyā. i. 4.61.

अनात्मनिर्देश (anātma-nirdeśa) *m.* mention of what is not the self शुद्धात्मनि नारदेन पृष्टे अनात्मनिर्देशो न युक्त इति यदुक्तम्, तत्राह — अनात्मेति LaCandr. 734.32.

अनात्मनिश्चिति (anātma-niściti) *f.* ascertainment of what is not the self अज्ञातायां यथा शुक्तौ रजताद्यर्थनिश्चितिः। अनात्मनिश्चितिस्तद्वदज्ञातेऽनुभवात्मनि BṛĀraUBhVā. iv. 4.901.

अनात्मनिष्ठ (an-ātmaniṣṭha) *adj.* **i** not residing in oneself (i. e. not self-conscious) स्वार्थावबोधक्षम एव बोधः प्रकाशते नार्थकथान्यथा तु। परे परेभ्यो भयतस्तथापि प्रपेदिरे ज्ञानमनात्मनिष्ठम् MahāVīSt.(H.) 1.12 = SyādvāMañ. 12; न विद्यते आत्मनः स्वस्य निष्ठा निश्चयो यस्य तदनात्मनिष्ठम्। अस्वसंविदितमित्यर्थः SyādvāMañ. 12(17); **ii** (anātma-niṣṭha) residing in the non-self ज्ञानात्मनोः संबन्धोऽनात्मनिष्ठ इत्यनुमानमाश्रयासिद्धम् TattvPradī.(Ci.) 24.7; असत्त्वं सत्त्वानधिकरणानात्मनिष्ठसंसर्गाभावप्रतियोगि। अनात्मनिष्ठसंसर्गाभावप्रतियोगिधर्मत्वाद् रूपवत् NyāySu.(Ja.) 56B.3 (*on* i. 1.1); न च सत्त्वमसत्त्वानधिकरणानात्मनिष्ठात्यन्ताभावप्रतियोगि, अनात्मनिष्ठात्यन्ताभावप्रतियोगित्वादसत्त्ववदिति प्रयोगान्नात्मन्यर्थान्तरमिति वाच्यम् Nyāyāmṛ. 417A.6; AdvaiSi. 628.20; GuruCandr. iii. 125.23; LaCandr. 628.41.

अनात्मनीन (an-ātmanīna) *adj.* **i** not beneficial to oneself, detrimental to oneself विधाय विध्वंसमनात्मनीनम् … भवतश्छलेन। — कृतोपकारा इव विद्विषस्ते Kirātā. 3.16; वृत्तादनात्मनीनाद् धीः स्यादेवमनुरक्षिता। तद्रक्षणाच्च संरक्षेत् क्षत्रियः क्षितिमक्षताम् MahāP. 42.49; कोऽयं तपोवनविरुद्धमनात्मनीनं क्रूरो नृशंसमनुतिष्ठति कर्म घोरम् CaṇḍaKau. 2.17; स्ववरणे फणिभिर्निराशैर्निःश्वस्य तत्किमपि सृष्टमनात्मनीनम् NaiṣC. 11.22; अनात्मनीने पथि वर्तमानात् पुंसो हि लोका भृशमुद्विजन्ते RāghPāṇ.(Ka) 7.26; रिपोरनात्मनीनेन तेनाभूत् सोऽपि सस्मितः PāṇḍaC. 5.179; धर्मध्वंसधुरीणम् … अनात्मनीनम् … इष्टे … अजयन्नक्षौघमक्षेमभाक् SindūPra. 72; स्वनासाच्छेदेन शत्रोरमङ्गलमापादयत्यनात्मनीनो मूर्खः Jīvān. 176.2; **ii** not belonging to the self, corporeal सर्वेऽपि लोके विषयो यथार्था ज्ञानादृते नैव भवन्ति जातु। अनात्मनीयं(? °नं) परिहर्तुकामास्तदर्थिनो ज्ञानमतः श्रयन्ति SubhāRaSaṁ. 192.

अनात्मनीनवृत्ति (anātmanīna-vṛtti) *adj.* **i** whose livelihood is not beneficial to oneself अन्तर्लीनसत्त्वः … पारिपुङ्ग इवानात्मनीनवृत्तिरपि … कल्याणपरंपरामाचचक्षे YaśasCam. i. 41.1; **ii** (an-ātmanīnavṛtti) who does not admit the existence of the self, YaśasCam. i. 41.1.

अनात्मनीय (an-ātmanīya) *adj.* [w. r. for अनात्मनीन] SubhāRaSaṁ. 192.

अनात्मने (an-ātmane) (Gr.) (when the fruit does) not (accrue) to oneself (as the agent) (i. e. not in the middle voice) गमोऽनात्मने SiddhaHe. iv. 4.51 (Vṛtti गमः परस्य स्ताद्यशितः सादेरिट् स्यात् नत्वात्मनेपदे। गमिष्यति।… अनात्मने इति किम्। संगंसीष्ट)

अनात्मनेपदनिमित्त (an-ātmanepadanimitta) *n.* not the cause of the Ātmanepada-endings or of the middle voice स्नुक्रमोरनात्मनेपदनिमित्ते P. vii. 2.36; स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसंख्यानम् Vār. 1 *on* P. vii. 2.36; MahāBh. iii. 292.3 (*on* vii. 2.36); अनात्मनेपदनिमित्त इति प्रसज्यप्रतिषेधः। स्नुक्रमी यत्रात्मनेपदनिमित्ते न भवतस्तत्र प्रत्यासत्त्या ताभ्यां परस्यार्धधातुकस्येडित्यर्थः LaŚabdeŚe. ii. 516.2.

अनात्मनेपदनिमित्तत्व (anātmanepadanimitta-tva) *n.* the state of not being the cause of the Ātmanepada-endings or of the middle voice स्नुक्रमोरुदात्तत्वादिटि सिद्धे नियमार्थं वचनमनात्मनेपदनिमित्तत्वे एवेडयथा स्यात् Pradī. vi. 125.8 (*on* vii. 2.36)

अनात्मनेपदविषय (anātmanepada-viṣaya) *m.* [Loc.] not in the domain of the Ātmanepada-endings or the middle voice अनयोरुदात्तत्वादिटि सिद्धे नियमार्थं वचनम्। अनात्मनेपदविषय एवानयोर्यथा स्यात् Nyās. ii. 720.12 (*on* vii. 2.36)

अनात्मनेपदस्थ (an-ātmanepadastha) *adj.* not declined in the Ātmanepada or middle voice अनात्मनेपदस्थात्तु वृतादेरिड् न स्ये सनि। इवस्तन्यां च क्रुपेर्नैव कृतादेर्वापि सेऽसिचि KātanVṛ. *on* iii. 7.13.

अनात्मनेपदार्थ (anātmanepadārtha) *adj.* meant for the sake of other than the Ātmanepada or the middle voice अनात्मनेपदार्थ आरम्भः आत्मनेपदेषूत्तरसूत्रेणैव सिद्धत्वात् Nyās. ii. 619.23 (*on* vii. 1.4)

अनात्मनेपदित्व (anātmanepadi-tva) *n.* the state of not being conjugated in the Ātmanepada or in the middle voice क्षीयत इति प्रयोगो दृश्यते स कर्मकर्तरि द्रष्टव्यः । क्षीयतेरनात्मनेपदित्वात् KāvyālaṅSū. v. 2.5.

अनात्मपक्षपातिन् (anātmapakṣapāt-in) *adj.* falling within the category of what is other than the self यथा सांख्यानामनात्मपक्षपाति स्वतन्त्रं प्रधानम् ··· न तद्वदिहान्यदात्मनः किंचिदपि वस्तु विद्यते AitUBh. 250. 12 (*on* 1.1)

अनात्मपरज्ञ (an-ātmaparajña) *adj.* who does not know (i. e. who does not distinguish between) oneself and others रतिवियुक्तमनात्मपरज्ञ। किं स्वमिव मामपि तापितवानसि NaiṣC. 4.78.

अनात्मपरत्व (anātmapara-tva) *n.* the state of having reference to the non-self ननु पूर्वं 'अन्योऽन्तर आत्मा प्राणमय' इत्यात्मशब्दस्यानात्मपरत्वावगमात् 'अन्योऽन्तर आत्मा आनन्दमय' इत्यात्मशब्दस्यात्मपरत्वं न शक्यते वक्तुम् VedāntKau. 309. 11 (*on* iii. 3. 16)

अनात्मपरिशेष (anātma-pariśeṣa) *m.* residual part of or supplement to the non-self अनात्मात्मपरिशेषः स्यादात्मानात्मपरिशेषो वा SarvaDaSaṁ. 16.151.

अनात्मप्रकाश (an-ātmaprakāśa) *m.* not self-luminosity यः पुनर्विज्ञानमप्यनात्मप्रकाशमभिधत्ते स इत्थं प्रष्टव्यः NyāyMa. 137.4.

अनात्मप्रकाशत्व (anātmaprakāśa-tva) *n.* the state of being other than self-luminosity तच्चेज्जडं न प्रकाशेत, नाप्ययं केवलोऽनात्मप्रकाशत्वात् NyāyMa. 142. 6; जडत्वं नामानात्मप्रकाशत्वमसंविद्रूपत्वं वा पर्युदासात्मकम् PramāMā. 13.2.

अनात्मप्रकाशनरूपा (anātmaprakāśana-rūpā) *adj.* (*f.*) having the nature of illumining what is different from the self तस्मादर्थसंवित्तिरेवात्मानात्मप्रकाशनरूपा प्रकाशते NyāyMa. 134.5.

अनात्मप्रतिकूल (an-ātmapratikūla) *adj.* not adverse to oneself अनात्मप्रतिकूले तु दिवसे शुक्लपक्षके । शिवशास्त्रोक्तमार्गेण कुर्याल्लिङ्गं प्रमाणवत् ŚivaP. vii(2). 36. 2 (592B.5)

अनात्मप्रतिभास (anātma-pratibhāsa) *m.* presentation of what is not the self (as the self) अनात्मप्रतिभासनिवृत्तये परिसंख्याविधिरदृष्टार्थः स्यात् VivaPraSaṁ. 143. 13.

अनात्मप्रतियोगिक (anātmapratiyogi-ka) *adj.* having non-self as the counter-correlative जडेशभेदे जडजीवभेदे च ब्रह्म जीवो वा अनात्मप्रतियोगिकधर्मिज्ञानाबाध्यभेदवान्, पदार्थत्वात्, घटवत् Nyāyāmṛ. 584A. 3; AdvaiSi. 819.4.

अनात्मप्रत्यक्त्व (anātmapratyak-tva) *n.* the state of being the inner self of the insentient आत्मा त्वनात्मप्रत्यक्त्वाद्व्यतिरेकं न सोऽर्हति BṛĀraUBhVā. iv.4. 157.

अनात्मप्रत्यक्षगुणत्व (anātmapratyakṣaguṇa-tva) *n.* the state of being the perceptible quality of what is other than the self तस्माद्वर्णो न नित्योऽनित्यो वा ··· अनात्मप्रत्यक्षगुणत्वात् TattvCin. iv(1). 461. 1.

अनात्मप्रत्यय (anātma-pratyaya) *m.* cognition of the non-self मौनं नाम अनात्मप्रत्ययतिरस्करणस्य पर्यवसानं फलम् BṛĀraUBh. 421. 3 (*on* iii. 5. 1); अनात्मप्रत्ययोत्पत्तिरहंप्रत्ययपूर्विका BṛĀraUBhVā. i. 4. 917; iv. 3. 210; आत्मप्रत्ययमैकात्म्यं द्वितीयस्त्वात्मनो भवेत् । अनात्मप्रत्ययोऽतोऽहं स्वत एकोऽस्मि केवलः BṛĀraVBhVā ii. 3.14; iv. 3. 78; iv. 4. 844.

अनात्मप्रधानत्व (anātma-pradhānatva) *n.* predominance of what is other than the self आत्मानात्मप्रधानत्वाद्ब्रह्मरूपेण नेक्ष्यते BṛĀraUBhVā. iv. 4. 1275.

अनात्मप्रपञ्च (anātma-prapañca) *m.* the world which is non-self नन्वस्तु जीवब्रह्मभेदो वास्तवः । अनात्मप्रपञ्चोऽस्तु भ्रान्तिकल्पितो ब्रह्मणीत्याह NyāySu.(Ja.) 206A. 10 (*on* i 4. 6); 389B. 7 (*on* ii. 2. 7)

अनात्मप्रसारण (anātma-prasāraṇa) *n.* [w. r. for **अनास्यप्रसारण**] KātanVṛ. *on* iii. 2. 42.

अनात्मप्रिय (anātma-priya) *adj.* non-self which is dear कस्मात्पुनः आत्मानात्मप्रिययोः अन्यतरप्रियहानेन इतरप्रियोपादानप्राप्तौ, आत्मप्रियोपादानेनैवेतरहानं क्रियते, न विपर्ययः BṛĀraUBh. 118. 9 (*on* i.4. 8)

अनात्मफल (anātma-phala) *n.* result other than the self यद्वचनात्मफलं तस्मै कर्म सर्वं विधीयते TaiUBhāVā. 7.9(1)

अनात्मफलद (anātmaphala-da) *adj.* yielding a result other than the self कर्तुः कर्माणि कार्यार्थमनात्मफलदानि TaiUBhāVā. 43. 15(2)

अनात्मबन्ध (anātma-bandha) *m.* bondage in the form of the non-self अज्ञानमूलोऽयमनात्मबन्धो नैसर्गिकोऽनादिरनन्त ईरितः ViveCū. 148.

अनात्मबन्धन (anātma-bandhana) *m.* bondage in the form of the non-self आत्मानात्मविवेकं ते वक्ष्यामि शृणु सादरम् । यस्य श्रवणमात्रेण मुच्यतेऽनात्मबन्धनात् SarvaVeSāSaṁ. 294.

अनात्मबलवेदिन् (an-ātmabalavedin) *adj.* ignorant of the spiritual strength पुनरुत्सहते चेतः स्वाहंकारस्य संग्रहे । विज्ञानं क्रियाक्रान्तमनात्मबलवेदिनम् SkandP. i(3). 1. 64.

अनात्मबुद्धि (anātma-buddhi) *f.* 1 notion of no soul, notion of the absence of self तेन तथैनात्मत्वमप्येष्टव्यमनात्मबुद्धिसिद्ध्यर्थम् AbhidhKoBh. 79. 21 (*on* 2. 46); 2 notion of (something being) not one's own अनागतं कार्यमुपस्थितं च येऽनात्मबुद्ध्या प्रविचारयन्ति । स्वकार्यसिद्धिं ह्यनवाप्य मूढास्ते संश्रितैस्तैः सह यान्ति नाशम् VarāṅgaC. 12. 19; 3 notion of non-self (as the self) आत्मधीमात्रगम्यार्थाच्चतदन्योऽवभासते । तद्दर्शननिषेधार्थं ब्रह्मेत्याह परा श्रुतिः ।··· अनात्मबुद्धिविषयं यतो यत्नान्निषेधति BṛĀraUBhVā. ii. 4. 241; न च ज्ञप्तिमात्रप्रतिभासः कस्यचिच्छरीरेऽस्ति येन तन्मात्रात्मवादिनोऽप्यनात्मबुद्धिरुपपद्येत ĀtmaSi. 32. 17; अनात्मबुद्धिर्देहेऽस्मिन्नात्मबुद्धिश्च वस्तुषु । एवमात्रयुक्तस्य IśānŚiPa. ii. 67. 87; अनात्मबुद्धिशैथिल्यं फलं ध्यानाद् दिने दिने PañcDa. 9. 156.

अनात्मबोधवत् (anātmabodha-vat) *adv.* like the knowledge of what is not the self तथाप्यनुभवादेव प्रत्यक्त्वानभिज्ञता । अनात्मबोधवत्सिद्धाविद्यातः प्रत्यगात्मनि BṛĀraUBhVā. iv. 4. 655.

अनात्मभाव (anātma-bhāva) *m.* consideration as the non-self आत्मन्यनात्मभावेन व्यवहारविवर्जितम् । यत्तदस्तेयमित्युक्तमात्मविद्भिर्महामते JābālaDaU. 1. 12; न च भवद्भिर्मेऽप्यस्माकं परस्वबुद्धिर्नापि भवच्छरीरेऽप्यनात्मभावः NalaCam. 7. 3(7); *adj.* (an-ātmabhāva) not having the status of the self (or reality) तया अविद्यया ये प्रत्युत्थापिताः अनात्मभावा लोकाः, ते असत्माः स्थावरान्ताः BṛĀraUBh. 566. 16 (*on* iv. 3. 20)

अनात्मभाविनी (an-ātmabhāvini) *adj.* (*f.*) not belonging to oneself देव, प्रसादनादनात्मभाविन्योऽपि विभूतयः पतिंवरा इव स्वात्पतितस्यापि जनस्य भवन्ति YaśasCam. i. 432. 7 (comm. आत्मनः अभविष्यन्त्योऽपि)

अनात्मभूत (an-ātmabhūta) *adj.* [*f.* -ā] 1 which is not the self, which is different from the self यथैव चाभ्यासवशादनात्मभूतेषु संस्कारेषु संस्कृतलक्षणानभिज्ञा आत्मस्नेहं निवेश्य तद्धेतोर्दुःखान्युद्वहन्ति AbhidhKoBh. 182.11 (*on* 3. 94); न अनाप्तकामं ब्रह्म ।··· यथा अन्येषामनात्मभूता धर्मादिनिमित्तापेक्षाः कामाः न ··· तथा ब्रह्मणः TaiUBh. 257. 7 (*on* 2. 6); यस्य हि अनात्मभूतं फलं देशकालनिमित्तान्तरितम्, तत्रानात्मविषये सफलः प्रयत्नो विघ्नाचरणाय देवानाम् BṛĀraUBh. 137. 2 (*on* i. 4. 10); भ्राम्यतेऽनात्मभूतदेहादिमात्मानं मन्यमानः सुरनरतिर्यगादिभेदभिन्ननानायोनिषु ŚvetāUBh. 86.16 (*on* 1. 6); यः अनादाता अनात्मभूतदेहेन्द्रियतद्धर्मानात्मत्वेन नोपादत्ते SanatBh. 229. 3 (*on* 1. 34); इह अनात्मभूतानामाभासतो भावानामात्मत्वेन दर्शनं विधीयते स्वाराज्यफलाय ManuBh. ii. 480. 27 (*on* 12. 94); पुरुषधर्मत्वेनेवादर्शनमवभासते YogBh. 95. 1 (*on* 2. 23); अनात्मभूतमात्मनि संबध्यमानं भूतसूक्ष्मतद्वासनादिकं पञ्चाग्निविद्यायां ज्ञातव्यतयोदितम् ··· मुमुक्षुभिर्ज्ञातव्यम् GītāBh. (Rā.) 410. 1 (*on* 8. 3): श्लोकार्धमनात्मभूतविजातीयभेदनिषेधमुपसंहरतीत्याह ŚrutaPra. iB.41. 24 (*on* i.1. 1); 2 which is different from itself, which is not identical भ्रान्तस्यापि अभ्रान्तवद्रजतमेवापरोक्षमनात्मभूतं चालम्बनम् TātpaṬ.(U.) 220.19 (*on* 7. 109); कार्याकारोऽपि कारणस्यात्मभूत एव अनात्मभूतस्यानारम्भ्यत्वात् BrahmSūBh.(Śaṅ.) 323. 12 (*on* ii. 1. 18); यस्तावत्प्रतिपत्ता परायतनस्वामिनम् ··· प्रत्येति प्रयत्नवत्तया, नासौ तं ग्राह्यैकरसतया किन्तु ग्राह्यकोटिनिविष्टमनात्मभूतमेव PrakaPañ. 345. 4; कथमनात्मभूतमसंबद्धं संवेद्यते Kāśi ii. 121. 9 (*on* 5(3). 64); न च रजतमनात्मभूते शुक्तिनि प्रतीयते Bhām. 131. 18 (*on* i. 1.9): यदानात्मभूतैरपि भूतैः कृतं कर्म पुरुषं बध्नाति NyāyRa. 711.18 (*on* 5(17).88); रजतत्वजातिः ··· शुक्तिशकलस्य अनात्मभूतैवात्मतयावगम्यते ŚāstrDī. 58.7 (*on* i. 1.5); जात्यादयः ···। अनात्मभूताश्चेत् कथं सामानाधिकरण्यमश्नुवीरन् NyāyVārPari. 604. 1; नासौ तम् ··· ग्राह्यकोटिविष्टमनात्मभूतमेव परिच्छिनत्ति NyāyMa. 27. 6; अकार्यानात्मनो रसादेरकारणानात्मभूतस्यानुमानस्य लोके बहुलमुपलब्धेः TārkiRa. 82.8; ते तर्हि स्वभावास्तस्यात्मभूता अनात्मभूता वा । अनात्मभूताश्चेत्, स्वभावहानिः PramāMī. 27. 7 (*on* i. 1. 32); SyādvāMañ. 5(159); अकार्यानात्मभूतकृत्तिकोदयादिना अकारणानात्मभूतरोहिण्युदयाद्यनुमानात् NyāyPari. 107. 6.

अनात्मभ्रम (anātma-bhrama) *m.* illusion as the non-self न चात्मन्यनात्मभ्रमः क्वापि दृष्टः ViṣṇuTaNi. 15A. 6.

अनात्ममनःसंयोगज (an-ātmamanassaṁyogaja) *adj.* not produced from the contact between the mind and the self अनात्ममनःसंयोगजत्वादिच्छा स्वरूपमात्रेण नित्यापि कदाचित् सर्गेण कदाचित् संहारेण वा विशेषेणानुरज्यते NyāyMañ. i. 185. 10.

अनात्ममय (anātma-maya) *adj.* 1 of the nature of the non-self (i. e. insentient) इत आत्मा ततोऽप्यात्मा नास्त्यनात्ममयं जगत् MahāU. 6.10; II (an-ātmamaya) not of the nature of the self (i.e. ignorant) मूढोऽनात्ममयः क्वचित् VyaktiVi. 80.6.

अनात्ममात्र (anātma-mātra) *n.* I mere non-self (अ)नात्ममात्रस्य धर्म्यन्तर्भावे न साध्यव्याप्तिसिद्धिः TarkSaṁ.(Ā.) 8.11; II all others than the self, the insentient 'अतोऽन्यदार्त'मिति श्रुत्या अनात्ममात्रस्यैव विनाशित्वप्रतिपादनात् AdvaiSi. 316.3; GuruCandr. i. 166.22; अनात्ममात्रं जडतया ··· भाति GuruCandr. i. 362.2; अधिष्ठानचिद्रूपात्यन्ताभावस्यात्यन्ताभावाप्रतियोगित्वात् तत्प्रतियोगित्वमनात्ममात्रेऽस्ति GuruCandr. i. 440.19; LaCandr. 422.30; अनात्ममात्रस्य दुःखासाधनत्वेन लोकानामनुभूयमानत्वात् LaCandr. 431.10.

अनात्ममात्रदर्शिन् (anātmamātradarś-in) *adj.* who perceives only what is not the self एप एव साक्षात् सर्वज्ञः, न अनात्ममात्रदर्शी SanatBh. 270.1 (*on* 2.50)

अनात्ममात्रप्रतियोगिकत्व (anātmamātrapratiyogika-tva) *n.* the state of having mere non-self as the counter-positive आत्मत्वावच्छिन्नधर्मिताको भेदो न परमार्थसत्प्रतियोगिकः। अनात्ममात्रप्रतियोगिकत्वात् Nyāyāmṛ. 14A.6.

अनात्ममात्रवृत्तित्व (anātmamātravṛtti-tva) *n.* the state of having that which resides only in the non-self अनात्मत्वं नाहमर्थनिष्ठम् अनात्ममात्रवृत्तित्वात् Nyāyāmṛ. 385A.8; AdvaiSi. 604.2.

अनादिकालप्रारब्ध (anādikāla-prārabdha) *adj.* started since beginningless time ये मानवाः ··· नाभ्यसूयन्ति ··· । ते सर्वे बन्धहेतुभिरनादिकालप्रारब्धैः कर्मभिर्मुच्यन्ते GītāBh.(Rā.) 208.5 (*on* 3. 31)

अनादिकालम् (anādikālam) *adv.* from beginningless time अनादिकालं सविषयायाः संविदो निर्विषयता कुत आगता ŚatDū. 197. 8; सर्वेषां प्राणिनामनादिकालम्···°चतुरशीतिलक्षयोनिषु भ्रमताम्···यस्य कस्यापि प्राणिनोऽज्ञानान्धकारमग्नस्य यस्तत्त्वातत्त्वव्यक्तिं दर्शयति स एव ··· गुरुरुच्यते KumāPraPra. 65. 17.

अनादिकालमहित (anādikāla-mahita) *adj.* honoured since the beginningless time पतितोऽयमनादिकालमहितवेदवचनदूषणोच्चारात् ViṣṇuP. iv. 20.28.

अनादिकालवासना (anādikāla-vāsanā) *f.* impressions (prevailing) since the beginningless time अनादिकालवासनावशाच्च व्यावृत्तिरूपमपि सद्रूपमिव ··· अवभासते NyāyRa. 592.14 (*on* 5(13). 100)

अनादिकालविकल्पवाच् (anādikāla-vikalpavāc) *f.* words (growing out) of the discrimination (that has been functioning) since beginningless time चतुर्विधं महामते वाग्विकल्पलक्षणं भवति । यदुत लक्षणवाक् स्वप्नवाक् दौष्ठुल्यविकल्पाभिनिवेशवाक् अनादिविकल्पवाक् । — अनादिकालविकल्पवाक् पुनर्महामते अनादिकालप्रपञ्चाभिनिवेशदौष्ठुल्यस्वबीजवासनातः प्रवर्तते LaṅkāSū. 2. 140 (36. 20)

अनादिकालसंसिद्ध (anādikāla-saṁsiddha) *adj.* prevalent or existing since the beginningless time अनादिकालसंसिद्धं यद्भानं ब्रह्मणो निजम् । स आतिवाहिको देहो विराजो जगदाकृतिः YogVā. iv. 3. 11.

अनादिकालसंचित (anādikāla-sañcita) *adj.* [*f.* -ā] accumulated since time immemorial चित्तभूमौ अनादिकालसंचिताः कर्मवासना यथा यथा पाकमुपयान्ति तथा तथा गुणप्रधानभावेन स्थिताः ··· स्वकार्यमारभन्ते RājMar. 27. 12; ब्रह्मविद्यायाः प्रागनुष्ठितमभुक्तफलमनारब्धफलं पुण्यपापरूपं कर्मानादिकालसंचितमनन्तं विद्यामाहात्म्याद् विनश्यति BrahmSūBh (Rā.) 726. 10 (*on* iv. 1.19); बुद्धियोगयुक्तस्तु कर्म कुर्वाण उभे सुकृतदुष्कृते अनादिकालसंचिते अनन्ते बन्धहेतुभूते जहाति GītāBh.(Rā.) 135. 6 (*on* 2. 50); 690. 24 (*on* 18. 66)

अनादिकालसंबद्ध (anādikāla-sambaddha) *adj.* [*f.* -ā] connected with (i. e. existing since) the beginningless time अनादिकालसंबद्धाम्···। अविद्यागेहिनीं ते हि शश्वदाश्लिष्य शेरते PadmP.(Ra.) 105.200; अहो खल्विदं जगदनादिकालसंबद्धं निसर्गादिव अन्धे तमसि वर्तते MāṭhVṛ. 2.1 (*on* 1); स्वस्मिन्ननादिकालसंबद्धानां सर्वेषामेव चेतनानां निखिलसुखदुःखोपभोगापवर्गसाधनभूताया अचेतनायाः ··· °चेतनविशेषरूपच्छागस्वभावख्यापनाय तद्रूपत्वकल्पनं विरुद्धमेव BrahmSūBh.(Rā.) 357. 9 (*on* i. 4.10)

अनादिकालसंबन्धिन् (anādikāla-sambandhin) *adj.* having association with (i. e. existing since) the beginningless time विजयार्थो महाचलः ।·- योऽनादिकालसंबन्धिशुद्धिशक्तिसमन्वयात् । भव्यात्मनिर्विशेषोऽपि दीक्षायोगपराङ्मुखः MahāP. 4. 88.

अनादिकालसंमूर्छित (anādikāla-sammūrchita) *adj.* fixed from the time without beginning वासनाभिरनादिकालसंमूर्छितमिदं चित्तं विचित्रीकृतमिव सर्वतो मत्स्यजालं ग्रन्थिभिः YogBh. 71. 2 (*on* 2. 13)

अनादिकालसिद्ध (anādikāla-siddha) *adj.* established since beginningless time अनादिकालसिद्धानि प्राक्तनान्यमुना मुने । भविष्याणि च कर्माणि निरस्यन्ते सवासनम् AhirbuS. 45.6; अचेतनानां तु तदुपभोगयोग्यतासाधनत्वेनानादिकालसिद्धमेव वैचित्र्यम् SyādvāMañ. 6(165)

अनादिकालानुवृत्त (anādikālānuvṛtta) *adj.* continued since time immemorial इतरविरोधत्रयेऽनादिकालानुवृत्तसमयविरोधस्यैव प्रबलत्वाच्छ्रुतिसमन्वयसिद्धे ब्रह्मणो जगत्कारणत्वे समयविरोधं परिहर्तुं तान् ··· निराकरोति TattvPrakā. 94A. 2 (*on* ii. 2.1); न ह्यनादिकालानुवृत्तानां प्रतीतिसुन्दराणां तेषां सामान्यतो निराकरणेऽधिकारिणो निःशङ्का प्रवृत्तिर्भवति TattvPrakā. 94A. 5 (*on* ii. 2. 1)

अनादिकालाभ्यस्त (anādikālābhyasta) *adj.* repeatedly experienced from time immemorial विभक्तावयवाश्रयेणानादिकालाभ्यस्तः शोभाभिमानः सत्त्वानां प्रवर्तते Sphuṭā. i. 48. 9 (*on* 1. 19); (लावण्यद्रविणव्ययो न गणितः ·-कोऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता) वीतरागस्य वा अनादिकालाभ्यस्तरागवासनावासिततया मध्यस्थत्वेनापि तां (तन्वीं) वस्तुतस्तथा पश्यतो नेयमुक्तिः संभाव्या Loc. 216. 26 (*on* 3. 41); Kāvyānu.(He.) 314. 21.

अनादिकालिक (anādikāl-ika) *adj.* [*f.* -ā] existing since beginningless time आत्मदृष्टिरनुत्याद्या अभ्यासोऽनादिकालिकः MaYānaSū. 155. 17 (18. 103); कर्मणामनादिकालिका शक्तिः Sphuṭā. iv. 14. 13 (*on* 4.4-6); अनादिकालिकाव्यभिचारिव्यवहारप्रवृत्त्यवाप्तान्वयव्यतिरेकशुद्धानुमानं वह्न्यभाव इव निर्धूमतानुमानमप्रतिहतमेव BālaKrī. i. 241. 14 (*on* 2.117)

अनादिकाली (anādi-kālī) *f.* name of a deity (*lit.* the eternal goddess Kālī) शक्तिसंगमनामाख्यं श्रीबृहत्तन्त्रराजकम् ।···दिव्यौघरचितं तन्त्रम्···। अनादिकाल्या रचितं ताराख्यं द्वितीयकम् ŚaktiSaṁT. i. 1.15.

अनादिकालीन (anādikāl-īna) *adj.* [*f.* -ā] existing since beginningless time सा चेयं वासनानादिकालीना — इत्युक्तं शून्यवादिभिः Bṛha. 78. 5 (*on* i. 1. 5); जातिः शब्दैः प्रकाश्यते । तस्यां रूपावभासोऽयं तत्त्वेनार्थस्य वा ग्रहः । भ्रान्तिः सानादिकालीनदर्शनाभ्यासनिर्मिता PramāVār. 3.29; अनादिकालीनवासनोपप्लावितविचित्रविकल्पवतीभिर्बुद्धिभिर्विशेषाः प्रकाश्यन्ते Kāśi. i. 250. 23 (*on* 4. 115) ii. 91. 22 (*on* 5(3).1); iii. 93.15 (*on* 5(4). 167); वासनास्ताश्चानादिकालीनाः YogBh. 71.5 (*on* 2. 13); अनादिकालीनोऽयं श्रीजिनधर्मः KumāPraPra. 51. 1.

अनादिकालोत्पन्न (anādikālotpanna) *adj.* produced at the time having no known beginning शरीरमनादिकालोत्पन्नं त्रयोदशविधेन करणेन संयुक्तम् MāṭhVṛ. 69. 23 (*on* 52)

अनादिकालोपचित (anādikālopacita) *adj.* [*f.* -ā] accumulated since time immemorial अनादिकालोपचितात्मकत्वाद् बलीयसः क्लेशगणस्य चैव । ·- छेत्तुं न शक्याः सहसा हि दोषाः Saund. 16. 71; परमपुरुषमाराध्य तच्छिद्य-

शनेन ये शरीरयात्रां कुर्वते ते त्वनादिकालोपचितकिल्बिषैः ··· विमुच्यन्ते GītāBh.(Rā.) 185.3 (*on* 3.13); भेदवासनानिरसनद्वारेण ज्ञानोत्पत्तिमभ्युपगच्छतां कदाचिदपि ज्ञानोत्पत्तिर्न सेत्स्यति । भेदवासनाया अनादिकालोपचितत्वेनापरिमितत्वात् तद्विरोधिभावनायाश्चाल्पत्वादनया तन्निरसनानुपपत्तेः BrahmSūBh.(Rā.) 8.10 (*on* i. 1.1); ŚatDū. 61.1.

अनादिकुलकुण्डली (anādi-kulakuṇḍalī) *adj.* (*f.*) pertaining to the eternal *kulakuṇḍalī* power शरीरस्य न संस्कारो जायते न च कर्मणः । आत्मनः कारयेद् दीक्षामनादिकुलकुण्डलीम् KulārT. 14.81.

अनादिकुसमय (anādi-kusamaya) *m.* wrong theory (held) from time immemorial न चैक्याप्रसक्तेरतत्त्वमसीति निषेधायोगः।···अनादिकुसमयेन ··· स्वातन्त्र्यरूपेश्वरलक्षणस्य सर्वैरपि आत्मन्यभिमन्यमानत्वेन प्रत्यक्षेण वा प्रसक्तस्यैक्यनिषेधोपपत्तेः NyāyāmṚ. 599B.5; AdvaiSi. 839.1.

अनादिक्रम (anādi-krama) *m.* sequential order (handed down) since time immemorial अनादिक्रमसंसिद्धमातृकायन्तयोजनात् । तादात्म्यसिद्धिं तां विद्धि सर्वमन्त्रार्थविग्रहाम् TantrRā. 1.85.

अनादिगमन (anādi-gamana) *adj.* possessing eternal knowledge अनादिगमनस्य ··· शरणं प्रपद्यामि MahāP. 40.30.

अनादिगवादिशब्द (anādi-gavādiśabda) *m.* words *go* etc. which are eternal यदि गाव्यादीनां गवादिवत् प्रमादतः सुपरिरक्षितः प्रयोगस्तथैव तेभ्योऽर्थप्रतिपत्तिपूर्वको व्यवहारस्तदानादिगवादिशब्दसमानविषया एव गाव्यादय इति तदा कस्य किं ब्रूमः NyāyMañ. i. 386.23.

अनादिगाव्यादिशब्दवाचिन् (anādigāvyādiśabdavāc-in) *adj.* who maintains that words *gāvī* etc. are eternal संशयदशां तावदानीतोऽयमनादिगाव्यादिशब्दवाची महापुरुषः संबोध्यते भो महात्मन् NyāyMañ. i. 387.14.

अनादिगुणविस्तर (anādiguṇa-vistara) *m.* detailed treatment of the beginningless qualities सुस्थिरत्वं कृतप्रासिरनादिगुणविस्तरः । साधनोत्तमता —। सिद्धान्तनिर्णया क्षेत्ता युक्तयः AnuVyā. 48B.9 (*on* 3.3)

अनादिगुरु (anādi-guru) *m.* ancient preceptor किमिति वर्ण्यतामयमाश्चर्यचर्यो भगवान् ।··· अनादिगुरुः स ईश्वर इति व्याख्यन्ति केचित् Jīvān. 450.4 (comm. चराचराणां पुराणगुरुः)

अनादिगुरुत्व (anādiguru-tva) *n.* the state of being an ancient preceptor भृगोः ···। अनादिगुरुत्वम् ··· सिद्धम् ŚaṅkaVi.(Ā.) 211.3.

अनादिगृहस्थ (anādi-gṛhastha) *m.* ancient householder नमोऽनन्ताय शान्ताय रामायामिततेजसे ।··· अनादिगृहस्थाय नमो नमः AdhyāRā. vi. 3.19.

अनादिगोचर (an-ādigocara) *adj.* not having reference to the beginning अनादिगोचरम् ···। विषयं वनमप्यनेकशः स सुखं दुःखमिवालगान्नृपः RāghPāṇ.(Dha.) 4.50 (comm. न आदेर्गोचरो विषयो यस्य तत्)

अनादिगोत्रपद्धति (anādi-gotrapaddhati) *f.* family-lineage (starting) from ancient (*lit.* beginningless) time अविच्छेदो न नियतः कस्यचिद् गोत्रभाविनः । सूतमागधचण्डालाः कथं संभविनोऽन्यथा । ज्ञायन्त एव ते तज्जैरिति चेन्नियमो न हि । अनादिगोत्रपद्धत्यामस्यां न स्खलनं स्त्रिया(? याः) PramāVāBh. 11.29.

अनादिगौणेक्षण (anādi-gauṇekṣaṇa) *n.* visualisation in the secondary sense by the beginningless (*prakṛti*) अनादिगौणेक्षणप्रवाहपातेऽपि जगत्कारणे मुख्यमीक्षणमिति युज्यते VedāntKa. 110.7 (*on* i. 1.12)

अनादिग्रन्थ (anādi-grantha) *m.* eternal composition माशकबौधायनापस्तम्बादिशब्दा ह्यादिमदेकद्व्युपदेशिन इति न तेभ्यः प्रकृतिभूतेभ्योऽनादिग्रन्थविषयसमाख्याव्युत्पादनसंभवः TantrVā. 175.10 (*on* i. 3.10)

अनादिघटादि (anādi-ghaṭādi) *adj.* eternal jar and the like अनादिघटत्वादिरूपपक्षवाविद्यासंबद्धानाम् — मूलाविद्यारूपत्वेनानादिघटादीनामभिव्यक्तिः सांख्यादिसंमता GuruCandr. i. 92.10.

अनादिघोरसंसार (anādighora-saṃsāra) *m.* beginningless and dreadful transmigration अनादिघोरसंसारध्वान्तैकध्वंसकारिणे । नमः श्रीनाथवैद्याय KulārT. 8.33.

अनादिचक्रभ्रम (anādi-cakrabhrama) *m.* I beginningless (i.e. continuous) rotation of wheels प्राप्तव्योमासङ्गमोर्घ रथानां सन्त्येष्टास्तेऽनादिचक्रभ्रमेण । मुक्ताशं संसारपारं सुखं तं भव्यं सन्मार्गा इव स्मानयन्ति RāghPāṇ.(Dha.) 14.32; II beginningless (i.e. continuous) rotation like that of a wheel, RāghPāṇ.(Dha.) 14.32.

अनादिचित्रप्रवाह (anādicitra-pravāha) *adj.* having beginningless (i.e. continuous) and varied course कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे तत्तत्काले विपक्तिर्भवति हि विविधा TattvMu. 2.25.

अनादिचैतन्य (anādi-caitanya) *n.* eternal consciousness व्यक्तिः पूर्वं जातिरिव विषयात् पूर्वमज्ञानमस्तीति निरस्तमिति — चेन्न, अनाद्यज्ञानविषये अनादिचैतन्ये तत्तदागन्तुकपदार्थावच्छेदाभ्युपगमात् AdvaiSi. 488.12; रूप्योपादानाज्ञानमप्यनादिचैतन्याश्रितत्वादनाद्येव AdvaiSi. 544.5.

अनादिज (anādi-ja) *adj.* arisen since time immemorial गुणानां च समवायादनादिजात् । सुखिनो दुःखिनश्चैव प्राणिनः SkandP. i(2). 46.72.

अनादिजन्मन् (anādi-janman) *n.* transmigratory existence having no known beginning मुनिराहावगच्छामि ···। अनादिजन्मकान्तारे भ्रमन्तावागतौ कुतः PadmP.(Ra.) 109.53.

अनादिजन्ममरणप्रवाह (anādi-janmamaraṇapravāha) *m.* beginningless course of births and deaths यावानस्य कर्मसमूहस्य सर्वोऽपि कदाचिन्नसमाल्हेन भोक्तुं न शक्यते । अनादिजन्ममरणप्रवाहे केषांचित् कर्मणां ततः प्रागेव भुक्तत्वात् ŚivārkaMaDī. ii. 204.15 (*on* iii. 1.8)

अनादिजाति (anādi-jāti) *f.* beginningless generic quality षडस्माकमनादय इत्यादिसिद्धान्तादनादिजातेरनित्यान्यत्वासंभवात् LaCandr. 202.16.

अनादिजीवभाव (anādi-jīvabhāva) *m.* beginningless embodiedness of the soul परमात्मनोऽभिन्नोऽप्ययं विज्ञानात्मा ··· अनादिजीवभावमापन्नः प्रादेशिकः सन् न देहान्तराणि ··· युगपदावेष्टुमर्हति Bhām. 760.10 (*on* iv. 4.15)

अनादिजीवस्वभाव (anādi-jīvasvabhāva) *m.* beginningless soul-nature (ईश्वरः) अनादिजीवस्वभावानुसारेण हि कर्म कारयति GoviBh. 111.14 (*on* iii. 1.35)

अनादिजीवादृष्ट (anādi-jīvādṛṣṭa) *n.* beginningless unseen merit and demerit belonging to the individual soul इदमेव गुणत्रयाश्रयभूतं द्रव्यम् ··· अनादिजीवादृष्टानुसारिण्या श्रीपुरुषोत्तमेच्छया विक्षिप्तं सद् गुणवैषम्यं भजते VedāntRaMañ. 1.3 (24.20)

अनादिज्ञानगोचरत्व (anādijñānagocara-tva) *n.* the state of being what is within the perview of beginningless knowledge अनादिद्व्यणुकादिकार्यप्रवाहस्य पक्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विना नोपादानगोचरज्ञानजन्यत्वमनादिकार्यप्रवाहस्यानुमितिरालम्बते TattvCin. ii(2). 80.14.

अनादित् (an-ādit) *adj.* (verbal root) not having the vowel ā as the indicatory marker फलेर्विशरणे फुल्लं फलितं फलति त्रयम् । आदितोऽनादितस्त्वन्ये रूपे निष्पत्तिवाचिनः DaivaVyā. 159.

अनादित (a-nādita) *adj.* not resounding तत्सरः समतिक्रम्य — अनादिमत् (v. l. अनादितम्) Rāmā. iv. 42.35.

अनादितत्तदविद्या (anādi-tattadavidyā) *f.* every or each nescience having no beginning न च ··· मूलाविद्यायां घटत्वादिरूपावस्थाविद्यासंबन्धो घटाद्युत्पत्तिरिति वाच्यं, तत्र तत्तत्क्षणत्वादीनामनादितत्तदविद्यारूपतया तद्विशिष्टमूलाविद्यारूपक्षणानामप्यनादित्वात् तत्तदवच्छिन्नसंबन्धस्योत्पत्तित्वं न युक्तमिति चेत्, न GuruCandr. i. 92.1.

अनादितत्त्व (anādi-tattva) *n.* eternal reality निरुपममनादितत्त्वम् ···। नित्यानन्दैकरसं सत्यं ब्रह्माद्वितीयमेवाहम् ViveCū. 495.

अनादितत्त्वज्ञानप्रवाह (anādi-tattvajñānapravāha) *m.* beginningless continuous flow of the knowledge of reality संप्रदायेति । अनादितत्त्वज्ञानप्रवाहेत्यर्थः GuruCandr. ii. 356.12 = LaCandr. 542.22.

अनादितम (anādi-tama) *adj.* absolutely beginningless अनित्योऽनादितमः प्रागभावः SarvaDaSaṃ. 10.175.

अनादितमस् (anādi-tamas) *n.* beginningless ignorance जन्मानन्तरमेवैतदनादितमसाखिलम् । तथापि बाध्यते ज्ञानम् BṛĀraUBhVā. iv. 4.879.

अनादितस् (anādi-tas) *adv.* I due to the absence of a beginning गोत्रभेदात् ··· अनादितः । अभेदात्मैकबुद्धत्वम् MaYānaSū. 48.3 (9.77); II since beginningless time कर्माकृष्टैरनादितः SāmkhyaPraSū. 3.62; स्वभावाच्च विचरेद् कृष्णसारः सदा मृगः । धर्मदेशस्तु विज्ञेयः ···। स्वभावादनादित इत्यर्थः SmṛtiCan. i. 19.15; कर्मबन्धो न दुर्घटः । विचित्राध्यवसायस्थः स हि बध्नात्यनादितः ṢaḍdarSa.(Ra.) 171; न जीवोऽयं सर्वगतः —। न च वाच्यं स्वकर्मनिर्मितमेवास्य भोगायतनमिति···। अनादितः सर्वेषाम् ··· कर्मभेदस्यापि साधयितुमशक्यत्वात् TattvPrakā. 30A.3 (*on* i. 2.3); 53B.1 (*on* i. 3.26); आत्मा ··· न जिज्ञास्यः । अत एवानादितस्तदीयतत्त्वज्ञाने विद्यमानेऽपि ··· नासौ जिज्ञासितः कस्यचित् प्रयोजनस्येष्टे NyāySu.(Ja.) 12B.3 (*on* i. 1.1); काव्यं न तद् प्रीतिकरं वर्तमानसुखावहम् । स्वदते कथमस्थायी निर्वेदादिरनादितः SāhiSā. 5.69.

अनादिता (anādi-tā) *f.* the state of having no beginning इतो वर्षशतेष्वप्यस्यार्थस्य संबन्ध आसीदेव, ततः परेण, ततश्च परतरेणेत्यनादिता ŚābaBh. 253.3 (*on* i. 3.24); शक्यते वृद्धव्यवहारस्यानादितयानपेक्षता वक्तुम् Bṛha. 176.8 (*on* i. 1.5); देवदत्तादिशब्देऽपि प्रसक्तैवमनादिता ŚlokaVār. 5(15).120 (674.7); 5(15).122 (674.11); वेदः पुनः सविशेषः प्रत्यक्षगम्यस्तत्र घटादिवदेव पुरुषान्तरस्थमुपलभ्य स्मरन्ति तैरपि स्मृतमुपलभ्यान्येऽपि स्मरन्तोऽन्येभ्यस्तथैव समर्पय-

न्तीत्यनादिता TantrVā. 72.12 (*on* i. 3.1); 171.18 (*on* i. 3.10); 174.20 (*on* i. 3.10); यथैवास्य परैरुक्तस्तथैवेनं विवक्षति । इत्येपानियतिस्तत्र संबन्धवदनादिता TattvSam. 2678; सर्वप्रपञ्चनिर्मात्री । संसारस्यानादितया ··· सर्वदाशब्दवाच्यत्वं प्रपञ्चस्य LalitāTriBh. 332.17 (*on* 45); वेदोऽनादितया ···। भवति परमं प्रमाणम् SvātmNi. 44; कथं च चित्तेन जनिमता संबन्धोऽनादिः । नियमप्रागभावस्य तु हेत्वनपेक्षत्वादनादिता युक्ता IṣṭaSi. 361.6; नो खल्वनादितैव वृद्धव्यवहारपरंपराया उपपत्तिमती PrakaPañ. 302.10; अनादिरयं वासनाज्ञानयोः कार्यकारणभावः ···। अयं चानादितयेतरेतराश्रयपरिहारः अनादौ संसार इत्यत्र सूत्रितोऽत्र विवृत इत्यनुसंधातव्यम् Kāśi. ii. 98.27 (*on* 5(3).17); iii. 75.26 (*on* 5(4).123½); तत्त्वपक्षेऽप्यन्योऽन्याश्रयता बीजाङ्कुरवदिति चेत्, न, व्यक्तिभेदादनादितया च बीजाङ्कुरयोर्नान्योऽन्याश्रयम् NayaVi. 178.5 (*on* i. 1.5); संकेतयितृवेदकर्तृसंप्रतिपत्तिर्वा एकतैव वा वाच्येति ·· शाब्दस्यैव पुनः प्रश्नः । उत्तरं तु वृद्धव्यवहारानादितावलात् संकेतकल्पनाहानात् NayaVi. 185.9 (*on* i. 1.5); नैसर्गिक इति । स्वाभाविकोऽनादिरयं व्यवहारः । व्यवहारानादितया तत्कारणस्याध्यासस्यानादितोक्ता Bhām. 9.5 (*on* i. 1.0); 115.16 (*on* i. 1.4); 130.19 (*on* i. 1.5); पूर्वतमसाधर्म्येण पूर्वतरस्य एवं तत्पूर्वसाधर्म्येण पूर्वतनस्येत्यनादितैव वात्र परिहारः TātpaṬ (Vā.) 12.17 (*on* i. 1.1); 209.25 (*on* i. 1.9); नन्वविषयाप्यशक्यमेव विशेषग्रहणाधीनं भेदग्रहणं तदधीनं च विशेषग्रहणं कथमविषयापि निर्णीयेत, न चानादितया बीजाङ्कुरवत् परिहा(रेणापि विशेषो ग्रहीतुं शक्यत इति)रसंभवः NyāyRa. 171.11 (*on* 4.117); न हि कर्तुः कार्यत्वे प्रमाणमस्ति । प्रत्युत 'वीतरागजन्मादर्शना'दिति न्यायादनादितैव सिद्ध्यति NyāyKuA. i. 53.10; ii(2). 51.7; अपेक्षितोपायतां पाक्षिकीमभ्युपरीकृत्य प्रवृत्तिः । न च तत्संशयस्तस्यामनुपलब्धायामन्यत्रापि स्यादतः पुनरुपलब्धिराघातेत्यतोऽनादितामादायैव परिहृतम् NyāyVārPari. 122.6; 83.3; 765.2; प्रकृतेरप्यनादिता श्रुतिभिः प्रतिपादिता VedāSam. 111.13; लोकदृष्टानुसारित्वं जीवसाम्यमनादिता ।·· युक्तयः पूर्वपक्षगाः AnuVyā. 34A.5 (*on* 2.3); येषाम् ···। योग्यापि नेष्यते सृष्टिः ··· तेषामेव ह्यनादिता NyāyKu. 11.15; 177.16; अनादिता च पाकस्य मानभावादपाकृता TarkSam.(Ā.) 40.9; अनादितैव च नित्यता TattvCin. ii(2). 80.16; iv(1). 367.7; न च नैयायिकादयो मिथ्याज्ञानस्यानादिताम्··· अङ्गीकुर्वते NyāySu.(Ja.) 20A.6 (*on* i. 1.1); 84 A.13 (*on* i. 1.4); अनादितया समस्य ब्रह्मणोऽनुत्पत्तिरयुक्ता TattvPrakā. 110A.1 (*on* ii. 3.9); वर्णानां नित्यत्वात् अर्थस्य च प्रवाहरूपेण नित्यत्वात् तत्संबन्धस्यानादितया अपौरुषेयत्वम् TantrRaha. 24.19; संसारस्यानादितया ··· अनादिभावस्य नाशासंभवान्नित्यत्वं सिध्यति SiddhāMu. 94.20 (*on* 48); SāṁkhyaPraBh. 37.13 (*on* 1.69); सामग्र्यलाभे परमनादितेत्यविवादः BhāṭṭDī. i. 250.11 (*on* iii. 3.4); अनादिताकारणमन्तरेण निवेदितास्याः प्रकृतेः स्वरूपात् Vidvanmo. 6.3.

अनादितात्पर्य (anādi–tātparya) *n.* intention (established regarding the conventional meaning of a word) since time immemorial वराहशब्दस्य ··· शूकरत्वेऽनादिवेदसंबन्धात् प्रयोगोऽनादिसिद्ध एव शक्तिमात्रं कल्प्यत इति लाघवमित्यनादितात्पर्यात् शूकरे शक्तिरेव TattvCin. iv(2). 531.3; अनादितात्पर्यस्यैव स्वारसिकप्रयोगमूलत्वादेकवचनाद्यन्तपदस्यैव एकत्वादावनादितात्पर्योपगमेनातिप्रसङ्गविरहात् VyutpaVā. 96.2; 85.3; 116.15.

अनादितात्पर्यभ्रमवत् (anāditātparyabhrama–va(n)t) *adj.* who has erroneous knowledge that a word is intended to denote a particular meaning since time immemorial (गमिधातोः) विभागाद्यर्थे पूर्वपूर्वेषामनादितात्पर्यभ्रमवतो वक्तुः स्वकीयतात्पर्येण ग्रामं गच्छतीत्यादिप्रयोगः VyutpaVā. 116.8.

अनादितात्पर्यवत् (anāditātparya–va(n)t) *adj.* possessing the intention (regarding the meaning of a word) since time immemorial वाक्यार्थबुद्ध्यनुदयप्रसङ्गात् अनादितात्पर्यवान् भगवान् भवः सिध्यति MaṇiKa. 72.11.

अनादिताप्रतिपक्ष (anāditā–pratipakṣa) *m.* counter-view regarding beginninglessness वृद्धव्यवहारस्यानादिताप्रतिपक्षनिरासायेदमुपन्यस्तम् Bṛha. 178.1 (*on* i. 1.5)

अनादिताप्रतिपादन (anāditā–pratipādana) *n.* exposition of beginninglessness ननु क्रमव्यतिक्रमोऽनादितां प्रतिपादयितुमुक्तः, अनादिताप्रतिपादनं पुनः किमर्थम् NyāyVārPari. 429.2.

अनादिताभिधान (anāditābhidhāna) *n.* statement of beginninglessness वृद्धव्यवहारस्यानादिताभिधानोपन्यासोऽयम् Bṛha. 177.15 (*on* i. 1.5)

अनादिताभ्युपगम (anāditābhyupagama) *m.* acceptance of beginninglessness आचारात् स्मृतिः स्मृतेश्चाचार इत्यनादिताभ्युपगमे अन्धपरंपराप्रसङ्गात् NyāyKuA. i. 128.1; कर्मादीनामनादिताभ्युपगमेन समाधानमुक्तम् NyāySu.(Ja.) 311B.12 (*on* ii. 1.10)

अनादितारतम्य (anādi–tāratamya) *n.* gradation which has no beginning न च — जीवस्वरूपानन्दानामनादितारतम्यस्वभावत्वमिति वाच्यम् LaCandr. 894.27.

अनादितावाक्य (anāditā–vākya) *n.* sentence about beginninglessness तस्या अनादितावाक्यानि तु प्रवाहरूपेणैव वासनाद्यनादिवाक्यवद्व्याख्येयानि SāṁkhyaPraBh. 37.13 (*on* 1.69)

अनादिताश्रयण (anāditāśrayaṇa) *n.* resorting to beginninglessness अनादिताश्रयणे ··· मुक्तानां प्रवृत्तिरुदाहर्तव्या TattvPrakā. 97A.6 (*on* ii. 2.9)

अनादित्त्व (anādit–tva) *n.* the state of not having the vowel ऌ as an indicatory marker फलनिष्पत्तौ । अस्य चानादित्त्वादनिदित्त्वोत्त्वयोरसंभवेन फुलाभावाद् अन्त्ये इत्युक्तम् Puruṣ. 106.7 (*on* 159)

अनादित्य (an–āditya) *adj.* not having the sun (i.e. overcast) अप्रदीपा यथा रात्रिरनादित्यं यथा नभः । तथासांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि BṛSaṁ. 2.9=BhaviP. 324A.9 (ii(1).5.83)=SūktiMu. 109.93; (मेघवाहने नृपे) तस्मिन्नस्तं गते ।··· अनादित्यमिवाशेषं निरालोकमभूज्जगत् RājTa.(Ka.) 3.96; अनादित्यमिव व्योम ··· जज्ञे यस्य प्रयाणके PṛthvīVi. 5.116.

अनादित्यभक्त (an–ādityabhakta) *m.* not a devotee of the sun-god मयापि च समाख्याता कथा भानोः ···। इदमाख्यानम् ···। न ह्यनादित्यभक्ताय इदं देयं कदाचन BrahmP. 30.88.

अनादित्यमय (an–ādityamaya) *adj.* not containing the sun अनादित्यमयं लोकं निर्वषट्कारमाकुलम् । नष्टधर्मं विजानीहि SkandP. v(3). 172.10.

अनादित्रिविधौघ (anādi–trividhaugha) *adj.* having beginningless three-fold stream (of afflictions) त्वमेक एव दुःखौघध्वंसकः ··· अनादित्रिविधौघस्य राशेः स्वस्य महांहसः । ··· जन्मनः SkandP. ii(2). 15.39.

अनादित्व (anādi–tva) *n.* 1 the state of having no beginning, beginninglessness (often implying the being eternal, the state of having no known beginning, the being ancient, causelessness etc.) अनादित्वान्निर्गुणत्वात् परमात्मायमव्ययः । शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते MahāBhā. vi. 35.31 = BhagGī. 13.31 (Śaṅ. अनादेः भावः अनादित्वम् आदिः कारणं तत् यस्य नास्ति तद् अनादि); MahāBhā. xii. 199.19 (BhārBhāDī. अजन्यत्वात्); (संसारः) न कर्माविभागादिति चेन्नानादित्वात् BrahmSū. ii. 1.35; अभिव्यक्तिर्वासनानाम् । ··· तासामनादित्वं चाशिषो नित्यत्वात् YogSū. 4.10; देवयुगानीह व्यतीतानि सहस्रशः ···। न शक्य आनुपूर्व्येण तेषां वक्तुं सुविस्तरः । अनादित्वाच्च कालस्य BrahmāṇḍP. i. 35.158; iii. 2.68; पुनःपुनर्जन्ममरणे भवत इत्यनादित्वं संसारस्य दर्शयति NyāyVār. 86.6 (*on* i. 1.19); 3.19 (*on* i. 1.1); अनादित्वाच्च सर्गस्य ··· अन्योऽन्याश्रयो न दोषाय SāṁkhyaKāBh. 29.27 (*on* 52); नात्र कर्ता शक्यते कल्पयितुम्, वृद्धव्यवहारस्यानादित्वात् Bṛha. 190.1 (*on* i. 1.3); 369.3 (*on* i. 1.7); अनादित्वेऽपि सति ··· सर्वेषां परप्रत्ययात्र क्वचित् प्रामाण्यावस्थानम् TantrVā. 11.16 (*on* i. 2.7); 131.21 (*on* i. 3.7); 222.16 (*on* i. 3.22); संसारस्यानादित्वं तावदभ्युपगन्तव्यम् BrahmSūBh.(Śaṅ.) 198.7 (*on* i. 3.30); 477.11 (*on* ii. 3.42); संसारवृक्षः अश्वत्थः सनातनः अनादित्वाच्चिरप्रवृत्तः KāṭhUBh. 170.7 (*on* 6.1); अनादित्वम् अजत्वे हेतुः GītāBh.(Śaṅ.) 280.14 (*on* 10.3); भूतभाविकालभेदेन बहुवचनं कोटिशब्दस्य अनादित्वात् संसारमण्डलस्य LalitāTriBh. 276.16 (*on* 11); 281.18 (*on* 15); भ्रमेणाप्यन्यथा वास्तु जीवभावः परात्मनः । तदुपाधेरनादित्वान्नानादेर्नाश इष्यते VivеCū. 194; 200; अनादित्वादविद्याया अन्योऽन्याश्रयता न हि SarvaSiSaṁ. 17.78; न चोपचितानां कर्मणामियत्तास्ति संसारस्यानादित्वात् NaiṣkaSi. 47.4; स्वयंज्योतिष एव सतो जीवस्य ··· अनादित्वाच्च पूर्वदृष्टत्वम् PañcPā. 16.22 (*on* i. 1.1); (क्षणस्य) स्वतःसिद्धस्वभावेऽप्यनादित्वात् अन्यतस्सिद्धेर्न दोषः IṣṭaSi. 54.6; 326.8; अज्ञानस्यानादित्वात् अन्तःकरणकम्बुकद्वारं विनैव चैतन्यमाश्रयो भवति PañcPra. 56.4; उपनीय गुरुः शिष्यं वेदमध्यापयेदिति । शिष्याचार्यसंबन्धस्यानादित्वात् BrahmSūBh.(Bhā.) 3.17 (*on* i. 1.1); अनादित्वात् संसारस्य शुभाशुभसंस्कारानुविद्धा एवात्मानः NyāyMañ. i. 186.9; i. 214.10; ii. 43.23; ii. 95.13; न हि तेषां गोत्रत्वे एतल्लक्षणमस्ति आदिपुरुषः संज्ञाकारी गोत्रमिति । अनादित्वादेतद्गोत्राणाम् ManuBh. i. 290.25 (*on* 3.184); CaturCin. iii(1). 63.7; तेऽपि तत्कर्तुः स्मृत्यन्तरानुमितं शास्त्रं मूलभूतमनुमातुं शक्नुवन्तीत्येवमनादित्वात् स्मृतिपरंपराया लिङ्गभूतायाः संभवान्नानुमानविघातः PrakaPañ. 250.3; इयं संज्ञा । वेदस्यानादित्वात् महत्त्वेऽपि च न दुष्यति MṛtaSaṁ. 19.10 (*on* 3.10); अनादित्वेनाभ्युपगतस्याज्ञानस्यात्मनोऽव्यतिरिक्ततयावश्याश्रयणीयत्वात् अपरमार्थस्त विभाग इति चेत् ĀtmaSi. 24.10; अनादित्वेन जीवाविद्ययोर्बीजाङ्कुरवदनवक्लृप्तेरयोगात् Bhām. 166.6 (*on* i. 2.6); 115.14 (*on* i. 1.4); अनादित्वाच्च संयोगपरंपराया भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यत इति युक्तम् SāṁkhyaTaKau. 330.4 (*on* 21); 450.1 (*on* 52); न चोत्पत्तिरनादित्वान्नृप तस्याः कदाचन । नित्यैव सा परा देवी DevīBhāP. v. 33.54; नित्यत्वान्निर्गुणत्वाच्च अनादित्वाच्च तत्त्वतः । गणेशस्य स्वरूपं न वक्तुं केनापि शक्यते GaṇeP. i.1.12; ii. 124.29; अनादित्वादीश्वरप्रणिधानसत्त्वोपादानयोः शाश्वतिकत्वेन नान्योऽन्यसंश्रयः

TattvVai. 28.20 (*on* 1.24); 80.20 (*on* 2.17); 189.17 (*on* 4.10); 216.12 (*on* 4.33); ईश्वरः … आद्यानां स्रष्टॄणां ब्रह्मादीनामपि स गुरुः उपदेष्टा यतः स कालेन नावच्छिद्यते अनादित्वात् RājMār. 13.3; 69.13; (नाट्यवेदस्य संभवो ब्रह्मनिर्मितः) केचिदत्रानादित्वं वेदवन्नाट्यस्याचक्षाणाः उत्पत्त्यादिशब्दान् स्मरणाभिव्यञ्जनादावुपचरन्ति AbhinBhā. i. 9.22 (*on* 1.7); i. 27.18 (*on* 1.58); शब्दस्वरूपस्य … । सर्वकालवर्तित्वमेव चानादित्वम् ŚāstrDī. 48.8 (*on* i. 3.9); न च सर्वाद्यस्य कथं सिद्धिरिति वक्तव्यम्, अनादित्वात् संसारस्य NyāyRa. 273.8 (*on* 5(3).17); 646.12 (*on* 5(15).26); सापेक्षत्वादनादित्वात् … भुक्तेरस्ति हेतुरलौकिकः NyāyKuA. i. 8.2; तदनादित्वेऽप्यविभाग उपपद्यते BrahmSūBh.(Rā.) 464.2 (*on* ii. 1.35); अत्यन्तविभक्तस्वभावयोः प्रकृत्यात्मनोः संसर्गस्यानादित्वम् GītāBh. (Rā.) 582.21 (*on* 13.19); अनादित्वात् क्षेत्रज्ञानां तत्तत्कर्मप्रवाहश्चास्त्येव VedāntSā.(Rā.) 162.4 (*on* ii. 1.35); 12.3 (*on* i. 1.2); VedāntDī. 96.14 (*on* ii. 1.35); (अविद्यायाः) तस्याश्चानादित्वेऽपि मिथ्यारूपत्वादेव ब्रह्मदृश्यत्वेनैवानादित्वात् … ब्रह्मैव तद्दर्शनमूलं स्यात् VedāSam. 99.1; अकार्यत्वमनादित्वम् Kiraṇā. 30.19; 93.11; यद्यप्यनेकत्र सुराशब्दप्रयोगो दृश्यते तथापि कुत्रानादित्वमिति संदेहे — ‘ गौडी … विज्ञेया त्रिविधा सुरा ’ इति मनुवचनात् … तत्रैव मुख्यत्वं युक्तम् Mitā. 431.15 (*on* 3.253); (काश्यपग्रहणं पूजार्थम्) शास्त्रस्य पूजापारंपर्यप्रतिपादनेनानादित्वात् प्रामाण्यप्रतिपादनात् PradI. ii. 18A.23 (*on* i. 2.25); जीवभावश्चानादिरनादित्वादुपाधियोगस्य Aparā. 936.12 (*on* 3.130); 1009.6 (*on* 3.163); अनादित्वभावत्वयोस्त्वदभिमतयोरस्यानुभवस्यौदासीन्याच्च TattvPradI.(Ci.) 55.7; अनादित्वात् कर्मणश्च । न विरोधः कथंचन BrahmSūBh.(Ma.) 28A.2 (*on* ii. 1.36); अनादित्वं विनादृष्टं कथं स्यात् कारणं क्वचित् AnuVyā. 20B.5 (*on* 2.1); सर्वस्य जगतो न जन्माकाशादेरनादित्वात् VedāntKa. 49.22 (*on* i. 1.2); 91.9 (*on* i. 1.4); न हि प्रध्वंसस्यानादित्वम् NyāyKu. 166.7; कश्च प्रागभावः । अनादिः अन्तवान् इति चेत् किं तस्य अनादित्वम् TarkSam.(Ā.) 128.28; 31.8; एकयैव शाखया सर्वे प्रतिपद्यन्तामनर्थकं शाखान्तरमिति । तच्छाखान्तराणामकृत्रिमत्वात् प्रतिशाखं चाध्येतृनियमस्यानादित्वादनुपालम्भ एवेति CaturCin. iii(1). 753.6; अनादित्वाद्रागादीनां कथं प्रक्षय इति चेन्न SyādvāMañ. 17(139); वाहीकग्रामवाचिनोऽपि देवदत्तशब्दस्यानादित्वेनासांकेतिकत्वात् … काश्यादिलक्षणौ ठञ्ञिठौ न भवतः PadMañ. *on* KāśiVṛ. *on* P. i. 1.73; कर्मणां पूर्वसृष्टिस्थजीवकृतानामनादित्वात् VedāntPāSau. 175.16 (*on* ii. 1.34); किं नाम वैषम्यमाश्रित्य वेदाः प्रमाणम् … अथानादित्वसादित्वाभ्याम् ŚatDū. 93.12; न च गौणलाक्षणिकप्रयोगयोरवाच्यविषयत्वादवाच्यत्वम् । संबन्धसादृश्यमूलमात्रप्रवृत्तेरप्यनादित्वात् NyāyPari. 369.3; 386.20; (शब्दानाम्) अनादित्वं सजातीयप्रयोगपूर्वकत्वम् TattvCin. iv(2). 645.6; कर्तृत्वादीनामनादित्वम् VivaPraSam. 16.8; न च मन्तव्यं यत्रैव पर्यवसानं तदारभ्य दोष इति । अनादित्वात् कर्मपरंपरायाः TattvPrakā. 92B.4 (*on* ii. 1.36); 41A.7 (*on* i. 2.29); आकाशब्रह्मणोः सादित्वानादित्वे स्फुटं न प्रतीयेते TattvPrakā. 108B.2 (*on* ii. 3.6); 181B.10 (*on* iii. 3.55); न पुनर्यदनादित्वरहितं तदेव ज्ञाननिवर्त्यम् … अनादित्वस्य तत्रैव व्यभिचारः NyāySu.(Ja.) 20B.7 (*on* i. 1.1); 213A.11 (*on* i. 4.6); केयमविद्या नाम । अनाद्यनिर्वाच्या वा । अनादिभावरूपत्वे सति विज्ञानविलाप्या वा ।… न द्वितीयः, अनादित्वस्यासंभवित्वात् Vādā. 18.5; 22.4; VedāntKau. 175.24 (*on* ii. 1.34); यथा जीवानामनादित्वं तथा तत्कर्मणामप्यनादित्वं दृश्यते हि BrahmSūBh.(Śrī.) ii. 47.2 (*on* ii. 1.35); न च प्रलये कर्मणोऽप्यभावात् कथमिव तत्सापेक्षत्वं परमात्मनः संपादनीयमिति वाच्यम् । कर्मणामनादित्वात् VedāntRaMañ. 1.1 (14.4); 1.1 (7.6); प्रागभावस्योत्तरावधिसंभवेऽपि अनादित्वात् SarvaDaKau. 45.1; 125.13; पश्चात्त्वन्योऽन्याश्रय इति चेन्न। अनादित्वात् AṇuBh. 129.6 (*on* ii. 1.35); अनादिशब्दोऽनादित्वं प्रवृत्तिनिमित्तीकृत्य तद्विवर्तमानोऽनादिर्नारायण इति। विशेष्यवशादुक्तपुंस्कः Prasā. i. 202.15; शब्दार्थपरंपराया अनादित्वात् तत्संबन्धस्याप्यनादित्वम् TantrRaha. 24.22; 29.16; 39.20; न हि भोज्यभोक्तृरहिता भुक्तिरस्ति । यदि च ज्ञानस्यानादित्वात् तदनपेक्षा तर्ह्यनादेः प्रागभावादेः … कर्तर्यपेक्षा न स्यात् Nyāyāmṛ. 73A.5; न चानादित्वेन … अविद्याख्यदोषस्य तदनपेक्षा Nyāyāmṛ. 241B.6; 351B.9; 606A.8; अनादित्वात् संसारस्य धर्माधर्माकर्षणात् प्रधानं प्रवर्तते SāṁkhyaSūVṛ. 143.12 (*on* 3.62); प्रधानाभिमानतद्वासनयोश्च बीजाङ्कुरवदनादित्वान्न तदभिमाने नियामकान्तरापेक्षेति SāṁkhyaPraBh. 28.6 (*on* 1.57); 87.17 (*on* 2.46); कर्तृजन्यत्वे … । वीतरागजन्मादर्शनादनादित्वम् SiddhāMu. 27.3 (*on* 49); अज्ञानमेव स्वपराध्यासे कारणम् । न चात्माश्रयादिदोषप्रसङ्गः । अनादित्वेनोत्पत्त्यभावात् SiddhāBi. 38.5; 94.2; 104.7; न च — अनादित्वेन क्रियारूपत्वाभावात् अनपेक्षत्वमिति — वाच्यम् AdvaiSi. 303.3; 409.13; अतीताश्चन्द्रा अनन्तकोटय इति लभ्यम् । कालस्यानादित्वात् सर्वेषां न तेषामाकाशसमाश्रयणम् Kuval. 66(58); ननु अनाद्यावरणरूपस्य तिरोभावस्य कथं परमेश्वरकर्तृकत्वम् । उच्यते । अनादित्वेऽपि तस्य तत्कर्तृकत्वं युक्तम् ŚivārkaMaDī. i. 110.11 (*on* i. 1.2); i. 92.4 (*on* i. 1.1); उदाहृतश्रुतिः कर्मणामनादित्वं न प्रतिपादयति ŚivārkaMaDī. ii. 47.11 (*on* ii. 1.34); न चाज्ञानस्यानादित्वादुक्तावच्छेदकत्वस्याप्यनादित्वेनोक्तनिश्चयादिसत्त्वेऽपि तत् संभवतीति वाच्यम् GuruCandr. i. 19.10; i. 415.20; तथा प्रकृते ब्रह्मसत्ताया अनादित्वेन तत्कर्तृत्वबोधासंभवात् LaCandr. 310.19; सांव्यवहारिकभेदभिन्नस्य जीववदनादित्वे प्रसक्ते … नौपाधिकत्वं भेदादेः कल्पयितुं शक्यम् SiddhāTa. 11.1; चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जकान्तःकरणवृत्तिरिन्द्रियसंनिकर्षादिना जायत इति वृत्तिविशिष्टं चैतन्यमादिमदुच्यते VedāntPari. 28.1; 99.7; वेदस्य … ज्ञप्तिप्रतिबन्धस्तु प्रत्यक्षेणैव श्रुतिनिश्चयादनादित्वस्य चाप्रामाण्यशङ्कापनोदनमात्रे व्यापारादनन्तशङ्क्य एव MīmāKau. i. 5.1 (*on* i. 3.1); i. 44.25 (*on* i. 3.7); ii. 119.9 (*on* ii. 4.12); (पदपदार्थयोः) संबन्धस्याप्यनादित्वेन पौरुषेयत्वाभावात् BhāṭṭDī. i. 7.3 (*on* i. 1.4); i. 51.16 (*on* i. 3.8); ‘ यः कल्पः स कल्पपूर्वः ’ इति न्यायेन संसारस्यानादित्वात् … ईश्वरो गतकल्पीयं वेदमस्मिन् कल्पे स्मृत्वोपदिशति MīmāNyāPra. 194.6; यदि तु सृष्टिप्रलयपरंपरयानादित्वं शब्दानामनाद्यर्थसंबद्धानां वेदानां नित्यतां चाश्रित्य BhāṭṭCin. i. 40.23 (*on* i. 1.4); भक्षणाभावोऽत्र भक्षणप्रागभावः स चानादित्वादननुष्ठेयः MayūMāli. 465.3 (*on* vi. 2.5); करणशब्दप्रयोगेणानुबन्धानां सादित्वं सूचितम् ।… तेन तद्व्यतिरिक्तस्य सर्वस्यानादित्वं सूचितम् LaŚabdeŚe. i. 7.13; अनादित्वात् संसारस्य ततोऽपि पूर्वतनडित्थादिगुणाद्याश्रित्य प्रयोगादीति कश्चित् VaiyāSiMañ. 30.9; मूलाज्ञानम् … । सादिनिद्रादिवत्तत्रानादित्वे कस्य नाश्यता VedāntSiSūMañ. 1.75; **2A** the state of not being initial (in position) कुटि प्रत्ययादेरादेशानुपपत्तिरनादित्वात् Vār. 1 *on* P. iv. 1.158; श्वसस्त्युटयादेशानुपपत्तिरनादित्वात् Vār. 1 *on* P. iv. 3.15; नुमं वक्ष्यति । स च … सकारस्यानिदितामिति नकारस्य च लोपो न स्यात् । यथाक्रममनादित्वादनुपधत्वाच्च Nyās. i. 91.20 (*on* i. 1.47); **2B** (an–ādi-tva) absence of (the explanation of) initiality वृद्धसंज्ञायामजसन्निवेशादनादित्वम् Vār. 1 *on* P. i. 1.73.

अनादित्वकण्ठोक्ति (anāditva-kaṇṭhokti) *f.* actual statement of beginninglessness प्रकृतिमित्यत्रानादित्वकण्ठोक्तिः ŚrutaPra. iB. 75.23 (*on* i. 1.1)

अनादित्वकल्पना (anāditva–kalpanā) *f.* assumption of beginninglessness कर्तृसर्गविनाशानामथानादित्वकल्पना । सैवं युक्ता यथेदानीं भूतानां दृश्यते क्रमात् ŚlokaVār. 5(15). 67(657.1); अन्धपरंपरैषा अनादित्वकल्पना BrahmSūBh.(Śaṅ.) 31.15 (*on* i. 1.4); न च स्वारसिकलक्षणाग्रहस्थले तत्र तादृशान्वयबोधस्योभयवादिसिद्धत्वेऽपि निरूढलक्षणामते संबन्धितात्पर्यस्यानादित्वकल्पनागौरवम् VyutpaVā. 85.3; 85.5.

अनादित्वकारण (anāditva–kāraṇa) *n.* cause of beginninglessness यच्चार्येष्वनादित्वकारणमवध्यस्मरणं तदपि समानं म्लेच्छेष्वपि ŚāstrDī. 33.1 (*on* i. 3.5)

अनादित्वग्राहक (anāditva–grāhaka) *adj.* conveying beginninglessness मूलकारणत्वेनानादित्वग्राहकागमविरोधात् नायं प्रसङ्ग इत्याह — अनात्मन आकाश इति PrakaVi. 593.17.

अनादित्वनिरास (anāditva-nirāsa) *m.* refutation of beginninglessness भारताध्ययनानामनादित्वनिरासेन पुरस्तान्निरस्तत्वात् TattvPradI.(Ci.) 163.5.

अनादित्वनिर्धारण (anāditva–nirdhāraṇa) *n.* ascertainment of beginninglessness गौडी माध्वी … इति मनुवचनाद्गुडमधुपिष्टविकारेष्वनादित्वनिर्धारणात्तत्रैव मुख्यत्वं युक्तम् Mitā. 431.17 (*on* 3.253)

अनादित्वनिश्चय (anāditva–niścaya) *m.* decision regarding beginninglessness अनेन प्रकारेणानादित्वनिश्चयस्य गाव्यादिष्वतिप्रसक्तिं शङ्कमानोऽनतिप्रसक्तमनादित्वावगमोपायमाह MayūMāli. 48.5 (*on* i. 3.9); तस्मादभियुक्तस्मरणाभावाद् गाव्यादिषु नानादित्वनिश्चयः MayūMāli. 48.8 (*on* i. 3.9)

अनादित्वपक्ष (anāditva–pakṣa) *m.* view maintaining beginninglessness पृथिवीगतश्यामत्वादेः अनादित्वपक्षे तदुत्पादस्यैव अभावात् TarkSam.(Ā.) 62.16; नन्वनादित्वपक्षे घटे प्रथममुत्पन्नेनैव ज्ञानेन सर्वतदज्ञाननाशो भवेत् SiddhāLeSam. 138.2; डित्थादीनाम् … अनादित्वपक्षेऽनपभ्रष्टत्वादिलक्षणान्तरपक्षे वा तेषामपि साधुत्वं भाष्यादिसिद्धमेव VaiyāBhū. 163.9 (*on* 31)

अनादित्वपर (anāditva–para) *adj.* [*f.* -ā] referring to beginninglessness नैसर्गिकशब्दोऽनादित्वपरः ŚrutaPra. ii. 83.26 (*on* i. 3.39); सूक्ष्मरूपानादित्वपरा श्रुतिः TattvPrakā. 127B.2 (*on* ii. 4.5)

अनादित्वपरिभाषा (anāditva–paribhāṣā) *f.* technical convention regarding beginninglessness तस्याश्च कार्यत्वेऽनादित्वपरिभाषा परिलुप्येत Vādā. 54.7.

अनादित्वप्रतिपादन (anāditva–pratipādana) *n.* exposition of beginninglessness न कर्माविभागादिति चेन्नानादित्वात् इति क्षेत्रज्ञानां तद्गतकर्मणां चानादित्वप्रतिपादनात् BrahmSūBh.(Rā.) 418.18 (*on* ii. 1.14)

अनादित्वप्रपञ्चन (anāditva–prapañcana) *n.* detailed treatment

of beginninglessness अनादित्वप्रपञ्चनाय पृच्छति-कथं पुनरिति PrakaVi. 465. 15.

अनादित्वप्रसङ्ग (anāditva-prasaṅga) *m.* undesired contingency of beginninglessness अथादिसर्ग ईश्वरहेतुकः । तस्याप्यन्यानपेक्षत्वादीश्वरवदनादित्वप्रसङ्गः AbhidhKoBh. 102. 14 (*on* 2. 64); अपि च प्रागभावानामनादित्वेन कार्योत्पादस्याप्यनादित्वप्रसङ्गः TātpaṬ.(Vā.) 592. 22 (*on* iv. 1. 18); तथा च तत्रा(तद)वयवानामसंगमाभावेऽनादित्वप्रसङ्गे ह्यणुकत्वव्याघातः NyāyKuA. i. 124. 4; तथा सति कार्यस्याप्यनादित्वप्रसङ्गात् Upask. ll. 8 (*on* i. 1. 4)

अनादित्वभङ्ग (anāditva-bhaṅga) *m.* loss of beginninglessness न चैवं संसारस्यानादित्वभङ्गप्रसङ्गः NyāyKuA. ii(2). 57.12; स्वरूपप्रकाश एव हेतुः फलं च जिज्ञासाया इति चेन्न …। फलत्वे चानादित्वभङ्गात् ŚatDū. 51.26; सत्वत्वेऽपि सावयवं निरवयवं वा । आद्ये अनादित्वभङ्गः AdvaiSi. 574. 5.

अनादित्वमात्र (anāditva-mātra) *n.* mere beginninglessness ये प्रमाणतदाभासगुणदोषा ह्यनादयः । न तेऽनादित्वमात्रेण सर्वे गच्छन्ति तुल्यताम् TattvSaṁ. 3183; अनादित्वमात्रे बीजाङ्कुरदृष्टान्तो न तु जीवविद्याव्यक्तिभेदे VedāntKa. 222. 4 (*on* i. 4.22); आ(?अ)नादित्वमात्रं हुमादिषु स्तोभेषु गतमिति तद्वारणार्थं वाचकत्वमिति पदद्वयमप्यावश्यकम् MayūMāli. 47. 16 (*on* i. 3.9)

अनादित्वरहित (anāditva-rahita) *adj.* devoid of beginninglessness न पुनर्यदनादित्वरहितं तदेव ज्ञाननिवर्त्यमिति संकोच्यम् NyāySu.(Ja.) 20B. 5 (*on* i. 1. 1)

अनादित्वरूपसाधुत्व (anāditvarūpa-sādhutva) *n.* correctness in the form of beginninglessness (of words) अनादित्वरूपसाधुत्वमपि डित्थादीनां सादित्वपक्षे नेति तत्पक्ष एव तेषां साध्वसाधुबहिष्कारः VaiyāBhū. 163. 8 (*on* 31)

अनादित्ववचन (anāditva-vacana) *n.* statement of beginninglessness न चानादित्ववचनादेवार्थसिद्धिः सर्वार्थसिद्धिप्रसङ्गात् IṣṭaSi. 361.16.

अनादित्ववत् (anāditva-vat) *adv.* like beginninglessness आगमिसकलसंसारकारणाविद्यानिवृत्तिर्न स्वरूपेण मायायाः … मिथ्यात्वेऽप्यनादित्ववदनुच्छेदसंभवात् PrakaVi. 4. 13.

अनादित्वविशेषण (anāditva-viśeṣaṇa) *n.* attribute in the form of beginninglessness (अविद्यायाः) अनादित्वविशेषणाददोष इति चेन्न TattvPradī.(Ci.) 54.12.

अनादित्वव्याप्यता (anāditvavyāpya-tā) *f.* the state of being pervaded by beginninglessness अनादित्वसाधकेनेति ज्ञानजन्यकार्यस्य प्रागभावेऽनादित्वव्याप्यतया गृहीतेनेत्यादिः GuruCandr. ii. 361.11.

अनादित्वव्याहति (anāditva-vyāhati) *f.* destruction of beginninglessness तथा सत्यनादित्वव्याहतेः सकलशास्त्रार्थभङ्गप्रसङ्ग इति भावः TattvVai. 215. 16 (*on* 4. 33)

अनादित्वश्रवण (anāditva-śravaṇa) *n.* statement of beginninglessness श्रीसदाशिवस्यापि तत्र तत्रानादित्वश्रवणं तदुपाधेर्गुणविशेषस्यानादित्वात् VīraMi.(Bhakti.) 170.19.

अनादित्वश्रुति (anāditva-śruti) *f.* Vedic statement of beginninglessness अनादित्वश्रुतिर्गौणानादित्वापेक्षया । मुख्यासंभवात् BrahmSūBh.(Ma.) 40A. 2 (*on* ii. 4. 2); अनादित्वश्रुतिस्तु न सर्वविषयेति भवति गौणीभूते कथमप्यवृत्तेः TattvPrakā. 107B. 11 (*on* ii. 3. 3); अनादित्वश्रुतेर्युक्त्युपेतायाः प्राबल्यात्तद्विरोधेनाप्रामाण्यात् TattvPrakā. 115B.1 (*on* ii. 3. 18); 126B.11 (*on* ii. 4. 4)

अनादित्वश्रुतिविरोध (anāditvaśruti-virodha) *m.* contradiction with the Vedic statement of beginninglessness नोत्पत्तिश्रुतेरनादित्वश्रुतिविरोधः TattvPrakā. 107B. 8 (*on* ii. 3. 3); 129B.9 (*on* ii. 4.9)

अनादित्वश्रुत्यादिविरोध (anāditvaśrutyādi-virodha) *m.* contradiction with the Vedic statement etc. of beginninglessness न चानादित्वश्रुत्यादिविरोधः TattvPrakā. 115B. 3 (*on* ii. 2.18)

अनादित्वसाधक (anāditva-sādhaka) *adj.* which establishes beginninglessness अनादित्वसाधकेन ज्ञाननिवर्त्यत्वे सति भावविलक्षणत्वेन सत्प्रतिपक्षश्च, भावत्वस्योपाधित्वं च AdvaiSi. 545. 3.

अनादित्वसामान्य (anāditva-sāmānya) *n.* similarity on the basis of beginninglessness अतोऽनादित्वसामान्यं बुद्धानामभिधीयते । मीमांसकायमानैस्तैर्वेदाध्यायिनमिव । तदज्ञानविशेषत्वान्न तेषां याति तुल्यताम् TattvSaṁ. 3181.

अनादित्वसिद्धान्त (anāditva-siddhānta) *m.* established view of beginninglessness न ह्यसावनध्यस्ता…। न चाध्यस्ताप्युत्पन्ना । अनादित्वसिद्धान्तभङ्गप्रसङ्गात् ŚatDū. 174.19.

अनादित्वसिद्धि (anāditva-siddhi) *f.* establishment of beginninglessness प्रतिकल्पमधीतस्यास्य वाक्यस्यार्थवत्त्वात् सृष्टेरनादित्वसिद्धिः ŚrutaPra. ii. 273. 27 (*on* ii. 1. 35); पूर्वपूर्वाधीतप्रकारस्यानुसरणादनादित्वसिद्धेः NyāyPari. 383. 22; श्रुत्यविरोधेन ब्रह्मणोऽनादित्वसिद्धेः TattvPrakā. 110B. 7 (*on* ii. 3. 9); संसारस्यानादितया आत्मनोऽनादित्वसिद्धावनादिभावस्य नाशासंभवान्नित्यत्वं सिध्यति SiddhāMu. 24.20 (*on* 48); प्रकृते च लाघवानुगृहीतप्रत्यभिज्ञाबलेन गकारादीनामभेदसिद्धौ अनादित्वसिद्ध्या तत्सिद्धेः VīraMi.(Saṁskāra.) 894. 10.

अनादित्वस्वीकार (anāditva-svīkāra) *m.* acceptance of beginninglessness कर्मणा वैषम्यादिपरिहारो न स्यात् ।… कर्मणः क्षेत्रज्ञानां च ब्रह्मवदनादित्वस्वीकारात् GoviBh. 111. 10 (*on* ii. 1.35)

अनादित्वहेतु (anāditva-hetu) *m.* logical reason in the form of beginninglessness नित्यत्वव्याप्तस्यानादित्वहेतोरुपन्यासो न हीति न विलीयन्त इति निगमनम् TattvPrakā. 108A. 4 (*on* ii. 3. 4)

अनादित्वाङ्गीकार (anāditvāṅgīkāra) *m.* acceptance of beginninglessness न चान्योऽन्याश्रयादिदोषः । आगमसर्वज्ञपरंपराया बीजाङ्कुरवदनादित्वाङ्गीकारात् SarvaDaSaṁ. 3.151.

अनादित्वाद्यभाव (anāditvādy-abhāva) *m.* absence of beginninglessness etc. अनादित्वाद्यभावेऽपि पाणिपादपायुगुह्यवाचः कर्मार्थानीन्द्रियाणि TattvPrakā. 128B. 4 (*on* ii. 4. 7)

अनादित्वाधीन (anāditvādhīna) *adj.* dependent upon beginninglessness न चादिमदर्थविषयं सदनादित्वाधीनं वेदत्वं प्रमाणत्वं वा लभते TantrVā. 207.20 (*on* i. 3.18)

अनादित्वानभ्युपगम (anāditvānabhyupagama) *m.* non-acceptance of beginninglessness ब्रह्मव्यतिरिक्तस्यानादित्वानभ्युपगमान्नैवमिति चेत् Vādā. 18. 3

अनादित्वानुपपत्ति (anāditvānupapatti) *f.* untenability of beginninglessness तस्य च वेदेन … प्रतिपादनमपि प्रमाणान्तरविरुद्धमेव तस्यानादित्वानुपपत्तेः PrakaPañ. 439. 2.

अनादित्वापत्ति (anāditvāpatti) *f.* undesired contingency of beginninglessness न च विजातीयत्वेन तत्त्वज्ञानस्य मोक्षहेतुत्वाद्विजातीयत्वस्यावश्यं कार्यतावच्छेदकत्वेन तदाश्रयस्यानादित्वापत्तिरिति वाच्यम् LaCandr. 542.27.

अनादित्वापात (anāditvāpāta) *m.* undesired contingency of beginninglessness न चासंभावनानिवृत्त्यादिकमेवानादीति वाच्यम्, तद्ध्वंसप्रागभावस्यानिवृत्तेरप्यनादित्वापातात् GuruCandr. ii. 357.18.

अनादित्वाभाव (anāditvābhāva) *m.* absence of beginninglessness न तावदनादिभावरूपत्वे सति… सादिशुक्त्याद्यवच्छिन्नचैतन्यावारकाज्ञानेऽव्याप्तेः, तस्यानादित्वाभावात् AdvaiSi. 544. 3; अथ तत्र शब्दानुकरणत्वाङ्गीकारेण साधुता, तथापि शब्दपरत्वस्याप्यनादित्वाभावादवर्थविशेषणता तदवस्थैव MīmāKau. i. 126. 7 (*on* i. 3. 25); सादित्वावगमेन तेषामनादित्वाभावात् MayūMāli. 47.13 (*on* i. 3.9); अस्य समयस्य मध्ये कल्पितत्वेनानादित्वाभावात् Bhāsk. ii. 110.21 (*on* ii. 3. 8)

अनादित्वाभिधान (anāditvābhidhāna) *n.* statement of beginninglessness न चान्वयव्यतिरेकाभ्यां द्रव्यशक्तीरवगत्य चरकं प्रणीतवानिति शिष्टानामनादित्वाभिधानात् NyāyMañ. i. 391. 20; अस्याप्रयत्नपूर्वकत्वमात्रेणानादित्वाभिधानमिति नागमविरोधः TātpaṬ.(Vā.) 635.19 (*on* iv. 1.67); क्रमसाहस्रपरंपरायाश्च … अनादित्वाभिधानम् PrakaVi. 50. 16; कार्याध्यासस्य च प्रवाहरूपेण बीजाङ्कुरवदनादित्वाभिधानान्न कोऽपि दोषः SiddhāBi.42. 3.

अनादित्वाभिधायक (anāditvābhidhāyaka) *adj.* which declares beginninglessness न वियतोऽनया श्रुत्योत्पत्तिः साधयितुं शक्या अनादित्वाभिधायकश्रुतिविरोधात् TattvPrakā. 107B. 7 (*on* ii. 3. 3)

अनादित्वाभ्युपगम (anāditvābhyupagama) *m.* acceptance of beginninglessness वैषम्यनैर्घृण्यपरिहारश्च जीवानामनादित्वाभ्युपगमेन तत्कर्मनिमित्ततया प्रतिपादितः VedāSaṁ. 111.10; अविद्याकृतभेदस्योपाधिकृतभेदस्य चानादित्वाभ्युपगमात् VedāntSā.(Rā.) 21. 8 (*on* i. 1. 2); न च सांख्ये कार्यत्वप्रसङ्गश्चोद्यः … कल्पितप्रदेशवत्त्वेऽप्याकाशस्यानादित्वाभ्युपगमात् PrakaVi. 325. 19; बौद्धैरपि सर्वज्ञसंतानान्तरितधर्मदेशनासंतानस्य अनादित्वाभ्युपगमात् ŚatDū. 94. 8; 129. 2.

अनादित्वायोग (anāditvāyoga) *m.* absence of the possibility of beginninglessness अस्यापि विवादस्यानादित्वायोगात् NyāyPari. 479.20; तेषामेवोत्पत्तिमत्त्वेन तद्धर्मस्यानादित्वायोगात् TattvPrakā. 181B. 11 (*on* iii. 3.55); अज्ञानस्य ज्ञाननिवर्त्यस्य … अनादित्वायोगात् AdvaiSi. 544.25.

अनादित्वावगम (anāditvāvagama) *m.* knowledge of beginninglessness अनतिप्रसक्तमनादित्वावगमोपायमाह MayūMāli. 48. 5 (*on* i. 3. 9)

अनादित्वाविशेष (anāditvāviśeṣa) *m.* non-difference (i.e. same-

ness) of beginninglessness यथैव वेदस्य वक्तृदोषरहितत्वात् प्रामाण्यम् एवं लौकिकस्यापि पदस्यानादित्वाविशेषात् TantrVā. 799.5 (*on* iii. 2.25); न हि म्लेच्छप्रसिद्धिरादिमती येन विशेषोऽवगम्येत अवश्यस्मरणात्तु आर्यप्रसिद्धिवदेवानादित्वाविशेषः MīmāKau. i. 59.14 (*on* i. 3.9)

अनादित्वासिद्धि (anāditvāsiddhi) *f.* non-establishment of beginninglessness अनादित्वासिद्धेश्चोभयत्राविशेषात् KhaṇḍanKhā. 691.11; अविद्याकल्पितत्वाभ्युपगमेनानादित्वासिद्धेः ŚatDū. 94.7.

अनादित्वोक्ति (anāditvokti) *f.* statement of beginninglessness पुरुषापायानाम् ... स्वाभाविकानन्तादिवैचित्र्यहेतुत्वमिति परिहर्तुमनादित्वोक्तिः TattvPrakā. 160A.13 (*on* iii. 2.36)

अनादित्वोपगम (anāditvopagama) *m.* acceptance of beginninglessness न चाविद्याया अनादित्वोपगमाच्छुक्तिरजतवत् कल्पितत्वं न युज्यते SiddhāLeSaṁ. 305.9; न च सांप्रतिकोऽयमध्यारोपः प्रकरणनिवेशप्रयोजनेनागमविवक्षारूपस्यैवास्यानादित्वोपगमात् SiddhāSi. i. 20.23.

अनादित्वोपपत्ति (anāditvopapatti) *f.* tenability of beginninglessness नापि जीवस्य सादित्वापत्तिः उपाधिबिम्बसंबन्धानादित्वेनानादित्वोपपत्तेः AdvaiSi. 579.13.

अनादित्समान (an-āditsamāna) *adj.* not desirous of taking तव तु पित्रानेन ... लवमप्यादेयमनुत्सृजता लक्ष(र ? म)प्यनादेयमनादित्समानेन व्यवहारप्रत्यवेक्षिणा ... भुक्तम् ... भरतेनेव भारतं वर्षम् AvantiKa. 209.8.

अनादित्सु (an-āditsu) *adj.* I not desirous of admitting (the non self) अहंवृत्त्यैकसाधनः। युष्मदर्थमनादित्सुर्जैमिनिः प्रेर्यते कथम् NaiṣkaSi. 53.8; II not desirous of accepting पूर्वमेताननादित्सुः कृपणः कलितो जनैः ŚāliC. 4.56.

अनादिदंपति (anādi-dampati) *m.* (du.) the eternal couple भक्तवत्सलयोरनादिदंपत्योरुपासनया संपादनीया सिद्धिः Jīvān. 58.1.

अनादिदर्शन (anādi-darśana) *n.* doctrine (prevalent) from time immemorial स्वकृतान्यपि हट्टानि भङ्क्तुं न क्षमसे यदि। अनादिदर्शनानि त्वं कथं ध्वस्तुं समुद्यतः PrabhāC. 156.23.

अनादिदुर्वासना (anādi-durvāsanā) *f.* wrong impression since time immemorial तत्सिद्धावप्यनादिदुर्वासनादार्ढ्यादपथे प्रवर्तन्ते कर्ममीमांसका इति चेन्न ŚatDū. 54.15; निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसव्यापारः VedāntPari. 347.5.

अनादिदृश्य (anādi-dṛśya) *n.* beginningless visible object अनाद्यविद्यादौ च बाधः। तादृशप्रतियोग्यविद्योपादानकत्वोक्तौ प्रतियोग्यन्तवैयर्थ्यं अनादिदृश्ये बाधश्च GuruCandr. i. 97.2; अविद्यारूपदोषप्रयुक्तत्वं यद्यपि प्रातीतिकेऽप्यस्ति तथापि मूलाविद्याप्रयुक्तत्वं वाच्यम्, अनादिदृश्येऽपि तदव्याहतम् GuruCandr. iii. 193.8; दृश्योच्छेदस्तत्त्वज्ञानोत्पत्तिक्षणे न संभवति। अनादिदृश्यानां ज्ञानानुच्छेद्यत्वादविद्यातत्कार्ययोरेव तदुच्छेद्यत्वात् LaCandr. 5.4; 891.14.

अनादिदेव (anādi-deva) *m.* ancient god अनादिदेवाच्युत शेषशेखर प्रभो VarāP. 73.19 = PadmP. v. 29.99.

अनादिदेवक (anādideva-ka) *m.* ancient god नमाम्यहं सततमनादिमीश्वरं (v. l. परममनादिदेवकं) हरिम् VāyuP. ii. 47.30.

अनादिदेवता (anādi-devatā) *f.* ancient deity अनादिदेवतां दृष्ट्वा शुचः स्युर्नष्टभार्गवि BṛhaspaSm. 358.40; अनादिदेवतार्चायां पूजास्नानादिकर्मणि। यस्यार्हणादिकं द्रव्यं तस्य देवस्य तद्भवेत् BhaviP. 351B.13 (ii(2). 3.16); अनादिदेवतारूपाः पितरः ManvaMu. 125.21 (*on* 3.192); देवदर्शनमपि पुराणादिप्रसिद्धानामनादिदेवतानां प्रथमम् VīraMi.(Samaya.) 150.11.

अनादिदेहसंतति (anādi-dehasantati) *f.* beginningless series of bodies (i.e. births) अनादिदेहसंततिसंचितात्पकर्मक्षयो भोगात् NayaVi. 225.6 (*on* i. 1.5)

अनादिद्रोणव्यवच्छेद (anādidroṇa-vyavaccheda) *m.* exclusion of the ancient Droṇa येन हेतुनाश्वत्थामा द्रौणायन इत्युच्यते ...। अनादिद्रोणव्यवच्छेदपरमेतद् वेदितव्यम् Nyās. i. 898.12 (*on* iv. 1.103)

अनादिधाविस्वपरंपरा (anādidhāvi-svaparamparā) *f.* succession of individual souls transmigrating since time immemorial अनादिधाविस्वपरंपराया हेतुस्त्रजः स्रोतसि वेश्वरे वा NaiṣC. 6.102.

अनादिन् (a-nādin) *adj.* not producing a sound (सुवर्णम्) किञ्जल्कवर्णं मृदु स्निग्धमनादि भ्राजिष्णु च श्रेष्ठम् ArthŚā. i. 211.1 (2.13)

अनादिनामरूपबीज (anādi-nāmarūpabīja) *n.* beginningless source in the form of name and form किं तात्त्विकमस्य (ब्रह्मणः) रूपमपेक्ष्येदमुच्यते उतानादिनामरूपबीजसहितम् Bhām. 367.21 (*on* ii. 1.24)

अनादिनिगोदवनस्पतिराशि (anādi-nigodavanaspatirāśi) *m., f.* beginningless mass of trees of *Nigodas* (i.e. support of minute living beings) यावन्तश्च यतो मुक्तिं गच्छन्ति जीवास्तावन्तोऽनादिनिगोदवनस्पतिराशेस्तत्रागच्छन्ति SyādvāMañ. 29(70)

अनादिनित्य (anādi-nitya) *adj.* [*f.* -ā] originless and eternal किं देवा अनादिनित्या उत विद्यादिना पदप्राप्तिमुक्तिमन्तः TattvPrakā. 53A.13 (*on* i. 3.26); नन्वनादिनित्यस्य जीवस्योत्पत्तिः श्रुतावपि कथं युज्यते TattvPrakā. 115B.4 (*on* ii. 3.19); आकाशोऽनादिनित्यः NyāySu.(Ja.) 151B.10 (*on* i. 1.11); स्वाप्नार्थो न तावदनादिनित्यः NyāySu.(Ja.) 208A.5 (*on* i. 4.8); अनादिनित्याया अपि प्रकृतेः सत्त्वरजस्तमोरूपैकदेशदर्शनात् Nyāyāmṛ. 498B.4 = AdvaiSi. 745.8.

अनादिनित्यता (anādinitya-tā) *f.* the state of being beginningless and eternal न चात्ममोक्षयोर्भेदाभावः। आत्मनोऽनादिनित्यतया तदभिन्नमोक्षस्य ज्ञानसाध्याविद्यानिवृत्तिरूपत्वानुपपत्तेः TattvPrakā. 30B.12 (*on* i. 2.6); ननु स्वभावतो निर्गुणमेवारोपितैर्मिथ्यागुणैस्सगुणमिति बालैरभिलिख्यते। -- आरोपप्रवाहस्य चानादिनित्यतया सदा सगुणत्वं च नानिष्टम् NyāySu.(Ja.) 102A.6 (*on* i. 1.2)

अनादिनित्यतापात (anādinityatāpāta) *m.* undesired contingency of beginninglessness and eternality तेऽनन्ताः किं क्रमेण भेदा धर्मिणं परिरभन्ते युगपद्वा। नाद्यः, क्रमेण परिरभमाणानन्तभेदसंबन्धाय धर्मिणोऽनादिनित्यतापातात् Vādā. 102.6.

अनादिनित्यत्व (anādinitya-tva) *n.* the state of being beginningless and eternal अनादिनित्यत्वाज्जीवकरणसंबन्धस्य युज्यते तत्करणत्वश्रुतिः BrahmSūBh.(Ma.) 42B.2 (*on* ii. 4.17); अतः कर्मविरोधपरिहाराय देवानामनादिनित्यत्वमेवाभ्युपेयम् TattvPrakā. 54A.5 (*on* i. 3.27); प्राणानां ब्रह्मकरणत्वेऽपि युज्यते जीवकरणत्वश्रुतिः। जीवकरणसंबन्धस्यानादिनित्यत्वात् TattvPrakā. 132B.5 (*on* ii. 4.17); न ते विष्णाविल्यनया भगवतो देहस्यानादिनित्यत्वम् NyāySu.(Ja.) 420B.13 (*on* ii. 2.11); अत्र सृष्ट्वेत्यनेनानादिनित्यत्वपक्षदोषा अनभ्युपगमेनैव निरस्ताः NyāySu.(Ja.) 460B.6 (*on* iii. 2.1)

अनादिनित्यदेहत्व (anādinityadeha-tva) *n.* the state of having an originless and eternal body वासुदेव इति श्रुतिद्वयेनानादिनित्यदेहत्वम् NyāySu.(Ja.) 421A.1 (*on* ii. 2.11)

अनादिनिधन (an-ādinidhana) *adj.* [*f.* -ā] I having neither beginning nor end (often implying the sense eternal, having no known beginning or end, having no birth and death) अनाद्यन्तं भूतसंहारकारकम्। अनादिनिधनं लोके चक्रं संपरिवर्तते MahāBhā. i. 1.38; xii. 204.7; अनादिनिधनो देवः स कर्ता जगतः प्रभुः MahāBhā. i. 57.84; iii. 160.17; अनादिनिधनं भूतं विश्वमक्षयमव्ययम्। -- यो ह्येनं पुरुषं वेत्ति MahāBhā. iii. 186.15; iii. 202.16; v. 108.17; vi. App. I. 3(7); vii. 124.15; xii. 46.8; xii. 64.11; xii. 69*(1); xii. 73*(9); xiii. 17.11; अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्। --स्तुवन्नित्यं सर्वदुःखातिगो भवेत् MahāBhā. xiii. 135.6 = ViṣṇuSa. 6; MahāBhā. xiii. 151*(7); xv. 107*(2); यो यज्ञपुरुषं देवमनादिनिधनं हरिम्। विनिन्दत्यधमाचारो न स योग्यो भुवः पतिः HariVaṁ. 106*(2); ViṣṇuP. i. 13.28; भगवन्तमनादिनिधनं वासुदेवमभ्यर्चयेत् ViṣṇuSm. 65.1; सूक्ष्मलिङ्गमचेतनमनादिनिधनं तथाप्रसवधर्मि निरवयवमेकमेव हि साधारणमेतदव्यक्तम् TattvSa. 118.17; अनादिनिधनोऽनन्तः कर्मिणां प्रतिपत्तये ... व्यूहतामागतः स्वयम् PauṣkS. 33.18; अनादिनिधनं देवं जगत्स्रष्टारमीश्वरम्। ध्यायेत् JayāS. 6.73; 16.276; ते समेत्य जगद्योनिमनादिनिधन हरिम् ViṣṇuP. i. 12.32; iv. 2.24; कर्मकलापं हित्वा -- अनादिनिधनम् ... अवाप। अच्युतं पदम् ViṣṇuP. iv. 2.131; iv. 3.6; v. 20.100; v. 33.41; अधर्मस्य विनाशाय धर्माचारार्थमेव च। अनादिनिधनो देवः करोति स्थितिपालनम् MārkP. 19.36; 8.230; 111.1; अनन्तमपरिव्यक्तं दशधा सूक्ष्म एव च। अनन्तमकृतात्मानमनादिनिधनं च तत् VāyuP. i. 49.157; BrahmāṇḍP. i. 19.165; ऋषयस्तपसा देवाः ...। अनादिनिधना दिव्याः पूर्वं सृष्टाः स्वयंभुवा VāyuP. i. 57.48; ii. 8.51; MatsyaP. 179.45; अनादिनिधनं ब्रह्म ...। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः VākyaP. 1.1 = ŚivDṛ. 2.9; ŚaṅkhaSm. 7.32; अनादिनिधनो जन्तुः सेवते मृत्युजन्मनी PadmP.(Ra.) 14.37; अनादिनिधने लोके यत्र ...। जन्तवो दुःखमत्युग्रं प्राप्नुवन्ति PadmP.(Ra.) 85.20; अनादिनिधना राजन् स्थितिरेषा व्यवस्थिता PadmP.(Ra.) 117.7; VarāṅgaC. 26.11; कालो हि नाम भगवाननादिनिधनो यथोचितकर्मानुसारी AṣṭāSaṁ. i. 14.11 (1.4); एको ज्ञानाश्रयस्तस्मादनादिनिधनो नरः TattvSaṁ. 1871; अनादिनिधनं तत्त्वमलमेकमलं परैः NyāyVi. 2.76; उत्सर्गोऽप्ययं वाचः संप्रदायप्रवर्तनात्मको द्रष्टव्यः, अनादिनिधनाया अन्यादृशस्योत्सर्गस्यासंभवात् BrahmSūBh. (Śaṅ.) 191.18 (*on* i. 3.28); TaiUBh. 245.18 (*on* 2.3); अनादिनिधनेऽप्येवं वेदे वेदार्थगोचरे। व्याख्यानं मुख्यवृत्त्यापि स्यात् TantrVā. 719.21 (*on* iii. 1.13); अनादिनिधनं तुङ्गमनल्पफलदायिनम्। उपाध्वं विपुलच्छायं श्रुतस्कन्धमहाद्रुत(? म)म् MahāP. 1.18; 3.2; 21.137; 25.147; जगतामनादिनिधनस्य तस्थुषो

जनकत्व एव जननोज्झितस्थितेः HarVi. 6. 72; RāmC. 9. 9; एतदनादिनिधनं विश्वरूपस्य ब्रह्मणः संसारबीजं चक्रक्रमात् परिवर्तते BālaKrī. ii. 48. 10 (on 3.124); सूक्ष्मत्वादव्यक्तः सनातनोऽव्यक्तस्वाभाविकेनानादिनिधनेनैश्वर्येण युक्तः ManuBh. i. 10. 28 (on 1. 7); SaṁkṣeŚā. 3. 353 (ii. 346. 16); चिन्तयेन्मन्त्रमातृकान्। अनादिनिधनां देवीमहन्तां पुरुषोत्तमीम् LakṣmīT. 23. 19; अनादिनिधनं देवं जगत्कारणमीश्वरम्। प्रपद्ये NyāyKa. 1. 6; मन्ये त्वां क(?का)लमीशानमनादिनिधनं विभुम् BhāgP. i. 8. 28; xii. 11. 50; KūrmaP. 9. 10 (1. 1); 16. 12 (1. 1); अनादिनिधना दिव्या वागुत्सृष्टा स्वयंभुवा KūrmaP. 23. 17 (1. 2); 28. 4 (1. 2); अनादिनिधनं ब्रह्म तदेव शरणं व्रज KūrmaP. 79. 16 (1. 9); SāṁkhyaPraBh. 3. 21 (on 0. 0); KūrmaP. 109. 4 (1. 12); 788. 16 (2. 45); अनादिनिधनं महत् SkandP. vii(1). 6. 29; vii(4). 30. 33; वेदेषु गीयते ···। अनादिनिधनो धाता त्वनन्तः पुरुषोत्तमः ViṣṇuDhaP. i. 2. 5; ii. 157. 7; अनादिनिधने देवे हरिशंकरसंज्ञिते ··· भेदं कुर्वन्ति पापिनः BṛNāraP. 6. 42; 36. 19; (द्रव्यम्) अनादिनिधनं हि न साधनान्तरमपेक्षते TattvPradī.(A.) 132.6 (on 2. 6); 304.2 (on 3. 25); अनादिनिधनो ह्येष पुरुषः ···। तापयत्येष त्रीँल्लोकान् BrahmP. 30. 8 = BhaviP. 118A. 18 (i. 66. 50); अनादिनिधनं चैव यद्रूपं तस्य ते नमः BrahmP. 33. 21; अनादिनिधनो ह्यात्मा तं बुद्ध्वा विहरेन्नरः BrahmP. 237. 5; अनादिनिधना शक्तिर्नैषा ब्राह्मी द्विजोत्तम BhaviP. 318A. 11 (ii(1). 1. 26); 684A. 22 (iv. 55. 49); अनादिनिधने चण्डि भुक्तिमुक्तिप्रदे शिवे DevīBhāP. i. 9. 40; अनादिनिधना जीवाः कर्मबीजसमुद्भवाः DevīBhāP. iv. 2. 4; अनादिनिधना योऽसौ जगतः कारणं परम्।··· कालः PadmP. ii. 81. 32; iv. 88. 73; वनं वृन्दावनं नाम ह्यनादिनिधनं मतम् ĀdiP. 10. 35; ब्रह्मोवाच ··· त्वम् ··· अनादिनिधना क्षपा। जगन्माता GaṇeP. i. 16. 22; i. 77. 8; अनादिनिधने बाले न शोकं कर्तुमर्हसि GaṇeP. ii. 83. 30; ii. 116. 6; अनादिनिधनश्चायम् ···। जगतः कर्ता महादेवो महेश्वरः ŚivaP. vii(1). 9. 11 (511. 6); तस्मादनादिनिधनं ब्रह्मतत्त्वमेवाविद्याश्रय इति वाच्यम् NyāyMa. 313. 6; तस्मादनादिनिधन° ··· °चिन्मात्रब्रह्मात्मभावावबोधेन बन्धनिवृत्तिर्मुक्तिव BrahmSūBh.(Rā.) 18. 16 (on i. 1. 1); शास्त्रं चानादिनिधनाविच्छिन्नपाठसंप्रदाय° ··· °वेदाख्याक्षरराशिः BrahmSūBh.(Rā.) 471. 13 (on ii. 2. 3); VedāntDī. 113. 16 (on ii. 2. 35); VedāSaṁ. 103. 6; NyāyPari. 20. 4; मद्याजिनस्तु मामनादिनिधनम् ··· प्राप्य न पुनर्निवर्तन्ते GītāBh.(Rā.) 476. 2 (on 9. 25); अनादिनिधनाः सर्वे (जीवाः) ज्ञानदर्शनलक्षणाः TriṣaŚaPuC. iv. 4. 224; पञ्चास्तिकायमयो लोकोऽनादिनिधनो जिनाख्यातः SthānṬ. 96A. 14; कथमनादिनिधनस्य जीवस्य लय उच्यते PrakaVi. 101. 22; MalliC. 7. 939; 'अनादिनिधनं ब्रह्म' इत्यादिवचनानि चानादिनिधनशब्देन स्मारितानि ŚrutaPra. iA. 86. 10 (on i. 1. 1); अनादिनिधने काले जीवानाम् ···। संविधानं हि तन्नास्ति संसारे यन्न संभवेत् PārśvC. App. 18; CaturCin i. 311. 23; iii(2). 7. 1; न हि सामान्यमनादिनिधनमेकं संग्रहाभिमतं प्रमाणभूमिः SyādvāMañ. 28(77); चेतनस्यानादिनिधनस्य देहादिसंयोगहेतुकविचित्रविज्ञानविकाशो जन्म VedāntKau. 13. 9 (on i. 1. 2); अनादिनिधनस्यैव वेदस्य प्रतिकल्पमीश्वरेणाप्ततमेन यथापूर्वं प्रवर्तनमभिसन्धाय NyāyPari. 20. 7; 386. 10; अवतार्य भुवो भारमवतारो ममामराः। अनादिनिधनं धर्ममक्षतं स्थापयिष्यति Yādavā. 1. 94; अनादिनिधनम् ··· आत्मानमवाह्येन चक्षुषा साक्षात्कुर्वतः PārvaPa. 2. 5(1); अनादिनिधनो देवः भूतचक्रप्रवर्तकः KathāKau. 8. 64; अनादिनिधना द्वाविंशतिः शक्तयः RājTa. (Prā.) 475; भूमेर्भारावताराय चरन्तौ बाललीलया। अनादिनिधनौ (रामकृष्णौ) पूर्णौ मूर्तिभेदमुपाश्रितौ KaṁVa. 5. 27; भगवन् अनादिनिधनचिदानन्दनिधे AmṛUda. 4.2(3)

अनादिनिधन (an-ādinidhana) *m.* **i** one of the thousand epithets of Viṣṇu (*lit.* who has neither a beginning nor an end, i. e. eternal) विष्णोर्नामसहस्रं मे शृणु पापभयापहम्। यानि नामानि ···। ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ···। अनादिनिधनो धाता MahāBhā. xiii. 135. 18 = ViṣṇuSa. 18; विष्णोर्नामसहस्रं च विष्णुभक्तिकरं शुभम्।··· अनादिनिधनो देवः सर्वज्ञः SkandP. v(1). 63. 77; **ii** name of one of the twenty Gaṇeśvaras of the north-east region गणेश्वराः।··· ईशान ईश्वरः ···। अनादिनिधनः ··· इत्यैशान्यां तु विंशतिः ĪśānŚiPa. ii. 49. 152; **iii** name of one of the attendants of Skandasena, i. e. Kārttikeya अनादिनिधनः ··· विश्वसृजो हरः। इत्येते कोटिगुणिता रुद्ररूपा नमो नमः।··· ये भूताः स्कन्दसेनस्य पार्षदा बलिभोजिनः। तृप्यन्तु ते TantrSa. 9. 177.

अनादिनिधनत्व (anādinidhana-tva) *n.* the state of having neither a beginning nor an end (often implying the sense of eternality, continuity, the state of having no birth and death) ज्ञानोपरमलक्षणामेव ब्रह्मप्राप्तिमाहुः···अन्ये तु···°ज्ञानोत्पादलक्षणाम्। अनादिनिधनत्वे हि नापनेयं नोपनेयं वा किंचिदस्तीति तदर्थानि शास्त्राणि तदर्थाश्च प्रवृत्तयो व्यर्थाः स्युः BrahmSi. 8. 16; कथं ब्रह्मणः संसारात्मतैवेति। तत्तु साधारणविशेषात्मकत्वेनारम्भकस्य यज्ञादिचक्रस्यानादिनिधनत्वाभिधानेनैव परिहृतप्रायत्वात् ··· अनुपयोगित्वान्न परामृश्यते BālaKrī. ii. 50. 7 (on 3. 131); ननु च साधारणविशेषात्मकस्य कर्मणोऽनादिनिधनत्वात् तथैवानादिः शरीरसंबन्धः, तथैवानन्तोऽपि BālaKrī. ii. 60. 1 (on 3. 166); आत्मैव स्वरूपावस्थितो मोक्ष इत्युच्यते, न चात्मस्वरूपं कर्मसाध्यमनादिनिधनत्वेन सिद्धत्वात् NyāyMañ. ii. 91. 16; न खलु द्रव्यैर्द्रव्यान्तराणामारम्भः, सर्वद्रव्याणां स्वभावसिद्धत्वात्। स्वभावसिद्धत्वं तु तेषामनादिनिधनत्वात् TattvPradī.(A.) 132. 6 (on 2. 6); निश्चयेन शुद्धबुद्धैकस्वभावानामनादिनिधनत्वेनोत्पादव्ययरहितानामपि निगोदजीवानाम् TātpaVṛ. 313. 14 (on 3. 30); कालस्यानादिनिधनत्वादात्मनां च परिमितत्वात् संसारस्य रिक्तता भवन्ती केन वार्यताम् SyādvāMañ. 29(13); तस्माज्जीवानामानन्त्यात् अनादिनिधनत्वादुत्पन्नानागतविजातीयं न सुखमस्ति TattvCin. iii. 37. 3.

अनादिनिधनस्थिति (anādinidhana-sthiti) *adj.* having beginningless and endless existence चेतनालक्षणो जीवः सोऽनादिनिधनस्थितिः। ज्ञाता द्रष्टा च कर्ता च भोक्ता देहप्रमाणकः MahāP. 24. 92.

अनादिनिधना (an-ādinidhanā) *f.* an epithet of the goddess Lalitā इदं नामसहस्रकम्। पठन्ति भक्त्या सततं ललितापरितुष्टये। ··· श्रीमाता — अम्बिकानादिनिधना LalitāSa. 120; **i** (*lit.* who is devoid of origin and death) आदिर्जननं निधनं मरणं च न विद्यते यस्याः सानादिनिधना LalitāSaBh. 86. 15 (on 120); **ii** (*lit.* whose worship delivers one from the eighty causes of death) अथवानादिशब्दादादिशब्दाद्वा वररुचिपरिभाषानुसारेणाशीतिसंख्योच्यते। आदिसंख्याकानि च तानि निधनानि च।··· न विद्यन्ते आदिनिधनानि यस्या उपासनया सानादिनिधना LalitāSaBh. 86. 18 (on 120)

अनादिनिधनागम (anādinidhanāgama) *m.* traditional precept which has neither a beginning nor an end जिनाः कर्तारः तत्त्वतः सम्यगाख्यातवन्तः कथितवन्तः ··· अनादिनिधनागमादपि तथा सिद्धम् TātpaVṛ. 133. 13 (on 2. 6)

अनादिनिधनात्मिका (anādinidhanātm-ikā) *adj.* (*f.*) having beginningless and endless nature प्रमाणादिव्यवस्थेयमनादिनिधनात्मिका। सर्वसंव्यवहर्तॄणां प्रसिद्धापि प्रकीर्तिता Nyāyāva. 32.

अनादिनिधि [w. r. for अनादिनिधन] BrahmāṇḍP. i. 29. 53.

अनादिनिमित्तप्रभवता (anādinimittaprabhava-tā) *f.* the state of being what arises from a beginningless cause (दृग्दर्शनशक्त्योरनादिरर्थकृतः संयोगो हेयहेतुर्दुःखस्य कारणम्) अनादिनिमित्तप्रभवतया तस्याप्यनादित्वात् TattvVai. 80. 27 (on 2. 17)

अनादिनिर्मल (anādi-nirmala) *adj.* eternal and free from impurities अनादिनिर्मलः शुद्ध एक एव महेश्वरः ĪśānŚiPa. ii. 1. 14.

अनादिनिष्ठ (an-ādiniṣṭha) *adj.* not having either a beginning or an end यः सर्वेषामावरीता वरीयान् सर्वैर्भावैर्नावृतोऽनादिनिष्ठः।··· नमस्तेऽविज्ञेयाय व्योमरूपाय तस्मै Kirātā. 18. 40 (comm. अविद्यमाने आदिनिष्ठे उत्पत्तिनाशौ यस्य)

अनादिनैसर्गिक (anādi-naisargika) *adj.* beginningless and natural योऽयं प्रकृत्या सहानादिनैसर्गिकोऽस्य भोग्यभोक्तृत्वलक्षणसंबन्धोऽविवेकख्यातिमूलः RājMār. 83. 15.

अनादिन्याय (anādi-nyāya) *m.* maxim of (investigation of series of items till) the item which is not preceded by anything else is reached (this maxim refers to the investigation of the caste of a person till his origin is ascertained) सत्यपि च स्त्र्यपराधे यदि मातुरेव क्षेत्रिणो वा पुत्रः स्यात्ततस्तयोः प्रसिद्धजातित्वान्नैव दुर्ज्ञानता भवेत्। तयोरप्येवमेवं तत्पूर्वजयोरित्यनादिन्यायेन जातिरवधार्यतैव TantrVā. 31. 3 (on i. 2. 13)

अनादिपद (anādi-pada) *n.* **A I** word whose origin is not traceable (and whose meaning is decided by divine will) सादिपदे तथा अनादिपदे त्वर्थप्रत्ययस्य अन्यथापि भावात् न तत्कल्पनेति चेत्, न TattvCin. iv(2). 659. 2; **A II** eternal word (whose meaning is neither decided by human convention nor by divine will) देवदत्तादिशब्दानां चाधिमत्संकेतेनार्थप्रतिपादकानाम् अनादिपदनिष्ठशक्त्यभावादसाधुत्वापत्तिः MīmāKau. i. 110. 6 (on i. 3. 24); **B** the word *anādi* अनादिपदस्य···सार्थकत्वात् AdvaiSi. 544. 22; ततस्तद्वारणार्थमनादिपदम् MayūMāli. 47. 7 (on i. 3. 9)

अनादिपदार्थ (anādi-padārtha) *m.* beginningless thing अथाविद्यारूपमहाकालदेशमानं तदा अनादिपदार्थेषु तत्संबन्धासंभवः GuruCandr. i. 253. 20; अनादिपदार्थेष्वपि क्षेमसाधारणस्याविद्याकल्पदोषजन्यत्वस्य सत्त्वात् GuruCandr. i. 369. 18.

अनादिपद्धति (anādi-paddhati) *adj.* having a beginningless path परन्तु दर्शनश्रेणिराराध्यानादिपद्धतिः PrabhāC. 156. 10.

अनादिपरंपरसिद्ध (anādiparampara-siddha) *m.* epithet of Jina (*lit.* Siddha belonging to a beginningless tradition) अनादिसंपरसिद्धेभ्यो

नमो नमः MahāP. 40. 25(6)

अनादिपरंपरा (anādi-paramparā) *f.* A series without a beginning एवमनादिपरंपरा वर्तते TripāMaNāU. 366. 4(4); B tradition existing from time immemorial न च संकेतव्युत्पत्तये कश्चिदसंकेतितः शब्द आस्थेयः। संकेतव्युत्पन्नानां संकेतोऽनादिपरंपरयास्तु NayaVi. 257. 1 (*on* i. 1. 24); वंशभेदः कल्प्यते यत्रानादिपरंपरयाविगीता स्मृतिः VīraMi.(Saṁskāra.) 622. 15.

अनादिपरंपरागत (anādiparamparāgata) *adj.* which has come down through a beginningless tradition (शाश्वतोऽयं स्मृतो धर्मः पार्थिवानाम्) शाश्वतोऽयमिति सनातनोऽनादिपरंपरागतधर्मोऽयम् RājNīRa. 67. 1.

अनादिपरंपराप्रसिद्ध (anādiparamparā-prasiddha) *adj.* well-established through beginningless tradition मातापित्रादिकर्तृकाद्व्युत्पादनादनादिपरंपराप्रसिद्धाद्व्युत्पत्तिग्रहणं तदर्थादेव जायते ŚivārkaMāDī. i. 175. 31 (*on* i. 1. 4)

अनादिपरंपरायात (anādiparamparāyāta) *adj.* which has come down through beginningless tradition (विधानस्य) तस्य स्वयंभुवो नित्यस्यानादिपरंपरायातस्य (त्वमेकः -- कार्यतत्त्वार्थवित्) ManuBh. i. 5. 18 (*on* 1. 3)

अनादिपरंपरासंयुक्त (anādiparamparā-saṁyukta) *adj.* associated continuously since time immemorial पङ्ग्वन्धवदुभयोः (प्रधानपुरुषयोः) संयोगः भोगायानादिपरंपरासंयुक्तोऽपि कैवल्याय पुनः संयुज्यते SāṁkhyaTaPra. 172. 14.

अनादिपल्लवाविद्या (anādi-pallavāvidyā) *f.* beginningless sprout-like nescience सृष्ट्यादिकाले घटत्वादिकं जायते। अनादिपल्लवाविद्यारूपत्वे तु न जायत एव LaCandr. 791. 25.

अनादिपादविभूति (anādipāda-vibhūti) *adj.* having (i. e. displaying) the glory of the beginningless (*avidyā-*) quarter (of the Brahman) तत उपरि ··· अनादिपादविभूतिवैकुण्ठमेवमाभाति TripāMaNāU. 370. 20(6)

अनादिपापवासना (anādi-pāpavāsanā) *f.* beginningless impressions of the past sins तदिदम् ··· अनादिपापवासनादूषिताशेषशेमुषीकाणाम् ··· °कुतर्ककल्ककल्पितमिति ··· प्रमाणवृत्तयाथात्म्यविद्भिरनादरणीयम् BrahmSūBh. (Rā.) 27.17 (*on* i. 1. 1); मय्यनिवेशितमनसः--अनादिपापवासनया विषयध्याननववर्जनीयं स्यात् GītāBh.(Rā.) 146. 13 (*on* 2. 62)

अनादिपापादि (anādi-pāpādi) *adj.* beginningless sin etc. पापस्य पुण्यस्य मिथ्याज्ञानजन्यसंस्कारस्य वा 'अस्ति भाती'ति व्यवहारे प्रतिबन्धकत्वमित्यत्र विनिगमकाभावादनादिपापादिभिर्न प्रतिबन्धकत्वेन कल्प्यते GuruCandr. ii. 426. 12.

अनादिपारंपर्यागत (anādipāramparyāgata) *adj.* which has come down through tradition existing from time immemorial अनादिपारंपर्यागतस्य ··· तस्यासंभवान्यथाभावाभावरूपत्वतदशुद्धिसिद्धत्वात् ŚatDū. 78.28.

अनादिपारंपर्यागतत्व (anādipāramparyāgata-tva) *n.* the state of being that which has come down through tradition existing from time immemorial एष्वृणादानादिषु व्यवहारस्थानेषु ··· अनादिपारंपर्यागतत्वेन नित्य धर्ममवलम्ब्य कार्यनिर्णयं कुर्यात् ManvaMu. 289. 28 (*on* 8. 8)

अनादिपुंस् (anādi-puṁs) *m.* ancient Person (i.e Viṣṇu) पतिदेवतेयमनादिपुंसोऽपि ··· नायकस्य पुरः ··· दहनमनुजगाहे RāmāCam. 6.96(1)

अनादिपुरुष (anādi-puruṣa) *m.* ancient Person नैवमस्माभिरपि -- वर्ण्यते। नाप्यनादिपुरुषः सृष्टिसंहारकारकः TattvSaṁPañ. 714. 14 (*on* 2671-2673); एकस्य कस्यचिदशेषजगत्प्रसूतिहेतोरनादिपुरुषस्य ··· ब्रह्मेति विष्णुरिति रुद्र इति प्रतीतिः NyāyMañ. i. 242. 16; वसुधारे च -- शंकरः ··· अनादिपुरुषो व्यवस्थितः VarāP. 81(357. 13); मनसः सादित्वे तद्विना कदाचिदनादिपुरुषेणावस्थातव्यम्। न चैवं भवति TattvPrakā. 126B. 12 (*on* ii. 4.4)

अनादिपुरुषागतत्व (anādipuruṣāgata-tva) *n.* the state of being that which has come down from the ancient Person न च स्मर्तृपुरुषप्रत्यक्षमात्रेण स्वादृष्टश्रुतावनाश्वासः। अग्निहोत्रादिश्रुतीनामपि वर्णस्वरूपस्य प्रत्यक्षेणावगतावपि अनादिपुरुषागतत्वस्याध्यापकपुरुषाधीनत्वेनानाश्वासापत्तेः MīmāKau. i. 22. 12 (*on* i. 3. 4)

अनादिपुरुषोत्तम (anādi-puruṣottama) *m.* the ancient Supreme Person धर्ममर्थं च कामं च मोक्षं चान्विच्छतां सदा। आराधनीयो भगवाननादिपुरुषोत्तमः ViṣṇuP. i. 14. 16.

अनादिपूर्वपक्षन्यायाभास (anādi-pūrvapakṣanyāyābhāsa) *m.* fallacious reasoning in the form of *prima facie* view based on the beginningless (Veda) अलौकसिद्धानामपि प्रधानादीनामनादिपूर्वपक्षन्यायाभासोत्प्रेक्षितानामनुवादत्वमुपपन्नम् Bhām. 332.15 (*on* ii. 1. 3) (VedāntKa. वैदिकलिङ्गानां न्यायाभाससिद्धानामनुवादत्वमित्यर्थः)

अनादिपूर्वपक्षाभास (anādi-pūrvapakṣābhāsa) *m.* fallacious reasoning in the form of the *prima facie* view (which considers ether etc.) as originless अनादिपूर्वपक्षाभासोत्प्रेक्षितानुत्पत्तीनामाकाशादीनामुत्पत्त्यभिधानस्य सर्वकार्योपलक्षणार्थत्वाद् VedāntKa. 313. 9 (*on* ii. 3. 9)

अनादिप्रकाश (anādi-prakāśa) *adj.* having (i.e. displaying) luminosity from time immemorial अनादिप्रकाशम् ··· परं ब्रह्म ··· मुक्तिसाधकम् BrahmSūBh.(Śrī.) ii. 355.2 (*on* iii. 3. 39)

अनादिप्रकृति (anādi-prakṛti) *f.* nature existing from time immemorial (स्वभावतोऽपास्तसमस्तदोषम्) स्वभावेनैवानादिप्रकृत्यैवापास्ता निरस्ताः समस्ता दोषा यस्मात्तम् VedāntRaMañ. 1. 4 (43. 14)

अनादिप्रकृतिसंबन्ध (anādi-prakṛtisambandha) *m.* originless association with the primordial matter पुरुषोऽनादिप्रकृतिसंबन्धकृतगुणसङ्गादेतद्देहमात्रमहेश्वरो देहमात्रपरमात्मा च भवति GītāBh.(Rā.) 584. 13 (*on* 13. 22)

अनादिप्रतियोगिक (anādipratiyogi-ka) *adj.* having a counter-positive which has no origin अनादिप्रतियोगिकाभावत्वादौ व्यभिचारात् GuruCandr. i. 428. 23; LaCandr. 418.41.

अनादिप्रथित (anādi-prathita) *adj.* well-known from time immemorial भूचक्राक्षं गते द्वीपे ह्यनादिप्रथितं हि यत्। क्षेत्रं स्वकर्मफलदम् PauṣkS. 36.8.

अनादिप्रधान (anādi-pradhāna) *n.* beginningless primordial matter न चानादिप्रधानमस्तु प्रतिबन्धकम् GuruCandr. ii. 426. 20.

अनादिप्रबन्ध (anādi-prabandha) *m.* continuance without a beginning कार्यकारणभावस्य नियामकत्वादनादिप्रबन्धप्रवृत्तो हि ज्ञानानां हेतुफलभावप्रवाहः NyāyMañ. ii. 16. 3; ii. 42. 22; तेनानादिप्रबन्धोपचितपरिणमत्कर्मपाकोपनीतं दुःखं संत्यज्य निःश्रेयसमखिलभयातीतमाप्तुं यतेत NyāyMañ. ii. 45. 1; ii. 82. 15; ii. 98. 3; *adj.* having continuance without a beginning यथानादिप्रवृद्धो (v.l. °प्रबन्धो) घोरः संसारसागरः। तथानादिर्महाविष्णुः संसारान्मोचकः स्मृतः BṛNāraP. 15. 44.

अनादिप्रभवाप्यय (an-ādiprabhavāpyaya) *adj.* (Prakṛti) which is without an Ur-source and an end सुदर्शनवपुः श्रीमाननादिप्रभवाप्ययः। ज्ञानस्वरूपो भगवान् पूर्णषाड्गुण्यविग्रहः AhirbuS. 33. 14; शब्दस्पर्शविहीनं तद्रूपादिभिरसंहितम्। त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम् ViṣṇuP. i. 2. 21; SāṁkhyaPraBh. 32. 4 (*on* 1. 62)=60.27 (*on* 1. 128)

अनादिप्रमा (anādi-pramā) *f.* beginningless (divine) valid cognition नाप्यनवस्था। अन्यथा तार्किकाणामप्यनादिप्रमा गुणं विनापीति प्रामाण्यपरतस्त्वं भज्येत AdvaiSi. 497. 9.

अनादिप्रयुक्ता (anādi-prayuktā) *adj.* (*f.*) used since time immemorial स चायमूहोऽनादिप्रयुक्तास्वेव संज्ञासु, न सर्वत्रेत्याह — संज्ञास्विति PadMañ. *on* KāśiVṛ. *on* P. iii. 3. 1.

अनादिप्रयोग (anādi-prayoga) *m.* usage since time immemorial यद्यप्यनादिप्रयोगयोगिता न शक्तिनियता वैदिकगौण्यादिना व्यभिचारात् तथापि शक्तिरनादिप्रयोगनियता TattvCin. iv(2). 530.6; निरूढेति। अनादिप्रयोगावच्छिन्नलक्षणाया(?या:) तत्त्वादिति भावः VaiyāBhū. 225. 9 (*on* 52)

अनादिप्रयोगपरंपरा (anādi-prayogaparamparā) *f.* beginningless continuous tradition of usage गवादय एव साधवः न गाव्यादय इति साधुस्वरूपनियमस्य तु अनादिप्रयोगपरंपरैव मूलम् BhaṭṭDī. i. 52. 14 (*on* i. 3. 8)

अनादिप्रयोगप्रवाह (anādi-prayogapravāha) *m.* beginningless continuity of usage अनादिप्रयोगप्रवाहवशादेकवस्तुप्रवणत्वात्मना कुलानुगताद्दिरूपशक्यस्य सादृश्येन संबन्धेनानुकूलादिशब्देरनुगुणादयो लक्ष्यन्ते RasGaṅ. 186. 10.

अनादिप्रवाहप्रवृत्ति (anādipravāha-pravṛtti) *f.* prevalence of an originless flow श्राद्धस्य विधिः शाश्वतः प्रतिसर्गमनादिप्रवाहप्रवृत्त्या नित्यः ManvaMu. 30. 10 (*on* 1.112)

अनादिप्रवाहरूप (anādipravāha-rūpa) *n.* form or nature of a beginningless continuity प्रकृतेरजात्वं तु, अनादिप्रवाहरूपेण स्वर्गादिरमृतत्ववदापेक्षिकम् ŚaṅkaVi.(Ā.) 124. 19.

अनादिप्रवृत्त (anādi-pravṛtta) *adj.* [*f.*-ā] existing or continuing since time immemorial अनादिप्रवृत्तोऽयं घोरः संसारसागरः BhaviP. 277B. 29 (i. 187. 19); भवतु वानादिप्रवृत्ताया लक्षणावृत्तेरेव षष्ठीसमासादावनुगमः NyāyRa. 903. 11 (*on* 7.207); अयमभ्यास इदानीं प्रवृत्तः स्वयमदृष्टः सन्ननादिप्रवृत्ता व्युत्थानवासनाः कथमभिभवेत् JīvanVi. 117.6.

अनादिप्रवृत्तज्योतिस् (anādipravṛtta-jyotis) *n.* science of astrology existing since time immemorial अरे अनादिप्रवृत्तज्योतिषातीन्द्रियज्ञानप्रतारितेन भवतेदमतिकष्टं व्रतमाश्रितम् PraboCan. 3. 8 (52. 8)

अनादिप्रवृत्तत्व (anādipravṛtta-tva) *n.* the state of being that which is existing from time immemorial स्वभावप्रवृत्तशब्देन अनादिप्रवृत्तत्वं

विवक्षितम् ŚrutaPra. iB. 149. 30 (*on* i. 1.4)

अनादिप्रवृत्तसंस्कारा (anādipravṛtta-saṁskārā) *adj.* (*f.*) having impressions existing from time immemorial ब्रह्मणोऽपि मायोपाधेरनादिप्रवृत्तसंस्काराया मायायाः प्रलयकारणकर्मक्षयोत्थापितसंस्कारादिनिमित्तवशात् सर्गोन्मुखः परिणाम ईक्षणमित्यर्थः PrakaVi. 91. 21.

अनादिप्रवृत्तिशील (anādi-pravṛttiśīla) *adj.* habitually active since time immemorial अनादिप्रवृत्तिशीलानां प्रवृत्तिसंकोचाय आश्रमाः शास्त्रेण विहिताः GoviBh. 279. 11 (*on* iii. 4. 39)

अनादिप्रवृद्ध (anādi-pravṛddha) *adj.* ever-growing since time immemorial अनादिप्रवृद्धोऽयं घोरः संसारसागरः BṛNāraP. 15. 44.

अनादिप्रसिद्ध (anādi-prasiddha) *adj.* well-known since time immemorial अनादिप्रसिद्धपौद्गलिककर्मबन्धनोपाधिसंनिधिप्रधावितोपरागरञ्जितात्मवृत्तिर्जपापुष्पसंनिधिप्रधावितोपरागरञ्जितात्मवृत्तिः TattvPradī.(A.) 176. 11 (*on* 2. 34)

अनादिप्रसिद्धकर्तृक (anādiprasiddhakartṛ-ka) *adj.* whose agent is well-known from time immemorial अनादिप्रसिद्धकर्तृकादन्यत् सकर्तृकम् PrakaVi. 42. 8.

अनादिप्रसिद्धि (anādi-prasiddhi) *f.* prevalence since time immemorial लाघवस्य तर्कविधया प्रमाणानुग्राहकत्वेनानादिप्रसिद्धिरूपाचारप्रमाणसिद्ध-सकर्तृकत्वबाधकत्वायोगात् BhāṭṭCin. ii. 32. 7 (*on* i. 3.6)

अनादिप्रस्थान (anādi-prasthāna) *n.* non-initial setting out for renunciation (in course of progress towards Buddhahood), one of the twentyseven means of attaining Buddhahood [BodhiBhū. 56.18] अनादिप्रस्थानं कतमत्। या अवतीर्णस्य पुद्गलस्य परिपाच्यमानतायां वर्तमानस्य बोधिसत्त्वेभ्यो बुद्धेभ्यश्चानभ्युपेक्षामागम्य विवृतानां च स्थानानां भूयो भूयः उत्तानक्रियामागम्य उत्तरोत्तरपरिपाकगमनता BodhiBhū. 57. 14.

अनादिप्राक्तनसंस्कार (anādi-prāktanasaṁskāra) *m.* previous impression since time immemorial कवेः … यः अन्तर्गतोऽनादिप्राक्तनसंस्कारप्रतिभानमयः … रागान्त(गस्त) एव … तं भावयन् … भावश्चित्तवृत्तिलक्षण एवोच्यते AbhinBhā. i. 345.19 (*on* 7. 2)

अनादिबद्ध (anādi-baddha) *adj.* **A** fixed or deeply rooted since time immemorial येनेह मोहतरुमूलमभेद्यमन्यैरुत्पाटितं निरवशेषमनादिबद्धम् ।… सोऽर्हञ्जयति VarāṅgaC. 1. 2; जीवस्य मिथ्यात्वमनादिबद्धम् VarāṅgaC. 11. 2; 1. 12; 11. 35; **B** bound since time immemorial अनादिबद्धस्य कथंचिदात्मा … अमूर्तमूर्तत्वनिजस्वभावस्य एव जानाति KalyāKā. 7. 3; अनादिबद्धेन जीवेन … मुमुक्षुणा मुक्तिः संपादनीया VedāntKau. 6.17 (*on* i. 1. 1); 423.5 (*on* iv. 4. 2)

अनादिबन्ध (anādi-bandha) *m.* bondage existing from time immemorial अनादिबन्धं निर्धूय मुक्ता सापि (तारा) विकल्पया AdhyāRā. iv. 3. 38.

अनादिबन्धवश (anādibandha-vaśa) *m.* [Abl.] due to the influence of the bondage existing from time immemorial जीवः … पश्चादनादिबन्धवशाद् व्यवहारेण … मूर्तशरीरगतो मूर्तशरीरपरिणतो भवति TātpaVṛ. 72.18 (*on* 1.55); 238. 17 (*on* 2.83)

अनादिबन्धु (anādi-bandhu) *m.* kindred from time immemorial अयमात्मा … आत्मानमेवात्मनोऽनादिबन्धुमुपसर्पति TattvPradī.(A.) 272.12 (*on* 3. 2); अयं मदीयात्मा … स्वकीयचिदानन्दैकस्वभावं परमात्मानमेव निश्चयनयेनानादिबन्धुवर्गं पितरं मातरं कलत्रं पुत्रं चाश्रयति TātpaVṛ. 272. 22 (3.2)

अनादिबुद्ध (anādi-buddha) *adj.* enlightened eternally गुरुः … शिष्यं शिवीभूतं ध्यात्वा तस्मै शिवविषयान् षडङ्गगुणानापादयेत्। तद्यथा … परितृप्त अनादिबुद्ध … इत्येकैकाहुतिं हुत्वा … अष्टौ समयान् ज्ञापयेत् ĪśānŚiPa. ii. 18. 119½ (15); अनादिबुद्धो नित्यश्च ततः स्यादविनश्वरः। नित्यतृप्तश्च सप्तान्ते भव स्वाहेति योजिताः। मन्त्राः स्युरेभिर्हुत्वाज्यमेभिरेव शिवं स्पृशेत् ĪśānŚiPa. ii. 47. 119; ii. 51.42.

अनादिबुद्धिसंतान (anādi-buddhisantāna) *m.* beginningless series of cognitions स चायमनादिबुद्धिसंतानोऽनादिवासनानिबन्धनः … संसरति PrakaPañ. 317.15.

अनादिबोध (anādi-bodha) *m.* **A** beginningless (divine) enlightenment (one of the six attributes of Śiva) सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः। अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य VāyuP. i. 12. 31; KūrmaP. 490. 4 (2. 8); ŚivaP. i. 18. 12 (21B.11); अनादिबोधस्य परार्थप्रवृत्तिसृष्टिवैषम्यापादकरागादिदोषाभावसिद्धावुपयोगमाह ŚivārkaMaDī. i. 124. 19 (*on* i. 1.2); **B** word *anādibodha* in the *pāśupata mantra* शिखे चानादिबोधोऽयं जातियुक्तं शिखां तथा ĪśānŚiPa. ii. 6. 51; *adj.* possessed of beginningless enlightenment (one of the six attributes of Śiva) ओं हूं आत्मने अनादिबोधो भव स्वाहा AgniP. 88. 46½ (2); 97. 51; अनादिबोधाय स्वतन्त्राय … एवं क्रमेण स्वाङ्गैरायोज्य षडङ्गानि भवन्ति ĪśānŚiPa. i. 15.12(1); अनादिबोधोऽयमलुप्तशक्तिः सोऽनन्तशक्तिर्निखिलाध्यपालः ĪśānŚiPa. ii. 2. 16; अतोऽनादिबोधं ब्रह्म (= शिवः) … 'शान्तिसमृद्धममृत'मिति श्रूयते BrahmSūBh.(Śrī) i. 124. 5 (*on* i. 1. 2)

अनादिबोधत्व (anādibodha-tva) *n.* the state of having beginningless enlightenment (one of the six attributes of Śiva) सर्वज्ञत्वं नित्यतृप्तत्वमनादिबोधत्व(? त्वम्) स्वतन्त्रत्वमलुप्तशक्तिमत्त्वमनन्तशक्तिमत्त्वं चेत्येतानि सर्वज्ञत्वादीनि BrahmSūBh.(Śrī.) i. 121. 3 (*on* i. 1. 2); स्वतस्सिद्धनिरतिशयज्ञानवत्त्वमनादिबोधत्वम् BrahmSūBh.(Śrī.) i. 124. 3 (*on* i. 1.2); ii. 259. 19 (*on* iii. 2.29); ŚivārkaMaDī. ii. 487. 33 (*on* iv. 4. 9)

अनादिबोधरूप (anādibodha-rūpa) *adj.* who is of the nature of beginningless enlightenment (one of the six attributes of Śiva) देवमीशानंनारदः … तुष्टाव। अनादिबोधरूपाय नमस्ते AhirbuS. 1. 32.

अनादिबोधायतन (anādibodhāyatana) *n.* abode of beginningless enlightenment अनादिबोधायतनं प्रपद्ये स्वतन्त्रतायाः सदनं प्रपद्ये। हरं प्रपद्येऽहमलुप्तशक्तिम् YātrāPra. 4. 52

अनादिबोधायन (anādibodhāyana) title of a work [pw., *nt.*]

अनादिब्रह्माश्रयत्व (anādibrahmāśraya-tva) *n.* the nature of being that which resides in the eternal Brahman अनाद्यब्रह्मस्य तत्कार्यभ्रमकल्पिताश्रयत्वायोगादनादिब्रह्माश्रयत्वासिद्धेः IṣṭaSi. 326. 7.

अनादिभव (anādi-bhava) *m.* beginningless transmigratory existence सर्वाकारजतादिम गंगमनादिभवभाविभावाभिनिवेशविदूषिताशयैः … हरिहरहिरण्यगर्भादिभिरनधिगतं प्रज्ञापारमिताश्रवणात् सुखेन … अवधार्य AbhisaAlaĀ. 5. 15.

अनादिभवचक्रक (anādibhavacakra-ka) *n.* beginningless cycle of transmigratory existence मन्दप्रवृत्त्यभ्यासेन मन्दताप्यस्ति जन्मिनाम्। ततस्तत्पूर्विका सापा (? पी)त्यनादिभवचक्रकम् PramāVāBh. 56. 10.

अनादिभवनिर्व्यूढ (anādibhava-nirvyūḍha) *adj.* increased or accumulated in the course of the beginningless transmigratory existence एकादशेन्द्रियकृतं पापराशिम् …। अनादिभवनिर्व्यूढं नाशयेत् पूजितः प्रभुः SkandP. ii(2).32.43.

अनादिभवपरंपरा (anādi-bhavaparamparā) *f.* beginningless continuance of transmigratory existence अनादिभवपरंपरोपार्जितानां पाप्मनामपि प्रसुप्तानां संभवात् Bhām. 142.6 (*on* i. 1.20); नावश्यं निःशेषस्य कर्माशयस्य निवृत्तिरनादिभवपरंपराहितस्यानियतविपाककालस्यासंख्येयत्वात् कर्माशयस्य Bhām. 638.14 (*on* iii. 3.32); प्राचां तु कर्माशयानामनादिभवपरंपरासंचितानाम् … भोगेन क्षपयितुमशक्यत्वादशक्योच्छेदः संसारः स्यात् TattvVai. 68. 19 (*on* 2. 13); अनादिभवपरंपरोपात्तं च धर्माधर्मप्रचयम् … प्रक्षिणोति TātpaṬ.(Vā.) 9.10 (*on* i. 1. 1); विद्याया अप्यनादिभवपरंपरायामनुत्पन्नाया उपर्यप्युत्पादे विश्वासकारणाभावात्प्रत्युत नोत्पत्स्यते NyāyMa. 317. 9; अनादिभवपरंपरानुबद्धया प्रकृत्या सह यः पुरुषस्य विवेकाग्रहणलक्षणोऽविष्वग्भावः स एव चेत्र बन्धः SyādvāMañ. 15 (124)

अनादिभवभेत्तृ (anādibhava-bhettṛ) *adj.* destroyer of the beginningless transmigratory existence नन्वस्तु विष्णोरनादिभवभेत्तुर्विश्वसंहारे सामर्थ्यं संहर्तृत्वं कुत इत्यत आह TattvPrakā. 113A. 5 (*on* ii. 3. 13)

अनादिभवरूप (anādibhava-rūpa) *adj.* of the form of beginningless transmigratory existence अनादिभवरूपेण कृतज्ञेन द्विजन्मना। कारितः करसंयोगोऽनयोर्मन्त्रपुरःसरम् MalliC. 3. 74.

अनादिभवसंस्कार (anādibhava-saṁskāra) *m.* impressions (accumulated) through beginningless transmigratory existence अनादिभवसंस्कारविकाराकारवर्जिताः। स्वस्वरूपमयाः सिद्धा(? द्धाः) केवलज्ञानगोचराः KumāPraPra. 79.7.

अनादिभवसंक्लिष्ट (anādibhava-saṅkliṣṭa) *adj.* distressed due to the beginningless transmigratory existence प्रतिपन्नं तैः सम्यग्दर्शनम् …। अनादिभवसंक्लिष्टैर्यन्न प्राप्तं कदाचन PadmP.(Ra.) 123.53.

अनादिभवसंचित (anādibhava-sañcita) *adj.* accumulated in the beginningless transmigratory existence अनादिभवसंचितकर्मणां भोगेन क्षयादपवृज्यते TattvCin. ii(2). 184. 5; अनादिभवसंचितानेकदुरितदोषेणास्तिककामुकस्य … विद्यासाधने श्रवणादौ प्रवृत्तिपर्यन्ता रुचिर्न जायते SiddhāLeSaṁ. 352.4; तेषामनादिभवसंचितनानाविधदुःखजनककर्मवृन्दसामर्थ्यं परिभूय … आत्यन्तिकदुःखनिवृत्तिं तेषां युगपदेव कथं न कुर्यात् ŚivārkaMaDī. i. 110.14 (*on* i. 1. 2); i. 248.13 (*on* i. 1. 21); अनादिभवसंचितानामनन्तानां कर्मणां युगपत्कार्यारम्भकत्वादर्शनात् ŚivārkaMaDī. ii. 47. 24 (*on* ii. 1. 35); अनादिभवसंचितः क्षीणः पुण्यपापराशिरत्यन्तमधिक इति तदभिप्रायेण 'पापकाशिनी' त्युक्तिरुपपद्यते Śivārka-

MaDī. ii. 440. 11 (*on* iv. 1. 13)

अनादिभवाभ्यास (anādibhavābhyāsa) *m.* repetition of beginningless transmigratory existence वसन्ते ... पापकर्मोदयान्मनः । चलितम् ... अनादिभवाभ्यासवशेन च PārśvC. 6. 1296.

अनादिभाज् (an-ādibhāj) *adj.* not having any beginning, not having origination अनादिभागहं ब्रह्म ह्येक आत्मा निरञ्जनः ŚivaP. iii. 8. 13 (303A. 16)

अनादिभाव (anādi-bhāva) *adj.* having a beginningless existence ते ...। व्रजन्ति संसारमनादिभावं त्यक्त्वा चिरं मोक्षपदं विशुद्धम् SkandP. v(3). 9. 51; *m.* I eternal entity नाशस्त्वनादिभावस्य कथं स्यादित्याकाङ्क्षायाम् आह SāṃkhyaPraBh. 55. 34 (*on* 1. 121); संस्कारस्यानादितया आत्मनोऽनादित्व-सिद्धावनादिभावस्य नाशासंभवान्नित्यत्वं सिध्यतीति बोध्यम् SiddhāMu. 24. 20 (*on* 48); 27. 4 (*on* 49); II beginninglessness, cf. **अनादिभावनिवृत्ति**.

अनादिभावत्व (anādibhāva-tva) *n.* the state of being an eternal entity अनादिभावत्वे सति ज्ञाननिवर्त्यमज्ञानमिति चेत् । न । अनादेर्भाव-स्यात्मवन्निवर्त्यत्वेन निवर्त्यत्वानुपपत्तेः TattvPradī.(Ci.) 54. 13; न चासंभवित्वम्, भावाभावविलक्षणस्याज्ञानस्य ... भावत्वोपचारादात्मवदनादिभावत्वेनानिवर्त्यत्वानुमाना-नुपपत्तेः TattvPradī.(Ci.) 57. 17; अनादिभावत्वान्मोक्षस्य नित्यत्वमपि सिद्धम् PrakaVi. 62. 18; दुःखनिवृत्तेरन्तराहित्यात् स्वाभाविकसुखस्यानादिभावत्वादन्त-विरहोपपत्तेश्च न नित्यपुरुषार्थासंभावनेति चेत् — न ŚrutaPra. iA. 72. 21 (*on* i. 1.1); अनादित्वेन च नित्यता सर्वमुक्तावपि तत्सत्त्वमनादिभावत्वात् TattvCin. ii(2). 81. 1; ज्ञानविरोधित्वम्, अनादिभावत्वसमानाधिकरणम्, सकलज्ञान-विरोधिवृत्तित्वात् AdvaiSi. 567. 10.

अनादिभावनिवृत्ति (anādibhāva-nivṛtti) *f.* cessation of beginninglessness प्रागभावासंप्रतिपत्तावनादिभावनिवृत्तौ दृष्टान्तेन भाव्यम् Śivārka-MaDī. i. 92. 13 (*on* i. 1. 1)

अनादिभावनिष्ठ (anādibhāva-niṣṭha) *adj.* present in an originless entity निवर्त्यत्वं वा नानादिभावनिष्ठं नानाद्यभावविलक्षणनिष्ठं वा Nyāyāmṛ. 325A. 8; AdvaiSi. 566. 3.

अनादिभावनिष्ठता (anādibhāvaniṣṭha-tā) *f.* the state of being present in an originless entity मां प्रति हि प्रयुक्तस्य त्वदनुमानस्य मन्मते निर्दोषत्वमपेक्ष्यते, तच्च नास्त्येव, मयोक्तसामग्रीमत्त्वे अनादिभावनिष्ठताया निश्चितत्वेन ममोक्तसंशयाभावात् LaCandr. 566. 30.

अनादिभावनिष्ठत्व (anādibhāvaniṣṭha-tva) *n.* the state of being present in an originless entity मयोक्तसामग्रीमत्त्वेऽनादिभावनिष्ठत्वस्य निश्चि-तत्वेन ममोक्तसंशयायोगात् GuruCandr. ii. 421. 11.

अनादिभावभिन्नत्व (anādibhāvabhinna-tva) *n.* the state of being different from an originless entity अत्राप्याद्य इष्टापत्तिः, द्वितीये अनादिभावभिन्नत्वस्योपाधित्वम् AdvaiSi. 611. 23.

अनादिभावमात्रवृत्तित्व (anādibhāvamātravṛtti-tva) *n.* the state of being that which resides only in an originless entity अनादित्वे सति भावत्वमभावविलक्षणत्वं वा न निवर्त्यनिष्ठमनादिभावमात्रवृत्तित्वात् Nyāyāmṛ. 325A. 7.

अनादिभावमात्रवृत्तिधर्मत्व (anādibhāvamātravṛttidharma-tva) *n.* the state of being a property which exists only in an originless entity अनादित्वे सति भावत्वमभावविलक्षणत्वं वा, न निवर्त्यनिष्ठम् अनादिभाव-मात्रवृत्तिधर्मत्वात् AdvaiSi. 566. 2.

अनादिभावरूप (anādi-bhāvarūpa) *adj.* originless and having the form of existence, originless and existent अनादिभावरूपं यद्विज्ञानेन विलीयते । तदज्ञानम् TattvPradī.(Ci.) 57.11; अनादिभावरूपाज्ञानमेव विश्वो-पादानभूतं शुक्तिरजताद्यपि विचित्रकार्यं जनयेत् ŚrutaPra. iB.28. 23 (*on* i. 1.1); अनादिभावरूपस्य न निवृत्तिरिति चेन्न । अनिर्वचनीयत्वादज्ञानस्य NyāySu.(Ja.) 19B. 11 (*on* i. 1.1); अवश्यं तावदज्ञानमनादिभावरूपं विज्ञानेनाप्यमभ्युप-गन्तव्यम् NyāySu.(Ja.) 62A. 13 (*on* i. 1.1); (विकल्पः) न द्वितीयः, अना-दित्वस्यासंभवित्वात् । अनादिभावरूपस्य विज्ञानविलापनासंभवाच्च, ब्रह्मवत् Vādā. 18. 5; भावरूपत्वात् तिरोधानं संभवतीति चेन्न । तथा सत्यनादिभावरूपस्यात्म-वन्नित्यत्वापातात् SarvaDaKau. 138. 4; अविद्या च न विद्याभावः । किन्तु अनादिभावरूपमज्ञानम् SarvaDaKau. 139.4; अनादिभावरूपस्यान्यत्राद्दृष्टापि निवृत्तिः श्रुतिबलात् Nyāyāmṛ. 290B.10; चैतन्यम् ... अनादिभावरूपाज्ञानस्य चिन्मात्रनिष्ठत्वेन व्यापकत्वात् तदवच्छिन्नं सत् ... साक्षिरूपेणैवावतिष्ठते VīraMi. (Bhakti.) 168. 16.

अनादिभावरूपत्व (anādibhāvarūpa-tva) *n.* the state of being originless and existent अध्यासो न निवर्तते, अनादिभावरूपत्वात्, आत्मवत्, इति चेत्, न VivaPraSaṃ. 118. 18; केयमविद्या नाम, अनाद्यनिर्वाच्या वा, अनादिभावरूपत्वे सति विज्ञानविलाप्या वा Vādā. 17. 7; यच्चोक्तमनादिभावरूपत्वे सति ज्ञाननिवर्त्यत्वम् ... अविद्यालक्षणम् Nyāyāmṛ. 297A. 6; अथ — केयमविद्या, न तावदनादिभावरूपत्वे सति ज्ञाननिवर्त्या सेति AdvaiSi. 544. 2.

अनादिभूत (anādi-bhūta) *adj.* [*f.*-ā] 1 which or who is beginningless, existing since time immemorial यदनादिभूतं यदनन्तरूपं यद्विज्ञानरूपं यद्वेवाः सर्वे ब्रह्म ज्येष्ठमुपासते Varadottaratāpanīyopaniṣad 4. 2; सकलजगतामादिरनादिभूतस्तः ... विष्णुः ViṣṇuP. iv. 1. 5; ते द्वे ज्ञानैश्वर्ये ईश्वर-सत्त्वे वर्तमाने अनादिभूते RājMār. 11. 24; सितेन भस्मना कुर्याल्ललाटे तु त्रिपुण्ड्र-कम् । योऽसावनादिभूतान् हि लोकानाप्तो मृतो भवेत् ŚivaP. i. 24. 21 (30B. 13); अनादिभूता श्रुतिरस्ति ManvaMu. 142. 9 (*on* 3. 281); एते सत्त्वरजस्तमोगुणा अनादिभूताः SiddhāTa. 49 14; 2 which is non-initial अनादिभूतं वस्त्वपेक्ष्य तत्पूर्वस्तुन आदित्वं न भवति Nyās. i. 134. 2 (*on* i. 1. 71)

अनादिभूतक्रियाक्षण (anādibhūta-kriyākṣaṇa) *m.* non-initial moment of an action बहूनां(? नाम्) क्रियाक्षणानामादिमध्यान्तभावे सत्यनादिभूत-क्रियाक्षणव्यवच्छेदादादिभूतो यः क्रियाक्षणस्तदादि कर्मेति युक्तं प्रतिपादयितुम् Nyās. i. 771. 22 (*on* iii. 4. 71)

अनादिभूतत्व (anādibhūta-tva) *n.* the state of being non-initial आदेरनादिभूतत्वापेक्षत्वादादिशब्दस्य तत्राप्रवृत्तिः Nyās. i. 771. 25 (*on* iii. 4. 71)

अनादिभूतभूतेश (anādibhūta-bhūteśa) *m.* lord of the beings who exist from time immemorial अनादिभूतभूतेशमहिमा वागगोचरः MahNirvāT. 14. 20.

अनादिभूपति (anādi-bhūpati) *m.* kings Ana etc. (वामराशिनामा विप्रः) सः ... पौषधशालायाः पुरतः स्थितोऽनादिभूपतिवन्द्विभिरधीयमानं योगशास्त्र-माकर्ण्याशठत्वेदमपाठीत् PrabaCin. 92. 7.

अनादिभेदप्रयोजकत्व (anādibheda-prayojaka-tva) *n.* the state of having beginningless distinction as the cause भेदकत्वादिकम् ... तच्च न संभवति, सादेस्तस्यानादिभेदप्रयोजकत्वस्वकार्योपादानत्वायसंभवात् LaCandr. 572. 8.

अनादिभेदभ्रम (anādibheda-bhrama) *m.* illusion of beginningless distinction नाप्यनादिभेदभ्रमवासनादोषः Nyāyāmṛ. 126B. 8.

अनादिभेदवासना (anādi-bhedavāsanā) *f.* beginningless impression of distinction एतद्विरोध्यनादिभेदवासनानिरसनायास्यार्थस्यानवरत-भावना निदिध्यासनम् BrahmSūBh.(Rā.) 6. 19 (*on* i. 1. 1); अनादिभेद-वासनादिरूपाविद्याख्यो दोषः BrahmSūBh.(Rā.) 18. 20 (*on* i. 1. 1); अनादि-भेदवासनाख्यदोषजातं प्रत्यक्षम् VedāSaṃ. 102. 17.

अनादिभेदाप्रहाण (anādibhedāprahāṇa) *n.* non-abandonment of the beginningless distinction सत्त्वम् ... संहतेषु वर्तते चेत् — अनादिभेदा-प्रहाणेन संहतत्वात् ... ब्रह्म सच्छब्दवाच्यमुपादानं स्यात् ŚrutaPra. ii. 177. 2 (*on* i. 4. 28)

अनादिभेदोपाधित्व (anādibhedopādhi-tva) *n.* the state of having the attribute of beginningless distinction जन्यत्वेनावगतस्यान्तःकरणस्यानादिभेदोपाधित्वायोगाच्च VīraMi.(Bhakti.) 18. 10.

अनादिभ्रमजनकत्व (anādibhramajanaka-tva) *n.* the state of being the producer of the beginningless illusion स्वरूपतोऽनादित्वं प्रवाह-रूपेणानादिभ्रमजनकत्वं चाविद्यादोषस्य स्वाभाविकत्वम् GuruCandr. ii. 295. 22.

अनादिभ्रमपरंपरा (anādibhrama-paramparā) *f.* series of beginningless illusions न चान्तःकरणमुपादानम् ... अनादिभ्रमपरंपरानुपादान-त्वाच्च AdvaiSi. 573. 7; प्रवाहरूपेणानादिभ्रमपरंपरायां न मन उपादानम् GuruCandr. iii. 3.7.

अनादिभ्रमसंतति (anādibhrama-santati) *f.* series of beginningless illusions पूर्वदृष्टत्वं च भ्रमविषयस्यानादिभ्रमसंततावेति गमयितव्यम् PrakaVi. 7.20.

अनादिभ्रमसिद्ध (anādibhrama-siddha) *adj.* established by the beginningless illusion अनादिभ्रमसिद्धाभेदनिबन्धनोऽयं प्रयोगः AdvaiSi. 835.12.

अनादिभ्रान्ति (anādi-bhrānti) *f.* beginningless illusion परिणाम-वादस्यानादिभ्रान्तिसिद्धत्वेन शिष्यबुद्ध्यारूढत्वेन प्रथमं तद्वादमाश्रित्यैव समाधानो-चित्यादन्यथा शिष्यव्याकुलतापत्तेः GuruCandr. ii. 205.22.

अनादिम (an-ādima) *adj.* [*f.*-ā] A subsequent (*lit.* not the first) विचित्रमधुनामनागियमनादिमा या न मा समुत्सुकमनारतं कलयितुं सुखं मुञ्चति RasiRañ. 102 (comm. अनादिमा आदिमा न प्रौढा); B first or earliest (*lit.* before whom there is nobody) चकार यन्मेरुमनादिमः पुमान् सुवर्णरूपं सुरसद्मां वशे Acyutarā. 3. 50 (comm. न विद्यते आदिमः यस्मात्सः अनादिमः सर्वादिभूत इत्यर्थः)

अनादिमत् (an-ādima(n)t) *adj.* [*f.*-tī] having no beginning

beginningless अनादिमांस्त्वं विभुत्वेन वर्तसे ŚvetāU. 4.4; अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते MahāBhā. vi. 35.12 = BhagGī. 13.12; तद् सरः समतिक्रम्य ··· व्योम निष्पयोदमनादिमत् Rāmā. iv. 42.35; अनादिमति संसारे स्त्रीपुरुषा अन्योऽन्यं रूपाभिरामास्ते च वेदनास्वादगर्धात् AbhidhKoBh. 15.11 (on 1.22); तासु ··· लक्षं च पुत्राणां भगवानखिलमूर्तिरनादिमानजनयत् ViṣṇuP. iv. 15.36; अहर्मुखे प्रबुद्धस्तु जगदादिरनादिमान् MārkP. 46.8; KūrmaP. 41.13 (1.4); SkandP. v(2).5.12; VarāP. 211.72; भवानीशो ना(? ऽना)दिमान् धामराशिर्ब्रह्मा लोकानां त्वं कर्ता त्वादिसर्गः VāyuP. i. 24.262(? 162); LiṅgaP. i. 21.85; BrahmāṇḍP. iii. 3.109; इति मायादिकालान्तप्रवर्तकमनादिमत्। कर्म MṛgendraT. i. 8.6; बन्धावस्था पूर्वं प्रकल्प्या, अनादिमती अन्तवती च GītāBh.(Śaṅ.) 364.18 (on 13.2); 380.10 (on 13.12); त्रय्येवानादिमती नाथर्वणश्रुतिः NyāyMañ. i. 232.18; अनादिमदहं ब्रह्म मामनर्च्य न मुच्यते SkandP. iv. 31.14; सर्गपरंपराः। अनादिमत्योऽविरतं प्रस्फुरन्ति तरङ्गवत् YogVā. iv. 47.19; स्वतन्त्रोऽनादिमान् कर्ताध्येषणीयो महेश्वरः ĪśānŚiPa. ii. 1.42; अनादिमानेष कालः GrahaGa. 7.16(1.25); आदिरस्य विद्यत इत्यादिमत् तद् न भवतीत्यनादिमत् VedāntKa. 376.26 (on iii. 2.21); अनादयो जिना धर्मस्तदाख्यातोऽप्यनादिमान् SamarāSam. 9.475; 9.637; अकारणमकार्यं च तन्त्रेणानादिमत् SiddhāSi. iii. 2.6.

अनादिमतिभावित (anādi-matibhāvita) *adj.* caused by the intellect since time immemorial बिम्बवद्दृश्यते चित्तमनादिमतिभावितम्। अर्थाकारो न चार्थोऽस्ति यथाभूतं विपश्यतः LaṅkāSū. 6.2 (91.14)

अनादिमत्त्व (anādimat-tva) *n.* beginninglessness बद्धमुक्तयोश्च किंचिज्ज्ञत्वसर्वज्ञत्वादिभिर्मुक्तानां नित्यानां च विशुद्धेरादिमत्त्वानादिमत्त्वाभ्यामेव विभक्तधीसंभवः NyāyPari. 498.17.

अनादिमद्व्यवहृति (anādimad-vyavahṛti) *f.* usage prevalent since time immemorial उपलप्स्यामहे शब्दादेवैनामिति चेन्मतम्। अनादिमद्व्यवहृतेः संबन्धस्य च सिद्धितः BṛĀraUBhVā. iv. 3.785.

अनादिमध्य (an-ādimadhya) *adj.* [*f.* -ā] not having either beginning or middle सर्वं प्रशान्तमजमेकमनादिमध्यमाभास्वरं स्वदनमात्रमचैत्यचिह्नम्।··· तदोमितीदम् MahāU. 4(9); अनादिमध्यान्तं (v.l. अनादिमध्यं तम्) अपारयोगं लोकस्य सेतुं प्रवदन्ति विप्राः MahāBhā. vi. 61.70; अनादिमध्यं महतः परं ध्रुवं प्रधानमेतत् प्रवदन्ति सूरयः TattvSa.(1) 118.15; सर्वेश्वरादन्यदनादिमध्यात्। यस्मान्न किंचित् तम् ··· संश्रयमेमि विष्णुम् ViṣṇuP. iv. 2.128; v. 30.79; हरिः ··· अनादिमध्यो भगवाननन्तः MatsyaP. 245.19; VāmaP. 29.19; श्रुत्युक्तमव्ययमनन्तमनादिमध्यम् ··· यद् ब्रह्म तत्त्वमसि SarvaVeSāSam. 780; ज्योतिःस्वरूपमनादिमध्यम् ··· शिवम् SkandP. v(3). 177.17; त्वमेव विश्वेश्वरि ···। अनादिमध्यानिधना GaṇeP. ii. 95.12; चिद्व्योम केवलमनन्तमनादिमध्यं ब्रह्मेति भाति निजचित्तवशात्स्वयंभूः YogVā. iii. 2.56; iii. 80.62.

अनादिमध्यनिधन (an-ādimadhyanidhana) *adj.* [*f.*-ā] not having beginning, middle and end (i.e. eternal) पुरा वसुमतीपालो यज्ञं चक्रे दिदृक्षया। अनादिमध्यनिधनं देवं नारायणं प्रति MahāBhā. xii. 64.11; पूजयामास देवेशम् ··· अनादिमध्यनिधनं लोककर्तारमव्ययम् MahāBhā. xii. 803*; SkandP. ii(9). 5.10; ब्रह्म सनातनम्। अनादिमध्यनिधनम् ··· नित्यं च यद्वदन्ति शमात्मकाः MahāBhā. xii. 290.97; विभुः। अनादिमध्यनिधनो न विघ्नैर्न कुतो ह्यसौ MahāBhā. xiii. App. I. 3A (86); अनादिमध्यनिधनः सोऽन्तरात्मास्मि शाश्वतः MahāBhā. xiii. App. I. 3A (410); कालो हि नाम (भगवान्) स्वयंभुरनादिमध्यनिधनः SuśruS. i. 6.3; वसुधापि लब्धकामा ··· देवदेवं च तुष्टाव। ··· देवदेव। वासुदेव।··· अनादिमध्यनिधन ViṣṇuSm. 98.13; भगवाननादिमध्यनिधनो देवकीगर्भमवततार वासुदेवः ViṣṇuP. iv. 15.30; अनादिमध्यनिधनं सदसन्न सदेव यत् MārkP. 23.43; अनादिमध्यनिधनमपरिमाणमव्यक्तवियति भुवनकोशे ··· लोकपुर्यः AvantiKa. 217.4; सकलार्थविग्रहतया विवर्तते यदनादिमध्यनिधनं किलाक्षरम् HarVi. 6.55; अनादिमध्यनिधनाविद्यासंदूषितात्मनः। ब्रह्मणो जायते व्योम TaiUBhāVā. 73.1(2); एतद्भगवतो रूपम् ···। अनादिमध्यनिधनं नित्यं वाङ्मनसः परम् BhāgP. ii. 10.34; स्थानं प्राहुरनादिमध्यनिधनं यस्मादिदं जायते KūrmaP. 273.16 (1.25); अनादिमध्यनिधन त्रैलोक्यप्रतिपालक। इमां गृहाण तुलसीं विवाहविधिनेश्वर SkandP. ii(4). 31.22; अनादिमध्यनिधनां वल्लभां ते ददाम्यहम् SkandP. ii(4). 31.23; अनादिमध्यनिधन सहस्रसंभव विश्वं त्वामाहुः VāmaP. 26.1(2); 32.17; येन सृष्टमिदं सर्वं त्रैलोक्यं सचराचरम्। अनादिमध्यनिधनं दुर्विज्ञेयं सुरासुरैः VarāP. 210.28; ब्रह्मणे ··· अनादिमध्यनिधनसर्वज्ञाय नमो नमः BṛDharmaP. i. 13.16; नताः स्मो विघ्नकर्तारम् ··· अनादिमध्यनिधनम् GaṇeP. ii. 40.24; पाति यो विश्वम् ··· अनादिमध्यनिधनः ··· विनायकः GaṇeP. ii. 78.9; अक्षरं परमं ब्रह्म ···। अनादिमध्यनिधनमप्रतर्क्यं सनातनम् ŚivaP. vii(1). 19.17 (522A.16); रूपमनादिमध्यनिधनस्येदं हरेर्मानुषम् Subhāṣi. 2573; *m.* I an epithet of Śiva (*lit.* not having beginning, middle and end) अनादिमध्यनिधनः ···। एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम् LiṅgaP. i. 98.37; अनादिमध्यनिधनो गिरिशः ···। एवं नाम्नां सहस्रेण तुष्टाव गिरिजापतिम् SaurP. 41.21; ŚivaP. iv. 35.9 (391A.5); II an epithet of Viṣṇu (*lit.* not having beginning, middle and end) अनादिमध्यनिधनो वृद्धिक्षयविवर्जितः।··· इति ··· विष्णोर्नामसहस्रकम् SātvaT. 6.187.

अनादिमध्यनिष्ठ (an-ādimadhyaniṣṭha) *adj.* not having beginning, middle and end अनादिमध्यनिष्ठस्य शिवस्य परमेष्ठिनः। बुद्धि सूते नियोगेन प्रकृतिः पुरुषस्य च LiṅgaP. ii. 10.7.

अनादिमध्यपर्यन्त (an-ādimadhyaparyanta) *adj.* not having beginning, middle and end चिन्मात्रं चैत्यरहितमनन्तमजरं शिवम्। अनादिमध्यपर्यन्तं यदनादि निरामयम् MahāU. 2(6); YogVā. iii. 9.50; ऋतमेकाक्षरं ब्रह्म ···। अनादिमध्यपर्यन्तं न देवा नर्षयो विदुः MahāBhā. xii. 73*(6); यदेतदद्भुतं देव मया दृष्टं त्वदाश्रयम्। अनादिमध्यपर्यन्तं किं तच्छंसितुमर्हसि MahāBhā. xiii. App. I. 3A(388); xiii. App. I. 11(148); असौ ··· जनयति ··· अनादिमध्यपर्यन्तं कदाचिदमलं पयः YogVā. iv. 44.34; iii. 62.15.

अनादिमध्यान्त (an-ādimadhyānta) *adj.* [*f.*-ā] not having beginning, middle and end मत्वा धीरो न शोचति ··· कविं पुराणम् ···। अनादिमध्यान्तमनन्तमव्ययम् NāraPaU. 9.17; सहस्रशीर्षं पुरुषं पुराणमनादिमध्यान्तमनन्तकीर्तिम्।··· शरणं प्रपद्ये MahāBhā. v. 69.6; अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम्। पश्यामि त्वाम् (कृष्णम्) MahāBhā. vi. 33.19 = BhagGī. 11.19; कृष्णः ··· स्थिताश्च सर्वे त्वयि भूतसंघाः कृत्वाश्रयं त्वाम् ···। अनादिमध्यान्तमपारयोगं लोकस्य सेतुं प्रवदन्ति विप्राः MahāBhā. vi. 61.70; अनादिमध्यान्तमजमवृद्धिक्षयमच्युतम्। प्रणतोऽस्मि ViṣṇuP. i. 17.15; तस्मादहम् ··· व्रजामि ···। अंशावतारं पुरुषोत्तमस्य ह्यनादिमध्यान्तमजस्य विष्णोः ViṣṇuP. v. 17.33; BrahmP. 191.33; अनादिमध्यान्तमपाञ्चभौतिकम् ··· प्रभावम् ··· कथमम्ब वर्णये BrahmāṇḍP. iii. 13.27; आदिश्च मध्यं च अन्तश्च न विद्यते यस्य सः अयम् अनादिमध्यान्तः तं त्वाम् अनादिमध्यान्तम् GītāBh.(Śaṅ.) 311.3 (on 11.19); अनादिमध्यान्तम् — आदिमध्यान्तरहितम् GītāBh.(Rā.) 546.24 (on 11.19); तस्मादनादिमध्यान्तं विज्ञाय परमेश्वरम्।··· समाराधय यत्नतः KūrmaP. 168.8 (1.15); 585.8 (2.18); जयानादिमध्यान्त विज्ञानमूर्ते KūrmaP. 204.16 (1.17); यजामहे दिव्यं परं पुराणमनादिमध्यान्तमनन्तरूपम् VarāP. 120.12; अनादिमध्यान्तमजं परेशं रूपादिहीनं प्रणताः स्म देवम् BṛNāraP. 15.64; शान्तमनादिमध्यान्तं लक्ष्मीकान्तमनन्तकम्।··· तं प्रणेमुः सुराः DevīBhāP. ix. 41.19; ईश्वरं ब्रह्मरूपिणम्। ध्यायेदनादिमध्यान्तमानन्दादिगुणालयम् SaurP. 12.57; यदैवाभ्युदिताविद्या त्वहंत्वादिमयी मुधा। तदैवानादिमध्यान्ता भ्रमस्यानन्ततोदिता YogVā. iii. 121.17; प्रधानमव्यक्तमित्यनर्थान्तरम्। तच्चानादिमध्यान्तमनवयवम् SyādvāMañ. 15(34); देवं स्तोतुमुपचक्रमे ··· स्वयंभुवम् ··· अनादिमध्यान्तम् TīrthaKa. 89.1; KumāDeC.(So.) 14.6; SiṁhāDvā. 235.11.

अनादिमध्यान्तत्व (anādimadhyānta-tva) *n.* the state of being devoid of beginning, middle and end न ··· व्यज्यत इत्यव्यक्तम्। श्रोत्रादिभिरिन्द्रियैर्न गृह्यत इत्यर्थः। कस्मात् अनादिमध्यान्तत्वान्निरवयवत्वाच्च TattvSa.(1) 118.11.

अनादिमध्यान्तमहेश्वर (anādimadhyānta-maheśvara) *m.* great lord (Śiva) who is without beginning, middle and end व्योमप्रकाशो भगवानमेयो ह्यनादिमध्यान्तमहेश्वरोऽसौ ĪśānŚiPa. ii. 2.17.

अनादिमध्यान्तरहित (anādi-madhyāntarahita) *adj.* beginningless and devoid of middle and end अनादिमध्यान्तरहितम् ··· तं वन्दे BṛNāraP. 15.83.

अनादिमध्यान्तविहीन (anādi-madhyāntavihīna) *adj.* beginningless and devoid of middle and end नमाम्यहं देववरम् ···। त्वाम् ··· अनादिमध्यान्तविहीनरूपम् SaurP. 54.10.

अनादिमनस् (anādi-manas) *n.* mind which has no beginning (due to the beginningless impressions) वासनाः ··· सन्त्येवाद्येषजीवानामनादिमनसि स्थिताः AnuVyā. 38B.2 (on 3.2)

अनादिमनोगत (anādimano-gata) *adj.* existing in the mind which has no beginning (due to the beginningless impressions) अनादिमनोगतान् संस्कारान् स्वेच्छामात्रेण प्रदर्शयति BrahmSūBh.(Ma.) 48A.6 (on iii. 2.3)

अनादिमनोग्रहण (anādimano-grahaṇa) *n.* acceptance of the beginningless mind स्वशिरश्छेदादीनामसत्त्व(? त्त्व)निरासायानादिमनोग्रहणम् TattvPrakā. 150A.7 (on iii. 2.3)

अनादिमल (anādi-mala) *m.* beginningless impurity जयानादिमलाज्ञानतमःपटलचन्द्रिके (देवि) ŚivaP. vii(1). 15.28 (518A.5); अनादिमलकर्मवासनारूढदेवादिशरीराभिमानप्रवाहसिद्धान् ··· संसाररुजं द्रावयत्युपासकानामिति

-रुद्रः BrahmSūBh.(Śrī.) ii. 438.7 (*on* iv. 1.12)

अनादिमलभोगान्त (anādimalabhogānta) *adj.* ending with the experience of the beginningless impurity (i. e. ending when the experience of the beginningless impurity ends) पुण्यपापात्मकं कर्म सुखदुःखफलं तु यत् । अनादिमलभोगान्तमज्ञानात्मसमाश्रयम् ŚivaP. vii(1). 5.26 (507A. 6)

अनादिमलमुक्तत्व (anādimalamukta-tva) *n.* the state of being free from the beginningless impurity अनादिमलमुक्तत्वान्निर्मलत्वं स्थितं शिवे IśānŚiPa. ii. 1. 13.

अनादिमलसंश्लेष (anādimala-saṁśleṣa) *m.* contact with the beginningless impurity अनादिमलसंश्लेषप्रागभावात् स्वभावतः। अत्यन्तपरिशुद्धात्मेत्यतोऽयं शिव उच्यते ŚivaP. vi. 9. 7 (480B. 12); vii(1). 32.29 (538B. 7)

अनादिमलसंघात (anādimala-saṅghāta) *m.* A aggregate of beginningless impurities अनादिमलसंघातहरणैकपटीयसीम् । अन्नगङ्गामपि नदीमन्यामपि गृणन्त्यहो YātrāPra. 7. 168; B heap of dirt (accumulated) for a long time, YātrāPra. 7. 168.

अनादिमलसंबन्ध (anādimala-sambandha) *m.* contact with the beginningless impurity अनादिमलसंबन्धान्मलिनत्वमणौ स्थितम् IśānŚiPa. ii. 1. 13; जीवेश्वरयोः ... वैषम्यमनादिमलसंबन्धभावाभावाभ्यां संभवति BrahmSū-Bh.(Śrī.) i. 351.1 (*on* i. 2. 11)

अनादिमलहीन (anādi-malahīna) *adj.* bereft of impurity from time immemorial अनादिमलहीनाय ज्ञानगम्याय ते नमः KūrmaP. 93.10 (1. 10) = SaurP. 23.27.

अनादिमलापेत (anādi-malāpeta) *adj.* bereft of impurity from time immemorial अथानादिमलापेतः सर्वकृत्सर्वविच्छिवः। पूर्वव्यत्याश्रितस्याणोः पाशजालमपोहति MṛgendraT. i. 2.1 (comm. अनादिकृत्वा मलापेतः ... परमेश्वरः, *but* also अनादिश्चासौ मलापेतः -- मुक्ताणुवर्गः, अनादेर्मलादपेतः ... मन्त्रमन्त्रेश्वरमन्त्रमहेश्वरवर्गः)

अनादिमहाजनपरिग्रह (anādi-mahājanaparigraha) *m.* acceptance by great persons since time immemorial अनादिमहाजनपरिग्रहादनादिवेदप्रवाहप्रामाण्यावधारणेऽपि तन्निर्वाहकेतरानपेक्षमूलभूतप्रमाणाभावेनानाश्वास एव TattvCin. iv(1). 370. 1.

अनादिमहामूलतमस् (anādimahāmūla-tamas) *n.* darkness (i.e. ignorance) which is beginningless and firm-rooted नमोऽनादिमहामूलतमःस्तोमौघभानवे SkandP. ii(2). 27. 44.

अनादिमहालिङ्ग (anādi-mahāliṅga) *n.* great Liṅga existing from time immemorial अथानादिमहालिङ्गं पूर्वस्मिन् गौडमण्डले। गताः स्म पूजितुं देवं मानवा उग्रमाधवम् BallāC. 34. 10.

अनादिमात्रविश्रान्तत्व (anādimātraviśrānta-tva) *n.* the state of being that which depends on only that which is beginningless न चास्मिन् सादौ पूर्वप्रयोगमपेक्ष्य उत्तरोत्तरप्रयोगो वक्तुं शक्यते, तस्यानादिमात्रविश्रान्तत्वात् AdvaiSi. 455.9.

अनादिमात्रवृत्तित्व (anādimātravṛtti-tva) *n.* the state of being present in only that which is beginningless अनादित्वं वा नावरणनिष्ठमनादिमात्रवृत्तित्वात् प्रागभावत्ववत् Nyāyāmṛ. 325B. 6 = AdvaiSi. 566. 4.

अनादिमाया (anādi-māyā) *f.* A beginningless power of illusion अनादिमायया सुप्तो यदा जीवः प्रबुध्यते GauḍKā. 1. 16; स एव भिन्नस्त्वमनादिमायया द्विधेव बिम्बं सलिले विवस्वतः PraboCan. 6. 26 (114. 9); अनादिमायया भ्रान्ता जीवेशौ सुविलक्षणौ। मन्यन्ते PañcDa. 6. 223; B beginningless (divine) wisdom or power विष्णोः प्रज्ञप्तिरेवैका शब्दैरेवाभिधीयत इत्यतो मायाख्यहरिवित्येतदुपपन्नम्।... अनादिमायया सुप्तो यदा जीवः प्रबुध्यते।... इति पूर्वश्लोके अनादिमायया परमेश्वरप्रज्ञया तदिच्छया वा जीवजातस्य -- सुप्तत्वं तथैव... प्रबोधमभिधाय Nyāy-Su.(Ja.) 222B.13 (*on* i. 4.6); C beginningless primordial matter or Prakṛti, cf **अनादिमायानिबन्धन, °परियुक्त, °वृत, °वृतत्व.**

अनादिमायानिबन्धन (anādimāyā-nibandhana) *adj.* dependent on beginningless *māyā* or primordial matter (जीवः) अनादिमायानिबन्धनेनाज्ञानेनावृतज्ञानत्वात् ... पदार्थावधारणे मुह्यति VedāntKau. 200.19 (*on* ii. 2. 28)

अनादिमायानिशा (anādimāyā-niśā) *f.* night in the form of beginningless illusory power भगवत्कैङ्कर्यैकरतेः परमैकान्तिनोऽनादिमायानिशावसानेऽनन्तमोक्षावसरप्रारम्भे च प्रत्यूषवदाश्रितोऽयमायुःशेषकालः PañcRāRa. 167. 6.

अनादिमायापरियुक्त (anādimāyā-pariyukta) *adj.* enveloped by the beginningless *māyā* or primordial matter अनादिमायापरियुक्तरूपं त्वेनं विदुर्वै भगवत्प्रसादात् SiddhāRa. 2(20. 13) (VedāntRaMañ. अनाद्या -- गुणमय्या मायया प्रकृत्या)

अनादिमायामेघाली (anādimāyā-meghālī) *f.* multitude of clouds in the form of beginningless illusory power गच्छन्ति गतिं त एव शुक्लामञ्जिवं परकारणेन याति। येषां तनुरिव्यनादिमायामेघालीविततावि कल्पकाली RāmC. 14. 20.

अनादिमायामोहाली (anādimāyā-mohālī) *f.* multitude of delusions (of mind) caused by beginningless illusory power गच्छन्ति गतिं त एव शुक्लामञ्जिवं परकारणेन याति। येषां तनुरिव्यनादिमायामेघाली(v. l. °मोहाली)-वितता विकल्पकाली RāmC. 14. 20.

अनादिमायायोग (anādimāyā-yoga) *m.* contact with the beginningless illusory power or nescience तयोगेन अनादिमायायोगेन भवन्ति जीवादयो नित्याः SanatBh. 207. 18 (*on* 1. 20); एकस्यैव परमात्मनोऽनादिमायायोगेन बहुरूपत्वमुक्तम् SanatBh. 216.6 (*on* 1. 21)

अनादिमायावृत (anādimāyāvṛta) *adj.* enveloped in the beginningless *māyā* or primordial matter जीवस्तु नित्यज्ञानरूपोऽपि अनादिमायावृतज्ञानधर्मो बन्धमोक्षार्हः VedāntKau. 52. 13 (*on* i. 2. 6); अनादिमायावृतापहतपाप्मत्वादिगुणस्वरूपो जीवः VedāntKau. 94. 6 (*on* i. 3. 20)

अनादिमायावृतत्व (anādimāyāvṛta-tva) *n.* the state of being enveloped in the beginningless *māyā* or primordial matter जीवस्य -- ब्रह्माभिन्नत्वम्। तस्यानादिमायावृतत्वात्तादृशभेदज्ञानं नास्ति VedāntKau. 25. 24 (*on* i. 1.7)

अनादिमायासंबन्ध (anādimāyā-sambandha) *m.* association with the beginningless illusion (आत्मा) अनादिमायासंबन्धात् क्षीरोदकवत् समुदाचारवृत्तितां न लभते SarvaDaSaṁ. 16.877.

अनादिमायासंभिन्ना (anādimāyā-sambhinnā) *f.* an epithet of Pārvatī (*lit.* intermingled with the beginningless divine power of illusion) अनादिमायासंभिन्ना त्रितत्त्वा प्रकृतिग्रहा।-- एवं नाम्नां सहस्रेण स्तुत्वासौ हिमवान् गिरिः KūrmaP. 110. 11 (1. 12)

अनादिमायैकनिबन्धनत्व (anādimāyaikanibandhana-tva) *n.* the state of being brought about by the beginningless nescience alone इतश्च निर्भेदकमात्मतत्त्वं निरूपणे कारणकार्यतादेः। अनादिमायैकनिबन्धनत्वादसंभवात् SaṁkṣeŚā. 3. 198 (ii. 266. 15)

अनादिमिथ्याज्ञानप्रवाह (anādimithyājñāna-pravāha) *m.* continuous flow of the beginningless erroneous knowledge नैयायिकानामप्यनादिमिथ्याज्ञानप्रवाहः परमाणुश्यामता च निवर्तते NyāySu.(Ja.) 19B. 10 (*on* i. 1.1)

अनादिमिथ्याज्ञानोपादानत्व (anādimithyājñānopādānatva) *n.* material causality of the beginningless false knowledge अनादिमिथ्याज्ञानोपादानत्वं तु पूर्वमेव निरस्तम् BrahmSūBh.(Rā.) 95.14 (*on* i. 1.1)

अनादिमिथ्यादर्शन (anādi-mithyādarśana) *n.* erroneous knowledge since time immemorial तथा निर्विचिकित्सादाम्नायादवगतात्मतत्त्वस्यानादिमिथ्यादर्शनाभ्यासोपचितबलवत्संस्कारसामर्थ्यान्मिथ्यावभासानुवृत्तिः BrahmSi. 35. 4; 35. 15.

अनादिमिथ्यादर्शनवासना (anādi-mithyādarśanavāsanā) *f.* past mental impression of false view or outlook from time immemorial तेषामनादिमिथ्यादर्शनवासनादूषितमतितया यथास्थितवस्तुतत्त्वानवबोधेन बुधरूपत्वाभावात् SyādvāMañ. 23(40)

अनादिमिथ्यावासना (anādi-mithyāvāsanā) *f.* beginningless erroneous mental impression श्रवणमात्रान्न वैराग्यसिद्धिः, किं तु साक्षात्कारात्। साक्षात्कारश्च झटिति न भवति, अनादिमिथ्यावासनाया बलवत्त्वात् SāṁkhyaPraBh. 75. 9 (*on* 2. 3)

अनादिमिथ्याशरीर (anādi-mithyāśarīra) *n.* beginningless unreal body न च ... न सिद्धसाधनमिति वाच्यम्, तथाप्यनादिमिथ्याशरीरमादायार्थान्तरसंभवात् सिद्धसाधनपदस्योद्देश्यासिद्धिपरत्वात् विग्रहं विनापि सृष्ट्वादिसंभवेनाप्रयोजकत्वमपि बोध्यम् LaCandr. 741. 37.

अनादिमीमांसापरिशोधित (anādimīmāṁsā-pariśodhita) *adj.* examined by the science of interpretation since time immemorial तदवधारणं चानादिमीमांसापरिशोधितन्यायाद्वेद TattvCin. iv(1). 342. 1; वेदे त्वनादिमीमांसापरिशोधितत्तर्कैरर्थावधारणमित्याहुः SiddhāMu. 52. 23 (*on* 84)

अनादिमीमांसासिद्ध (anādimīmāṁsā-siddha) *adj.* established by the science of interpretation since time immemorial एतेन वेदान्तानां सावकाशत्वाव्यवस्थितार्थत्वशङ्कापि निरस्ता।-- अनादिमीमांसासिद्धैर्न्यायैः -- अर्थाव्यवस्थितिसिद्धेश्च ŚivārkaMaDī. ii. 4. 13 (*on* ii. 1. 1)

अनादेय (an-ādeya) *adj.* [*f.* -ā] **1A** (person) not fit to be accepted **B** (person) not to be trusted **2AI** not fit to be taken (as food) **II** which should not be taken in, to be avoided **BI** (view, theory etc.) to be rejected, to be discarded **II** not to be used **CI** not fit to be taken **II** not fit to be received **3** not fit to be taken (as tax etc. which is not due) **4A** from whom (property is) not to be taken away, not to be deprived (of property) **B** (field) not to be taken away (i. e. not transferable) **5** (Law) inadmissible (as a law suit) **6** which cannot be secured or obtained **1A** (person) not fit to be accepted अथ चेलक्षयेदेनं मर्यादां क्षत्रियब्रुवः । अप्रशस्यस्तदूर्ध्वं स्यादनादेयश्च संसदि MahāBhā. xii. 97 9; **1B** (person) not to be trusted सर्वदानादेयेषु प्रतिकूलवर्तिषु जडेषु रतिं कुर्वाणः … धीवर इवोपलक्ष्यसे NalaCam. 3. 16(11) (comm. अनादेयेष्वश्रद्धेयेषु जडेषु); **2AI** not fit to be taken (as food) (उक्षाणः) अनादेयानि धासानि विघसन्ति स्वकामतः BṛParāSm. 5. 49; **2AII** which should not be taken in, to be avoided मधुविषसंपृक्तान्नमनादेयम् NyāyBh. 9. 20 (*on* i. 1. 2); **2BI** (view, theory etc.) to be rejected, to be discarded (स्मृतिः) कुदृष्टित्वान्निष्फलत्वादनादेया स्यात् MuṇḍUBh. 308. 12 (*on* i. 1. 5); यदप्रागल्भ्यादिभिः स्खलितपदमुदाहरन्ति न तावता तदनादेयम् ManuBh. ii. 110. 2 (*on* 8. 78); अनैकान्तिकं परं प्रत्यसिद्धं चेत्यनादेयम् Kiraṇā. 200. 18; तन्निरन्तरं प्रदर्शितन्यायवचनाभ्यां दूषितमित्यनादेयमिवोपलक्ष्यते CaturCin. iii(1). 1124. 18; पुराणान्तरादिवचनादीनि … । अत्यन्तविरुद्धानि त्वनादेयानि NyāySiA. 193. 24; श्रुतिपरित्यागस्त्वयुक्तः । किन्तु स परिहर्तव्यः । अन्यथा प्रागपि श्रुतिरनादेया स्यात् NyāySu.(Ja.) 231B.7 (*on* ii. 1. 1); भविष्यति कश्चिदत्रोपाधिरिति शङ्कापिशाची … अनादेया Upask. 396. 6 (*on* ix. 2. 2); यत्तु … कुल्लूकव्याख्यानं तदनादेयं पाठापरिचयपदार्थापरिज्ञानमूलकत्वात् DaṇḍaVi. 139. 11; 279.19; एवं भूतार्थप्रतिपादकवाक्यमप्राप्यं, साधनासंभवादनादेयम् VyavaNi. 28. 6; संख्यानियमस्त्वदृष्टार्थ इति केचिच्चिद्व्यवस्थानादेया VīraMi. (Āhnika.) 46. 13; 85. 9; अत्र दशभ्यो दिग्देवताभ्य इति गौतमभाष्यमनादेयम् VīraMi.(Āhnika.) 418.17; घटत्वादिभेदस्य हेतुत्वान्तरकल्पनमनादेयमेव VyutpaVā. 57. 13; 174. 18; प्रभाकरवचनं निर्युक्तिकत्वादनादेयम् BhāṭṭCin. i. 8. 2 (*on* i. 1.2); व्यापार आश्रयत्वादिकं प्रकल्प्य फलव्यापारोभयार्थत्वकल्पनं तत्र तत्रोक्तमनादेयम् VaiyāBhū. 54.8 (*on* 12); 234. 22 (*on* 58); यदमृतानन्दैर्व्याख्यातम् … तदनादेयम् SetuBa. 73. 7; 113. 31; इति तूक्तभाष्यविरोधादनादेयम् LaŚabdeŚe. ii. 308. 8; **2BII** not to be used तत्र व्यभिचारवारणायानादिपदम् । … अनादिपदमनादेयमेव AdvaiSi. 421. 5; 562. 12; **2CI** not fit to be taken तस्या(? स्मा)त्तस्या अनादेया बलवीर्यादिशक्तयः PāraS. 18. 308; कृपणस्य वित्तमिति रोहणस्य च मणिचक्रमनादेयम् UdaySuKa. 56. 24; **2CII** not fit to be received अनास्वाद्यमविक्रेयमनादेयमनीप्सितम् । दत्तं निरुपकारं यद्दन्ध्यदानेन तेन किम् DarpDa 6. 17; **3** not fit to be taken (as tax etc. which is not due) अनादेयं नाददीत परिक्षीणोऽपि पार्थिवः । न चादेयं समृद्धोऽपि सूक्ष्ममप्यर्थमुत्सृजेत् ManuSm. 8.170; Subhāṣi. 2832; अनादेयस्य चादानादादेयस्य च वर्जनात् । दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति ManuSm. 8. 171 (ManuBh. अनादानार्हमनादेयम्); अनेन … त्वमप्यादेयमनुत्सृजता लक्ष्(? म)प्यनादेयमनादित्समानेन … मुक्तम् … भारतं वर्षम् AvantiKa. 209. 7; करदण्डशुल्कादि शास्त्रविहितं वर्जयित्वान्यत्पौरधनमनादेयम् ManuBh. ii. 158. 3 (*on* 8. 170); **4A** from whom (property is) not to be taken away, not to be deprived (of property) यो भृत्यात्मपीडाभ्यामुपचिनोत्यर्थं स कदर्यः । स पक्षवांश्चेदनादेयः ArthŚā. i. 163. 6 (2. 9); **4B** (field) not to be taken away (i. e. not transferable) (क्षेत्रम्) अनादेयमकृतोऽन्यः पञ्चवर्षाण्युपभुज्य प्रयासनिष्क्रयेण दद्यात् ArthŚā. ii. 58. 7 (3.10); **5** (Law) inadmissible (as a law-suit) एकस्य बहुभिः सार्धं स्त्रीभिः प्रेक्षकैस्तथा । अनादेयो भवेद्वादो धर्मविद्भिरुदाहृतः BṛhaspaSm. 22. 135; Mitā. 129. 2 (*on* 2. 5) = VyavaNi. 26. 12 = VīraMi. (Vyavahāra.) 35.6; 33. 15; BṛhaspaSm. 28. 174; देशकालविहीनश्च द्रव्यसंख्याविवर्जितः । साध्यप्रमाणहीनश्च पक्षोऽनादेय इष्यते BṛhaspaSm. 32. 19 = KātySm. 138 = VyavaNi. 38. 5; VīraMi. (Vyavahāra.) 48. 27; अन्ये वा ये पुरग्राममहाजनविरोधकाः । अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिताः BṛhaspaSm. 33. 32 = Mitā. 131. 26 (*on* 2. 6); VyavaNi. 27. 2; VyavaMa. 14. 2; VīraMi. 395. 2 (*on* 2. 5); 'साध्यप्रमाणहीनश्च पक्षोऽनादेय इष्यते'। अनादेयस्त्वाज्यः परीक्षकैः Aparā. 609. 8 (*on* 2. 6); यत्र यदुपयुज्यते तत्र तदभावे साध्यसिद्धेः कर्तुमशक्यत्वादनादेय एवोपयोगिविहीन पक्षः SmṛtiCan iii. 84. 15; **6** which cannot be secured or obtained विकल्पद्वययोजना । अनाधे(? दे)याप्रहेयातिशये स्यास्नौ न किंचन MahāP. 21. 250; नानागतनैर्लिङ्गं प्रत्यगेकमविक्रियम् । अनादेयमहेयं (य)न्नमस्तस्मै सदादृशे TaiUBhāVā. 40. 6 (2)

अनादेयता (anādeya-tā) *f.* inadmissibility (as a law-suit) अन्यथा सख्यादिरहितद्रव्यविषयविवादस्यानादेयता स्यात् Aparā. 608. 13 (*on* 2.6); न च गुरुशिष्यत्वपितृपुत्रत्वादिप्रयुक्तव्यवहारानादेयतापरमिदमिति वाच्यम् VīraMi. (Vyavahāra.) 33. 25.

अनादेयतृण (anādeya-tṛṇa) *n.* grass which is unacceptable (as food for human beings) अनादेयतृणान्यत्त्वा स्रवन्त्यनुदिनं पयः । … पूज्या गावः कथं न ताः BṛParāSm. 5. 9.

अनादेयत्व (anādeya-tva) *n.* **A** unacceptability व्यावहारिकसंगवे प्रातीतिकस्यानादेयत्वात् LaCandr 733 29; **B** inadmissibility (as a law-suit) तादृशस्याप्यनादेयत्वे निर्णयाभावप्रसङ्गेन युक्तिविरोधात् VīraMi. (Vyavahāra.) 33. 26.

अनादेयफलकुसुम (anādeya-phalakusuma) *adj.* (tree) whose fruit and flowers are not fit to be taken सकलगुणैकनिकेतन दानववासेन धरणिरुहराज । जातोऽसि भूतले त्वं सतामनादेयफलकुसुमः ĀryāSaŚa. 674.

अनादेयवचन (anādeya-vacana) *adj.* whose words should not be taken into consideration अतत्त्वज्ञमनादेयवचनं वाग्विदां वर । यः पृच्छति नरं तस्मान्नास्ति मूढतरोऽपरः YogVā. ii. 11.45.

अनादेयवाक्य (anādeya-vākya) *adj.* whose statement is not acceptable स चेदित्थंत्वमागच्छति मनुष्याणां सभागतां प्राणातिपातेनाल्पायुर्भवति … संभिन्नप्रलपेनानादेयवाक्यः AbhidhKoBh. 254. 3 (*on* 4. 85); को भो गौतम हेतुः कः प्रत्ययः येनेहैके सत्वा(त्त्वा) अल्पायुषोऽपि दीर्घायुषोऽपि … अनादेयवाक्या अपि आदेयवाक्या अपि Mahākarmavibhaṅga 29.27 (Ed. S. Levi, Paris,

1932) [DBHS.]

अनादेयवाक्यत्व (anādeyavākya-tva) *n.* the state of being one whose words are not acceptable (भिक्षुः … वृत्ती) वृत्तस्थो न भिन्नवृत्तस्तस्यानादेयवाक्यत्वात् AbhidhKoBh. 261.9 (*on* 4.100)

अनादेयवाद (anādeya-vāda) *m.* inadmissible dispute (in a law-suit) अनादेयवादस्य लक्षणमाह । नारदः — एकस्य बहुभिः सार्धं स्त्रीणां प्रेष्यजनस्य च । अनादेयो भवेद्वादः VyavaNi. 26.10.

अनादेयव्यवहार (anādeya-vyavahāra) *m.* inadmissible dispute (in a law-suit) सर्वत्र पितापुत्रादिविरोधेऽनादेयव्यवहारे साक्षिणो द्रष्टारो वा ये स्युः … तेषां द्विशतो दमः BālaKrī. i. 283.1 (*on* 2.245)

अनादेया (a-nādeyā) *adj.* (*f.*) not originating from a river ते … ददृशुः पद्मिनीं शुभाम् । … एकद्वारामनादेयां सुप्रतीर्थामकर्दमाम् MahāBhā. xiii. 95.16.

अनादेयादान (anādeyādāna) *n.* taking of what should not be taken (i.e. taking of undue taxes) अनादेयादानाद्दरिद्रोऽयमिति लोकेऽख्यातिः … जायते ManvaVi. 985.22 (*on* 8.171)

अनादेयाश्रयत्व (anādeyāśraya-tva) *n.* the state of being the abode (of words) which cannot be relied upon न गृही भिक्षुण्यादय इति । तेषामनादेयाश्रयत्वात् Sphuṭā. iv. 103.17 (*on* 4.101)

[1]**अनादेश** (an-ādeśa) *m.* **1A** absence of specific instruction, absence of specific statement or injunction अनादेशे मन्त्रा बलवन्तस्तपोऽन्विताः पावना भवन्ति SāmaViBr. i. 5.2 (Sāy. अनादेश इति । आदेशः उपदेशः । अस्येदं प्रायश्चित्तमिति यत्र विशेषोऽनभिहितः तत्र); अनादेशे त्रिरात्रमुपवासः पुष्येणारम्भः SāmaViBr. ii. 1.2; अनादेशेऽष्टाक्षराः पादाः SarvaAnu. 3.11; 12.5; खैलिकानामनादेशोऽस्मिन्ग्रन्थेऽनुवाकानाम् SarvaAnu.(Anuvāka) 17; एकाङ्गवचने दक्षिणं प्रतीयात् अनादेशे ĀśvaŚS I. i. 1.13; अनादेशे विकल्पभूतौ ŚāṅkhāŚS. i. 16.14; xiv. 1.3; अनादेशे प्रकृतिः प्रत्येतव्या ĀpaŚS. xix. 18.5; अनादेशेऽध्वर्युः कुर्यात् MānŚS. 7.7; 115.15; (आज्यम्) तस्य होमोऽनादेशे KātyŚS. i. 8.38; DrāhyŚS. ii. 3.11; एकश्रुतिविधानान्मन्त्रान् कर्माणि चोद्गातैव कुर्यादनादेशे LāṭyāŚS. i. 1.4=DrāhyŚS. i. 1.4; LāṭyāŚS. i. 5.1= DrāhyŚS. ii. 1.1; प्रथमाभिर्विष्टुतिभिः स्तोमविधानमनादेशे LāṭyāŚS. vi. 2.1; DrāhyŚS. xvi. 2.1; निधनानि । स्वरानादेशे तथा स्वराणि स्युः । इडा चानादेशे LāṭyāŚS. vii. 10.2; DrāhyŚS. xxi. 1.2; पूर्वस्मिन्नयोदशरात्रे व्यूढाश्छन्दोमाः सोमसामादेशाद् गौरीवितस्य चानादेशात् LāṭyāŚS. x. 3.12; DrāhyŚS. xxviii. 4.19; पूर्वया द्वारानादेशे प्रविशेत् DrāhyŚS. xii. 1.15; xx. 1.31; मन्त्रानादेशे लिङ्गवतेति भागलिः VaitāSū. 1.3; नित्यमक्ष्णयापच्छेदनमनादेशे BaudhŚuS. 4.4; एवमनादेशे सर्वेषु भूतिकर्मसु, पुरस्ताच्चोपरिष्टाच्चैताभिरेव जुहुयात् ŚāṅkhāGS. i. 12.13; KauṣīGS. i. 8.15; अग्निरिन्द्रः प्रजापतिर्विश्वेदेवा ब्रह्मेत्यनादेशे ĀśvaGS. i. 3.8; तां न मिथः संसादयेदनादेशात् BaudhGS. i. 5.1; स्वस्तिपुण्येष्वनादेशे त्रिकाः KāṭhGS. v. 19.4; सर्वत्रानादेशे अग्निः पुंसामर्यमा स्त्रीणाम् VārāGS. 3.6; आज्याहुतिष्वनादेशे पुरस्ताच्चोपरिष्टाच्च महाव्याहृतिभिर्होमः GobhiGS. i. 9.27; उदगयनपूर्वपक्षपुण्याहेषु प्रागावर्तनादह्नः कालोऽनादेशे DrāhyGS. i. 1.2; ii. 2.15; अक्षात्यनादेशे स्थालीपाकः KauśiSū. 7.1; अनादेशे पटलेऽस्मिन् विधानं सर्वत्र विद्यादपि वैकृतानाम् ṚPrāti. 6.4; अनादेशे प्रण्यस्ता जिह्वा TaiPrāti. 2.20; त्रिपदा गायत्र्यः सर्वत्रानादेशे शङ्कुमत्यो भवन्ति UpaniSū. 6.22; एतान्येवानादेशे विकल्पेन क्रियेरन् GautDS. iii. 1.18= VāsiDS. 22.14; अनादेशे जपो होम उपवासः MahāBhā. xii. 50*(1); कारकग्रहणमनादेशे स्वार्थविज्ञानात् Vār. 1 *on* P. iii. 3.19; कर्तरि कृद्वचनमनादेशे स्वार्थविज्ञानात् Vār. 1 *on* P. iii. 4.67; अनादेशे स्वार्थविज्ञानात् समानशब्दाप्रतिषेधः Vār. 3 *on* P. v. 3.10; MahāBh. ii. 404.22 (*on* v. 3.10); कर्तरि कृतो भवन्तीत्युच्यतेऽनादेशे स्वार्थविज्ञानात् MahāBh. ii. 177.9 (*on* iii. 4.67); तत्सर्वार्थमनादेशात् MīmāSū. iv. 3.13=TantrRa. 31.12; पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् MīmāSū. vii. 3.16=ŚābaBh. 1556.9 (*on* vii. 3.16); होमपात्रमनादेशे द्रवद्रव्ये स्रुवः स्मृतः GobhiSm. 1.108=VīraMi. (Paribhāṣā.) 106.13; आज्यं हव्यमनादेशे जुहोतिषु विधीयते GobhiSm. 1.113; CaturCin. ii(1). 41.17; VīraMi.(Paribhāṣā.) 105.19; 105.21; BhāṭṭCan. 83.5 (*on* xv. 2.20); किं सर्वफलमेतत्कर्म, उतैकफलमिति ।… तत्सर्वार्थमिति । कुतः । अनादेशात् । न किंचिदिहातिदिश्यत इदं नाम फलमिति ŚābaBh 1255.12 (*on* iv. 3.13); अनादेशे तु सर्वत्र दक्षिणः पाणिरुच्यते LaghvāśvaSm. 2.11; अनादेशाद्यद्यत्कामयते फलमनियमेन तस्य तस्योपायत्वेन विधीयमानत्वात्सर्वार्थता ṬupṬ. 34.5 (*on* iv. 3.13); यद्यपि च पर्णकृच्छ्रस्य क्वचिद् विनियोगो नोक्तः, तथाप्यनादेशे पापगुरुत्वापेक्षया प्रत्येतव्यः BālaKrī. ii. 176.14 (*on* 3.312); मन्त्रस्य देवतायाश्च … 'अनादेशे' अविधाने CaturCin. i. 139.19; अनादेशे … सावित्र्येव जप्या ManvaVi. 253.57 (*on* 2.220); अनादेशे तु संख्यायाः शतमष्टोत्तरम् ManvaVi. 1467.17 (*on* 11.248); उभयविधेऽपि द्रव्येऽनादेशे स्रुवा होमो न कर्तव्यः VīraMi.(Āhnika.) 421.5; (मार्जनं यज्ञपात्राणां पाणिना) वामस्य निषिद्धत्वादनादेशे …। दक्षिणेनेति BālamBha. i. 450.27 (*on* 1.185); **1B** absence of command or order अष्टौ शतानि श्वेतकेतूनां यानि त्वं च सत्वं निजघान भूयसः । अनादेशेनोभय(तश्च) वीडिताः अविद्याभिर्नोऽभिरक्षन्तु वाजिनः AVPari. 1(41).2; एवं तदुक्तितः पत्युरनादेशाच्च योषितः । शेषा विहरणे बुद्धिं न चक्रुः PadmP.(Ra.) 97.71; **2** (Gr.) **2A** absence of substitution अनादेशेऽविकारः VājaPrāti. 4.131; आङ् शासु इच्छायाम् ।… ल्यपोऽभावः फलम् । क्त्वापि छन्दसीति अनादेशः DhātuPra. 2.12 (71.9); **2B** [Loc.] when (the case-ending is) not liable to substitution युष्मदस्मदोरनादेशे P. vii. 2.86 = CāndraVyā. v. 4.54 = SaraKaṇṭhā.(Gr.) vi. 4.55; युष्मदस्मदोर्थकारोऽन्तादेशः(? शः) स्यादनादेशे अजादौ परे । त्वया । मया PrakriKau. i. 248.2; अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः SiddhāKau. 91B.12 (*on* vii. 2.89); LaŚabdeŚe. i. 329.6; **2C** other than a substitute (i. e. *sthānin* or the original form) ष्यङ्यनादेशे यलोपवचनम् Vār. 1. *on* P. iv. 1.78; (इडः) अग्रहणे ह्यनादेशस्यापि दीर्घप्रसङ्गः Vār. 2 *on* P. vi. 4.16; न वा छन्दस्य नादेशस्यापि दीर्घत्वदर्शनादिड्ग्रहणानर्थक्यम् Vār. 3 *on* P. vi. 4.16; ष्यङ्यनादेशे यलोपो वक्तव्यः । औदमेध्यायाश्छात्राः औदमेधाः MahāBh. ii. 229.26 (*on* iv. 1.78); अक्रियमाणे हीड्ग्रहणेऽनादेशस्यापि दीर्घत्वं प्रसज्येत MahāBh. iii. 184.17 (*on* vi. 4.16); ऋच्छेरनादेशस्य ग्रहणम् KāśiVṛ. *on* i. 3.29= PariVṛ.(Sī.) 40.15; यद्यनादेशस्य ग्रहणं स्यादादेशस्यात्मनेपदं न सिध्यति Nyās. i. 229.18 (*on* i. 3.29); न त्वनादेश ऋच्छिर्निर्दिष्ट इत्यर्थः Pradī. iii. 84B.10 (*on* iii. 1.36); गमेरित्यादेशानादेशयोर्ग्रहणमविशेषात् Prasā. ii. 122.22 [*anādeśa* is given as the meaning of *anakāla*, NānārthaMa. 1720]

[2]**अनादेश** (anādeśa) *m.* substitute *ana* (for *id* of the pronominal stem *idam*) त्यदाद्यत्वे पररूपत्वे च कृत इद्रूपस्यानादेशः Nyās. ii. 767.9 (*on* vii. 2.112); पूर्वेणानादेशे प्राप्ते हलादाविद्रूपस्य लोपो विधीयते Nyās. ii. 767.17 (*on* vii 2.113); इद्रूपस्यानादेशः स्यादापि प्रत्याहारे परे । अनेन । अनयोः BhāṣāVṛ. *on* vii. 2.112

[3]**अनादेश** (anādeśa) *m.* substitute *ana* (for the suffix *yu*) अङ्गसंज्ञानिमित्तस्य योः अनादेश उच्यमानो मृत्युशब्द इव तुटि कृते त्युशब्दोऽङ्गनिमित्तम्, न तु युशब्द इति न स्यादित्यर्थः Pradī. iv. 201B.21 (*on* iv. 3.23); तुटः प्रागनादेशः SiddhāKau. 256A.10 (*on* iv. 3.23)

[4]**अनादेश** (an-ādeśa) *m.* substitute *an* (for *id* of the pronominal stem *idam*) अनादेशे कृतेऽन्त्यनकारलोपात् PariVṛ.(Sī.) 179.18; अनादेशः । अनया PrakriKau. i. 288.7; ननु इद ए इति स्थिते स्मैभावात्परत्वादनादेशे 'सकृद्गतौ' इति न्यायेन स्मै न स्यात् …। स्मै आदेशे तु न अनादेशो हलिलोपेन बाधात् LaŚabdeŚe. i. 306.14.

अनादेश (anādeśa) *adj.* name of a Sāman आकूपारमनादेशम् Indische Studien 3.204a [PW., pw.] [better *n.*]

अनादेशकर (an-ādeśakara) *adj.* not carrying out the instruction, disobeying the order एवमश्रद्धितं शिष्यमनादेशकरं गुरुः । शशाप BhāgP. viii. 20.14.

अनादेशग्रहण (anādeśa-grahaṇa) *n.* use or mention of the word *anādeśa* (युष्मदस्मदोरनादेशे) अनादेशग्रहणं शक्यमकर्तुम् ।… तदेतदनादेशग्रहणं तिष्ठतु तावत् सांन्यासिकम् MahāBh. iii. 304.17 (*on* vii. 2.86); युष्मदस्मदोरनादेश इत्यनादेशग्रहणं तत्स्थानापत्त्या तद्धर्मलाभस्य स्वरूपविधिना निरस्तस्य ज्ञापकमुक्तम् Pradī. vi. 43.7 (*on* vii. 1.37); vi. 156.14 (*on* vii. 2.89); अनादेशग्रहणं 'योऽचि' इत्यत्रानुवृत्त्यर्थम् Prasā. i. 248.16.

अनादेशत्व (anādeśa-tva) *n.* the state of not being a substitute किं च कारणं न स्यात् । अनादेशत्वात् । आदेशः स्थानिवदित्युच्यते न चेम आदेशाः MahāBh. i. 136.17 (*on* i. 1.56); सकारमात्रस्यानादेशत्वात् षत्वाप्रसङ्गेऽपि सकारमात्रस्य सकार इति षत्वं प्राप्नोति PadMañ. *on* KāśiVṛ. *on* P. i. 1.50; PariVṛ.(Sī.) 114.5; नसायादेशानां कोऽयमनुपन्यासः … पदादीनां भाष्यरीत्यानादेशत्वात् LaŚabdeŚe i. 233.13.

अनादेशन (an-ādeśana) *n.* absence of teaching or instruction कुत एतत् । अर्थानादेशात् (v. l. अर्थानादेशनात्) । न ह्यर्था आदिश्यन्ते MahāBh. i. 363.8 (*on* ii. 1.1)

अनादेशप्रत्ययसकारत्व (anādeśapratyayasakāra-tva) *n.* the state of being the sound *s* which is neither a substitute nor a suffix अनादेशप्रत्ययसकारत्वात् सुटः षत्वं न प्राप्नोति Nyās. ii. 292.2 (*on* vi. 1.145)

अनादेशम् (ánādeśam) *adv.* without announcing to or addressing (a particular deity) अथ यद्रान्यानि गृह्णाति तद्तुभ्यश्छन्दोभ्यो गृह्णाति तदनादेशमेव गृह्णाति ŚatBr.(K.) II. iii. 1.7; II. iii. 1.8-9.

अनादेशहोम (anādeśa-homa) *m.* offering of an oblation without announcing to or addressing (a particular deity) होमोपदेशो यत्रास्ति न तु मन्त्रोपदेशनम्। तत्रानादेशहोमाः स्युः VīraMi.(Saṁskāra.) 278.25; अनादेशहोमा अनादिष्टदेवताका होमाः VīraMi.(Saṁskāra.) 279.4.

अनादेशादि (an-ādeśādi) *adj.* other than a verbal stem which is liable to substitution for its initial (consonant) अत एकहल्मध्येऽनादेशादेर्लिटि P. vi. 4.120; अनादेशादेरिति प्रतिषेधः प्राप्नोति MahāBh. iii. 218.1 (*on* vi. 4.120); अस्यैकव्यञ्जनमध्येऽनादेशादेः परोक्षायाम् Kātan. iii. 4.51; अतो हल्मध्येऽनादेशादेर्लिटि JaineVyā. iv. 4. 110; लिट्यनादेशादेरेत्हल्मध्येऽतः CāndraVyā. v. 3.116=SaraKaṇṭhā.(Gr.) vi. 3.116; अनादेशादेरिति किम्। चकणतुः KāśiVṛ. *on* vi. 4.120; SiddhāKau. 351B.15 (*on* vi. 4.121); अनादेशादेरेकव्यञ्जनमध्येऽतः SiddhaHe. iv. 1.24; अनादेशादेः किम्। चखदतुः PrakriKau. ii. 63.3.

अनादेशादित्व (anādeśādi-tva) *n.* the state of not being a verbal stem which is liable to substitution for its initial (consonant) अनादेशादित्वादनेनैवैत्त्वस्य सिद्धत्वात् Nyās. ii. 582.24 (*on* vi. 4.120)

अनादेशार्थ (anādeśārtha) *adj.* meant for the sake of that (sound *s*) which is not a substitute षसादेशः। अनादेशार्थे (v.l. °शार्थम्) वचनम् Prasā. ii. 176.9.

अनादेशार्थे (anādeśārthe) *adv.* for the sake of that (sound *s*) which is not a substitute षसादेशः। अनादेशार्थे वचनम् Prasā. ii. 176.9.

अनादेशिक (an-ādeśika) *adj.* not arising from instruction or injunction यदाश्रयस्तर्कः साक्षाद् व्यवहितोऽपि वा। तस्यानुमानभावेऽपि न ह्यसावपसर्पति। न चैतदनादेशिकम् NyāyPari. 333.11.

अनादेशिकत्व (anādeśika-tva) *n.* the state of being what is not arising from instruction or injunction यदेवं तत्सर्वं तदर्थविद्व्याख्यातं, यथा मन्वादिसंहितेति। अन्यथा त्वनाश्वासेनाव्यवस्थानादननुष्ठानमव्यवस्था वा भवेदनादेशिकत्वात् NyāyKuA. ii(2). 71.5; केचित्तु भावात्मकेषु विपर्ययिधर्मेषु प्रवृत्तमिदमेव प्रत्यवस्थानमुपलब्धिसमः अभावात्मकेषु त्वनुपलब्धिसम इति व्याचक्षते। तदशिष्यम् अनादेशिकत्वात् TārkiRa. 294.6; प्रमितिस्तत्करणं च यथेच्छं प्रमाणमाहुरित्यवोचाम। आश्रयप्रामाण्यस्यानादेशिकत्वात् NyāyPari. 35.4 (comm. अनादेशिकत्वात् प्रमाणत्वेनानुपदिष्टत्वात्)

अनादेश्य (an-ādeśya) *adj.* **I** which cannot be pointed out सूर्येन्दुपरिधियोगेऽर्काष्टमभागो भवत्यनादेश्यः Āryabh. 4.47(99) (comm. द्रष्टुमशक्यः); वलनादिशशिवदन्यद् ग्रहणं तैक्ष्ण्याद्रवेरनादेश्यम्। द्वादशभागादूनम् BrāhmSphuSi. 5.20; **II** not to be ordered by pointing out वोडणिभट्ठ(ट्ट)क्षेत्रं यस्य ··· अछाटभटप्रवेस(श)म् अनादेस्य(श्य)म् अनासेध्यम् - प्रतिपादितम् EI. xii. 264.45; मंदरजविषयां [तःपाति किं]इच्छिताग्रामः ···। एवं चतुराघाटनोपलक्षितः ··· अनादेस्यः (श्यः) अनासेध्यः ··· प्रतिपादितः EI. xxv. 62.76.

अनादेश्यग्रहपरत्व (anādeśyagrahapara-tva) *n.* the state of having reference to a planet which cannot be pointed out दर्शनवाक्यानां ग्रस्तास्तविषयत्वादनादेश्यग्रहपरत्वाद्वा ज्ञानस्य चार्थतः प्राप्तेस्तदेव निमित्तम् NirṇaSi. 53.25.

अनादेश्यग्रहव्यावृत्ति (anādeśyagraha-vyāvṛtti) *f.* exclusion of a planet which cannot be pointed out दृशेरुद्देश्यविशेषणत्वात् ग्रहे त्ववदविवक्षयार्थतः सिद्धज्ञानमात्रानुवादत्वे सर्वं सुस्थम्। अस्तुस्याद्यनादेश्यग्रहव्यावृत्त्या वा दर्शनस्यार्थवत्त्वम् NirṇaSi. 52.14.

अनादैजाद्यच् (anādaij-ādyac) *adj.* having an initial vowel (amongst the vowels) other than *ā*, *ai* or *au* नदीमानुषीनाम्नोऽनादैजाद्यच CāndraVyā. ii. 4.42 (vṛtti न चेदस्यादैचोऽचामादिभूता भवन्ति)

[1]**अनाद्य** (an-ādyá) *adj.* [*f.* -ā] **AI** what ought not to be eaten नैतां ते देवा अददुस्तुभ्यं नृपते अत्तवे। मा ब्राह्मणस्य राजन्य गां जिघत्सो अनाद्याम् AV. v. 18.1; AV.(P.) ix. 17.1; सा ब्राह्मणस्य राजन्य तृष्टैषा गौरनाद्या AV. v. 18.3; AV.(P.) ix 17.10; यद्राद्यं१ यदनाद्यं सर्वं ते अन्नमविषं कृणोमि AV viii. 2.19 = AV (P.) xvi. 4.9 अनाद्या वै ब्राह्मणेन परिस्रुत् स एतस्मादनाद्याज्जायते ŚatBr. XII. ix. 1.1; कुलटायाः षण्ढकस्य च तेषामन्नमनाद्यम् ĀpaDS. i(6). 19.15; कौटसाक्ष्यं सुहृद्वधः। गर्हितानाद्ययोर्जग्धिः सुरापानसमानि ManuSm. 11.56; अदनात्तदनाद्यस्य तुच्छमायुरकार्यत BṛParāSm. 1.32; 6.174; **AII** not eatable, not fit for eating मृत्यार्पश्चाग्नेरनाद्यम् TaiS. V. vii. 9.2; यद्रूपोऽन्वतिषिञ्चेत्। अनाद्यमग्नेरापः। अनाद्यमाम्यामपिदध्यात् TaiBr. I. iv. 3.6; BaudhŚS. ii. 193.12; तस्माद्दश्मानाद्यः ŚatBr. IX. i. 2.5; अनाद्यं दुर्गन्धत्वादिना भक्षणानर्हम् Aparā. 1047.13 (*on* 3.228); ManvaVi. 1417.8 (*on* 11.145); कृतान्नं पकान्नम् अपर्युषितम् अखाद्यापेयानाद्यम् VīraMi. (Āhnika.) 522.2; 522.5; अनाद्यम् अमनस्तुष्टिकरं न भोज्यम् BālamBha. iii. 127.24 (*on* 3.231); **B** (*fig.*) not to be fed upon तस्माद् ब्राह्मणोऽनाद्यः सोमराजा हि भवति ŚatBr. V. iii. 3.12 = V. iv. 2.3; सोमोऽस्माकं ब्राह्मणानां राजेति ब्राह्मणानेवापोद्धरत्यानाद्यान् करोति ŚatBr. IX. iv. 3.16; VāsiDS. 1.45; **C** not having anything to eat अथ वयं तवैवातिमानेनानाद्याः स्मः GopBr. i. 2.10 (43.9); **D** (a type of *śrāddha*) in which cooked food (or *piṇḍa*) is not offered अनाद्यं साक्षाददनीयद्रव्यवर्जितं आमद्रव्यकं श्राद्धम् CaturCin. iii(1). 1145.17; अनाद्ये आमश्राद्ध इत्यर्थः VīraMi.(Śrāddha.) 107.21; अनाद्ये ··· अभोजने आमहोमश्राद्धादौ वा NirṇaSi. 285.6; BālamBha. i. 507.17 (*on* 1.228); *n.* absence of eatables अन्नमाद्यं तदभावोऽनाद्यं तस्मिन् सति CaturCin. iii(1). 1145.16; अनाद्ये अदनीयद्रव्याभावे एकोऽपि भोजयितव्यः ManvaMu. 111.23 (*on* 3.125); अनाद्ये अन्नाभावे VīraMi. (Śrāddha.) 107.21; अनाद्ये ···। अन्नाभावे चेति व्याख्यान्तरम् NirṇaSi. 285.6; अनाद्ये ···। आद्यमन्नं तदभावे दुर्भिक्षे इत्यर्थ इत्यपरे BālamBha. i. 507.17 (*on* 1.228)

[2]**अनाद्य** (an-ādya) *adj.* [*f.*-ā] **A** not the first, other than the first (i.e. other than the Sapiṇḍīkaraṇa) अथातः पार्वणे श्राद्धे काम्य आभ्युदयिक एकोद्दिष्टे वा। ब्राह्मणान् ··· पितृवदुपवेश्यैकैकमेकैकस्य द्वौ द्वौ, त्रींस्त्रीन्वा ··· न त्वेवैकं सर्वेषाम्। काममनाद्ये ĀśvaGS. iv. 7.3; य आगच्छेत् तं ब्रूयात् ···। तथा कुर्वन्ननाद्ये हुवाने KauśiSū. 25.29; यत्र त्वनाद्यं गृह्यते न स (तत्र) शक्नोति पराणि लक्षयितुम् ṬupṬ. 228.10 (*on* ix. 4.19); काममनाद्ये आद्यं तु सपिण्डीकरणं ततोऽन्यदनाद्यम् Aparā. 464.11 (*on* 1.227); 'काममनाद्य इति' आद्यादन्यस्मिन् श्राद्धे सर्वेषां स्थाने काममिच्छया एकमपि ब्राह्मणमुपवेशयेत् CaturCin. iii(1). 1145.14; VīraMi.(Śrāddha.) 107.20; अनाद्ये पार्वणवर्जिते NirṇaSi. 285.6; BālamBha. i. 507.17 (*on* 1.228); **BI** having nothing prior to it, bereft of beginning, beginningless, originless अजममरमनाद्यमाद्यमेकं परममजं सकलं निष्कलं च AnnaU. 3.24; अप्रमेयमनाद्यं च ज्ञात्वा च परमं शिवम् BrahmBiU. 9; अनाद्यौ वरमुत्पादौ उभौ सूक्ष्मौ तु तौ स्मृतौ BrahmāṇḍP. iii. 4.21; ननु ककुभि अनाद्यायां(ऋचि) काकुभ इति न प्राप्नोति ŚābaBh. 1714.12 (*on* ix. 2.25); अनाद्योऽहम् VṛGautaSm. 502.4(1); SarvaVeSāSaṁ. 867; अनाद्यया समाविद्धा सा चिच्छक्तिरविद्यया LakṣmīT. 3.16; KūrmaP. 122.7(1.12); व्यासः ···। जयानाद्य जयानन्द जय नीलोत्पलद्युते।··· इत्यादि नाममालाभिः संस्तुवन् वनमालिनम् SkandP. iv. 95.37; लिङ्गं चैव चतुर्मुखम्। अनाद्यं चैव विप्रेन्द्र SkandP.v(1). 36.77; अनाद्यो लोकनाथोऽसौ रश्मिमाली BrahmP. 30.22; BhaviP. 119A.1 (i. 66.75); अजमजरमनाद्यं शाश्वतं ब्रह्म नित्यम् YogVā. iii. 9.76; v 17.33; साद्य मुनिवाङ नुद्यादनाद्या रुजः ŚaṅkaDigVi.(Mā.) 4.84; अनाद्यं कर्माधिकृत्याह Upask. 244.9 (*on* v. 2.14); **BII** not having the first, excluding the first मूलाभिरद्वितीयाभिर्लिङ्गमीवासमुदाहृतम्। सुगन्धान्तमनाद्याभिरष्टाभिः सर्वभद्रकम् SamarāSū. 19.224

अनाद्यकालोपचित (anādyakālopacita) *adj.* accumulated from beginningless time अनाद्यकालोपचितं सत्कायदृष्टिशैलं ज्ञानवज्रेण भित्त्वा स्रोतापत्तिफलं साक्षात्कृतम् GiMs. iii(1). 21.10.

अनाद्यगर्भज (anādyagarbha-ja) *adj.* not having one born prior to oneself 'भ्रातुर्ज्येष्ठस्य ··· धर्मविदब्रवीत्।' ··· ज्येष्ठो भ्राता अनाद्यगर्भजः NirṇaSi 334.5.

अनाद्यगर्भविषया (anādyagarbha-viṣayā) *adj.* (*f.*) referring to one not born as the first (child) जन्ममासे विवाहाभ्यनुज्ञा अनाद्यगर्भविषयेति द्रष्टव्यम् VīraMi.(Saṁskāra.) 301.14.

अनाद्यग्रह (anādy-agraha) *m.* beginningless non-comprehension अनाद्यग्रहस्य तत्कार्यभ्रमकल्पिताश्रयत्वायोगात् IṣṭaSi. 326.7; सर्वस्य च जनिमतोऽनाद्यग्रहं विना नान्यज्जन्मस्थित्यादिकारणम् IṣṭaSi. 335.6.

अनाद्यच् (anādy-ac) (Gr.) non-initial vowel वचनं त्वनाद्यजर्थं विज्ञायमानं पूर्वपदस्यापि वृद्धिं विदध्यात Pradī. vi. 192.15 (*on* vii. 3.10)

अनाद्यजग्धि (anādya-jagdhi) *f.* eating of what is not to be eaten अनाद्यजग्धेश्च निवृत्तिरिष्टा SaṁkṣeŚā. 1.426 (i. 314.6)

अनाद्यज्ञान (anādy-ajñāna) *n.* beginningless nescience or ignorance क्षेत्रम् ···। अनाद्यज्ञानसंसर्गात् कालह्रासवशादपि। नष्टं नरेन्द्रनाथा ये पालयन्त्यर्चनादिकैः। देहान्ते यान्ति ते स्वर्गम् PauṣkS. 43.121; अन्यदपि जडं विभक्तं चेत् कार्यत्वादनित्यमेवेत्यनाद्यज्ञानाश्रयो न स्यात् IṣṭaSi. 195.16; 368.20; अनाद्यज्ञानसंबन्धोऽपि ब्रह्मणोऽज्ञानसंबन्धद्वारक एव PañcPra. 57.4; अनाद्यज्ञानवन्मेयमूरीकृत्येह सर्वतः। उच्छिन्दन्ति प्रमाणानि ह्यज्ञातत्वं प्रमेयगम् BṛĀraUBhVā. iv. 4.922; सन्मात्रस्य ब्रह्मण एव अनाद्यज्ञानतिरोहितस्वरूपतया ··· जगत्कारणत्वमुपपद्य NītiMā. 14.10; 21.5; कर्मशरीरयोः ··· अनाद्यज्ञानोपादानत्वेनात्मसंबन्धः PrakaVi. 81.24; सादित्वात्तेषामनाद्यज्ञानाश्रयत्वानुपपत्तिरिति चेत् VivaPraSaṁ. 59.18; अनाद्यज्ञानचैतन्ययोर्निरवयवत्वात् Nyāyāmṛ. 228B.8;

231A.8; नागन्तुकपदार्थावच्छिन्नचैतन्यमनाद्यज्ञानस्य विषयः AdvaiSi. 488.9; 488.12; 557.6.

अनाद्यणुश्यामता (anādy-aṇuśyāmatā) *f.* originless dark-colouredness of an atom वृद्धवैशेषिकदृष्ट्या अनाद्यणुश्यामतोदाहृता VedāntKa. 219.25 (*on* i. 4.21)

अनाद्यतिरिक्तसृष्टिविषय (anādyatiriktasṛṣṭi-viṣaya) *m.* reference to creation of what is different from the (six) beginningless (things) अनाद्यतिरिक्तसृष्टिविषय एव दृष्टिसृष्टिस्वीकारात् AdvaiSi. 534.4.

अनाद्यत्यन्ताभाव (anādy-atyantābhāva) *m.* beginningless constant absence अनाद्यत्यन्ताभावस्य तार्किकादिमते यथा तत्तत्कालादिरवच्छेदकः GuruCandr. ii. 358.21; तार्किकादिमते अनाद्यत्यन्ताभावस्य यथा तत्तत्कालादिरवच्छेदकः LaCandr. 544.28.

अनाद्यत्व (anādya-tva) *n.* the state of not being the first one गिरापदेन त्वनाद्यत्वाद् ग्रहणं न शक्यमिति वैषम्यम् ŚāstrDī. 635.9 (*on* ix. 4.3); ब्राह्मणव्यक्तेर्वा आद्यत्वानाद्यत्वे विहाय अवधारणं च कालादेः · भविष्यति NyāvSu.(Ja.) 289B.7 (*on* ii. 1.4)

अनाद्यदृष्ट (anādy-adṛṣṭa) *n.* beginningless unseen effect पारमार्थिकोपाध्युपहितब्रह्मजीववादेऽप्युपाधिभेदहेतुभूतानाद्यदृष्टवशाद् व्यवस्था भविष्यतीत्याशङ्क्याह BrahmSūBh.(Rā.) 545.16 (*on* ii. 3.50); पारमार्थिकोपाधिसंबन्धिब्रह्मजीववादे अनाद्यदृष्टप्रवाहेणोपाधिप्रवाहानादित्वात् VedāntDī. 131.5 (*on* ii. 3.50)

अनाद्यध्यस्तत्व (anādy-adhyastatva) *n.* the state of being superimposed since time immemorial दोषजन्यज्ञानात्पूर्वं सतोऽप्यनादेरनाध्यस्तत्वे ब्रह्माप्यनाद्यनन्ताध्यस्तं स्यात् Nyāyāmṛ. 154A.5.

अनाद्यध्यास (anādy-adhyāsa) *m.* beginningless superimposition अविद्यादिवदनाद्यध्याससिद्धये साक्षिणाव्यवधानात् सुषुप्तेऽप्युपलम्भप्रसङ्गादित्यर्थः VedāntKa. 331.7 (*on* ii. 4.1); तदध्यासस्यानादित्वे प्रधानस्यापि पुरुषे स्वधर्माणामनाद्यध्यासमुखेन जगत्प्रवृत्तिहेतुत्वमिति तुल्यम् ŚrutaPra. ii. 288.28 (*on* ii. 2.9); न च कतिपयाध्यासे ··· दोषादित्वं तन्त्रं न तु ··· अनाद्यध्यासे Nyāyāmṛ. 243A.7.

अनाद्यनन्त (anādy-ananta) *adj.* [*f.* -ā] which has no beginning and no end (implying the sense of eternal, which has no known beginning and end, which has no birth and death, originless and imperishable etc.) अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते KāṭuU. 3.15; अनाद्यनन्तम् ··· विश्वस्य स्रष्टारमनेकरूपम् ।··· ज्ञात्वा देवं मुच्यते सर्वपाशैः ŚvetāU.5.13 (Śaṅ. आद्यन्तरहितम्); एषा ··· प्राधानिकी चेश्वरकारिता च। अनाद्यना(?न)न्ता ह्यभिमानपूर्वकं विश्वासयन्ती जगदभ्युपैति VāyuP. ii. 40.133; BrahmāṇḍP. iii. 3.111; अभव्यमिथ्यात्वमनाद्यनन्तमनाद्यनन्तश्च यथैव कालः VarāṅgaC. 11.13; पदार्थाश्चतुर्विधाः। अनाद्यनन्तसाद्यनन्तानादिसान्तसादिसान्ताः PārāSū. 28.18; 26.9; परमात्मद्रव्यं स्वभावसिद्धं भवति ···। अनाद्यनन्तेन ··· स्वकीयस्वभावेन निष्पन्नत्वात् TātpaVṛ. 132.14 (*on* 2.6); 30.22 (*on* 1.21); 44.12 (*on* 1.33); अनाद्यनन्तेऽपि काले ये केचिन्निर्वृताः ··· ते ··· अनन्तभागेऽपि न वर्तन्ते SyādvāMañ. 29(72); अनाद्यनन्तबहुविधदुर्विपद्दुःखानुषक्तदूषितात्पास्थिरसांसारिकसुखनयविषयमवुविरक्तस्य···भगवदुपासनं हिततमं विहितम् NyāyPari. 512.18; अनाद्यनन्तद्व्यणुकादियावत्पक्षीकरणेऽनाद्यनन्ततावद्भवदानगोचरपरोक्षज्ञानत्वम् TattvCin. ii(1).639.4; कल्पान्तेऽप्येककालः प्रकृतिपुरुषवत् ब्रह्मणो रूपमन्यन्निर्दिष्टोऽनाद्यनन्तो मुनिभिरिति ततः कार्यता चास्य मन्ना TattvMu. 1.65; सर्वकामावाप्तेः ब्रह्मानन्दावाप्तिरूपतया विवरणम् अनाद्यनन्तदेशकालप्रवहदखिलप्राणिव्रातवर्ति यावत्सुखवृन्दमस्ति PūrvottaVāNaMā. 368.7.

अनाद्यनन्तकल्प (anādyananta-kalpa) *m.* originless and endless aeons अनाद्यनन्तकल्पोपचितदुर्विषहानन्तापराधानङ्गीकारेण ··· स्वयमेव प्रयतते BrahmSūBh.(Rā.) 473.7 (*on* ii. 2.3); अनाद्यनन्तकल्पानुवृत्तसर्वप्रपञ्चजन्मादिकारणत्वं ब्रह्मलक्षणम् ŚivārkaMaDī. ii. 499.17 (*on* iv. 4.20)

अनाद्यनन्तकाल (anādyananta-kāla) *m.* beginningless and endless time, eternal time अनाद्यनन्तकालेऽनुच्छेदेन प्रवर्तमानानां समयानां न भ्रान्त्यादिमूलत्वमुचितम् NyāySu.(Ja.) 315A.11 (*on* ii. 2.1); उन्मत्तवाक्येऽविद्यमानानाद्यनन्तकालानुवृत्तित्तेषामेव तर्हि किंनिमित्तेति सुहृद्भावेन पृच्छन्तं प्रत्याह NyāySu.(Ja.) 315B.4 (*on* ii. 2.1); अनाद्यनन्तकालव्यापिसकलजगन्मूलकारणत्वोक्त्यैव कालपरिच्छेदराहित्यमपि लब्धम् ŚivārkaMaDī. i. 267.7 (*on* i. 1.23); अनाद्यनन्तकालेऽस्मिन् कदम्बाभ्यां चलोऽर्नशन्। भगोलोऽसौ वरीवर्ति वत्सक्तं राशिमण्डलम् SiddhāTaVi 140.3.

अनाद्यनन्तता (anādyananta-tā) *f.* beginninglessness and endlessness अस्तित्वं हि किल द्रव्यस्य स्वभावः, तत्पुनरन्यसाधननिरपेक्षत्वादनाद्यनन्ततया हेतुकयैकरूपया वृत्त्या नित्यप्रवृत्तत्वात् TattvPradī.(A.) 127.3 (*on* 2.4)

अनाद्यनन्तत्व (anādyananta-tva) *n.* beginninglessness and endlessness (implying eternality, originlessness, causelessness and imperishability) ईश्वरादीनां दिक्परिच्छिन्नत्वेऽपि ··· कथमनाद्यनन्तत्वम् PārāSū. 39.14; आत्मनो हि शुद्ध आत्मैव सदहेतुकत्वेनानाद्यनन्तत्वात् स्वतःसिद्धत्वात् TattvPradī.(A.) 257.3 (*on* 2.100); 'एवमयमनादिरनन्तः' तत्त्वज्ञानमन्तरेणाशक्यसमुच्छेदः। अनाद्यनन्तत्वे हेतुरुक्तो 'नैसर्गिक' इति Bhām. 31.7 (*on* i. 1.1); 'असद्विलक्षणतायां रजतस्यानाद्यनन्तत्वे सर्वदोपलम्भाद्बाधापात' इति तदनङ्गीकारपरास्तम् NyāyMa. 122.3; PramāMā. 11.6; अयं तु सादिसान्तत्वेन विनश्वरः, स च अनाद्यनन्तत्वेनाविनश्वरः TātpaVṛ. 245.18 (*on* 2.89); यावत्परमात्मा तिष्ठत्यनाद्यनन्तत्वेन एवं जीवोऽपि BrahmSūBh.(Ma.) 36B.10 (*on* ii. 3.30); तासां क्रियाणां संतानस्य बीजाङ्कुरसंतानवदनाद्यनन्तत्वाद्यनादिनिधनस्यापि कालस्य परिच्छेदः संभवति CaturCin. iii(2). 7.3; प्रतियोगिसिद्धो यथोक्तोऽभावः तथा इति चेत्, न, प्रतियोगिनिष्ठत्वस्य अभावे प्रत्युक्तत्वात्, अनाद्यनन्तत्वेऽभावत्वानुपपत्तेः आदर्शितत्वात् TarkSaṅ.(A.) 130.10; 130.13; गौरनाद्यनन्तवतीत्यादिश्रुतेर्मायागुणप्रवाहस्यानाद्यनन्तत्वात् VedāntRaMañ. 1.2 (20.24); 2.7 (90.15); तथाविधपरमाणूनां चावस्थाप्रवाहस्यानाद्यनन्तत्वात् तत्र विशेषकृतिः NyāyPari. 498.2; 500.1; नित्य एव जीवः।··· बिम्बस्य परमात्मनोऽनाद्यनन्तत्वात् TattvPrakā. 119B.4 (*on* ii. 3.30); गुणत्रयस्य चानाद्यनन्तत्वात् तदुपाधिकानामपि तथात्वम् ViraMi.(Bhakti.) 170.16.

अनाद्यनन्तदिव्यशरीरिन् (anādyanantadivyaśarīr-in) *adj.* having an eternal (*lit.* beginningless and endless) divine body अनाद्यनन्तदिव्यशरीरिणमीशमुक्तौ वैषम्यमीच्छन्ति PārāSū. 11.12.

अनाद्यनन्तप्रकार (anādyananta-prakāra) *adj.* of beginningless and endless varieties (जीवाः) एवंभूता बद्धाः -- अनाद्यनन्तप्रकारास्तिदुःसहतापत्रयाभितप्ताः YatīndraDī. 76.8.

अनाद्यनन्तबन्ध (anādyananta-bandha) *m.* bondage which is beginningless and endless, JainL.

अनाद्यनन्तभाव (anādyananta-bhāva) *adj.* of beginningless and endless nature सर्गावस्थितिसंहारग्रीष्मवर्षतुषारवत्। अनाद्यनन्तभावोऽयमात्मकृतसमाश्रयः YaśasCam. ii. 277.24.

अनाद्यनन्तभूमन् (anādyananta-bhūman) *adj.* of beginningless and endless glory जयताद्धि देवकीसुतोऽसौ जगतामादिरनाद्यनन्तभूमा Yādavā. 15.91.

अनाद्यनन्तलोक (anādyananta-loka) *m.* beginningless and endless world स एषोऽनाद्यनन्तलोकः स एव परानन्दलोकः स एषः पराख्यो लोकः PārāSū. 24.31.

अनाद्यनन्तविभवा (anādyananta-vibhavā) *adj.* (*f.*) of beginningless and endless greatness or power शिवोमा परमा शक्तिः ···। अनाद्यनन्तविभवा परमार्थापकर्षिणी।-- सुदुर्वाच्या दुरत्यया KūrmaP. 109.14 (1.12); ब्रह्मोवाच — त्वां नमामि ···। अनाद्यनन्तविभवां मूलप्रकृतिमीश्वरीम् SaurP. 25.13.

अनाद्यनन्तसंतानवत् (anādyanantasantāna-va(n)t) *adj.* having a beginningless and endless series तेषामपि हि सत्संकल्पानां विचित्राः संकल्पेच्छादयः ··· अनाद्यनन्तसंतानवन्तो वर्तन्ते NyāyPari. 499.6.

अनाद्यनन्तस्वभाव (anādyananta-svabhāva) *adj.* of beginningless and endless nature अनाद्यनन्तस्वभावात् परमात्मपदार्थाद्विपरीतः सायन्त आयुःप्राणः TātpaVṛ. 208.15 (*on* 2.54)

अनाद्यनन्तस्वभावसिद्धसमवाय (anādyanantasvabhāvasiddhasamavāya) *m.* inherence which is beginningless and endless and naturally established अनाद्यनन्तस्वभावसिद्धसमवायसंबन्धमेकमात्मानमाभिमुख्येनावलम्ब्य प्रवृत्तत्वात् तं विना आत्मानं ज्ञानं न धारयति TattvPradī.(A.) 3; 11 (*on* 1.27)

अनाद्यनन्तादिवाक्य (anādyanantādi-vākya) *n.* statement (about Brahman) as beginningless and endless etc. अनाद्यनन्तादिवाक्यस्य विष्णुपरत्वग्रहणे कारणाभावात्प्रधानमेवाश्चोच्यते TattvPrakā. 68A.8 (*on* i. 4.6)

अनाद्यनन्ताध्यस्त (anādyanantādhyasta) *adj.* superimposed by something which is beginningless and endless दोषजन्यज्ञानात्पूर्वं सतोऽप्यनादेरनाध्यस्तत्वे ब्रह्माप्यनाद्यनन्ताध्यस्तं स्यात् Nyāyāmṛ. 154A.5

अनाद्यनन्ताविद्या (anādyanantāvidyā) *f.* beginningless and endless nescience ब्रह्म एवैकस्य तत्तदनाद्यनन्ताविद्यावच्छेदेनानन्तजीवनिर्माणसम्पद्त्वाभ्युपगा(?गमा)त् TattvPradī.(C.) 384.17.

अनाद्यनपगत (anādy-anapagata) *adj.* beginningless and not perishing यदतः परमपुरुषाद्भिन्नकार्मनाद्यनपगतसत्त्वादिगुणयुक्तं चैतन्यं स जीवः TattvPrakā. 123B.1 (*on* ii. 3.47)

अनाद्यनिधन (anādy-anidhana) *adj.* who has neither a beginning nor an end अनाद्यनिधनः शंभुः EI. xiv. 166.1; अनाद्यनिधनाः सर्वे मग्नाः संसारसागरे VarāṅgaC. 26 9.

अनाद्यनिधनात्मक (anādyanidhanātma-ka) *adj.* of beginningless and endless nature पृथिव्यादिवदात्मायमनाद्यनिधनात्मकः YaśasCam. ii. 257. 12.

अनाद्यनिर्वचनीयभावरूपाज्ञान (anādyanirvacanīyabhāvarūpājñāna) *n.* nescience which is beginningless, indescribable and of the nature of existence तस्य चाध्यासस्य अनाद्यनिर्वचनीयभावरूपाज्ञानमुपादानम् VivaPraSaṁ. 17. 15.

अनाद्यनिर्वचनीयाज्ञान (anādyanirvacanīyājñāna) *n.* beginningless and indescribable nescience तस्माज्जागरस्वप्नयोरप्यनाद्यनिर्वचनीयाज्ञानमेव ब्रह्मावरणमभ्युपगन्तव्यम् VivaPraSaṁ. 28. 7.

अनाद्यनिर्वचनीयाविद्या (anādyanirvacanīyāvidyā) *f.* beginningless and indescribable nescience (ब्रह्मणः) अनाद्यनिर्वचनीयाविद्यावच्छिन्नस्य व्यापारवत्त्वमवभासत इति कर्तृत्वोपपत्तिः Bhām. 124. 16 (*on* i. 1.5); 502.18 (*on* ii. 3. 43); 555.2 (*on* iii. 2.9); अनाद्यनिर्वचनीयाविद्यानिबन्धनं तु भावानां भेदं न व्यासेधामः TātpaT.(Vā.) 616.4 (*on* iv. 1.41); देहेन्द्रियादयः ··· आत्मनि ··· अनिर्वचनीयानाद्यविद्याकल्पिता (v. l. अनाद्यनिर्वचनीयाविद्याकल्पिता) अनिर्वचनीया एव SiddhāBi. 18. 2; स्वरूपज्ञानमेव ··· अनाद्यनिर्वचनीयाविद्यावच्छिन्नमाधारः SiddhāTa. 10. 10.

अनाद्यनिर्वाच्य (anādy-anirvācya) *adj.* [*f.*-ā] beginningless and indescribable अनाद्यनिर्वाच्यमपीह कारणं मायाप्रधानं तु परं शरीरकम् AdhyāRā. vii. 5. 30; एका तावदनाद्यनिर्वाच्या ··· माया PrakaVi. 3. 22; 630. 26; अनाद्यनिर्वाच्याया अविद्याया य उपधाने भेदः संबन्धविशेषः स एवोपाधिः तेन कल्पितो जीवः VedāntKa. 371. 16 (*on* iii. 2.9); ब्रह्म ··· अनाद्यनिर्वाच्यानवच्छिन्नाविद्यासंबन्धात् बद्धमिव प्रतिभासते TarkSaṁ.(Ā.) 140. 28; केयमविद्या नाम अनाद्यनिर्वाच्या वा ··· भ्रमोपादानं वा Vādā. 17.7.

अनाद्यनिर्वाच्यभावरूपाज्ञान (anādyanirvācyabhāvarūpājñāna) *n.* nescience which is beginningless, indescribable and of the nature of existence अनाद्यनिर्वाच्यभावरूपाज्ञानमात्माश्रितमात्मविषयम् अध्यासस्योपादानमिति सिद्धम् VivaPraSaṁ. 21. 18.

अनाद्यनिर्वाच्यमाया (anādyanirvācya-māyā) *f.* beginningless and indescribable nescience अनाद्यनिर्वाच्यमायाख्यायां(स्यात्) जगतस्तस्मिन् प्रधीयमानत्वेन प्रधानशब्दवाच्यादन्य ईश्वरोऽत्र प्रतिपिपादयिषितः PrakaVi. 203. 20.

अनाद्यनिर्वाच्याज्ञान (anādyanirvācyājñāna) *n.* beginningless and indescribable nescience ज्ञानान्मोक्षस्य साध्यत्वसिद्धयन्यथानुपपत्त्यानाद्यवि(? नि)-र्वाच्याज्ञानसिद्धो भेदोऽभ्युपगन्तव्यः PrakaVi. 420. 22; अनाद्यनिर्वाच्याज्ञानस्यैव तथातथा विवर्तमानस्य तथाविधविवर्ताभ्युपगमात् TarkSaṁ.(Ā.) 30. 4.

अनाद्यनिर्वाच्याविद्या (anādyanirvācyāvidyā) *f.* beginningless and indescribable nescience अनाद्यनिर्वाच्याविद्योपधानमेव ब्रह्मणो जीव इति च क्षेत्रज्ञ इति चाचक्षते Bhām. 96. 10 (*on* i. 1. 4); 127. 2 (*on* i. 1.5); 709. 6 (*on* iv. 1. 2); तस्मान्न सन्नासन्नापि सदसदपि त्वनाद्यनिर्वाच्याविद्याक्रीडनमलीकनिर्भासं विभ्रमालम्बनमिति सिद्धम् NyāyMa. 127.10; 122. 9; 176. 9; सकलमपि द्वैतम् ··· परिपूर्णे प्रत्यगात्मनि अनाद्यनिर्वाच्याविद्यया समारोपितम् TarkSaṁ.(Ā.) 133. 28; 9. 27.

अनाद्यनिर्वाच्योपादान (anādyanirvācyopādāna) *adj.* having beginningless and indescribable (nescience) as the material cause विवादपदम् – अनाद्यनिर्वाच्योपादानं विपक्षे बाधकोपपत्तौ सत्यां कार्यत्वात् NyāyMa. 124. 2.

अनाद्यनुपमसिद्ध (anādyanupama-siddha) *m.* epithet of Jina (*lit.* beginningless and unparalleled Siddha) अनाद्यनुपमसिद्धेभ्यो नमो नमः MahāP. 40. 25(7)

अनाद्यनुभव (anādy-anubhava) *m.* experience since time immemorial वासनाः सर्ववस्तूनामनाद्यनुभवागताः AnuVyā. 28B.2 (*on* 3. 2); अनादीति। अनाद्यनुभवप्रवाहोत्पन्नाः (वासनाः) NyāySu.(Ja.) 460A.3 (*on* iii. 2.1); 461B. 7 (*on* iii. 2. 1)

अनाद्यनुसंधान (anādy-anusandhāna) *n.* remembrance since time immemorial न च हस्तचेष्टादिवत् संकेतमूलं शब्दस्य बोधकत्वमिति वक्तुं शक्यम्। अनाद्यनुसंधानाविच्छेदेऽपि संकेतयितृपुरुषाज्ञानात् VedāSaṁ. 167. 7; NyāyPari. 391. 19.

अनाद्यन्त (an-ādyanta) *adj.* [*f.*-ā] not having beginning and end अचिन्त्योऽमूर्तः ··· अप्रमेयोऽनाद्यन्तः ··· सर्वस्यात्मा MaiU. 7.1; पदमाद्यमनाद्यन्तं तस्य बीजं न विद्यते AnnaU. 4. 68; 5. 10; AdhyāU. 60; TripuTāU. 541. 6; शिवमक्षरमव्ययम् ··· अप्रमेयमनाद्यन्तं रुद्रसूक्तैरभिपिञ्च BhasmJāU. 563.14; 564.23; एवमेतदनाद्यन्तं भूतसंहारकारकम्। अनादिनिधनं लोके चक्रं संपरिवर्तते MahāBhā. i. 1.38; अनाद्यन्ता तु सा तृष्णा अन्तर्देहगता नृणाम्। विनाशयति MahāBhā. iii. 2. 36; PadmP. v. 19. 270; अनाद्यन्तमजं देवम् ···। यं देवं विदुषो गान्ति MahāBhā. iii. App. 27(86); अनाद्यन्तं परं ब्रह्म न देवा नर्षयो विदुः MahāBhā. xii. 70*; अनाद्यन्तं परं ब्रह्म AhirbuS. 2. 6; 31.7; कालोऽयमनाद्यन्तो ग्रहैरनुमीयते क्षेत्रे Āryabh. 3. 11(59); अनाद्यन्तं जगद्योनि त्रिगुणप्रभवाप्ययम् ।··· ब्रह्माग्रे समवर्तत MārkP. 45. 34; VāyuP. i. 4. 20; i. 49. 165; BrahmāṇḍP. i. 3.11; KūrmaP. 41. 7 (1. 4); LiṅgaP. i. 70. 6; एवमेतदनाद्यन्तं चक्रं संपरिवर्तते YājñaSm. 3. 124; अनाद्यन्तम् ··· यः प्रतीत्यसमुत्पादं जगाद ···। तं सर्वज्ञं प्रणम्यायं क्रियते तत्त्वसंग्रहः TattvSaṁ. 4; संसारवृक्षः अव्ययः अनाद्यन्तदेहादिसंतानाश्रयः हि सुप्रसिद्धः GītāBh.(Śaṅ.) 432.14 (*on* 15. 1); ViveCū. 466; अनाद्यन्तम् ··· महः शैवमीडे ŚivBhuSt. 2; SarvaVeSāSaṁ. 454; 761; अस्ति ··· शिवः ··· स्वयं ज्योतिरनाद्यन्तः KulārT. 1.8; तस्मात् शिवतत्त्वमिदमनाद्यन्तं स्वयं प्रथमानम् ParāTri. 143. 5; 274. 2; निर्विकारमनाद्यन्तं परमात्मानमाश्रयेत् TaiUBhāVā. 113. 15(2); यत्रानाद्यन्तं वा न यत्र किंचित् सादिसान्तम् ··· तं विद्धि परमानन्दलोकसंज्ञम् ParāSū. 24.26; अनाद्यन्तोऽपराधीनः ···। जयत्यविरतः व्याप्तविश्वः कालो विनायकः TantrRā. 1.1; 28.50; देवाः ··· अधितिष्ठन्ति तेऽमीक्ष्णं सहस्रारं सुदर्शनम्। कालचक्रमनाद्यन्तमस्य तेजः प्रकीर्तितम् LakṣmīT. 30. 54; विशुद्धं केवलं ज्ञानम् ···। सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ··· विदन्ति मुनयः BhāgP. ii. 6. 39; KūrmaP. 204.2 (1.17); SkandP. v(2). 5.10; BrahmP. 178. 131; नमस्यामि ··· वाग्देवतामनाद्यन्ताभीश्वरीम् KūrmaP. 255.13 (1.24); स हि सर्वगतो देवः सूक्ष्मोऽव्यक्तः सनातनः। जगदादिरनाद्यन्तः NaraP. 64. 70; अनाद्यन्ता शंभोरपृथगपि शक्तिर्भगवती DevīPañ. 5. 28; 5. 3; देवदेवमनाद्यन्तमनन्तं जगतां पतिम्। आराधयितुं प्रतिमां करोमीति मतिर्मम BrahmP. 50. 31; BhaviP. 112A. 7 (i. 63.6); नारायणमनाद्यन्तं न तं सेवेत को जनः PadmP. i. 61. 101; तत्कथं वेष्टनं मे स्यादनाद्यन्तस्य रज्जुतः AdiP. 28. 28; SaurP. 20. 19; ŚivaP. ii(5). 6.22 (227A. 14); देवः ··· स एव सदसद्रूपं येनालोकेन लक्ष्यते। सर्गचित्रमनाद्यन्तं स्वरूपं चाप्यरञ्जनम् YogVā. iii. 9.53; ब्रह्मणि स्फाररूपिणि। सर्वशक्तावनाद्यन्ते पृथग्-वदपृथक्कृताः। संस्थिताः शक्तयः YogVā. iv. 11.42; अपारे काव्यसंसारे कविरेव प्रजापतिः ··· अपार इति। अनाद्यन्त इत्यर्थः Loc. 222. 18 (*on* 3.43); तृष्णातन्तुरनाद्यन्तो विसानामिव देहिनाम् BṛKathāMañ. 18. 74; कालश्च भगवान्विष्णुः ··· अनाद्यन्तस्य यस्यान्तर्यान्ति कल्पान्तकोटयः DaśāvaC. 4. 50; NītiMā. 32 4; अनाद्यन्तश्च यो नित्यस्तस्मै कालात्मने नमः ĪśānŚiPa. ii. 21.33; भोगेच्छा ··· सा ··· अनाद्यन्ता ··· कथ्यते MālinīT. 1. 26; अनाद्यन्तभवावर्तवर्तिषु देहिषु। ज्ञानद्दष्यावृतिवैचान्तरायाभिधकर्मणाम् ··· कौटयस्त्रिंशत् परा स्थितिः TriṣaŚaPuC. i. 3.583; अनाद्यन्तं नित्यं चक्रं चक्रभ्रमणवत् कार्यकारणत्वमावर्तते DīpKa. 86. 20 (*on* 3.124); MahNirvāT. 4. 28; किम् ··· स्वामिनमेनं न बुध्यसेऽनाद्यन्तम् Yudhi-Vi. 3. 40; अनाद्यन्ता काचित् ··· शम्पा परिलसति कम्पापरिसरे MūkaPañ. 5.43; *m.* an epithet of Śiva आत्मयोनिरनाद्यन्तः ··· सप्तलोकधृक् ··· एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम् LiṅgaP. i. 98.91; SaurP. 41. 75; ŚivaP. iv. 35. 64 (392A. 15)

अनाद्यन्तकाल (anādyanta-kāla) *adj.* whose time (of existence) is without beginning and end आत्मा खल्वनाद्यन्तकालः संप्रतिपन्नः GoviBh. 157.4 (*on* ii. 3. 28)

अनाद्यन्तजगन्मूल (anādyanta-jaganmūla) *n.* beginningless and endless source (i. e. cause) of the world महानन्दकरं देवि प्राणिनां सृष्टिकारणम्। अनाद्यन्तजगन्मूलं शेषतत्त्वस्य लक्षणम् MahNirvāT. 7. 108.

अनाद्यन्तत्व (anādyanta-tva) *n.* the state of not having beginning and end पौरुषाणामहोरात्राणामतीतानां संख्यैव नास्ति। न च भविष्याणाम्। अनाद्यन्तत्वात् कालस्य ViṣṇuSm. 20.21; अत एव च कालस्यानाद्यन्तत्वसिद्धिः ŚatDū. 216. 12.

अनाद्यन्तपद (anādyanta-pada) *n.* position not having beginning and end उदितैषा प्रकाशाख्या चिच्छक्तिः परमात्मनः ··· स्वस्वभावं विदित्वैव-मनाद्यन्तपदे स्थिता YogVā. iv. 42.15; iv. 60. 5.

अनाद्यन्तम् (anādyantam) *adv.* without beginning and end सुवर्णं व्यवहाराङ्गमनाद्यन्तं यथास्थितम्। मायासुवर्णमप्येवमिति किं तेन तत्समम् TattvSaṁ. 3184.

अनाद्यन्तवती (anādyanta-vatī) *adj.* (*f.*) not having beginning and end गौरनाद्यन्तवती सा जनित्री भूतभाविनी। सितासिता च रक्ता च सर्वकामदुघा विभोः MantriU. 5.

अनाद्यन्तावभासात्मन् (anādyantāvabhāsātman) *adj.* of the nature

of brilliance that does not have beginning and end अनाद्यन्ताभासात्मा परमात्मैव विद्यते AnnaU. 2. 34.

अनाद्यन्तावभासिनी (anādyantāvabhāsin-ī) *adj.* (*f.*) appearing without beginning and end भाति (स्मृतिः) संवित्प्रभैवेयमनाद्यन्तावभासिनी YogVā. iv. 3.10.

अनाद्यन्यत्र (anādy-anyatra) *adv.* else where than in what is beginningless सृष्टिविषये सृज्यमान एव या दृष्टिः सानाद्यन्यत्र, न त्वनादौ स्वीक्रियते LaCandr. 534. 29.

अनाद्यपक्ष (anādya-pakṣa) *m.* view that the meaning (of a word) is eternal अस्ति चेद् व्यवहारसिद्धिः किमीश्वरेण किं वा तत्कृतेन समयेनेत्यनाद्यपक्ष एव श्रेयान् NyāyMañ. i. 225.11.

अनाद्यपचारप्रवाह (anādy-apacārapravāha) *m.* series of misdeeds since time immemorial जीवस्यानाद्यपचारप्रवाहेण पराभिध्यानादेव तिरोहितम् VedāntSā.(Rā.) 258.1 (*on* iii. 2. 4); जीवस्यानाद्यपचारप्रवाहेण पराभिध्यानात् परमेश्वरसंकल्पात् तस्य सत्यसंकल्पादिकं तिरोहितम् BrahmSūBh. (Śrī.) ii. 228.7 (*on* iii. 2. 4); एवं चानाद्यपचारप्रवाहे स्वरूपतिरोधायकेऽनुवर्तमाने स्वप्नदशायां तदभिव्यक्तिकल्पनमयुक्तमिति 'स हि कर्ते'त्येतदपि यथाकथंचित्परमेश्वरविषयतया योजनीयम् ŚivārkaMaDī. ii. 228. 33 (*on* iii. 2. 4)

अनाद्यपर्यवसाननित्यता (anādyaparyavasāna-nityatā) *f.* the beginningless and endless eternity (having the potential power of creating innumerable invisible objects), JainL.

अनाद्यप्राशन (anādya-prāśana) *n.* eating of forbidden food अनार्जवपैशुनप्रतिषिद्धाचारानाद्यप्राशनेषु ... अब्लिङ्गाभिरप उपस्पृशेत् GautDS. iii. 7. 7.

अनाद्यभक्षण (anādya-bhakṣaṇa) *n.* eating of forbidden food एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवम्।... शृणुतानाद्यभक्षणे ManuSm. 11. 145; ManuBh. ii. 414.11 (*on* 11. 144)

अनाद्यभावविलक्षण (anādy-abhāvavilakṣaṇa) *adj.* beginningless and distinct from non-existence अनादित्वे सति भावत्वमभावविलक्षणत्वं वा, न निवर्त्यनिष्ठमनादिभावमात्रवृत्तित्वात्। अनाद्यभावविलक्षणमात्रवृत्तित्वाद्वा आत्मवद् Nyāyāmṛ. 325A.8; AdvaiSi. 566. 2; 567. 11.

अनाद्यभावविलक्षणत्व (anādyabhāvavilakṣaṇa-tva) *n.* the state of being beginningless and distinct from non-existence एवमन्यदपि ऊहनीयम्।... यद्वा — अनाद्यभावविलक्षणत्वं, ज्ञानविरोधिवृत्ति AdvaiSi. 567.11.

अनाद्यभावान्य (anādy-abhāvānya) *adj.* beginningless and different from non-existence प्रमाणज्ञानं वानाद्यभावान्यानाद्यनिवर्तकम् AdvaiSi. 566. 5.

अनाद्यभ्यास (anādy-abhyāsa) *m.* experience or practice since time immemorial अनाद्यभ्यासवासनावशाददृष्टविशेषनियतं तु स्पार्शनप्रत्यक्षमेव तत्र कारणमेषितव्यम् Kiraṇā. 135. 11; अत एव जलाद्यभ्यवहारमलोत्सर्गहेतुनाडीनामनाद्यभ्यासवासनावशात् अदृष्टसहकृतत्वगिन्द्रियेणोपलम्भात् तद्गोचरप्रयत्नः TattvCin. ii(2). 31. 2.

अनाद्यर्थ (anādy-artha) *adj.* meant for (the retention of) the non-initial (reduplicative unvoiced stops) शिटः परोऽघोषोऽवशेष्यो भवति। शिटो लोप इत्यर्थः। चुश्च्योत। तिष्ठेव (? तस्थिव)। चस्कन्द।... अनाद्यर्थोऽयमारम्भः KātanVṛ. *on* iii. 3.10.

अनाद्यर्थप्रत्यायकत्व (anādy-arthapratyāyakatva) *n.* the state of being the conveyor of meaning since time immemorial अनाद्यर्थप्रत्यायकत्वस्य चाधुनिकसंकेतितडित्थादिपदेषु पाणिनिसंकेतितटिघुभादिष्वव्याप्तेः BhāṭṭCin. ii. 40. 1 (*on* i. 3. 8)

अनाद्यर्थसंबद्ध (anādy-arthasambaddha) *adj.* related to or connected with the things-meant since time immemorial शब्दानामनाद्यर्थसंबद्धानां वेदानां च नित्यत्वमाश्रित्य प्रामाण्यमङ्गीक्रियते ŚāstrDī. 115. 4 (*on* i. 1.5); BhāṭṭCin. i. 40. 23 (*on* i. 1. 4)

अनाद्यर्थाभिधायित्व (anādyarthābhidhāyi-tva) *n.* the state of being the conveyor of the thing-meant that has no known beginning अभिव्यक्तेत्यनेनानाद्यर्थाभिधायित्वम् LaŚabdeŚe. ii. 207. 18.

अनाद्यर्थाभिधायिन् (anādyarthābhidhāyin) *adj.* conveying the thing-meant that has no known beginning एतच्च स्मृतिशास्त्रस्यार्थतोऽनादित्वादनाद्यर्थाभिधायिग्रहणस्य न्याय्यत्वाद्गम्यते PradI. iv. 134A.9 (*on* iv. 1.96); स्मृतिशास्त्रस्य चार्थतोऽनादित्वादनाद्यर्थाभिधायिनामेव ग्रहणं न्याय्यम् PadMañ. *on* KāśiVr. *on* P. iv. 1. 96.

अनाद्यविद्या (anādy-avidyā) *f.* beginningless nescience अनुद्रूपं यत्परिहृत्य कृत्यम् अनाद्यविद्याकृतबन्धमोक्षणम् ViveCū. 85; अव्यक्तनाम्नी परमेशशक्तिः अनाद्यविद्या त्रिगुणात्मिका परा। कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ViveCū. 110; 368; अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते ĀtmaBo. 14; तदंशा जीवसंज्ञकाः। अनाद्यविद्योपहिता यथाग्नौ विस्फुलिङ्गकाः KulārT. 1. 9; SaṁgīRa. i. 24. 1 (1(2). 6); यदि वा कर्मकाण्डेन शिष्टाः स्वाभाविकीमिनामनाद्यविद्यां वासनाविपर्यासङ्गहेतुभूतामवधूय ManuBh. ii. 476. 5 (*on* 12. 86); अनाद्यविद्यैव संसारः, निखिलविकल्पातीतपरिशुद्धविद्योदयात् तदस्तमय एव मोक्षः PrakaPañ. 335. 16; NayaVi. 222. 2 (*on* i. 1.5); अनवयवमेव वाक्यमनाद्यविद्योपदर्शितालीकवर्णपदविभागमस्या निमित्तमिति केचित् TattvBi. 6. 2; (ईश्वरम्) अनाद्यविद्योपदर्शितवियदादिभेदावच्छिन्नज्ञानैश्वर्यादिमहिमविकल्पतया काल्पनिकमाचक्षते ĀtmaSi. 3. 23; BhāgP. viii. 24.46: तस्मात्प्रकाश एव ... अनाद्यविद्योपदर्शितविविधविचित्रनामरूपप्रपञ्चो ब्रह्मेत्यद्वैतसिद्धिः TātpaṬ.(Vā.) 616.8 (*on* iv. 1. 41); आत्माद्वैते ह्यनाद्यविद्यया देहाद्युपहितः सद्वितीय इव जीवात्मा भाति NayaVi. 222. 1 (*on* i. 1.5); तत्र कथमकर्ताप्रयोक्ता कथं वाभोक्ता कर्मजनितफलभोगभागी। तस्मादनाद्यविद्यालब्धकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधिनिषेधशास्त्रं प्रवर्तते Bhām. 28.25 (*on* i. 1.0); 185. 13 (*on* i. 2 21); ब्रह्मोपासना ... अनाद्यविद्यातद्वासनासमुच्छेदक्रमेण ब्रह्मसाक्षात्काराय मोक्षापरनाम्ने कल्पते Bhām. 39. 17 (*on* i. 1. 1); 568.6 (*on* iii. 2. 29); 760. 9 (*on* iv. 4. 15); AdhyāRā. ii. 1. 22; NyāySu.(Ja.) 504A. 8 (*on* iii. 2.9); अनाद्यविद्यासंसिद्धं बन्धनं छिन्नमद्य नः AdhyāRā. iv. 1. 80; iv. 3.20; iv. 4.7, vii. 5.40; अस्मिन्शास्त्रेऽनाद्यविद्याकृतविविधभेददर्शननिमित्तजन्मजरामरणादिसांसारिकदुःखसागरनिमग्नस्य निखिलदुःखमूलभूतमिथ्याज्ञाननिवर्हणायात्मैकत्वविज्ञानं प्रतिपिपादयिषितम् BrahmSūBh.(Rā.) 5. 5 (*on* i. 1. 1); सदसदनिर्वचनीयानाद्यविद्या BrahmSūBh.(Rā.) 16.3 (*on* i. 1.1); अखण्डैकरसं ब्रह्मानाद्यविद्यामन्तरेण जीवान् पश्यतीति ब्रह्माज्ञानप्रसङ्गः BrahmSūBh.(Rā.) 428. 9 (*on* ii. 1.15); VedāSaṁ. 73. 10; शक्यो निषेद्धुमिति सिद्धमनाद्यविद्यातद्वासनाविरचितभूनमात्रसिद्धः NyāyMa. 56.10; 73. 2; 108.7; 305. 10; 331. 6; अनाद्यविद्यातद्विलसितः सकलोऽप्ययं प्रपञ्चः TattvPradI.(Ci.) 339. 10; ब्रह्मैवानाद्यविद्यातिरोहितस्वरूपं स्वगतनानात्वं पश्यतीति चेन्न VedāntTaSā. 33. 1; स यद्यपि नैसर्गिकत्वेन सर्वक्षेत्रज्ञसाधारणस्तथाप्यनाद्यविद्याकृतभेदाभासतिरस्कृतः CaturCin. iii(1). 415. 13; बन्ध[न]स्यानाद्यविद्यातत्कार्यानुभवात्मकत्वाद् मोक्षस्य च तन्निवृत्तिरूपत्वात् ŚatDū. 105. 21; 102. 15; 115. 11; 142 10; वेश्यास्थानीययानाद्यविद्यया स्वभावान्तरं नीत आत्मा मातृस्थानीयया तत्त्वमसीत्यादिकया श्रुत्या स्वभावं नीयते SarvaDaSaṁ. 16. 881; किं तावदुक्तम्। क्षेत्रज्ञ इति। कुतः। तस्यैवानाद्यविद्यामूलकर्मनिमित्तकब्रह्मादिसर्वभावोपपत्तेः VedāntKau. 49. 3 (*on* i. 2. 1); SarvaDaKau. 139.2; अनाद्यविद्यादोषस्यानुवर्तमानतया भ्रमत्वस्यैवौत्सर्गिकत्वात् SāṁkhyaPraBh. 65. 35 (*on* 1.147); AdvaiSi. 690. 7; 738. 22; अनाद्यविद्याविजृम्भिताद् देहसंबन्धात् जीवरूपस्यांशस्य परेशकृतावनुज्ञापरिहारौ श्रूयेते GoviBh. 167. 11 (*on* ii. 3. 46)

अनाद्यविद्यातमस् (anādyavidyā-tamas) *n.* darkness in the form of beginningless nescience जीवलोकः ... अनाद्यविद्यातमःपटलपिहितदृष्टितया ब्रह्मभूयमापन्नोऽहमस्मीति न वेद Bhām. 213. 7 (*on* i. 3. 15); कदा भवन्ति मे पुनः पुनरनाद्यविद्यातमः प्रमृष्य गलितद्वयं पदमुदञ्चयन्त्यद्वयम् ŚaṅkaDigVi.(Mā.) 10. 28.

अनाद्यविद्यातिमिर (anādyavidyā-timira) *n.* darkness in the form of beginningless nescience ततः प्रभृति तत्तीर्थमापस्तम्बमुदाहृतम्। अनाद्यविद्यातिमिरव्रातनिर्मूलनक्षमम् BrahmP. 130.34; अनाद्यविद्यातिमिराक्रान्तविद्याविलोचनाः। पश्यन्ति हेतुं श्वभ्रस्य स्वर्गहेतुतया जडाः MohaRāPa. 4.42.

अनाद्यविद्यातिमिरप्रभात (anādyavidyātimira-prabhāta) *n.* dawn which dispels darkness in the form of beginningless nescience आलोकये ... अनाद्यविद्यातिमिरप्रभातम् (देवम्) DakṣiMūSt. 6.

अनाद्यविद्यातीत (anādyavidyātīta) *adj.* which is beyond beginningless nescience सिद्धस्य ब्रह्मण एवानाद्यविद्यातीतस्यानपायिनः पुरुषार्थत्वाद् NyāyMañ. i. 270.12.

अनाद्यविद्यादि (anādyavidyādi) *adj.* beginningless nescience etc. अनादिविद्यादीन् प्रत्युपादानत्वायोगाद् Nyāyāmṛ. 282A. 7; ज्ञानप्रयुक्ताभावप्रतियोगिकारणकत्वे वाच्ये उत्तरधीप्रयुक्ताभावप्रतियोगिपूर्वधीजन्यसंस्कारादौ सिद्धसाधनम्। अनाद्यविद्यादौ च बाधः GuruCandr. i. 97.1; ii. 207. 18; ii 283. 17; संस्कारोत्पत्तिपूर्वमेवैव वृत्तिरिति स्वीकारे संस्कारोत्पत्तिकाले अनाद्यविद्यादेरसत्त्वापत्तिः LaCandr. 545 38.

अनाद्यविद्यादिक (anādyavidyādi-ka) *adj.* beginningless nescience etc. उपादानत्वं हि न तावद्विशिष्टनिष्ठं परिणामित्वमाध्यासिकसंबन्धस्यातन्त्रत्वापातात्। अनाद्यविद्यादिकं प्रति तदभावाच्च Nyāyāmṛ. 227A. 8.

अनाद्यविद्याध्यास (anādyavidyādhyāsa) *m.* superimposition of beginningless nescience स्वस्यैव स्वहेतुत्वमनुपपन्नम्, अध्यासोऽस्त्वोरविशेषादिति चेन्न, अनाद्यविद्याध्यासे तयोर्विशेषस्य भवतैव स्वीकृतत्वाद् ŚatDū. 174. 18; दोषं विना भ्रमस्वीकारे – दोषस्याप्यध्यसनीयत्वेनानवस्थापत्तिरिति चेन्न,

अनाद्यविद्याध्यासस्य दोषानपेक्षत्वात् AdvaiSi. 497.7.

अनाद्यविद्यानिबन्धन (anādyavidyā-nibandhana) *adj.* [*f.* -ā] having beginningless nescience as its cause or basis नेयं पारमार्थिकी सृष्टिः ··· अपि त्वनाद्यविद्यानिबन्धना Bhām. 373.13 (*on* ii. 1.33); अनाद्यविद्यानिबन्धनविकल्पविलसिता एव विशेषाः न परमार्थतः सन्ति NyāyRa. 170.17 (*on* 4.117); कादाचित्के विभ्रमे साहृप्यापेक्षा नानाद्यविद्यानिबन्धने प्रपञ्चे SarvaDaSam. 16 59.

अनाद्यविद्यानिमित्तत्व (anādyavidyānimitta-tva) *n.* the state of being caused by beginningless nescience चित्तवृत्तिरोधे शान्तघोरमूढाकारचित्तवृत्त्युपभोगेऽनाद्यविद्यानिमित्तत्वादनादिः संयोगः TattvVai. 9.22 (*on* i. 4)

अनाद्यविद्यानिर्मितत्व (anādyavidyānirmita-tva) *n.* the state of being produced by beginningless nescience हृदये बुद्धौ साक्षिणस्तादात्म्याध्यासोऽनाद्यविद्यानिर्मितत्वेन ग्रन्थिवद् दृढसंश्लेषरूपत्वाद् ग्रन्थिरित्युच्यते JīvanVi. 9.2.

अनाद्यविद्यानिवृत्ति (anādyavidyā-nivṛtti) *f.* cessation of beginningless nescience 'तरति शोकमात्मवित्' इत्यादिश्रुतिशिरःशतवशेन निर्विशेषब्रह्मात्मैकत्वविषयानाद्यविद्यानिवृत्तिमङ्गीकुर्वाणाः ··· इमं विभागं न सहन्ते SarvaDaSam 4.43; 13.272; तत्त्वंपदार्थश्रवणमननभावनावलमुवा साक्षात्कारेणानाद्यविद्यानिवृत्तौ सच्चिदानन्दैकरसब्रह्माविर्भावः संपत्स्यते SarvaDaSam. 16.898.

अनाद्यविद्यानुवृत्ति (anādyavidyānuvṛtti) *f.* continuation of beginningless nescience अविद्येति विद्याभावस्तदन्यस्तद्विरुद्धो वा कश्चिदर्थः। -- न च तद्विरुद्धः, अनाद्यविद्यानुवृत्तिवैयर्थ्यात् ŚatDū. 142.10.

अनाद्यविद्यान्धकारित (anādyavidyāndhakārita) *adj.* darkened (i.e. concealed) by beginningless nescience ब्रह्मशब्दनिर्दिष्टं विचार्यम्, अनुदितानस्तमितस्वरूपैकप्रकाशमशेषविशेषशून्यमनाद्यविद्यान्धकारितं नित्यशुद्धं चेति ŚatDū. 51.19.

अनाद्यविद्यापट (anādyavidyā-paṭa) *m.*, *n.* (piece of) cloth in the form of beginningless nescience अनाद्यविद्यापटनेत्रबन्धनं प्रसह्य वेदान्तनिबन्धना मतिः ··· सतूलदाहं दहति SaṁkṣeŚā. 1.454 (i. 330.5); ततो वियन्मुख्यमदो जगज्जडं चिदात्मनोऽस्यैव विवर्त इष्यताम्। अनाद्यविद्यापटसंवृतात्मनस्तदोपलभ्यत्वममुष्य कल्प्यते SaṁkṣeŚā. 3.235 (ii. 287.6)

अनाद्यविद्यापदर्शित (anādyavidyāpadarśita) *adj.* wrongly exhibited by beginningless nescience पुरुषो हि ··· परमार्थसन्। प्रपञ्चस्त्वनाद्यविद्यापदर्शितोऽपरमार्थसन् Bhām. 104.14 (*on* i. 1.4)

अनाद्यविद्यापनय (anādyavidyāpanaya) *m.* removal of beginningless nescience न चोपासना ··· अनाद्यविद्यापनये वा विधिमन्तरेण प्राप्तत्वेन पुरुषेच्छयान्यथाकर्तुमकर्तुं वाशक्यत्वात् Bhām. 98.9 (*on* i. 1.4)

अनाद्यविद्यापिधान (anādyavidyāpidhāna) *n.* veil in the form of beginningless nescience त्वयापि -- नित्यशुद्धबुद्धत्वादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी वेदान्तगम्यास्थीयते। सा चोपासनाविषयस्य विधेर्न फलम् -- नाप्यविद्या (v.l. नाप्यनाद्यविद्या)पिधानापनयः तस्य स्वविरोधिविद्योदयादेव भावात् Bhām. 86.1 (*on* i. 1.4)

अनाद्यविद्याप्रसुप्त (anādyavidyā-prasupta) *adj.* asleep due to beginningless nescience पुरुषे आत्मनि सर्वं प्रविलाप्य ··· कृतकृत्यो भवति यतः, अतस्तद्दर्शनार्थमनाद्यविद्याप्रसुप्ताः उत्तिष्ठत हे जन्तवः KāṭhUBh. 145.18 (*on* 3.14)

अनाद्यविद्यामल (anādyavidyā-mala) *m.*, *n.* impurity in the form of beginningless nescience ब्रह्मस्वभाव एव मोक्षोऽनाद्यविद्यामलावृत उपासनादिक्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते, न तु क्रियते Bhām. 95.20 (*on* i. 1.4)

अनाद्यविद्यामूल (anādyavidyā-mūla) *adj.* having beginningless nescience as its root-cause न ह्यनाद्यविद्यामूलस्वप्नादिभ्रमस्य किंचित्प्रयोजनमुद्दिश्य केनचित्करणीयत्वमिति बोध्यम् GuruCandr. ii. 296.1.

अनाद्यविद्यायोग (anādyavidyā-yoga) *m.* connection with beginningless nescience (अनादियोगेन भवन्ति पुंसः) अनादियोगेन अनाद्यविद्यायोगेन भवन्ति पुंसः पुमांसो जीवाः बहवो भवन्ति SanatBh. 209.9 (*on* 1.20); चैतन्यमात्मनस्तत्त्वं कूटस्थं न तु कामवत्। अनाद्यविद्यायोगोऽस्य तत्कार्यैरादिमान्मतः BṛĀraUBhVā. iv. 3.1409.

अनाद्यविद्यालब्ध (anādyavidyā-labdha) *adj.* acquired through beginningless nescience अनाद्यविद्यालब्धकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधिनिषेधशास्त्रं प्रवर्तते Bhām. 28.25 (*on* i. 1.0)

अनाद्यविद्यावच्छेद (anādyavidyāvaccheda) *m.* delimitation by beginningless nescience अनाद्यविद्यावि(?व)च्छेदलब्धजीवभावः पर एवात्मा स्वतो भेदेनावभासते Bhām. 166.2 (*on* i. 2.6); अनश्नन्नन्योऽभिचाकशीति इतिश्रुतेः न चेद्वान्यत्वं वास्तवमभिप्रेतमपि त्वनाद्यविद्यावच्छेदमात्रापेक्षं तत्त्वमसि इत्यसकृदैकात्म्यश्रुतेः NyāyMa. 16.5; यत्तु जीवस्य मनोऽवच्छिन्नत्वं भूतसूक्ष्मावच्छिन्नत्वं च दूषितं तदस्मदिष्टमेव चेष्टितम्। ··· जीवस्यानाद्यविद्यावच्छेदाभ्युपगमात् VedāntKa. 199.20 (*on* i. 4.3)

अनाद्यविद्यावश (anādyavidyā-vaśa) *m.* influence of beginningless nescience, cf. अनाद्यविद्यावशग; [Abl., Inst.] on account of beginningless nescience [Abl.] अनाद्यविद्यावशात् ··· संविदेव परमार्थसती सैव आत्मेति सौगताः प्रकटाः ···आहुः ĀtmaSi. 19.8; ब्रह्मज्ञानमेव ··· परमं प्रयोजनम् ···तच्च प्राप्तमप्यनाद्यविद्यावशादप्राप्तमिवेति प्रेप्सितं भवति Bhām. 33.9 (*on* i. 1.1); सदैव मुक्तः सदैव केवलोऽनाद्यविद्यावशात्तु भ्रान्त्या तथावभासते Bhām. 60.17 (*on* i. 1.1); यदि ब्रह्मैवानाद्यविद्यावशात्स्वगतनानात्वं पश्यति तर्हि प्रलयकाले विद्यमानेऽप्यज्ञाने प्रपञ्चादर्शने किं कारणम् VedāntTaSā. 34.5; JīvanVi. 102 11; [Inst.] यदेकमेवाद्वितीयमसंसृष्टं सकलोपाधिपरिशुद्धं ब्रह्मतत्त्वं तत् अनाद्यविद्यावशेन शरीरादिसद्वितीयमिवोपाधिकलुषितमिवावभासमानं लब्धजीवव्यपदेशं सत् बद्धमिव लक्ष्यते PrakaPañ. 335.14; NyāyMa. 288.7.

अनाद्यविद्यावशग (anādyavidyāvaśa-ga) *adj.* which is under the influence of beginningless nescience सर्वोपसंहृतौ जीवो वासनाभिः स्वकर्मभिः। अनाद्यविद्यावशगस्तिष्ठत्यभिनिवेशतः AdhyāRā. iv. 3.26.

अनाद्यविद्यावासना (anādyavidyā-vāsanā) *f.* latent mental impression of beginningless nescience वस्तुतस्त्वनाद्यविद्यावासनारोपितग्राह्यग्राहकादिभेदप्रपञ्चं ज्ञानमात्रमेवेदम् NyāyMañ. i. 22.24; बुध्यसे वा साक्षी शब्दब्रह्मैवेदमद्वयमनाद्यविद्यावासनोपप्लवमानभेदमर्थभावेन विवर्तते NyāyMañ. i. 343.8; ii. 106.7; अनाद्यविद्यावासनावशोऽयमेकमहंकारास्पदं सत्त्वमित्यभिमन्यमानः ··· प्रवर्तते TātpaṬ.(Vā.) 507.7 (*on* iii. 1.4); विज्ञानवादिनामपि यद्यपि न बाह्यवस्तु सत्त्वाप्यनाद्यविद्यावासनारोपितमलीकं बाह्यं तत्र ज्ञानाकारस्यारोपः Bhām. 13.21 (*on* i. 1.0); 185.13 (*on* i. 2.21); 219.17 (*on* i. 3.19); सांप्रतमनाद्यविद्यावासनाप्रवासितसन्मतयः ··· अनेकान्तवादं येऽवमन्यन्ते SyādvāMañ. 21(1)

अनाद्यविद्यावासनातस् (anādyavidyāvāsanā-tas) *adv.* due to the latent mental impression of beginningless nescience न च प्रमितिरेव सिद्धिरपि तु प्रतीतिः सा चानाद्यविद्यावासनातो भवति प्रपञ्चविषया NyāyMa. 300.7.

अनाद्यविद्याविद्ध (anādyavidyā-viddha) *adj.* [*f.* -ā] pierced (i.e. affected) by beginningless nescience अनाद्यविद्याविद्धानामियत् तेषां हि वस्तुनि। नाधोर्ध्वं न त्वदृष्टीनां तत्त्वतो वाथ पौष्कर PauṣkS. 22.5; PāraS. 5.21; चिच्छक्तिः -- । अनाद्यविद्याविद्धेयमित्थं संसरति ध्रुवम् LakṣmīT. 3.26; 3.33.

अनाद्यविद्याविलसित (anādyavidyā-vilasita) *n.* manifestation of beginningless nescience न भेदो भावत्तोऽस्ति, अनाद्यविद्याविलसितमेतद् BrahmSi. 48.14; *adj.* manifested by beginningless nescience परमार्थतस्तदभावेऽप्यनाद्यविद्याविलसितो भेदोऽस्तीति चेत् Vādā. 49.7.

अनाद्यविद्याविलास (anādyavidyā-vilāsa) *m.* manifestation of beginningless nescience न खलु नेदं रजतमित्यपि निरुपाख्यगोचरं प्रत्ययमाचक्ष्महे येनैष सिद्धवदुदाह्रियेत, अनाद्यविद्याविलासस्यैव सोपाख्यतया ज्ञानाभिधानार्हस्याभावप्रत्ययगोचरताभ्युपगमात् NyāyMa. 110.1.

अनाद्यविद्याविहितकर्मन् (anādyavidyā-vihitakarman) *n.* act performed due to beginningless nescience अनाद्यविद्याविहितकर्मणां परिणामजाः। सहस्रशः प्रवृत्तास्तु गतयः DevīBhāP. viii. 21.14.

अनाद्यविद्यावृति (anādyavidyāvṛti) *f.* unveiling (i.e. removal) of beginningless nescience नान्यथा चित्तशुद्धिर्नो देवेऽप्येवं प्रसेदुषि। अनाद्यविद्यावृतये यो भविष्यति नित्यशः SkandP. i(3B). 16.43.

अनाद्यविद्याशबल (anādyavidyā-śabala) *adj.* blended with beginningless nescience ब्रह्मैवानाद्यविद्याशबलं स्वगतनानात्वं पश्यतीत्यद्वितीयत्वं ब्रह्मणोऽभ्युपयद्भिरभ्युपेत्यम् BrahmSūBh.(Rā.) 430.7 (*on* ii. 1.15)

अनाद्यविद्यासंस्कारा (anādyavidyā-saṁskārā) *adj.* (*f.*) having the latent impressions of beginningless nescience श्रीसिद्धर्षिप्रभोः पान्तु वाचः परिपचेलिमाः। अनाद्यविद्यासंस्कारा यदुपास्तेर्मिदेलिमाः PrabhāC. 121.3.

अनाद्यविद्यासिद्धत्व (anādyavidyāsiddha-tva) *n.* the state of being established or achieved through beginningless nescience इत्यादिश्रुत्या सार्वज्ञ्यादेः स्वाभाविकत्वोक्त्या कल्पितत्वासिद्धिः, अनाद्यविद्यासिद्धत्वेनेदानींतनत्वाभावेन च स्वाभाविकत्वोक्तेः AdvaiSi. 813.21.

अनाद्यविद्योपधान (anādyavidyopadhāna) *n.* adjunct in the form of beginningless nescience अनाद्यविद्योपधानलब्धसर्वज्ञशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्र्यम् Bhām. 74.14 (*on* i. 1.3); शुद्धस्याप्यनाद्यविद्योपधानवशेन कल्पकत्वोपपत्तेः AdvaiSi. 406.11.

अनाद्यविद्योपनिषद् (anādyavidyopaniṣad) *f.* secret teaching about beginningless nescience अनाद्यविद्योपनिषन्निषण्णैर्विशृङ्खलैश्चालमाचरद्भिः । अगूढलक्ष्यः MahāViSt.(H.) 2.23.

अनाद्यविद्योपादान (anādyavidyopādāna) *adj.* having beginningless nescience as its material cause आत्मपरमात्मनोः संबन्धेऽपि अनाद्यविद्योपादानभेदास्पदोऽयमीश्वरेशितव्यतादिरूपः संबन्धः परमार्थतस्त्वेकं तत्त्वमिति केचित् ĀtmaSi. 4.19; अनाद्यविद्योपादानदेहाद्यतिरिक्तप्रत्यगात्मतत्त्वावबोधे जातेऽपि अविद्यासंस्कारानुवृत्तावनुवर्तन्ते सांसारिकाः प्रत्ययास्तद्व्यवहाराश्च Bhām. 43.19 (*on* i. 1.1)

अनाद्यविद्योपाधिक (anādyavidyopādhi-ka) *adj.* having beginningless nescience as its adjunct चित्प्रतिबिम्बस्य जीवस्य स्वाभाविकी बिम्बभूतब्रह्मात्मता, अनाद्यविद्योपाधिकं संसारित्वम्, तस्य विद्यया निवृत्तौ स्वरूपावस्थानमुपपद्यते PrakaVi. 1082.20.

अनाद्यवृत्ति (anādya-vṛtti) *f.* mental cognitive function other than the first वृत्तिश्चिरस्थितैैव स्याद्धारावाहिकस्थले । भिन्ना वा वृत्तयः सन्तु स्थूलकालार्थगोचराः । उपास्तिवदमानानि सन्तु वानाद्यवृत्तयः । गृहीतग्रहणात् सूक्ष्मकालस्यातीन्द्रियत्वतः VedāntSiSūMañ. 1.85 (comm. अनाद्या आद्यभिन्नाः द्वितीयादिवृत्तयः)

अनाद्यसंभावना (anādy-asambhāvanā) *f.* impossibility of (assumption of *avidyā*) being beginningless अनाद्यज्ञानस्यैवानाद्यसंभावनाविपरीतभावनयोरपि गुरुप्रभावेण क्षणमात्रोच्छेदसंभवात् TristhaSe. 297.22.

अनाद्यादन (anādyādana) *n.* eating of forbidden food एषोऽनाद्यादनस्योक्तो व्रतानां विविधो विधिः ManuSm. 11.161; अनाद्यादनस्याभक्ष्यभक्षणस्य ManuBh. ii. 419.7 (*on* 11.160)

अनाद्यानुपूर्वी (anādy-ānupūrvī) *f.* beginningless sequential order (of sounds) आनुपूर्वीविशेषविशिष्टवर्णगता योग्यतेत्यप्ययुक्तम् । ··· ततश्चानाद्यानुपूर्वीविशिष्टतारूपवेदत्वं दूरोत्सारितम् ŚrutaPra. ii. 57.22 (*on* i. 3.25); अनाद्यानुपूर्वीभङ्गशङ्कया तेषां (वेदानाम्) प्रामाण्ये अनाश्वासः स्यात् ŚivārkaMaDī. i. 157.23 (*on* i. 1.3)

अनाद्यावरणरूप (anādyāvaraṇa-rūpa) *adj.* of the form of concealment from time immemorial अनाद्यावरणरूपस्य तिरोभावस्य कथं परमेश्वरकर्तृकत्वम् ŚivārkaMaDī. i. 110.10 (*on* i. 1.2)

अनाद्युदात्त (an-ādyudātta) *m.* [Loc.] when there is no accent on the initial syllable अन्तरनाद्युदात्ते TaiPrāti. 8.9; *adj.* not having accent on the initial syllable अन्तरनाद्युदात्तम् VājaPrāti. 1.162; (मध्योदात्तं त्विदं पदम्) मध्योदात्तमिति । अनाद्युदात्तमित्यर्थः MayūMāli. 250.4 (*on* iii. 3.8)

अनाद्युपप्लववासना (anādy-upaplavavāsanā) *f.* beginningless mental impression regarding illusion (*lit.* impediment) वेद्यवेदकाकारविधुराया अपि बुद्धेर्व्यवहर्तृपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया — अनाद्युपप्लववासनासामर्थ्याद् व्यवस्थोपपत्तेः पर्यनुयोगायोगात् SarvaDaSam. 2.211.

अनाद्युपाधि (anādy-upādhi) *m.* beginningless delimiting condition (in the form of ignorance) जीवन्मुक्तः स एव भ्रमविधुरमना निर्गतेऽनाद्युपाधौ नित्यानन्दैकधाम प्रविशति परमं नष्टसंदेहवृत्तिः ŚatŚlo. 91; आत्मनः सर्वज्ञस्याप्यनाद्युपाधियोगनिबन्धनाविद्यावशात्काम्येषु निषिद्धेषु कर्मसु कर्तृतोपपद्यते Aparā. 974.13 (*on* 3.67); अनाद्युपाधिस्थलेऽनादिभेदः LaCandr. 818.40.

अनाद्यून (an-ādyūna) *adj.* not voracious (i.e. eating moderately) (सिन्धुरमेकमुदयगिरिनामकं परीक्ष्य) अनाद्यूनमिव सुभगम् YaśasCam. i. 299.1 (comm. आद्यूनः क्रूराग्निर्न आद्यूनो अनाद्यूनः । अल्पभोजी इत्यर्थः)

अनाद्रियमाण (an-ādriyamāṇa) *adj.* [*f.* -ā] **I** not honouring, not respecting अनाद्रियमाणा वै यूयमाचरिष्ट नेतरान् नेतरान् आद्रियमाणा इति JaimiBr. 1.154; (अपाला) अनाद्रियमाणैवैतमब्रवीत् JaimiBr. 1.220; संबन्धमात्रव्यवहारिणो निष्प्रयोजनं कर्तृस्मरणमनाद्रियमाणा विस्मरेयुः ŚābaBh. 53.9 (*on* i. 1.5); (डोम्बिका) नृत्तं प्रधानभावं गीतं च तदुपसर्जनभावं नयन्ती तत एव तदभिनयमनाद्रियमाणा ··· अङ्गविक्षेपं करोति AbhinBhā. i. 176.5 (*on* 4.263); Kāvyānu.(He.) 395.16; ऋष्यशृङ्गादिवचनानि विगीतत्वबुद्ध्यानाद्रियमाणैः ··· आचार्यैरयमेव साधारणः पक्षोऽङ्गीकृतः Mitā. 346.13 (*on* 3.24); पुरुषगौरवमनाद्रियमाणानामपि युक्तिगौरवस्यादरणीयत्वात् ŚivārkaMaDī. ii. 8.10 (*on* ii. 1.4); यद्यन्यत्र लाघवलोभेन दृष्टनियममनाद्रियमाणोऽपि परः द्व्यणुककारणप्रक्रियायां तन्न परित्यजेत् ŚivārkaMaDī. ii. 75.5 (*on* ii. 2.13); **II** (*fig.*) discarding न खलु वृक्षमनाद्रियमाणा शाखास्ति GoviBh. 246.9 (*on* iii. 3.41)

अनाद्रियमाणत्व (anādriyamāṇa-tva) *n.* the state of being discarded or ignored प्रयोजनद्योतनात्मा व्यापारः ··· अनुपयुज्यमानत्वेनानाद्रियमाणत्वादस्मत्कल्पो यमर्थमधिकृत्य प्रवर्तते तद्धि प्रयोजनलक्षणम् Loc. 51.18 (*on* 1.17); प्रकृताप्रकृतत्वेन मिथो विरोधिनी ज्ञानामीत्यादिवाक्यस्यालंकारतयानाद्रियमाणत्वाद् Ekāva. 8.9(6) (225.8)

अनाधातृ (an-ādhātṛ) *adj.* who does not install or who does not set up (the sacred fires) अनाधातुश्च तत्त्विवाधातुरेवाग्निर्नो यतः । एकस्याग्निषु तत्सिद्धिर्ने स्वाग्निष्वात्मनेपदात् NyāyMāVi. 356.8 (*on* vi. 6.5); न चैवं संभारवाक्ये ··· अनाधातारं प्रति आहवनीयत्वाभावानवगतेः ··· वाक्यभेदापत्तिः MīmāKau. ii. 30.16 (*on* ii. 3.4); BhāṭṭDī. i. 146.14 (*on* ii. 3.4)

अनाधान (an-ādhāna) *n.* non-instilling, non-bestowing अनाधानेऽनुपकारितया सहकारिणो नापेक्षेरन् । आधानेऽपि भिन्नमभिन्नं वोपकारमादध्युः Bhām. 435.9 (*on* ii. 2.26); ननूपसर्पणप्रत्ययः प्रदीपे कं चिदुपकारमाधत्ते न वा, न तावदाधत्ते क्षणस्याभेद्यत्वेनोपकृतानुपकृतत्वासंभवात् । अनाधाने च सहकारिभावाभावात् TātpaṬ.(Vā.) 561.4 (*on* iii. 2.14); VedāntKa. 13.18 (*on* i. 1.1)

अनाधाय (án-ādhāya) *ger.* **AI** not having placed (the fuel-sticks on the fire) अनाहितस्तस्याग्निरित्याहुः । यस्समिधोऽनाधायाग्निमाधत्त इति । तास्संवत्सरे पुरस्तादादध्यात् TaiBr. I. i. 9.10; **AII** not having installed (the *aupāsana*-fire) तथा च प्रथममनाधेयमौपासनाग्निमनाधाय गार्हपत्याद्याधानकरणात्परिवेत्तेत्यपि गीयते SmṛtiCan. v. 177.19; 'आवसथ्यम्' औपासनाग्निम्, 'अनादृत्य' 'अनाधाय', 'त्रेतायां' गार्हपत्याद्यग्नित्रयाधाने, यः प्रवर्तते सोऽनाहिताग्निः एव भवति CatuCin. iii(1). 376.20; **B** not having instilled or bestowed यदा दर्शपूर्णमासादवयवो वा कांचित्पूर्वं शक्तिमनाधायैव विनश्येत्ततः ··· श्रुतं फलं साहित्यासंस्था नोपपद्येत TantrVā. 366.22 (*on* ii. 1.5); किमयं भावनाख्यः संस्कारः, उत अदृष्टरूपः ··· । न द्वितीयः - द्रव्येषु किंचित्संस्कारमनाधाय केवलात्मसमवेतादृष्टजनकत्वे प्रयाजादिवदारादुपकारकत्वप्रसङ्गात् NyāySiA. 260.3.

अनाधार (an-ādhāra) *m.* **1** not a receptacle आधारं वाप्यनाधारं विविच्यात्मानमात्मनि । ईक्षमाणो बुधो संविम् ऋचो दैवतवित् पठेत् BṛDe. 8.139; [Loc.] where there is no support साधारं नोद्धरेत् पात्रमनाधारे न निक्षिपेत् KulārT. 11.34; **2** epithet of Vināyaka (*lit.* not requiring any support) अनाधारोऽनामयोऽमलः ··· । इति वैनायकं नाम्नां सहस्रमिदमीरितम् GaṇeP. i. 46.70; *n.* not a support or resort निलयनं नीडं आश्रयः न निलयनम् अनिलयनम् अनाधारम्, तस्मिन् ··· ब्रह्मणीति वाक्यार्थः TaiUBh. 265.14 (*on* 2.7)

अनाधार (an-ādhāra) *adj.* [*f.* -ā] **1** not having (i.e. not requiring) any support अद्वैतसंस्थानम् । ··· अनाधारमादिमध्यान्तशून्यम् TripāMaNāU. 374.13 (7); BhasmJāU. 564.24; परमं ब्रह्म ··· । आधारं सर्वभूतानामनाधारमनामयम् YogŚiU. 3.18; SubāU. 6; तम् ··· । प्रतिष्ठाप्य ··· सर्वाधारमनाधारं सर्वशक्तिक्रियात्मकम् PāraS. 23.6; न ह्यनाधारस्य ··· परमेश्वरस्याधार उपदिश्येत BrahmSūBh.(Śaṅ.) 64.16 (*on* i. 1.20); स्वर्गलोकगतावत्र साधनं पृच्छ्यते यतः । अन्तरिक्षमनाधारं गतौ हेतुनिषेधनम् BṛĀraUBhVā. iii. 1.39; तत्सद् ब्रह्मेति यद्धुया सदेकं प्रतिपाद्यते ··· । अप्रमेयमनाधारमविकारमनाकृति SkandP. iv. 26.15 = ŚivaP. ii(1). 6.12 (43A.16); अध्यात्मयोगगम्यं त्वां परिपूर्णस्तुमो वयम् । अतीन्द्रियमनाधारम् ··· । इति स्तुत्वा महादेवम् ŚivaP. ii(2). 15.58 (86A.6); (हरिम् । ··· नरवाहनदत्तस्तमस्तौषीत् प्राञ्जलिः प्रभुम्) विश्वाधारोऽप्यनाधारः कः स तत्त्वमवैति ते KathāSaSāg. ix. 4.37; किं च यत्तदाकाशं तद् साधारमनाधारं वा KhaṇḍanKhā. 1113.6; अभयं गतो भवति ··· कथंभूते । ··· अनिलये अनाधारेऽनन्ताचिन्त्यशक्तिमतीत्यर्थः VedāntKau. 34.12 (*on* i. 1.20); अशेषाधारमेकं त्वामनाधारमधीयते Yādavā. 16.112; **2** not having a support जगदेतदनाधारं भ्रान्तिज्ञानार्थतत्परम् । ··· भ्राम्यते भवसंकटे ViṣṇuP. iii. 18.19 = PadmP. v. 13.368; न हि कश्चिदुभयपक्षसंप्रतिपन्नो दृष्टान्तः कार्यमनाधारमस्तीति NyāyVār. 197.17 (*on* ii. 1.16); NyāySā. 36.10; अनाधारं परस्पृष्ट(? ष्ट)म् ··· । एवं दुष्टं हविर्दृष्ट्वा प्रक्षिपेज्जलमध्यतः PāraS. 18.286; न च कार्यत्व(? कार्य)मनाधारं युक्तम् NyāyKa. 20.1; मथ्यमानेऽमृते सोऽद्रिरनाधारो ह्यपोऽविशत् BhāgP. viii. 7.6 = AgniP. 3.7; धार्यमाणोऽप्यनाधारस्तैरद्रिरतिगौरवात् । यथावधस्तलम् SkandP. ii(9). 11.24; (गङ्गाम्) अनाधारां पतिष्यन्तीं धरा धर्तुं न शक्ष्यति BṛDharmaP. i. 49.80; सहोत्पादे कार्यमनाधारं स्यात् TātpaṬ.(Vā.) 187.4 (*on* i. 1.5); न चानाधारैव शक्तिरात्मानं लभेत Kāśi. ii. 158.28 (*on* 5(3).159); अनित्यं हि कार्यं कारणाधारमिति नानाधारम् Bhām. 141.19 (*on* i. 1.20); आन्दोल्य मन्दरादूर्णि ते मन्त्रं मुव्यपातयन् । पपात सोऽप्यनाधारं नावेयमवतिष्ठते PariPar. 2.712; **3** not having a basis (such as an object) अनाधारा धारणा नोपपद्यते ViṣṇuP. vi. 7.79; यदाविद्यमानं स्मरति तदानाधारा स्मृतिः प्राप्नोति NyāyVār. 69.13 (*on* i. 1.10); प्रत्यक्षं प्रमाणमनाधारं सद् सर्वं नोपपद्यत इति द्रष्टव्यम् TātpaṬ.(Vā.) 407.25 (*on* iii. 1.42); **4** helpless (असुराः) काव्यशापाभिभूताश्च अनाधाराश्च ते पुनः । वध्यमानास्तदा देवैर्विविशुस्ते रसातले VāyuP. ii. 36.67; BrahmāṇḍP. ii. 73.68; महर्लोकं गमिष्यन्ति त्यक्त्वा त्रैलोक्यमीश्वराः । ततस्तेषु गतेषूर्ध्वं क्षीणे मन्वन्तरे तदा । अना-

धारमिदं सर्वं त्रैलोक्यं वै भविष्यति VāyuP. ii. 38.122 = BrahmāṇḍP. iii. 1.120; प्रजाः ... । अनाधाराः परित्रस्ताः ... । त्यक्त्वा पुराणि ग्रामांश्च भविष्यन्ति वनौकसः BrahmāṇḍP. ii. 74.210; ततश्चैवमनाधारा प्रजाशुद्धा विनङ्क्ष्यति AhirbuS. 11. 9; 5 not depending (on something else) अनाधारमप्रमेयमेकमनेकगोचरमशक्यवस्त्वन्तरकरणं विशेषः AlaṅkāSa. 136. 2; AlaṅkāRa. 63; SāhiDa. 596. 12.

अनाधारचयन (anādhāra-cayana) *n.* piling up (of the altar) without a support or foundation अप्राप्तस्य चयनस्य पृथिव्याधारत्वनिषेधायोगात्प्राप्तिस्तावदङ्गीकार्या पुनश्चानाधारचयनायोगात्तन्निषेधोऽपीत्येतदेवेत्यनेन परामृष्टम् NyāySu.(So.) 18. 2 (*on* i. 2. 5)

अनाधारता (anādhāra-tā) *f.* the state of not having a support दक्षिणाभिमुखास्तरणे त्वनाधारभूतभूम्यास्तृतानां दर्भाणामनाधारतैवोपपद्यते CaturCin. iii(1). 1416. 13.

अनाधारत्व (anādhāra-tva) *n.* 1 the state of not being a support पटस्य समवायः -- अथ पटेन सहोत्पद्यते तदा पटस्यानाधारत्वं प्राप्नोति NyāyKa. 19. 24; घटाकारेण ज्ञायत एवासौ (रसः) इति चेत् - अथ रसाकारेण किं न ज्ञायते । तेन रूपेण ज्ञाततानाधारत्वादिति चेत् - न तर्हि वर्तमानसामान्यज्ञानेऽप्यतीतानागतादिज्ञानम्, तेनाकारेण प्रावस्थ्यानाधारत्वात् NyāyKuA. ii(2). 13. 1-3; ii(2). 15. 4; 2A the state of not having a support अनाधारत्वं तु कार्यस्य नानुभवगोचरः, अपि तु युक्त्या साध्यम् TātpaṬ.(Vā.) 367. 6 (*on* ii. 1. 16); 2B the state of not having (i. e. not requiring) any substratum अनाधारत्वे च नित्यत्वं सर्वगतत्वं च हेतुः Bhām. 141. 17 (*on* i. 1. 20); अनाधारत्वं चाधारराहित्यम् AdvaiSi. 794. 6; 3 the state of not having any objective basis न तावत् ज्ञानं पक्षविषयं प्राङ्निकाधिकरणं चेति बौद्धराद्धान्ते संभवति ज्ञानस्यानाधारत्वात् TātpaṬ.(Vā.) 321. 10 (*on* i. 2. 1); 4 the state of not being a location ननु द्विवीति मन्त्रे सप्तम्या आधारत्वं प्रतिपाद्यते । अतः परमित्यत्र पञ्चम्या अनाधारत्वम् AnuBh. 46. 5 (*on* i. 1. 26)

अनाधारत्वज्ञापन (anādhāratva-jñāpana) *n.* indication of being without support यथा 'स्वे महिम्नि' इत्यत्रानन्वय्यपि स्वस्य स्वेनाधाराधेयभावोऽनाधारत्वज्ञापनाय निबध्यते ŚivārkaMaDī. i. 432. 25 (*on* i. 3. 13)

अनाधारत्वप्रसङ्ग (anādhāratva-prasaṅga) *m.* 1 undesired contingency of being supportless अनाधारत्वप्रसङ्गाच्च यदि कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धं न कारणे क्रियामारभेत NyāyVār. 240. 3 (*on* ii. 1. 31); 519. 16 (*on* iv. 2. 24-25); अनवस्थाप्रसङ्गमवतारयितुमनाधारत्वप्रसङ्ग उक्तः TātpaṬ.(Vā.) 186. 3 (*on* i. 1. 5); NyāyVārPari. 763. 4; कार्यस्यानाधारत्वप्रसङ्गेन, न हि क्षणिकत्वे कार्यकारणभावो न सिध्यति TātpaṬ.(Vā.) 543. 8 (*on* iii. 2. 12); 650. 10 (*on* iv. 2. 24); ii undesired contingency of being without objective basis कः पुनराधारार्थः । यत्र स्थीयते तदिति चेन्न ।... तत्रेतिप्रत्ययविषयस्यानाधारत्वप्रसङ्गात् KhaṇḍanKhā. 1098. 16.

अनाधारत्वसिद्धि (anādhāratva-siddhi) *f.* establishment of being supportless नित्यत्वमिति स्वमहिमप्रतिष्ठितत्वस्य व्याख्या । कथं नित्यत्वेनानाधारत्वसिद्धिः VedāntKa. 115. 10 (*on* i. 1. 7)

अनाधारत्वानुपपत्ति (anādhāratvānupapatti) *f.* untenability of being supportless भवानस्तु स्वाश्रयत्वं नास्त्येव । आश्रयान्तरनिषेधाभिप्रायेण स्वाश्रयत्वोक्तिः । अस्तूपाधिभेदेनेति चेन्न, तस्याप्याधाराकारोपाधेरनाधारत्वानुपपत्तेः तदाधारोपाध्यन्तरादिभेदकल्पनेऽनवस्थानात् ŚatDū. 176. 3.

अनाधारप्रतीति (an-ādhārapratīti) *f.* non-cognition as substratum भवत्वन्यत्रान्यस्याधारार्थत्वं तस्य त्वाधारार्थत्वं नोपपद्यतेऽनाधारप्रतीतिविषयेऽपि तत्त्वादित्युक्तेः KhaṇḍanKhā. 1103. 9.

अनाधारभूत (an-ādhārabhūta) *adj.* which is not a support दक्षिणाभिमुखास्तरणे त्वनाधारभूतभूम्यास्तृतानां दर्भाणामनाधारतैवोपपद्यते CaturCin. iii(1). 1416. 13.

अनाधारवासना (anādhāra-vāsanā) *f.* baseless latent impression कथमसंवेद्यमेव तादृप्यं प्रमाणवद् भविष्यति । एतच्च ज्ञानातिरिक्तवासनाभ्युपगमेनोक्तम् । न तु ज्ञानमात्रवादिनां तदतिरिक्ता वासना च काचिदस्ति । न चोपपद्यते, अनाधारवा(सना)नुपपत्तेः Kāśi. ii. 158.24 (*on* 5(3). 159)

अनाधाराधेयत्व (an-ādhārādheyatva) *n.* absence of the relation of the substratum and the superstratum संकेतमात्रेण नित्यविभूनां संबन्धस्य निराकृतमसम्बन्धत्वात् । तेषां चानाधाराधेयत्वात् संयोगसिद्धौ नाजसंयोगनिरासः सिद्धिः NyāyKu. 97.11.

अनाधार्याधारभूत (an-ādhāryādhārabhūta) *adj.* which are not (in the relation of) the superstratum and substratum अयुतसिद्धयोरिहप्रत्ययहेतुः संबन्ध इत्येतावत्यपि लक्षणे भवतामव्याप्त्यतिव्याप्त्यभावात्, अनाधार्याधारभूतयोरिहप्रत्ययस्यैवानुदयात् TattvPradī.(Ci.) 203.4.

अनाधि (an-ādhi) *adj.* free from worries or anguish धनुरधिज्यमनाधिरुपादद्वे नरवरः RaghuVa. 9. 54; राजा ... निरामयोऽनाधिर्विजयी भवति क्षणात् AhirbuS. 47.68; महाहवप्रश्नरतेरनाधेः । पयोधिभीमस्य नृपस्य सैन्यं शुकः सरित्कूलनिविष्टमाप Rāvaṇā. 12.29; अनीहमकाममवाममनाधि । जिनेन्द्र मनो मम वाञ्छति नाम न विभ्रमधाम न मौक्तिकदाम ChandaśCū. 2.172(2); स्ववलमनाधि रथिन्यां विदधद्धयां घटितमर्जुनाधिरथिभ्याम् YudhiVi. 8.58; तदनाधि ... विगतव्याधि कुलं व्रजौकसाम् ।... यदुनाथेन सनाथतां ययौ Yādavā. 9. 30.

अनाधिक्य (an-ādhikya) *n.* i non-increase, non-excessiveness गुरुत्वागतिवत् सर्वतद्गुणानुपलक्षणात् । माषकादेरनाधिक्यम् PramāVār. 4.162; चत्वारो जगति भावा भवन्ति ।... न च पञ्चमः प्रकारः काङ्क्षितुमपि शक्यते । विरोधाविरोधयोः साहित्यासाहित्ययोः आधिक्यानाधिक्ययोः परस्परनिषेधरूपत्वात् ĀtmaTaVi. 842.15; ii not an additional or extra factor आनुपूर्वीज्ञानस्य भेदान्वयबोधे हेतुताया अनाधिक्यात् VyutpaVā. 73.7; iii the state of being that beyond which there is no greatness अपरलाभस्यानाधिक्यं कथवृत्तान्तेन वसिष्ठ उदाजहार JīvanVi. 118. 7.

अनाधिपत्यशून्य (an-ādhipatyaśūnya) *adj.* not devoid of sense-perception व्यवहारादिनिर्भासो चिन्तुताक्षेऽपि भावतः । अनाधिपत्यशून्यं तत् पारंपर्येण चेत्, असत् NyāyVi. 2. 82 (comm. अधिपतिः निमित्तं संतानान्तरं व्याहारादेः स एवाधिपत्यं तेन शून्यम् आधिपत्यशून्यम्, न आधिपत्यशून्यम् अनाधिपत्यशून्यम् आधिपत्यसहितम्)

अनाधिव्याधिजीवित (anādhivyādhi-jīvita) *n.* life free from worries and physical diseases अनाधिव्याधिजीवितम् । निःसपत्नं शुभं राज्यम् ...। एतैर्मनोरथफलैः फलन्त्येव तपोद्रुमाः SkandP. iv. 19. 37; NaraP. 31. 26.

अनाधिष्ठ (anādhiṣṭha) *adj.* [w. r. for अनाधृष्ट ?], MāṇḍūŚi. 5. 4.

अनाधिष्ठित (anādhiṣṭhita) *adj.* not protected or guarded (निरन्वयं भवेत् स्तेयम्) 'निरन्वयं' तु यदनाधिष्ठितं रक्षकेण VyavaNi. 501.4.

अनाधुनिकभारती (anādhunika-bhāratī) *f.* not modern speech (i. e. the Vedas) हरत्यतिदुरत्ययं भवभयं गुरुक्तिर्नृणामनाधुनिकभारतीजरठशुक्तिमुक्तामणिः ŚaṅkaDigVi.(Mā.) 4. 86.

अनाधृति (anādhṛti) *m.* i name of a king in the family of Vṛṣṇis अनाधृष्टि(v. l. अनाधृति)श्चेकितानश्चेद्रिऽजोऽथ सात्यकिः । परिवार्य युयुः सर्वे MahāBhā. v. 149. 62; ii name of one of the sons of Dhṛtarāṣṭra प्रेषिता भीमसेनेन शराः ...। अपातयन्त पुत्रांस्ते (धृतराष्ट्र) रथेभ्यः ...। अनाधृष्टिं (v. l. अनाधृतिं) कुण्डभेदम् MahāBhā. vi. 92. 26.

अनाधृष् (án-ādhṛṣ) *adj.* not committing violence रेवतीरनाधृषः सिषासवः सिषासथ । उत स्थ केतुदूषणीः AV. vi. 21. 3.

अनाधृष्ट (án-ādhṛṣṭa) *adj.* [*f.* -ā] A unassailed, not (to be) subdued or checked य उग्रा अर्कमानृचुरनाधृष्टास ओजसा । मरुद्भिरग्न आ गहि ṚV. i. 19.4; AV.(P.) vi. 17.5; इन्द्र ...। स नेश्विमाभिरिद्वोऽनवद्याभिरूतिभिः । अनाधृष्टाभिरा गहि ṚV. iv. 32.5; अग्ने ...। अधा मही न आयस्यनाधृष्टो नृपीतये ṚV. vii. 15.14; सुप्रावर्गं सुवीर्यं सुष्ठु वार्यमनाधृष्टं (वामन्) रक्षस्विना ।... विश्वा वामानि धीमहि ṚV. viii. 22.18; पदं देवस्य मीळ्हुषोऽनाधृष्टाभिरूतिभिः । भद्रा सूर्य इवोपदृक् ṚV. viii. 102.15; इन्द्रः ...। अनाधृष्टानि धृषितो व्यासत् ṚV. x. 138. 4; अनाधृष्टमन्यकृतं यदेनस्तस्मात्सात्सस्माज्जातवेदो मुमुग्धि AV.(P.) ii. 30. 5; MaiS. iv. 14.17 (iv. 244. 14); TaiĀ. ii. 3. 1 (201. 4); अनाधृष्टमस्यनाधृष्यं देवानामोजः TaiS. I. ii. 10.2; MaiS. i. 2.7 (i. 16. 13); KāṭhS. 2. 8 (i. 13. 17) = KapiKaS. 2. 2 (15. 15) = VājaS. 5. 5 = VājaS. (K.) v. 2. 2 = ŚatBr. III. iv. 2. 14; ŚāṅkhaŚS. v. 8. 2; BhārŚS. xii. 1. 2; यत् तेऽनाधृष्टं नाम यज्ञियं तेन त्वादधे TaiS. I. ii. 12. 1 = VājaS. 5. 9; MaiS. i. 2. 8 (i. 17.10); KāṭhS. 2. 9 (i. 14. 11) = 7. 14 (i. 78. 2); KapiKaS. 2. 3 (16.11); नमोऽग्नयेऽप्रतिविद्धाय नमोऽनाधृष्टाय TaiS. I. v. 10.1; BaudhŚS. i. 84.2; देवीरापः -- अनाधृष्टाः सीदत TaiS. I. viii. 12. 1; MaiS. ii. 6. 8 (ii. 68. 8) = iv. 4. 2 (iv. 51. 9); VājaS. 10.4; ŚatBr. V. iii. 4. 23; MānŚS. 187.10; तपस्वानाधृष्टः TaiS. IV. iv. 8. 1; इदं क्षत्रं दुष्टरमस्त्वोजोऽनाधृष्टम् TaiS. IV. iv. 12. 2; MaiS. iii. 16. 4 (iii. 188. 8); KāṭhS. 22. 14 (ii. 70.4); आज्यस्याज्यमसि ... धामासि प्रियं देवानामनाधृष्टं देवयजनम् MaiS. i. 1.11 (i. 7. 3); i. 4. 4 (i. 52. 5); KāṭhS. 1. 10 (i. 5. 14) = 5. 6 (i. 48.14); 32.6 (iii. 24. 15); KapiKaS. 1.10 (7. 10); VājaS. 1.31; VājaS.(K.) i. 10.4; ŚatBr. I. iii. 2.17; अनाधृष्टासि पुरस्तात् MaiS. iv. 9. 3 (iv. 124.1); VājaS. 37. 12; देवास्त्वा शुक्रपाः प्रणयन्त्वनाधृष्टासि VājaS. 7. 12; 7.17; अनाप्तासौ चौरनाप्यानाधृष्टा चानाधृष्या चायं वा अग्निरनाधृष्टः KauṣīBr. 27. 5 (132. 14-15); अनाधृष्टासीति तद् रक्षोभिरेवैतदुत्तरवेदिमनाधृष्टां कुरुतः ŚatBr. IV. ii. 1. 15; XIV. i. 3.19; विराड्वा अनाधृष्टं छन्दोऽन्नं वै

विराड्वृत्रमनाधृष्टम् ŚatBr. VIII. ii. 4.4; औजिष्ठं हि ते तदात्मनः समवायन्तानाधृष्टमित्याहानाधृष्टं ह्येतत् GopBr. ii. 2.3 (167.6); अध्वर्यो येषां वा अनाधृष्टाः प्रजापतेस्तन्वं विद्वान् होता भवत्यनाधृष्टो वै स होता भवत्यनाधृष्टास्ते यजमाना भवन्ति ŚāṅkhāŚS. x. 19.2; सुवोऽस्यनाधृष्टः सपत्नसाह इति सुवमादत्ते MānŚS. 16.20; अनाधृष्टात्र पञ्चैव (यजूंषि) PārāŚi. 92; B unimpaired, perfect त्रयोदश समा निद्रां चिन्तयन्नाध्यगच्छत । अनाधृष्यः (v. l. अनाधृष्टः) परैर्युद्धे शत्रुभिर्मघवानिव MahāBhā. xi. 21.8; C not uttered with force, unraised(?) स्वरितानामनहादमुदात्तानामताडनम् । अनुदात्तमनाधिष्ठम्(? नाधृष्टम्) MāṇḍūŚi. 5.4; n. name of a metre (lit. unassailable) व्याघ्रं वयसाम्नोदनाधृष्टं छन्द इति ··· उक्षाणं वयसाम्नोद् ककुप् छन्द इति ŚatBr. VIII. ii. 4.4; m. A name of a king in the family of Vṛṣṇis अनाधृष्टि(v. l. अनाधृष्ट)श्चेकितानश्चेदिराजोऽथ सात्यकिः । परिवार्य ययुः सर्वे वासुदेवधनंजयौ MahāBhā. v. 149.62; B name of a son of Ugrasena नवोग्रसेनस्य सुताः ··· अनाधृष्टि(v. l. अनाधृष्ट)श्च पुष्टिमान् HariVaṁ. 27.28; C name of one of the sons of Dhṛtarāṣṭra अभयस्तथा । अनाधृष्टः कुण्डभेदी कौरवाः पूर्वजन्मनि । पूर्णामलस्य वै गेहे तन्नाम्ना भुवि संभवः BhaviP. 533B.5 (iii(3). 32.43); अष्टौ धृतराष्ट्रस्य याः स्त्रियः । अजायन्त सुतास्तासाम् ··· । पुत्राणां नवनवतिस्तेषां नामानि तद्यथा । ··· अनाधृष्टः कुण्डभेदी PāṇḍaC. 3.128.

अनाधृष्टम् (ánādhṛṣṭam) adv. without checking or assailing आ यस्मिन् देववीतये पुत्रासो यन्तु संयतः । अनाधृष्टं विपन्यया प्रति श्रुताय वो धृषत् ṚV.(Khila.) iv. 1.1.

अनाधृष्टि (anādhṛṣṭi) m. A name of a son of Raudrāśva and an apsaras रौद्राश्वस्य ··· दशाप्सरसि सूनवः ···। अनाधृष्टिर्भूतेषां विद्वान् MahāBhā. i. 875*(1); i. 89.10; अनाधृष्यस्तु(v. l. ष्टिस्तु) राजर्षिः HariVaṁ. 359*(1); Bi name of a Yādava, hero in the family of Vṛṣṇis, follower of Śrīkṛṣṇa अक्रूरो वृष्णिवीराणां सेनापतिः ··· । अनाधृष्टिः ··· उद्धवश्च MahāBhā. i. 213.26; कृतवर्मा अनाधृष्टिः समीकः ··· एते महारथाः MahāBhā. ii. 13.57; iv. 67.21; अनाधृष्टिश्चेकितानश्चेदिराजोऽथ सात्यकिः । परिवार्य ययुः सर्वे वासुदेवधनंजयौ MahāBhā. v. 149.62; vii. 9.51; अश्मक्यलभतापत्यमनाधृष्टिं यशस्विनम् HariVaṁ. 24.26; MatsyaP. 46.24; BrahmāṇḍP. ii. 71.189; BrahmP. 14.26; PadmP. v. 13.133; सेनापतिमनाधृष्टिम् ··· । यादवानां कुलकरान् स्थविरान् दश तत्र वै । स्थापयामास HariVaṁ. 86.76; 109.38; कृष्णः ···। उवाच ··· अनाधृष्टिं महाबलम् । सेनानीस्तात मा भैवम् (v. l. मैवं वोचस्त्वनाधृष्टे) HariVaṁ. 109.46; अनाधृष्टिः ··· शौर्यपुरात् ··· प्रस्थितो मथुरां प्रति PāṇḍaC. 2.294; रथमनाधृष्टिः ··· केशवम् । आरोप्य प्रापयामास ··· मन्दिरम् PāṇḍaC. 2.436; ततो यादवसेनानीर्दूरे-श्चेदिपतेश्चमूम् । ··· अनाधृष्टिरधावत PāṇḍaC. 14.118; 14.81; 14.142; 14.277; Bii name of a Yādava who was a son of Śūra (born of Bhojā/Bhojyā or Māriṣā) जज्ञिरे शूराद् भोज्यायां पुरुषा दश । वसुदेवः ··· । अनाधृष्टिः HariVaṁ. 24.18; MatsyaP. 46.3; शूरस्यापि मारिषा नाम पत्न्यभवत् । तस्यां चासौ दश पुत्रानजनयद् वसुदेवपूर्वान् । वसुदेवस्य ··· देवभागदेवश्रवोऽष्टककुकुचक्र(v. l. अनाधृष्टिकरूष्क Wai Ed.)वत्सधारक··· गण्डूषसंज्ञा नव भ्रातरोऽभवन् ViṣṇuP. iv. 14.30; BrahmāṇḍP. ii. 71.149; BrahmP. 14.18; PadmP. v. 13.110; Biii name of a Yādava, son of Ugrasena नवोग्रसेनस्य सुतास्तेषां कंसस्तु पूर्वजः । ··· अनाधृष्टिश्च पुष्टिमान् HariVaṁ. 27.28; C name of one of the sons of Dhṛtarāṣṭra प्रेषिता भीमसेनेन शराः ··· । अपातयन्त पुत्रांस्ते (धृतराष्ट्र) ··· । अनाधृष्टिं कुण्डभेदम् MahāBhā. vi. 92.26.

अनाधृष्टिमुख (anādhṛṣṭi-mukha) adj. having Anādhṛṣṭi in the front, headed by Anādhṛṣṭi अनाधृष्टिमुखाश्चान्ये ··· राजानोऽपि सहायाताः PāṇḍaC. 14.269.

अनाधृष्टिसुत (anādhṛṣṭi-suta) m. son of (the king) Anādhṛṣṭi अनाधृष्टिसुतस्तात राजसूयाश्वमेधिनः MahāBhā. i. 89.10.

अनाधृष्णि (anādhṛṣṇi) m. name of a Yādava, a hero in the family of Vṛṣṇis अक्रूरो वृष्णिवीराणां सेनापतिः ··· । अनाधृष्टिः (v. l. अनाधृष्णिः) MahāBhā. i. 213.26.

अनाधृष्य (an-ādhṛṣya) ger. not having overpowered आपो देवीः पिशाचानामपि नह्यन्त्वास्यम् । ··· अनाधृष्य पुनः पताद् AV.(P.) xiii. 10.10.

अनाधृष्य (an-ādhṛṣyá) adj. [f. -ā] I invincible, unassailable, not attackable गृष्टिः संसूव ··· । अनाधृष्यं वृषभं तुम्रमिन्द्रम् ṚV. iv. 18.10; ŚāṅkhāŚS. xiv. 21.2; अनाधृष्या तव पात्राणि धर्मणा ṚV. x. 44.5 = AV. xx. 94.5; उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ṚV. x. 103.13; AV.(P.) i. 56.1; TaiS. IV. vi. 4.4; VājaS. 17.46; VājaS.(K.) 18.46; तपसा ये अनाधृष्याः ··· तांश्चिदेवापि गच्छतात् ṚV. x. 154.2 = AV. xviii. 2.16 = TaiĀ. vi. 3.22 (666.1); इन्द्रस्य बाहू स्थविरौ युवानावनाधृष्यौ SV. II. ix(3). 7.3; अनाधृष्यः ··· वितर्दग्ने क्षत्रनिहीद् AV. vii. 84.1; AV.(P.) iii. 33.7; TaiS. IV. i. 7.3; MaiS. ii. 12.5 (ii. 149.6); KāṭhS. 18.16 (i. 276.19); KapiKaS. 29.4 (132.6); VājaS. 27.7; VājaS.(K.) 29.7; इदं क्षत्रं दुष्टरमस्त्वोजोऽनाधृष्यम् AV.(P.) xv. 1.5; ĀśvaŚS. I. iv. 12.2; प्रीणं पूर्वां वि राजानो वयं प्रजया धनेन । अनाधृष्यस्य ते पितोः AV.(P.) xx. 36.5; अस्यनाधृष्यं देवानामोजः TaiS. I. ii. 10.2; MaiS. i. 2.7 (i. 16.13); KāṭhS. 2.8 (i. 13.17); KapiKaS. 2.2 (15.15); VājaS. 5.5; VājaS.(K.) 5.6; ŚatBr. III. iv. 2.14; ĀśvaŚS. I. iv. 5.3; ŚāṅkhāŚS. v. 8.2; BhārŚS. xii. 1.2; वैतं ··· धामानाधृष्यं तेन त्वाधे MaiS. i. 2.8 (i. 17.10); KāṭhS. 2.9 (i. 14.11); KapiKaS. 2.3 (16.11); एतां वा ओजोऽनाधृष्यास्तीमी राष्ट्रमनाधृष्यं करोति MaiS. iv. 4.1 (iv. 51.4); इन्द्रो वृत्रमतरद् वृत्रतूर्येऽनाधृष्यः MaiS. iv. 14.13 (iv. 236.4); TaiBr. II. viii. 3.7; अनाधृष्या चाप्रतिधृष्या चानाधृष्या तदग्निः AitBr. 24.6 (645); अनासा सौ यौरनाधृष्यानाधृष्टा चानाधृष्या चायं वा अग्निरनाधृष्टोऽसावादित्योऽनाधृष्यः KauṣīBr. 27.5 (132.14-15); ĀśvaŚS. II. ii. 13.13; ŚāṅkhāŚS. x. 19.2; अनाधृष्यमित्याहानाधृष्यं ह्येतद् GopBr. ii. 2.3 (167.7); अग्निरिवानाधृष्यः ··· द्यौरिवानाधृष्यो भूयासम् AitĀ. V. i. 1.22; TaiĀ. iii. 7.4 (294.5); अनाधृष्या पुरस्तात् TaiĀ. iv. 5.3 (420.1) (Sāy. केनाप्यतिरस्कार्या) = v. 4.7 (605.14); BaudhŚS. i. 274.16; BhārŚS. xi. 7.15; ĀpaŚS. xv. 7.6; HirŚS. xxiv. 3.2 (869.5); VaikhāŚS. 13.9; ऋषिः परैरनाधृष्यो जामदग्न्यः प्रतापवान् MahāBhā. i. 94.35; iii 37.16; iii. 157.21; तमहं भारसासक्तमनाधृष्यं दुरासभिः । ··· राज्यहानि षटामि वै MahāBhā. iii. 222.53; iii. 261.12; iv. 937*(2); v. 19.15; भवता हि वयं गुप्ताः ···। अनाधृष्या भविष्यामस्त्रिदशानामपि MahāBhā. v. 153.14; v. 180.11; vii. 73.12; अनाद्रुत्य (v. l. धृष्यं) बले बाहोर्भीमसेनस्य MahāBhā. vii. 158.35; अनाधृष्यौ ··· । आस्तामृषिवरौ तत्र ज्वलिताविव पावकौ MahāBhā. x. 14.14; (सः) ददर्श ··· पर्णशालाम् ··· । अग्निसंवैरनाधृष्यां मृगैः सिंहगुहामिव Rāmā. ii. 93.22; शरार्चिषमनाधृष्यं चापखड्गेन्धनं रणे । रामाग्निम् ··· न प्रवेष्टुं त्वमर्हसि Rāmā. iii. 35.15; वसुमती देवदेवमभाषत । ··· प्रपन्नास्मि जगन्नाथ ··· । सुब्रह्मण्यमनाधृष्यम् ViṣṇuSm. 1.59; बलवत्प्रत्ययलाभेऽपि तैरनाधृष्यो भवति AbhidhKoBh. 454.4 (on 8.31); कुबेरस्य ··· नगरं तदनाधृष्यम् VāyuP. i. 41.4; अप्रसह्यमनाधृष्यं विद्यते मे तपोबलम् SkandP. iii(1). 26.21; PadmP. v. 25.100; तां पुरीं वीक्ष्य ··· संकटैरप्यनाधृष्याम् BṛKathāMañ. ix. 3.7; II inaccessible, unattainable ज्वलन्तमचलं मेरुम् ··· । अप्रमेयमनाधृष्यमधर्मबहुलैर्जनैः MahāBhā. i. 15.6 = ii. App. I. 12(26); i. 19.4; स्वयंवरमनाधृष्यं मन्यते चापि पाण्डवः MahāBhā. i. 213.3; i. App. I. 12(8); (सर्वे) अनाधृष्यमासेदुश्च गिरिव्रजम् MahāBhā. ii. 19.13; iii. 149.13; पञ्चेन्द्रियजलां घोरां लोभकूलां सुदुस्तराम् । ··· अनाधृष्यां नदीं तरति बुद्धिमान् MahāBhā. xii. 227.11; महद् वनम् । अगम्यं दुराधर्षं मृगपक्षिविवर्जितम् (v. l. ततोऽभवदनाधृष्यं मृगपक्षिगणैरपि) Rāmā. iv. 47.12; स सागरमनाधृष्यं क्रमित्वा Rāmā. v. 89*; मेरोः ··· शृङ्गम् ··· । अप्रमेयमनाधृष्यम् ··· । तस्मिन् देवः ··· उपविष्टो बभूव ह VāyuP. i. 30.82; BrahmP. 39.5; विस्तीर्णं शतयोजनम् । क्षुद्रसत्त्वैरनाधृष्यम् (आयतनम्) VāyuP. i. 38.34; VarāP. 80 (354.14)

अनाधृष्य (anādhṛṣyá) m. A name of a ṛṣi acting as abhigara priest अचित्तमना उपवक्तानाधृष्यश्चाप्रतिधृष्यश्चाभिगरौ अयास्य उद्गाता MaiS. i. 9.1 (i. 131.11) = i. 9.5 (i. 135.8); KāṭhS. 9.9 (i. 112.1); 9.12 (i. 115.4); KapiKaS. 8.12 (89.2); TaiĀ. iii. 5.1 (289.1); अनाधृष्याप्रतिधृष्यौ च शक्तैर्ध्येर्निरूपकौ । होता च मैत्रावरुणः स्मृतावभिगराविह AhirbuS. 58.63; B an epithet of one of the wind-gods सलिलाय त्वा वाताय स्वाहा ··· अनाधृष्याय त्वा वाताय स्वाहाप्रतिधृष्याय त्वा वाताय स्वाहा MaiS. iv. 9.8 (iv. 128.9); VājaS. 38.7; VājaS.(K.) 38.7; ŚatBr. XIV. ii. 2.4; TaiĀ. iv. 9.1 (474.3); दुर्तिर्वपुरनाधृष्यः ··· । एते त्वामभिरक्षन्तु मरुतः ViṣṇuDhaP. ii. 22.56; अनाधृष्यो वपुः ··· धुतिः । ··· गण आनिलः KalpaK. 371.16; Ci name of one of the sons of Dhṛtarāṣṭra नानेवाग्नि···। धृतराष्ट्रस्य पुत्राणाम् ··· । अनाधृष्यः कुण्डभेदी MahāBhā. i. 108.13 = i. App. I. 41 (36); गान्धारीप्रमुखाश्चाष्टौ धृतराष्ट्रस्य याः स्त्रियः । अजायन्त सुतास्तासाम् ··· । अनाधृष्टः (v. l. अनाधृष्यः Bhavnagar Ed.) कुण्डभेदी PāṇḍaC. 3.128; Cii name of a Yādava, a hero in the family of Vṛṣṇis अक्रूरो वृष्णिवीराणां सेनापतिः ··· । अनाधृष्टिः (v. l. अनाधृष्यः) MahāBhā. i. 213.26; Ciii name of a Yādava, son of Śūra जज्ञिरे शूराद् भोज्यायाम् ··· । वसुदेवः ··· । अनाधृष्टिः (v. l. धृष्यः) HariVaṁ. 24.18; n. name of a metre (lit. unassailable) पङ्क्तिर्विवयो गायत्री छन्दः ··· तुर्यवाड् वयोऽनुष्टुप् छन्दः ··· व्याघ्रो वयोऽनाधृष्यं छन्दः MaiS. ii. 8.2 (ii. 108.5); KāṭhS. 17.2 (i. 247.5); KapiKaS. 26.1 (105.5)

अनाधृष्यतम (anādhṛṣyá-tama) *adj.* most invincible or unassailable यो ह नाऽअस्यानाधृष्युतमो रुथस्तेनैषु युजमानानभिरक्षति स युस्तेऽनाधृष्युतमो रुथो येन युजमानानभिरुक्षसि ŚatBr. II. iii. 4. 40; युस्तेऽनाधृष्युतमो रुथो येन युजमानान् गोपायुसि ŚatBr.(K.) I. iv. 1. 29; (हनूमान्) आदित्यम् ··· । अनाधृष्यतमं देवमपि देवर्षिदानवैः । अनासाद्यैव पतितो भास्करोदयने गिरौ Rāmā. vi. 19. 15.

अनाधृष्ययशोबल (anādhṛṣya-yaśobala) *adj.* of unimpaired glory and valour नाहं मृष्ये हतं द्रोणम् ··· दुर्धर्षमनाधृष्ययशोबलम् MahāBhā. vii. 5. 35.

अनाधृष्यरूप (anādhṛṣya-rūpa) *adj.* of unimpaired form शश्वन्मृत्योः स्यामनाधृष्यरूपो व्यक्तं तस्मात् संयुगाद् विप्रमुक्तः MahāBhā. viii. 372*(3)

अनाधेय (an-ādheya) *adj.* [*f.* -ā] I different from what is supported अहेयमनुपादेयमनाधेयमनाश्रयम् ··· ब्रह्म AdhyāU. 62; ViveCū. 469; न च ब्रह्मणः स्वे महिम्नि व्यवस्थितस्यानाधेयस्याधारसंबन्धः कल्पते Bhām. 208.20 (*on* i. 3. 14); नाभिमेढ्रान्तरे ध्यायेच्छक्तिमाधाररूपिणीम् । देवीं केनाप्यनाधेयां नीरूपां ज्योतिरात्मिकाम् LakṣmīT. 36. 3; II not to be created सम्यग्दर्शनरत्नं यः ··· । अविनाशमनाधेयमहार्यं सारसौख्यदम् । ··· हृदयेन समाधत्ते PadmP. (Ra.) 98. 17.

अनाधेयगुणान्तरत्व (anādheyaguṇāntara-tva) *n.* the state of being that where any other quality cannot be deposited दुर्बुद्धेस्तु सर्वत्र मतिविपर्यास एव । स हि नीलीमेचकितसिचयकल्पः । अनाधेयगुणान्तरत्वात् KāvyMī. 11. 9.

अनाधेयताश्रुति (anādheyatā-śruti) *f.* statement of absence of being contained केचिदाहुर्यदाधारमात्रत्वं सवनेष्विह । तदा तेषां न मन्द्रादिः स्यादनाधेयताश्रुतेः TantrVā. 825. 20 (*on* iii. 3. 9)

अनाधेयरूपत्व (anādheyarūpa-tva) *n.* the state of having an unpredicable nature कार्यं स्वेनात्मना सिद्धं पुमर्थं साधयेद्यदि । सर्वदा तस्य तादृक्त्वात्पुमर्थः सर्वदा भवेत् । पुंव्यापारप्रसिद्ध्याथ सिद्धं स्वार्थकरं मतम् । तस्यानाधेयरूपत्वान्न कदाचित् फलं भवेत् BṛĀraUBhVā.(Sambandha.) 628.

अनाधेयविकार (anādheya-vikāra) *adj.* I not susceptible to change सन्नपि न सर्वः शब्द उपलभ्यते सर्वेण, संस्कृतस्य संस्कृतेनैवोपलम्भादिति । तत्र न संस्कृतस्योपलम्भोऽनाधेयविकारस्य संस्कारायोगात् PramāVāSvopVṛ. 88.16; II in which change is not to be produced (by an action) तत्र यन्निर्वृत्तं क्रिययानाधेयविकारं क्रियाया निष्पत्त्यर्थं केवलमुपादीयते तत्क्रियासंबन्धात् प्राप्यमपि नेप्सितमिति तस्य कर्मसंज्ञा न प्राप्नोति PradI. ii. 262A. 28 (*on* i. 4. 49)

अनाधेयविधा (anādheya-vidhā) *f.* [Inst.] in a manner without pledging राजकीयक्षेत्रम् ···। अनाधेयविधया । मम्म(म)पुत्रपौत्रात्मजै(जैः) ग्रैष्मिकक्षेत्रादी(दिः) सप्तमविभागेन क्रु(क)ष(र्ष)णीया(यः) EI. xx. 124. 12.

अनाधेयविशेष (anādheya-viśeṣa) *adj.* to which speciality cannot be attributed or assigned अनाधेयविशेषाणां किं कुर्वाणः प्रयोजकः PramāVār. 1. 298; अपेक्षि(क्षे)ति हि तत्प्रतिबन्धः । स च अनाधेयविशेषस्य सामान्यस्यायुक्त इति केवलं जनयेदिति नास्त्यन्यः स्थितिहेतुः PramāVāSvopVṛ. 46. 30; अनुग्राहकविरहमप्याह — ' अनाधेयविशेषेषु ' तच्चानाधेयविशेषत्वं ' क्षणिकेषु ' इत्यनेनाह । न हि क्षणिकानां विशेष आधातुं शक्यते HetuBiṬ. 113.12.

अनाधेयविशेषत्व (anādheyaviśeṣa-tva) *n.* the state of being one to which no speciality can be attributed वस्तुनोऽनाधेयविशेषत्वात् । आवरणाभावस्याकार्यत्वात् । वस्तुवदेव ज्ञानस्यापि सिद्धत्वात् PramāVāSvopVṛ. 93. 14; HetuBiṬ. 113. 12.

अनाधेयातिशय (anādheyātiśaya) *adj.* in which or whom no improvement can be produced यच्च नीरूपं तच्छशविषाणादिवदकार्यातिशयम् — अनाधेयातिशयम्, यच्च नाधेयातिशयं तदाकाशवदविकारि TattvSaṁPañ. 20.5 (*on* 12); कीदृशोऽनाधेयातिशयस्य पुरुषस्य भोगो भवेत् BrahmSūBh.(Śaṅ.) 357. 10 (*on* ii. 2.6); नित्योऽपि तर्ह्यनाधेयातिशयो भावः कार्यसिद्धये क्षणिक इव सहकारिणमपेक्षते PañcPā. 28. 2 (*on* i 1.1); न चाप्रयोजकत्वमपि असंघातस्यासङ्गस्याशेषविक्रियाशून्यस्यानाधेयातिशयकूटस्थ चितिमात्रवपुषः पुरुषस्य संघातं प्रति परत्वानुपपत्तेः ĀtmaSi. 39. 19; 41.10; न केवलं तात्त्विको भोगोऽनाधेयातिशयस्य कूटस्थनित्यस्य पुरुषस्य न संभवति Bhām. 387.3 (*on* ii. 2. 6); न च बुद्धिः पुरुषे स्वभावनिर्मलत्वेनानाधेयातिशये किंचिदपूर्वदर्शनमुपजनयति NyāyMa. 286. 2; SarvaDaSaṁ. 16.33; SarvaDaKau. 137.21; 137.26.

अनाधेयातिशयता (anādheyātiśaya-tā) *f.* the state of being one in which or whom no improvement can be produced अभावस्य चानपेक्षितसहकारिणो अनाधेयातिशयतया नास्तीति ज्ञानजनने नित्यं तज्जननप्रसङ्गः HetuBiṬ. 176. 9; एतौ मन्त्रावनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः BrahmSūBh.(Śaṅ.) 25. 17 (*on* i. 1. 4); न च पुरुषभेदेन प्रकृतिगतयोग्यताया अपायानपायौ अनाधेयातिशयतया पुरुषं प्रति प्रकृतिविशेषाभावे तद्व्यवस्थानुपपत्तेः TattvPradī.(Ci.) 369.6; अत्रानाधेयातिशयस्य निष्क्रियस्योपकार्यत्वमपि क्वचिन्न दृष्टम् NyāySu.(Ja.) 328A. 1 (*on* ii. 2. 1); अनाधेयातिशयतया पुरुषकृतविशेषाभावे व्यवस्थानुपपत्तेः SarvaDaKau. 137.25

अनाधेयातिशयत्व (anādheyātiśaya-tva) *n.* the state of being one in which or whom no improvement can be produced क्षणिकस्य स्वरसेनैव निर्वाणात्, अनाधेयातिशयत्वाच्च BrahmSi. 14. 18; न ह्यात्मनः स्वतोऽविद्या युक्ता ··· नाप्यन्यतोऽद्वितीयत्वादनाधेयातिशयत्वान्निर्हेतुकत्वाच्चाविद्यायाः IṣṭaSi. 207. 13; 360. 5; (नित्यं तु सुखं न सत्यम्) नापि संस्कार्यमनाधेयातिशयत्वात् ĀtmaTaVi. 921. 11; भेददर्शनेऽपि ईश्वरज्ञानचिकीर्षायत्नादेर्नित्यस्य विषयेण अकारणभूतेन अनाधेयातिशयत्वात् PratyabhiVi. i. 51. 1 (*on* i. 1. 1); भाष्येऽनाधेयातिशयत्वनित्यशुद्धत्वयोः पूर्वसिद्धवदुक्तहेत्वोः सिद्धिमेतौ मन्त्रौ दर्शयतः VedāntKa. 99.23 (*on* i 1.4); तस्य (ईश्वरस्य) परिजनस्थानादीनि धर्मिग्राहकमानबाधितानि, अनाधेयातिशयत्वात् NyāyKu. 87.15.

अनाधेयातिशयपुरुष (anādheyātiśaya-puruṣa) *m.* person in whom no improvement can be produced न च स्वस्वामिभावो निमित्तं सर्वथोदासीनस्य स्वामिभावे दृष्टान्ताप्रसिद्धेः । न च बुद्धेः स्वत्वमपि अनाधेयातिशयपुरुषेऽनुपकारकत्वात् TattvPradī.(Ci.) 369. 4.

अनाधेयातिशयरूपत्व (anādheyātiśayarūpa-tva) *n.* the state of having the form in which no improvement can be produced संस्कृतिपक्षेऽपि न तावद्ब्रह्मणि गुणाधानलक्षणः संस्कारः संभवति, अनाधेयातिशयरूपत्वात् VivaPraSaṁ. 318. 13.

अनाधेयातिशयस्वरूपत्व (anādheyātiśayasvarūpa-tva) *n.* the state of having an essential nature in which no improvement can be produced साध्यत्वं मोक्षस्य न संभवति ।··· नाप्यतिशयाधानेन । अनाधेयातिशयस्वरूपत्वात् BrahmSūBh.(Rā.) 153.10 (*on* i. 1. 4)

अनाधेयातिशयात्मन् (anādheyātiśayātman) *adj.* having the nature in which no improvement can be produced अनाधेयातिशयात्मा च परे (परान् अ)पेक्षते चेति व्याहतमेतत् PramāVāSvopVṛ. 35. 11.

अनाध्मात (an-ādhmāta) *adj.* not blown अत्रान्तरे स्वयमेवानाध्माता अपि तारमधुरं शङ्खा विरेसुः HarṣaC. 184.11; अनाध्मातस्ततः शङ्खो दध्वान भवनश्रिताम् । व्यन्तराधिपतेर्गेहे रराट पटहः स्वयम् PadmP.(Ra.) 3. 162.

अनाध्यान (an-ādhyāna) *adj.* which cannot be meditated upon अनाध्यानादवेद्यत्वान्नैव प्रश्नो विधीयते VāyuP. ii. 39. 197; *n.* I [Loc.] in the sense other than remembrance with longing संप्रतिभ्यामनाध्याने P. I. 3.46; i. 3.67; यस्माण्णेः प्राक्कर्म कर्ता वा विद्यते न चैतस्माण्णेः प्राक्कर्म कर्ता वा विद्यते । इदं तर्हि प्रयोजनमनाध्यान इति वक्ष्यामीति MahāBh. i. 292. 2 (*on* i. 3. 67); सं प्रति इत्येवं पूर्वाज्जानातेरनाध्याने वर्तमानादात्मनेपदं भवति । आध्यानमुत्कण्ठास्मरणम् KāśiVṛ. *on* i. 3. 46; *on* i. 3.67; II [Loc.] not (Ātmanepada) in the sense of remembrance with longing (अनात्मन्यनाध्याने) स च णिच्प्रकृतिर्धातुराध्याने न वर्तते ··· अनाध्यान इति किम् । स्मरति वनगुल्मं कोकिलः स्मरयत्येनं वनगुल्मः ŚākaṭāVyā. i. 4. 61; न त्वाध्यान इत्यनेनानाध्यान इति प्रसज्यप्रतिषेधपरं पञ्चमं दर्शितम् Prasā. ii. 420. 16.

अनाध्याय (anādhyāya) *m.* intermission of (Vedic) recitation रजोवृष्टौ च यानादौ आरूढस्य तथा द्विजः । एतानन्यांश्च तत्कालाननाध्यायान्विदुर्बुधाः BṛParāSm. 6. 366; cf. **अनध्याय.**

अनाध्यायोपनीत (anādhyāyopanīta) *adj.* who has undergone the thread ceremony on a day prohibited for (Vedic) recitation विना वसन्तऋतुना कृष्णपक्षे गलग्रहे । अनाध्यायोपनीतश्च पुनःसंस्कारमर्हति NāraS. 24. 34.

अनाध्यासिक (an-ādhyāsika) *adj.* not based on superimposition आत्मस्वरूपस्य तद्गुणस्य वा ज्ञानस्य ज्ञेयेन संयोगसमवाययोरभावात्, अन्यस्य चानाध्यासिकस्य संबन्धस्याभावात् AdvaiSi. 453. 3; GuruCandr. ii. 41. 17.

अनानत (án-ānata) *adj.* unbent, not humble प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः (मरुतः) ṚV i. 87.1; वि दृळ्हानि चिदद्रिवो जनानां शचीपते । वृह माया अनानत ṚV. vi. 45.9; तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून् ṚV. vii. 6. 4; क ईं स्य वृषभो युवा तुविग्रीवो अनानतः । ब्रह्मा कस्तं सपर्यति ṚV. viii. 64. 7; विश्वानरस्य वस्पतिमनानतस्य शवसः । एवैश्च चर्षणीनामूती हुवे रथानाम् ṚV. viii. 68.4; विश्वानरस्यादित्यस्य । अनानतस्य । शवसो महतो बलस्य Nir. 12.21 (212. 18) (Durga अनानतस्य शवसः अनानतज्योतिर्बलस्य अनभिभूतप्रकाशस्य); अहमप्याह्वयाम्येनं न लोभान्न च कोपतः । किन्त्वन्तर्न विशेचक्रमेकस्मिन्नप्यनानते TriṣaŚaPuC. i. 5. 467.

अनानत (anānata) *m.* name of a sage सिन्वुक्षिदनिलो बि[भ्राट्] कृष्णो बिन्दुरनानतः ŚabdaRa.(Vā.) 3544.

अनानति (an-ānati) *f.* absence of favourable inclination, absence of satisfaction दर्शपूर्णमासयोरार्त्विज्यार्थमन्वाहार्यमात्रेण ब्राह्मणानामनानतौ तदानमनेन क्रतुनिर्वृत्त्यर्थतया प्राप्तास्तेष्वायुधीयमनादिरूपा अपगोरणादयो निषिध्याः PūrvottaVāNaMā. 50.9.

अनानन (an-ānana) *adj.* not having the mouth (i.e. not coming from the mouth) मम हि हितननानानानन स्वस्वनाना SaraKaṇṭhā. 210.15 (comm. अविद्यमानमाननं मुखं यस्य सः। मुखं विनैव जायमान इत्यर्थः)

अनानन्तर्य (an-ānantarya) *n.* absence of closeness or nearness सिद्धमनानन्तर्यात्तनकारान्तेनाङ्गावनिवृत्तिः Vār. 5 *on* P. vii. 1.3; MahāBh. iii. 242.14 (*on* vii. 1.3); आनन्तर्यमिहाश्रीयते हकारस्य नकार इति। क्वचिच्च संनिपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यं क्वचिच्च न संनिपातकृतं नापि शास्त्रकृतम् MahāBh. iii. 330.14 (*on* vii. 3.54); असांहितिकत्वाद्धलि लोपस्याचोरनानन्तर्येऽविधानान्नत्वानन्तर्यं इत्यत्र नास्ति PariVṛ.(Sī.) 97.15; स्थानिवद्भावाच्चदनानन्तर्यं प्राप्नोति तत् कुतवं न विहन्ति Prasā. i. 227.4.

अनानन्तर्यतस् (anānantarya-tas) *adv.* due to the absence of immediateness भावस्वभावभूतायामपि शक्तौ फलेऽदृशः। अनानन्तर्यतो मोहो विनिश्चेतुरपाटवात् PramāVār. 3.106.

[1]**अनानन्द** (an-ānanda) *m.* non happiness, misery मत्तः प्रकृतिपुरुषात्मकं जगच्छून्यं चाशून्यं च अहमानन्दानानन्दाः विज्ञानाविज्ञाने अहम् DevīU. 1; आनन्दप्रचुर इति यदुच्यते ··· ब्राह्मणप्रचुरो ग्राम इत्यादिवदनानन्दस्यापि प्राप्तेः प्रचुरानन्द इति विपरीतसमासः कृतः TattvPrakā. 17A.8 (*on* i. 1.13); 'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्मे'ति श्रुतेः। सती सद्विद्या तद्विषये अज्ञा अनभिज्ञा ये तेषामनानन्दमानन्दभिन्नं दुःखमेव रूपयति ददाति LalitāSaBh. 161.11 (*on* 202); *adj.* devoid of happiness, miserable तदनानन्दमस्वस्थमाकुमारमहष्टवत्। बभूव पाण्डवैः सार्धं नगरं द्वादश क्षपाः MahāBhā. i. 118.30; अनन्दाः अनानन्दाः असुखा नाम ते लोकाः, तेन अन्धेनादर्शनलक्षणेन तमसा आवृताः व्याप्ताः BṛĀraUBh. 632.1 (*on* iv. 4.11); KāṭhUBh. 104.5 (*on* 1.3); अनानन्दाभिधा लोकास्तीव्रदोषसमन्विताः BṛĀraUBhVā. iv. 4.607; वाति मन्दमनानन्दः समीरस्तस्य संसदि। स्वभावभीषणाकारभूकृष्णभुजगीभयात् Surath. 3.46; दशरथादयः। दहृशु राघवम् ··· । अनुद्विग्नमनानन्दं पूर्णप्रायमनोरथम् YogVā. i. 11.17; प्रत्यग्रप्रणयापराधसमवानानन्दमन्दोदरीपादाम्भोरुहताडनैरपि सुखाकुर्वद्भिरप्रस्तुतान्। कुर्वद् गर्वितराक्षसेश्वरशिरःस्तोमाभिरस्तोपमान् ··· राघवधनुर्भूर्जोतु दैन्यं मम RāmCāSta. 78.

[2]**अनानन्द** (anānanda) *m.* bliss of *ana* (i.e. of Brahmā) अज्ञस्य न भवत्येव बोधजा। अनानन्दसमानन्दमुग्धमुग्धमुखद्युतिः AnnaU. 1.126 (Upaniṣadbrahmayogin अनस्य मुख्यप्राणस्य ब्रह्मणः योऽस्ति आनन्दः चित्तप्रसादरूपः); YogVā. v. 55.20; अनानन्दमहानन्दकालातीतस्ततोऽपि हि। मुक्त इत्युच्यते योगी AnnaU. 2.15; YogVā. v. 70.32.

अनानन्दकरी (anānandakar-ī) *adj.* (*f.*) causing unhappiness अनानन्दकरी शून्या निष्फला व्यर्थमुन्नता। अमङ्गलकरी क्रूरा तृष्णा क्षीणेव मञ्जरी YogVā. i. 17.21.

अनानन्दत्व (anānanda-tva) *n.* A the state of being other than bliss or happiness ब्रह्मणोऽनानन्दत्वमेव परमार्थः स्यात् ŚatDū. 214.23; अनानन्दत्वस्य मिथ्यात्वं प्रत्यप्रयोजकत्वात् Nyāyāmṛ. 75A.6; अपि च सत्यानन्दादिपदलक्ष्यत्वे ब्रह्मणो नदीपदलक्ष्यस्य तीरस्यानदीत्ववदसत्यत्वानानन्दत्वादिकं स्यादिति शून्यवादापत्तिः Nyāyāmṛ. 465A.7; केवलचितः अनानन्दत्वेन तत्र व्यभिचारः LaCandr. 296.4; B the state of being devoid of happiness or bliss न च ब्रह्मणः आनन्दमयत्वाङ्गीकारात् किंचिदनानन्दत्वमपि स्यादिति वाच्यम् VedāntKau. 30.6 (*on* i. 1.14); विष्णोरनानन्दत्वे जगतो निश्चेष्टत्वप्रसङ्गमापादयन्त्या श्रुत्या जगच्चेष्टकत्वं हेतुत्वेन विवक्षितमिति NyāySu.(Ja.) 133A.3 (*on* i. 1.6)

अनानन्दत्वापत्ति (anānandatvāpatti) *f.* undesired contingency of not being bliss ननु गङ्गाशब्दे जहल्लक्षणा आनन्दादिशब्देषु तु जात्यंशत्यागेऽपि व्यक्त्यंशत्यागायोगात् जहदजहल्लक्षणेति कथमनानन्दत्वापत्तिरिति चेन्न Nyāyāmṛ. 466B.7.

अनानन्दत्वासिद्धि (anānandatvāsiddhi) *f.* non-establishment of not being bliss नाप्यानन्दत्वम्। जन्मादिमत्यनात्मनि वैषयिकानन्देऽनानन्दत्वासिद्धेः Nyāyāmṛ. 74A.8.

अनानन्दपद (anānanda-pada) *n.* state of bliss of *ana* (i.e. of Brahmā) आनन्दैकान्तशीलत्वादनानन्दपदं गतः। अनानन्दमहानन्दकालातीतस्ततोऽपि हि AnnaU. 2.14 (Upaniṣadbrahmayogin मुख्यप्राणात्मकचतुर्मुखानन्दपदम्); YogVā. v. 70.31.

अनानन्दमहानन्द (anānanda-mahānanda) *n.* bliss greater than the bliss of *ana* (i.e. of Brahmā) अनानन्दमहानन्दकालातीतस्ततोऽपि हि। मुक्त इत्युच्यते योगी AnnaU. 2.15; YogVā. v. 70.32.

अनानन्दमुख (anānanda-mukha) *adj.* having an unhappy or miserable face अनानन्दमुखं श्यामं शरीरं शीविवर्जितम्। दग्धं स्थलमिवैनं ते बहुमन्यन्त नाकुलाः YogVā. v. 46.24.

अनानन्दयितव्य (anānanday-itavya) *adj.* to be considered as bereft of sexual pleasure एतद् (ब्रह्म) पण्डिता एव पश्यन्ति ··· अविसर्जयितव्यमनानन्दयितव्यममन्तव्यम् NṛsiṃhoTāU. 9.

अनानन्दव्यवच्छेदार्थ (anānanda-vyavacchedārtha) *adj.* meant for the sake of exclusion of non-bliss एवमविज्ञानानानन्दव्यवच्छेदार्थं विज्ञानानन्दपदद्वयम् MānaMe. 200.3.

अनानन्दसमानन्द (an-ānandasamānanda) *m.* bliss or happiness equal to the bliss of *ana* (i.e. of Brahmā) व्युत्थितस्य भवत्येषा समाधिस्थस्य चानघ। ··· अनानन्दसमानन्दमुग्धमुग्धमुखद्युतिः AnnaU. 1.26; YogVā. v. 55.20 (*but* comm. न विद्यन्ते आनन्दाः समा यस्य तथाविधानन्देन)

अनानन्दात्मक (anānandātma-ka) *adj.* of the nature of non bliss अनानन्दात्मके हि जगत्कारणे ब्रह्मशब्दप्रयोगो न युज्यते PañcPā. 81.18 (*on* i. 1.2)

अनानन्दात्मकत्व (anānandātmaka-tva) *n.* the state of having the nature of non-bliss स्वर्गादिलोकानामपुरुषार्थत्वमनानन्दात्मकत्वमविद्यादिषयत्वेन दर्शयित्वा SanatBh. 241.10 (*on* 2.6)

अनानन्दादिरूपत्व (an-ānandādirūpatva) *n.* absence of having the form of bliss etc. स दुःखादिमुक्त आनन्दीभवति ··· इति पैङ्गिश्रुतावानन्दादि- (पैङ्गिश्रुतावनानन्दादि°, Brahmasūtrabhāṣyam, Ed. by R. S. Panchamukhi, Raghavendra Tirtha Pratishthana, Dharwad, 1981) रूपत्वं प्रतीयते BrahmSūBh.(Ma.) 37A.3 (*on* ii. 3.31); अनानन्दादिरूपत्वमानन्दादिरूपत्वाभावः TattvPrakā. 119B.13 (*on* ii. 3.31); 120A.2 (*on* ii. 3.31)

अनानन्दादिव्यावृत्त (anānandādi-vyāvṛtta) *adj.* excluded from non-bliss etc. आनन्दादिविशेषवत्त्वेन ज्ञानं न जिज्ञासायाः प्रयोजनम्, किन्तु आनन्दादिविशेषद्वारा अनानन्दादिव्यावृत्तज्ञानम् LaCandr. 738.37.

अनानन्दादिव्यावृत्तता (anānandādivyāvṛtta-tā) *f.* the state of being excluded from non-bliss etc. आनन्दादिधर्मो न चेद् तर्हि प्रतियोगिताप्रतिद्वन्द्विता अनानन्दादिव्यावृत्तत्तापि ब्रह्मणि न संभवति LaCandr. 738.38.

अनानन्दाद्यात्मक (anānandādyātma-ka) *adj.* of the nature of non-bliss etc. ब्रह्म आनन्दत्वज्ञानत्वसत्यत्वस्वप्रकाशत्वादि खण्डनोक्तरीत्या दुर्वचमिति ब्रह्म तत्त्वतोऽनानन्दाद्यात्मकं स्यात् AdvaiSi. 473.5; ब्रह्मण्यानन्दत्वादिसंसर्गखण्डनेन ब्रह्मानानन्दाद्यात्मकमिति भावः LaCandr. 473.27.

अनानन्दानुमान (anānandānumāna) *n.* inference of being bereft of bliss ईशस्यानुमयासिद्धेः श्रुतिर्धर्मिग्राहिका भवेद्। तया सर्वगुणैः पूर्णः ईश उक्तो यतस्ततः। अनानन्दानुमानस्य धर्मिग्राहिविरोधतः। न प्रमाणं भवेत्तस्मात्त्वानुमात्रोपयोगिनी AnuVyā. 28A.10 (*on* 2.2)

अनानन्दापादकाज्ञान (anānandāpādakājñāna) *n.* nescience conducive to non-bliss अनानन्दापादकाज्ञानविरोधि चित् आनन्दः LaCandr. 310.22; सत्तांशस्य व्यवहारे असत्त्वापादकाज्ञानं प्रतिबन्धकम् ··· आनन्दांशस्यानानन्दापादकाज्ञानम् LaCandr. 310.42.

अनानन्दिन् (an-ānandin) *adj.* not possessing bliss स्वयंप्रकाशत्वं हि वेदान्तिनां सर्वात्मव्यापकमचेतनत्वादनानन्दिनि धर्मभूतज्ञानाख्ये विपक्षे च वर्तते NyāyPari. 296.1.

अनानमत् (an-ānamat) *adj.* not bowing, not bending (लवणाङ्कुशौ) अम्भोधरधृतेनापि धनुषा कृतकोदनौ। अनानमद्भिराक्लिष्यपार्थिवैरपि लेखितौ PadmP.(Ra.) 100.60.

अनानमयितव्यत्व (anānamayitavya-tva) *n.* the state of being one who is not to be made favourably inclined or satisfied (दक्षिणा) केवलप्रधानार्थत्वेऽप्यङ्गकर्तृभ्य ऋत्विग्भ्य एव देया न तु प्रधानकर्त्रे यजमानाय तस्य स्वत एव फललाभाय प्रधानानुष्ठाने प्रवृत्तस्य दक्षिणादानेनानानमयितव्यत्वात् VidhiRa. 9 (71.17)

अनानम्य (an-ānamya) *adj.* which cannot be bent सोऽन्वेषमाणः कौन्तेयान्पाञ्चाल्यो जनमेजय। दृढं धनुरनाय(v. l. °न)म्यं कारयामास भारत MahāBhā. i. 176.9.

अनानयन (an-ānayana) *n.* absence of bringing, non-bringing पद्मानयेत्युक्ते यत्किंचिच्छुक्लानयनं शुक्लानयेत्युक्ते नियमेन पद्मस्यानानयनम् NyāySu.(Ja.) 106B.1 (*on* i. 1.2)

अनानयन्ती (an-ānayanti) *adj.* (*f.*) not bringing सततमनभिभाषणं मया ते परिपणितं भवतीमनानयन्त्या। त्वयि तदिति विरोधनिश्चितायां भवति भवत्-

सुहृज्जनः सकामः ŚiśuVa. 7.9 (comm. अनानयन्त्या । आनयितुमशक्नुवत्या); VyaktiVi. 58.12.

अनानस (anānasa) *m.* pineapple (राढा नाम महापुरी) अनानसैश्च रम्भाभिः ··· । अलंकृता ··· वर्वर्ति ParamāKā. 134.14.

अनाना (a-nānā) *ind.* not manifold (नाधार्थेत्ये च्व्यर्थे) नार्थेत्ये धार्थेत्ये च शब्दे च्व्यर्थे वाचि कृ भू इत्येताभ्यां क्त्वाणमौ भवतः । ··· अनाना नानाकृत्य गतः JaineVyā. 143.12 (*on* ii. 4.47); KāśiVṛ. *on* iii. 4.62; अत्र च नानोक्त्वा(? क्त्वा) प्रयुक्त इवशब्दोऽनाना संगृह्णातीति भेदाभेदाख्यमुभयं निराकृतं भवति NyāySu.(Ja.) 452A. 10 (*on* ii. 3.14)

अनानात्मक (a-nānātmaka) *adj.* not of diverse nature स्वतोऽनानात्मकेऽज्ञानाद्यन्नानात्मसमीक्षणम् । मिथ्याज्ञानमनात्माभं मोह इत्युपदिश्यते BṛĀraUBhVā. iii. 5.62.

अनानात्मता (anānātma-tā) *f.* the state of not being of diverse nature अन्यथा स्यात् पदार्थानां विधानप्रतिषेधने । एकधर्मस्य सर्वात्मविधानप्रतिषेधनम् । अनानात्मतया PramāVār. 4.231.

अनानात्व (a-nānātva) *n.* absence of diversity (अपोहस्य) यदि वा भिन्नमानत्वाद्वस्त्वसाधारणांशवत् । अवस्तुत्वे त्वनानात्वात् पर्यायत्वान्न मुच्यते ŚlokaVār. 5 (13). 46 (578.8); TattvSaṁ. 927; अन्यथा चापि व्यपदेशो भवत्यनानात्वस्य प्रतिपादकः BrahmSūBh.(Śaṅ.) 479.4 (*on* ii. 3.43); वस्तुनो यद्यनानात्वमात्मनः प्रश्न ईदृशः । कथं घटेत वो विप्रा वक्तुर्वा मे क आश्रयः BhāgP. xi. 13.22.

अनानात्व (a-nānātva) *adj.* not possessing diversity or multiplicity दुर्दर्शमतिगम्भीरमजं साम्यं विशारदम् । बुद्ध्वा पदमनानात्वं नमस्कुर्मो यथाबलम् GauḍKā. 4.100; एवं तावदनानात्वे ब्रह्मणि ज्ञानकर्मणोः समुच्चयो निराकृतः NaiṣkaSi. 39.1; योऽल्पकामदनानात्वो भेदसंसर्गवर्जितः । तं त्वौपनिषदं देवं साक्षादित्यादिलक्षणम् BṛĀraUBhVā. iii. 9.115.

अनानानन्दन (a-nānānandana) *adj.* (*sākṣin*) different from that (i. e. the individual soul) which delights in many objects विष्णोस्तत्परमं पदम् ।··· अनानानन्दनातीतं दुष्प्रेक्ष्यं मुक्तमव्ययम् TejoBiU. 1.8.

अनानान्न (a-nānānna) *adj.* not taking various kinds of food (i. e. observing restrictions regarding food) (गिरिः) नानानानान्ननान्नन्नीः Yādavā. 6.93 (comm. नानान्नाः सर्वाहारभोगि(? जि)नः अनानान्नाः नियताहारास्तपस्विनः)

अनानाप्रयोक्तृकता (anānāprayoktṛka-tā) *f.* the state of not being uttered by different persons (i. e. being uttered by the same person) इदं चैष वर्णवादी प्रष्टव्यः — किमियमनानाप्रयोक्तृकतार्थज्ञानाङ्गम् न वेति SphoṭSi. 115.3.

अनानाभूत (a-nānābhūta) *adj.* which has not become manifold अविद्यया मोहितः सन् य इह ब्रह्मण्यनानाभूते परस्मादन्योऽहं मत्तोऽन्यत्परं ब्रह्मेति नानेव भिन्नमिव पश्यति उपलभते KāṭhUBh. 156.4 (*on* 4.10); अस्य ग्रन्थस्य, यदनुत्पन्नं तदनानाभूतं दृष्टमित्यर्थो वक्तुं न युज्यते ŚrutaPra. iA. 108.11 (on i. 1.1)

अनानामत्युपलक्षण (a-nānāmatyupalakṣaṇa) *adj.* not characterised by the notion of being diverse भगवानेक आसेदमग्र आत्मात्मनां विभुः । आत्मेच्छानुगतावात्मानानामत्युपलक्षणः (may be नानामत्युपलक्षणः) BhāgP. iii. 5.23 (Śrīdhara नानाद्रष्टृदृश्यादिमतिभिर्नोपलक्ष्यत इति)

अनानाम्य (an-ānāmya) *adj.* who cannot be subdued (*lit.* who cannot be made to bend down) (भूपतिः) युध्यनानाम्यः स दोहदमपूरयत् DvyāśraKā. 11.6.

अनानाय्यगोदुह् (an-ānāyyagoduh) *adj.* [SiddhaHe. v. 1.25; केचिदग्निविशेषादन्यत्राप्यनित्यविशेष इच्छन्ति । आनाय्यो गोधुक् अनित्य इत्यर्थः Bṛhadvṛtti *on* SiddhaHe. v. 1.25] who is not an irregular cow-milker (i. e. who always milks the cow) गर्भेविघ्नच्छिदेऽभुवन्नुध्यनानाय्यगोदुहः । ··· ऋपयः DvyāśraKā. 11.10 (comm. अनानाय्यगोदुहो नित्यगोदोहकाः)

अनानार्थ (a-nānārtha) *m.* [Loc.] not in the sense of many objects (i.e. when not used in the dual or plural) पदपूर्वमामन्त्रितमनानार्थेऽपादादौ VājaPrāti. 2.17 (Uvaṭa पदपूर्वमामन्त्रितं यत्पदं तदनुदात्तं भवति, यदि तन्नानाभूतस्यार्थस्याभिधायकं न भवति, यदि तत् द्विवचनबहुवचनेन नारभ्यत इत्यर्थः ।··· अनानार्थ इति किम् । मित्रस्य मा चक्षुषेक्षध्वमर्मयः); *adj.* 1 not referring to different things-meant अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम्, निर्विकल्पमनानार्थमेतत् तत्त्वस्य लक्षणम् MūlaMāKā. 18.9; 2 (word) not having many meanings, not polysemous (दृष्युत्थो ध्वनिः) अयं च वाक्यमात्रे । पदसमूहश्च वाक्यम् । तेनास्य नानार्थानानार्थघटितसमासविषयत्वेऽपि न विरोधः । न तु शुद्धैकपदे, तस्मिन्नानार्थानानार्थयोरसमावेशात् RasGaṅ. 174.13; 174.14.

अनानास्त्रकोविद (a-nānāstrakovida) *adj.* who is not an expert in (the use of) many missiles नाल्पवीर्योमहाभागस्तथानानास्त्रकोविदः । नादेवसत्त्वो विनयेत्कुरूनस्ते महाबलान् MahāBhā. i. 121.2 [better read तथा नानास्त्रकोविदः]

अनानिञ्ज्य (an-āniñjya) *adj.* which does not have immovability (i. e. not accumulated) हेतुरत्र संप्रयुक्तकहेतुः सहभूहेतुश्च ।·· न विपाकहेतुः । अनानिञ्ज्यस्य कर्मणः कस्यचिद् गत्यन्तरेऽपि विपाकादानात् Sphuṭā. ii. 128.19 (*on* 2.52) [cf. अनिञ्ज्य DBHS.]

अनानीत (an-ānīta) *adj.* [*f.*-ā] I not brought अनीता वा अन्येषां देवानाऽस्मोऽनानीता अन्येषा सऽस्पर्शन KāṭhS. 8.11 (i. 95.3) = KapiKaS. 7.8 (79 3); II not led to (प्रकाशस्य शुद्धसंविद्रूपस्य देहादिसंस्पर्शैरनाविलीभूतस्य) देहादिभिरवच्छिन्नतामनानीतस्येत्यर्थः Bhāsk. i. 302.16 (*on* i. 6.1)

अनानीय (an-ānīya) *ger.* not having brought (back) चौरहृतं ब्राह्मणद्रव्यं युद्धेन विजित्यानीय शुध्यति । अथवा शक्तैलीन् वारान् घातितस्तन्निमित्तं च शस्त्रक्षतो जीवन्नप्यनानीयापि कृतयुद्धः शुध्यति DīpKa. 97.2 (*on* 3.246)

अनानुकूल्य (an-ānukūlya) *n.* non-favourability (towards the opposite view) तर्को व्याप्याभ्युपेतावनभिमतिपदव्यापकस्य प्रसक्तिः ···। विश्रान्तिवैपरीत्ये प्रतिहतिविरहोऽनिष्टतानानुकूल्यं व्याप्तिश्चास्याङ्गम्, एवं कतिचिदनुमितेस्ताङ्क्षं भेदमाहुः TattvMu. 4.60 (Sarvārthasiddhi अनानुकूल्यं विरुद्धहेत्वाभासवत् परपक्षसाधकत्वाभावः)

अनानुकृत्य (an-ānukṛtyá) *adj.* [PadaPā. अनुनुऽकृत्य AltGr. II. 1.71] not to be imitated, inimitable हिमेव पुर्णा मुषिता वनानि बृहस्पतिनाकृपयद्वलो गाः । अनानुकृत्यमपुनश्चकार यात्सूर्यामासा मिथ उच्चरातः RV. x. 68.10; AV. xx. 16.10; शर्धत्पृथिवी इन्द्र शत्रूंननानुकृत्या रण्या चकर्थ RV. x. 112.5.

अनानुगामिकत्व (anānugāmika-tva) *n.* [AltGr. II. 1.71] the nature of not being the follower (of the soul in the next birth) विपर्ययभेदान् सकलानाह ··· अनानुगामिकत्वाय न शुभानुबन्धायेति SthānṬ. 149B.5.

अनानुगुण्य (an-ānuguṇya) *n.* incongruity, non-conformity सांख्यनिराकरणार्थतानि सूत्राणि ··· इति यन्मायावादिनो वदन्ति तन्नेत्यर्थः ।··· सूत्राक्षराणामनानुगुण्यात् NyāySu.(Ja.) 119B.13 (*on* i. 1.5); 144A.1 (*on* i. 1.6)

अनानुगुण्यगणना (an-ānuguṇyagaṇanā) *f.* non-consideration of justification कार्यारम्भः फलोल्लासमालोक्य प्रायशो जनैः । अनानुगुण्यगणनां कुर्वाणैर्न विगर्ह्यते RājTa.(Ka.) 7.1422.

अनानुगुण्यरूप (anānuguṇya-rūpa) *adj.* of the nature of incongruity निदर्शनालंकारोणाश्रयाश्रयिणोरनानुगुण्यरूपोऽधिकालंकारो व्यज्यते PratāYaBhū. 83.5.

अनानुजा (án-ānujā) *f.* [AltGr. II. 1.71] not a younger sister अनानुजामनुजां मामकर्त TaiS. IV. iii. 11.3; KāṭhS. 39.10 (iii. 127.9); PāraGS. iii. 3.5.

अनानुद (an-ānudá) *adj.* [PadaPā. अनुनुऽद AltGr. II. 1.71] (warrior) who never gives in, unyielding, relentless त्वं एता वहगृदस्यामिनुपुरोऽनानुदः परिषूता ऋजिश्वना RV. i. 53.8 = AV. xx. 21.8; अनानुदो वृषभः ··· इन्द्रः सुयज्ञ उषसः स्वर्जनत् RV. ii. 21.4; ii. 23.11; स्वरूणं हि त्वामहमिन्द्र शुश्रवानानुदं वृषभ रध्रचोदनम् RV. x. 38.5; JaimiBr. 1.228; ŚāṭyāyaniBr. 64.1 (collection of the Fragments of Lost Brāhmaṇas, Batakrishna Ghosh, Calcutta, 1935)

अनानुदिष्ट (án-ānudiṣṭa) *adj.* [PadaPā. अनुनुऽदिष्ट AltGr. II. 1.71] who is not requested (to do anything), unsolicited निरत्नौ मघवा तं दधाति ब्रह्मद्विषो हन्त्यनानुदिष्टः RV. x. 160.4.

अनानुपूर्वी (an-ānupūrvī) *f.* 1 absence of fixed order शीतोष्णव्यत्यासमनानुपूर्व्योपसेवमानस्य ··· त्रयो दोषा युगपत् प्रकोपमापद्यन्ते CaraS. ii. 5.8 (1941 Ed.); पूर्वानुपूर्व्या न पश्चानुपूर्व्या नानानुपूर्व्या वेत्यर्थः AupaSūṬ. 42.1; सा च गणनानुपूर्वी त्रिप्रकारा पूर्वानुपूर्वी पश्चानुपूर्व्यनानुपूर्वी चेति SthānṬ. 4B.9; 4B.10; 2 absence of a precedent cause अनानुपूर्व्या संतापात्तीक्ष्णदण्डे च घातनात् । स मिथ्याविनयाद् घोराद् ऋच्छेद् गात्रे व्यथान्तरः Hastyāyur. 428.24 (3.8)

अनानुपूर्व्य (an-ānupūrvya) *n.* I absence of uninterrupted succession (of words) अनानुपूर्व्ये पदसंध्यदर्शनात् पदव्यवेतं च पदव्यवायि च ṚPrāti. 11.8; II absence of (meaningful) succession of words अनानुपूर्व्येणापि संनिविष्टानां यथेष्टमभिसंबन्धो भवति MahāBh. i. 152.26 (*on* i. 1.58); *adj.* not having (internal) sequential order तत् (वाक्यम्) ·· अनानुपूर्व्यं व्यञ्जकक्रमवशाच्च क्रमवद् भागवच्च प्रतिभाति SphoṭSi. 221.1.

अनानुपूर्व्यसंहिता (anānupūrvya-saṁhitā) *f.* the continuous *saṁhitā*-text (of the Veda) which is not according to the succession

(of words in the Pada text) शुनश्चिच्छेपं निदितं नरा वा शंसं पूषणन्। नरा च शंसं दैव्यं ता अनानुपूर्व्यसंहिताः ṚPrāti. 2. 43.

अनानुभविकत्व (anānubhavika-tva) *n.* the state of being that which does not come from experience इयमपि च ··· प्रतीतिः प्रलयादिवन्न्-वर्जिताभिलापसंबन्धादताद्दृशीव प्रकाशत इति चेन्न।··· अनानुभविकत्वस्योभयत्रा(पि) साम्यात् NyāySu.(Ja.) 396A. 5 (*on* ii. 2. 7)

अनानुभाविकत्व (anānubhāvika-tva) *n.* the state of being that which does not come from experience सदेत्यनेन परमप्रेमयोग्यत्वम्। तस्यानानुभाविकत्वादसंभवमाशङ्क्य सदा ममेत्युक्तम् NyāySu.(Ja.) 2A. 11 (*on* i. 1.1)

अनानुभूति (án-ānubhūti) *adj.* i [PadaPā. अनंनुऽभूति AitGr. II. 1. 71] undevoted, neglectful अनांनुभूतीरवधून्वानः पूर्वीरिन्द्रः शरदंस्तर्तरीति ṚV. vi. 47. 17; [*but f.* PW., MW., APTE]; ii devoid of proper experience अनानुभूतीः सम्यगनुभवरहितानवधून्वानोऽवमे संसारे वर्तयन्निन्द्रः पूर्वीः शरदोऽतीतान् संवत्सरांस्तीर्णिः वर्तमानांश्च तर्तरीति NyāySu.(Ja.) 586A. 1 (*on* iii. 4. 5-6)

अनानुमानिक (an-ānumānika) *adj.* not inferential नन्वनानुमानिके ह्यानुमानिकत्वं निरसनीयम्, न पुनरनुमानस्योद्धारो वक्तव्यः Bṛha. 101. 6 (*on* i. 1.5)

अनानुरूप्य (an-ānurūpya) *n.* incongruity आश्रयाश्रयिणोरा(? रना)-नुरूप्यमधिकम्। विरोधप्रस्तावादिह निर्देशः। अनानुरूप्यस्य विरोधोत्थापकत्वात् AlaṅkāSa. 134.7; अत्र विरोधस्य प्रक्रान्तत्वमेवैतन्निरूपणकारणम्। अत्रानानुरूप्ये हि विरोधस्य जागरूकत्वात् Ekāva. 8. 40(1) (291. 7); न चात्र विपद्गणस्यावस्थानमात्रेण तमोगणानामवस्थानमापादयितुमुचितम्, न तु जयः अनानुरूप्यात्, इति शङ्क्यम् RasGaṅ. 654.8.

अनानुरूप्यलक्षण (anānurūpya-lakṣaṇa) *adj.* characterised by incongruity अत्र च तुच्छफलत्वं प्रति महतः प्रयत्नस्य कारणत्वाद्धेतुफलयोरनानुरूप्यलक्षणो विषमालंकारो नाशङ्कनीयः AlaṅkāRa. 62(22); अत्रोपमालङ्कारेण यशसः पुण्डरीकवद् वैपुल्य, गगनस्य च भ्रमरवदल्पत्वस्य प्रतीतेराश्रयाश्रयिणोरनानुरूप्यलक्षणोऽधिकालङ्कारो व्यज्यते CitraMī. 28.20.

अनानुवषट्कृत (an-ānuvaṣaṭkṛta) *adj.* [AitGr. II. 1.71] not accompanied by the subsequent utterance of *vaṣaṭ* अशान्तो भक्षोऽनानुवषट्कृतः GopBr. ii. 3.8 (194. 8)

अनानृशंस्य (an-ānṛśaṃsya) *adj.* devoid of compassion (i. e. cruel) कथं हि मन्त्राग्र्यधरो मनीषी ···। एवंयुक्तः सर्वमन्त्रैरहीनो अनानृशंस्यं कर्म कुर्यादमूढः MahāBhā. v. 32.19; *n.* absence of mercy or compassion, cruelty अनानृशंस्यं हिंसोपकरणादानतत्कथाः। निसर्गहिंस्रता चेति लिङ्गान्यस्य स्मृतानि वै (रौद्रध्यानस्य) MahāP. 21.49.

अनानेय (an-āneya) *adj.* who cannot be brought (to the court) (अथ मूलमनाहार्यम्) अनाहार्यम् अनानेयम् VīraMi.(Vyavahāra.) 295. 21.

अनान्तत्व (anānta-tva) *n.* the state of being (a stem) which does not end in the sound *n* न हि 'अष्टाभिः' इत्यत्र 'झल्युपोत्तमम्' इति प्राप्नोति, कार्यकालपक्षेऽनान्तत्वेन षट्त्वाभावात् LaŚabdeŚe. i. 319.7.

अनान्तरबाह्य (an-āntarabāhya) *adj.* distinct from these (religious faiths) that fall within and (also those that fall) outside (the Vedic fold) अद्भुतस्थितिरनान्तरबाह्यः सत्समस्तु समयोऽयमपूर्वः Yādavā. 21. 16 (comm. आन्तरो वैष्णवादिः, बाह्य आर्हतादिः, वेदानुरोधाननुरोधाभ्यामान्तरबाह्यत्वे, तदुभयव्यतिरिक्तः)

अनान्तरीयकत्व (anāntarīyaka-tva) *n.* the state of being what is not inseparable or not invariably connected अत एव चापरैरप्यन्तरङ्गच्छेदवत्तदनान्तरीयकत्वात्प्रागेव सर्व एवोपधिः प्रतिषेध्यः TattvPradī.(A.) 295. 2 (*on* 3.19)

अनान्तरीयकत्वापत्ति (anāntarīyakatvāpatti) *f.* undesired contingency of not being invariably connected (नान्तरीयकत्वम्) इष्टव्याप्यत्वं तदिति चेन्न। तद्यदि कालिकं तर्ह्यान्तरालिकश्रमादेरप्यनान्तरीयकत्वापत्तेर्विध्यर्थबाध एव VaiyāBhū. 96. 18. (*on* 22)

अनान्तर्य (an-āntarya) *n.* absence of close (phonetic) affinity (with regard to the place of articulation) इह तर्हि खट्वर्श्यः मालर्श्य इति दीर्घवचनादकारो नानान्तर्यादिकारौकारौ न MahāBh. i. 23. 14 (*on* i. 1. 0); अथवानान्तर्यमेवैतयोरान्तर्यम् MahāBh. i. 125.2 (*on* i. 1. 50)

अनान्वीपिकी (a-nānvīpikī) *adj.* (*f.*) [P. iv. 4.28; SiddhaHe. vi. 4.28] not unfavourable पत्यौ हासादनान्वीपिक्यक्षिपत्पौष्पिकी स्रजम् DvyāśraKā. 17. 18 (comm. अनान्वीपिकी न प्रतिकूलं वर्तमानानुरक्तेत्यर्थः)

अनाप् (an-āp) *adj.* (Gr.) other than the feminine suffix *-āp* (= ā) आतोऽनापः Vār. 1 *on* P. vi. 4. 140 (MahāBh. अनाप इति किमर्थम्। खट्वायाम् मालायाम्): इह तर्हि याः पश्य आतो धातोः इति लोपः प्रसज्येत। नैष दोषः। अनाप इत्येवं सः MahāBh. i. 253. 20 (*on* i. 3. 1); आबनापोरेकादेश आप आदिवद्भवति MahāBh. iii. 63. 20 (*on* vi. 1. 85); लुगातोऽनापः SiddhaHe. ii. 1. 107.

अनापतत् (an-āpatat) *adj.* 1 not approaching (नृपः) आस्कन्दमास्कन्दमनापतन्तम्।··· स तैः (किरातैः) जहर्ष प्लवगैर्नु रामः DvyāśraKā. 14. 25 (comm. अनापतन्तं श्रान्तत्वेनानागच्छन्तम्); 2 not coming within, not adhering to परःसहस्राः शरदस्तपांसि युगान्तरं योगमुपासतां वा। तथापि ते मार्गमनापतन्तो न मोक्ष्यमाणा अपि यान्ति मोक्षम् MahāVīSt.(H.) 2. 14.

अनापत्काल (anāpat-kāla) *m.* time of non-distress कारिता (वृद्धिः)। ऋणिकेन यानापत्काल एवोत्तमर्णपीडया कृता ManvaMu. 317. 15 (*on* 8.153)

अनापत्कालविषय (anāpatkāla-viṣaya) *adj.* having reference to the time of non-distress शूद्राज्ज्ञानागमश्चैव ज्वलन्तमपि पातयेत्। ··· एतदनापत्कालविषयम् VīraMi (Saṃskāra.) 513. 16.

अनापत्ति (an-āpatti) *f.* 1 no offence, unpunishableness 2A absence of (physical) trouble B absence of distress, prosperous time 3 non-attainment (of a state or condition) 4 non-happening of what is desired 5 [Inst.] because of absence of (any other) possibility 1 no offence, unpunishableness भिक्षुरनर्थीशो धर्मं देशयति, सातिसारो भवति। अनापत्तयस्तन्मुखिकया निर्गता भवन्ति Divyāva. 204. 16; 464. 28; अनापत्तिरादिकर्मिकस्येति पूर्ववत् Divyāva. 464. 30; एवं बोधिसत्त्वशीलसंवरस्थितस्य बोधिसत्त्वस्यापत्तिरपि वेदितव्या। अनापत्तिरपि क्लिष्टाप्यक्लिष्टापि मृद्वी मध्याधिमात्रा अपि BodhiBhū. 109. 22; अनापत्तिः क्षिप्तचेतसः। अनापत्तिः शुद्धाशयभूमिप्रविष्टस्य BodhiBhū. 110. 8; विनिश्चयतश्च तत्रापत्तिः कथं भवत्यनापत्तिर्वेति निर्धारणात् MaYānaSū. 55. 10 (11.4); उभयासंभवे तु सर्वत्र शिक्षितव्यम्। तत्राप्येकस्यां शिक्षायां शिक्षणायामशक्तस्येतरशिक्षानभ्यासादनापत्तिः ŚikṣāSa. 11. 8 [DBHS.]; 2A absence of (physical) trouble शिशुधात्र्योरनापत्तिः शुद्धक्षीरस्य लक्षणम् KāśyaS. 9A. 8; 2B absence of distress, prosperous time (भोजनाभ्यञ्जनाद् दानाद् यदन्यत्कुरुते तिलैः) यदन्यत्कुरुते विक्रयाद्यनापत्तौ ManvaVi. 1324. 21 (*on* 10. 91); 3 non-attainment (of a state or condition) न च समुद्रादुदकात्मनोऽनन्यत्वेऽपि तद्विकाराणां फेनतरङ्गादीनामितरेतरभावापत्तिर्भवति, न च तेषामितरेतरभावानापत्तावपि समुद्रात्मनोऽन्यत्वं भवति BrahmSūBh.(Śaṅ.) 307. 8 (*on* ii. 1.13); 4 non-happening of what is desired न हि विधिश्रुतिः व्रीह्यादिविषयस्त्विष्टः, यवादिष्वनापत्तेः, व्रीह्यादिविषयत्वे आनर्थक्यापत्तेश्च MīmāKau. ii. 143.9 (*on* iii. 1. 8); एवमेषा व्यवस्था न प्रागुक्ते करणमनुमानमिति नये संगच्छते। करणस्य ज्ञायमानलिङ्गत्वपक्षे वाच्यतायाः केवलाया आपत्तेः। लिङ्गज्ञानत्वपक्षे वाच्यत्वलक्ष्यत्वयोरनापत्तेः RasGaṅ. 642.11; अन्यथा शोभनं पचति स्तोकं पचतीतिवच्छोभनं पाक इत्यनापत्तेः VaiyāBhū. 60. 12 (*on* 14); ध्वस्ते घटे जानातीत्यनापत्तेरितीदं मतं परिष्कुर्वन्ति VaiyāBhū. 102. 17 (*on* 24); अकारादिग्रहणे इकारणकारादीनामाद्यन्तत्वस्यैवानापत्तेः LaŚabdeŚe. i. 15. 3; i. 238. 13; i. 256.11; कर्मप्रवचनीयसंज्ञाया एवानापत्तिः LaŚabdeŚe. i. 472. 14; 'पादः पत्' इत्यत्र ग्रहणापत्तौ पादयतेः क्विपि पद् इत्याद्यनापत्तेः LaŚabdeŚe. ii. 118. 10; 5 [Inst.] because of absence of (any other) possibility त्र्यवटकस्य तु ··· पुनर्गणनादोषात्। अनापत्त्या पुनर्गणने विनिगमनाविरहेण त्र्याणामपि गणनापत्तिः SetuBa. 247. 29.

अनापत्तिक (anāpatti-ka) *adj.* free from offence अनुत्तरं वा योगक्षेमं निर्वाणमनुप्राप्नुवतोऽनापत्तिकस्य सतो देवेषूपपत्तिर्भविष्यतीति संपश्यता पण्डितेन अलमेव प्रव्रज्याविमुक्तेन भवितुम् Divyāva. 187. 15 [DBHS.]

अनापत्त्रासा (an-āpattrāsā) *adj.* (*f.*) free from trouble and fear अथ नानापत्त्रा सा कुरुसेना रुषितमतिरनापत्त्रासा। कर्णं समदा रयतः स्फुरद्भिरिषुभिर्बलं समेत्य समदारयत YudhiVi. 8. 29.

अनापत्प्रकरण (anāpat-prakaraṇa) *n.* context other than that of calamity रक्षसां गच्छते योनिं यस्तामभ्यवमन्यते (भिक्षाम्)। इति एतदप्यनापत्प्रकरणात्पतितादिवर्जं वेदितव्यम् SmṛtiCan. ii. 463. 18; (राजतो धनमन्विच्छेत्संसीदन् स्नातकः क्षुधा) न च 'संसीदन्' इत्यभिधानादापद्धर्मविषयत्वमस्य वाच्यम्। अव्यभिचारादनापत्प्रकरणात् ManvaMu. 151. 2 (*on* 4. 33)

अनापत्ययकारत्व (anāpatyayakāra-tva) *n.* the state of being a secondary suffix *ya* denoting the sense other than an offspring मानुष्यकमिति।··· (मनुष्य इति शब्दे) येषां तु मतेन जातिमात्रे यन् नापत्ये तेषां नार्थः प्रकृतिभावेन। अनापत्ययकारत्वादेव हि लोपो न भविष्यति Nyās. ii. 606. 10 (*on* vi. 4.163)

अनापत्सहा (an-āpatsahā) *adj.* (*f.*) not enduring difficulties निष्प्रधाना हि प्रकृतयो भोग्या भवन्त्यनुपजाप्याश्चान्येषामनापत्सहास्तु ArthŚa.

ii. 265.7 (7.5); (भूमिः) भिन्नमनुष्या भोग्या भवत्यनुपजाप्या चान्येषाम्। अनापत्सहा तु ArthŚā. ii. 309.4 (7.11)

अनापद् (an-āpad) *f.* absence of trouble or misfortune, non-adversity स यथा व्रजे गा अनपाद्य(? अनापद्य) अर्गलेनापि हन्यात् तादृक् तत् JaimiBr. 1.141; नैवाददीत पाथेयं यतिः किंचिदनापदि। पक्वमापत्सु गृह्णीयाद्यावदन्नं न लभ्यते SamnyāU. 2(92); न वृथाग्नीनुद्वासयेन्नैवानापत्सु BaudhŚS. iii. 380.7; न चैनमध्ययनविघ्नेनात्मकार्येष्व(? ष्व)त्युपरुन्ध्यादनापत्सु HirŚS. xxvi. 2.113 (40.5) (comm. अनापत्स्विति वचनादापत्स्वध्ययनविघातेनाप्युपरोधे न दोषः); ĀpaDS. i(2). 8.26; अथापि नानापदि रात्रेः ससन्धिकायाः स्तोमविकारो विद्यते NidāSū. 181.9 (10.7); नानापदि परस्यान्नमनिमन्त्रितमाहरेत् MahāBhā. xiii. 517*(1); अनापदि चरेद्यस्तु सिद्धं भैक्षं गृहे वसन्। दशरात्रं पिबेद्ब्रह्मापत्सु त्र्यहमेव च AtriS. 163; 307; LaŚaṅkhaSm. 12; अद्रोहेणैव भूतानामल्पद्रोहेणैव वा पुनः। या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ManuSm. 4.2; 4.100; 5.33; गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयोनयः। अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि ManuSm. 8.62; 9.58; समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि ManuSm. 9.282=AgniP. 226.55=ViṣṇuDhaP. ii. 72.160; YājñSm. 1.32; 1.160; प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि ViṣṇuP. iii. 18.40; iii. 11.14; पूर्वां संध्यां सनक्षत्रां पश्चिमां सदिवाकराम्। उपासीत यथान्यायं नैनां जह्यादनापदि MārkP. 34.18=SkandP. i(2). 41.123=BrahmP. 221.18; ततश्चानापद्यन्यथाभक्षणे च प्रायश्चित्तम् BālaKrī. i. 48.11 (on 1.32); क्षत्रियं ब्राह्मणो जात्या यदुपेयादनापदि। प्रतिलोममिदं वृत्तं धर्मशास्त्रैर्निषिद्धतः BṛĀraUBhVā. ii. 1.93; धनार्थं ब्राह्मणा यान्ति राजानमिति बुध्यते। न त्वनापदि विद्यार्थं तं यान्तीह द्विजोत्तमाः BṛĀraUBhVā. iv. 1.5; न त्वत्र शुभा वेदविद्या वेदितव्या, आपदि विधिर्भविष्यति, अनापदि तु नैवेष्यते ManuBh. i. 194.14 (on 2.238); विकर्मस्थाः— अत्रानापदि ये वर्णान्तरवृत्त्या जीवन्ति। यथा ब्राह्मणः क्षत्रवृत्त्या ManuBh. i. 342.7 (on 4.30); i. 413.3 (on 4.247); ii. 66.24 (on 7.216); इतरेतरभार्यागमने ज्येष्ठानुज्योः पातित्यमनापदि सत्यपि नियोगे ManuBh. ii. 257.10 (on 9.58); अनापदि आपद्वेगेनात्यर्थमुक्तं भवति ManuBh. ii. 316.5 (on 9.282); एकस्मिन् वासरे मघनिवृत्तेर्भूतिलः किल। एतद्दोषात्सहायेषु मृतेष्वापदनापदम् YaśasCam. ii. 329.8; राज्ञो हि परमो धर्मः स्वधर्मस्यानुपालनम्। शासतोऽन्यान्यथाशास्त्रमनापद्युत्पथानिह BhāgP. i. 17.16; v. 26.15; नाद्याच्छूद्रस्य विप्रोऽन्नं मोहाद्वा यदि कामतः। स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि KūrmaP. 567.4 (2.14); PadmP. i. 56.1; स्वधर्मं यः समुत्सृज्य परधर्मं समाचरेत्। अनापदि स विद्वद्भिः पतितः परिकीर्त्यते VāmaP. 14.89; नाविशालां न वा भग्नाम्…। न च जन्तुमर्यां शय्यां समातिष्ठेदनापदि BhaviP. 897B.18 (iv. 205.121); दुर्गतिस्तु भवेत्पापादनापदि न चापदि DevīBhāP. vii. 13.23; अनापदि नरो यस्तु हिरण्यादीन्यपाहरेत्। … संदंशे नरके पतेत् PadmP. iv. 48.20; ततः सा निश्चितावादीदेव येनास्म्यनापदि। विक्रीतान्यस्य निःसत्त्वं लुब्धं कथमुपैमि तम् KathāSaSāg. vii. 9.117; एतान्यनापदि ब्राह्मणस्य षट् कर्माणि Mitā. 40.3 (on 1.118); सत्यप्यधिकारे श्रौतस्मार्ताग्निपरिग्रहमकुर्वत उत्सृष्टाग्नेश्चान्नमनापदि न भुञ्जीत Aparā. 237.14 (on 1.160); 273.12 (on 1.192); अनापदि कामतो भोजनं कृत्वेदम् (प्रायश्चित्तम्) HārLa. 83.18; पितात्मनः पुण्यमनापदः क्षमा धनं मनस्तुष्टिः …। अतः परं पुत्रि न कोऽपि तेऽद्य मित्युद्श्रवेष व्यसृजन्निजौरसीम् NaiṣC. 16.118 (*but* comm. न विद्यन्त आपदो यास्वस्ताः, आपन्नाशिका इत्यर्थः); एतत्सर्वमापदि परिग्रहविषयम्। … अनापदि तु गौतमेनोक्तम् SmṛtiCan. ii. 468.7; अयं च शूद्रप्रश्नविधिरनापदि हीनवृत्त्युपजीविनां द्विजानामपि भवति SmṛtiCan. iii. 205.17; v. 171.5; ब्रह्मचारिनापद्येकस्यान्नं नाश्नीयात्। ब्रह्मचारी ब्राह्मणश्चेत् तदार्थितः सन्नेकान्नमनापद्यपि श्राद्धे भुञ्जीत CaturCin. iii(1). 424.10; iii(1). 527.11; अनापदि तु कृत्स्नस्य वेदस्य नियमेनाध्येतव्यत्वात् ManvaVi. 505.10 (on 4.100); अनापदि व्याध्याद्यभावे ManvaVi. 1253.22 (on 9.282); 1427.13 (on 11.167); आर्तः आपत्काले अनापदि त्वन्यत्प्रायश्चित्तम् ManvaVi. 1445.26 (on 11.202); आपत्सु त्वा सहायानामात्मनः पौरुषस्य च। अनापदि सुहृत् सर्वः स्वयं च पुरुषायते SūktiRa. 163.106; एषामामान्नमनापदि ग्राह्यम्। आपदि तु पक्वान्नमपि DīpKa. 20.28 (on 1.166); 95.22 (on 3.235); अनापदि आर्त्यभावे DaṇḍaVi. 227.17; तेन ज्ञानिनोऽप्यनापदि विहितत्यागोऽविहितकरणं च चित्तमालिन्यजननेन ज्ञानतिरोधायकम् AṇuBh. 288.1 (on iii. 4.27); 289.8 (on iii. 4.31); द्विजातिरनापदि तत्तद्देवार्चनविधानं विना न मांसं भक्षयेत् ManvaMu. 200.11 (on 5.33); एकस्मिन्नशुचौ सत्यां तन्मित्रेऽप्यशुचिः स्मृता। अनुलयोर्मयं मार्गमाचरेत्तदनापदि ŚilpaRa. ii. 31.64; अनापदि तु अग्नीषोमीयप्रयोगसमाप्तेः पूर्वं दोष एव MīmāKau. i. 24.8 (on i. 3.4); अनापदि प्रतिषेधाच्च BhāṭṭDī. ii. 85.25 (on iv. 1.2); एकमेकस्वामिकमन्नम् अनापदि अन्नान्तरलाभसंभवे नाद्यात् (ब्रह्मचारी) VīraMi. 94.4 (on 1.32); 238.20 (on 1.160); विकर्मस्थाः आश्रमस्था एव अनापदि आश्रमधर्मानुष्ठानत्यागिनः VīraMi. (Āhnika.) 453.9; 73.10; (मनुरपि माता पिता वा दद्यातां यमद्भिः पुत्रमापदि। इति आपदि दुर्भिक्षादौ। अनापदि दाने दातुर्दोषः VīraMi. (Saṁskāra.) 224.22; अनापदि विना मार्गमनिशायामनातुरः। मृत्तिकाशौचहीनस्तु नरो भवति किल्बिषी RasGaṅ. 520.5; अनापदि तु कृतान्येतान्यनिष्टापादकानि NityoNi. 63.17; अनापदि शास्त्रीयः समाचारः GoviBh. 275.15 (on iii. 4.31); अनापदि तु स्वजातीयेष्वतिप्रशस्तेष्वेव तदाचरेत् BālamBha. i. 160.6 (on 1.29); स्त्रीणाम् … स्वधनव्ययेऽपि भर्त्रायनुमतिरपेक्षिता सति संभवेऽनापदि BālamBha. ii. 255.13 (on 2.144); कोशवर्धनम्। अनापदि न कुर्वीत तीर्थदेवकरग्रहात् ŚukraNī. 4(2). 9; *adj.* free from danger कान्तारेऽत्र कृतान्तोऽपि इवापदानामनापदम् (v.l. °पदान् Bhavanagar Ed. 1936)। त्वत्पुत्रभीतो नैतेषां प्रभवत्यपमृत्यवे PāṇḍaC. 1.139.

अनापदत् (an-āpadat) *adj.* not bringing about यानि पुनरिहाशुचित्वमनापदद्भिरेव निमित्तैः प्रयुक्तान्याचमनानि तेषु प्राचीनावीतशङ्कैव नास्ति CaturCin. iii(1). 1118.13.

अनापदिष्ठ (an-āpadiṣṭha) *adj.* not being in trouble विक्रोशमानां यो भक्तां दासीं विक्रेतुमिच्छति। अनापदिष्ठः शक्तः सन् प्राप्नुयाद् द्विशतं दमम् KātySm. 729.

अनापदुपलक्षण (anāpad-upalakṣaṇa) *n.* indication of absence of misfortune (अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्) अनातुर इत्यनापदुपलक्षणम् ManvaVi. 234.13 (on 2.187)

अनापद्गत (an-āpadgata) *adj.* not being in difficulty 'तृणं वा यदि वा काष्ठम् …। अनापद्गतं तु गृह्णानो हस्तच्छेदनमर्हति' इति, तदनापद्गतशूद्रादिविषयम् Aparā. 774.3 (on 2.166)

अनापद्दशा (anāpad-daśā) *f.* the state of non-adversity सर्वेषां चापदनापद्दशास्वपि प्रतिग्रहेषु यमोपदिष्टं मन्त्रविशेषं भगवान् शौनकः स्मरति PāñcRā-Ra. 135.6.

अनापद्य (an-āpadya) *ger.* not having attained न हीमे पूर्वोत्तरे आम्नाते एकवाक्यतामनापद्य कंचिदर्थं प्रतिपादयतः BrahmSūBh.(Śaṅ.) 232.18 (on i. 4.3); कस्यचिदासन्नभव्यस्य … झटिति … केनचित्कारणमात्रेण विचारकान्तारेषु मनोविहारास्पदं खेदमनापद्य यदा जीवादिषु पदार्थेषु वा याथात्म्यसमवधानं श्रद्धानं भवति तदा प्रयोक्तुः सुकरक्रियत्वाल्लयन्ते शालयः YaśasCam. ii. 322.13.

अनापद्यमान (an-āpadyamāna) *adj.* 1 not occurring एकस्यैस्थानेष्वनापद्यमानानि तृचेषु कुर्यात् गायत्रं त्रिणिधनं मध्यन्दिने मध्ये निधनमैडमार्भवे LāṭyāŚS. vi. 4.5 = DrāhyŚS. xvi. 4.5; ii not attaining रसरूपतामनापद्यमानाश्च स्थायिनो भावा भावशब्दवाच्याः SāhiDa. 198.3.

अनापद्विषय (anāpad-viṣaya) *adj.* referring to (the time of) non-distress मनुः– भैक्षेण वर्तयेन्नित्यं नैकान्नादी भवेद्व्रती। एतदनापद्विषयम् SmṛtiCan. i. 111.2; मनुः– अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः। प्रब्रूयाद्ब्राह्मणस्तेषां नेतराविति निश्चयः। एतदनापद्विषयम्। आपदि क्षत्रियादेरप्यध्ययनविधानात् SmṛtiCan. i. 143.15; iv. 446.4; प्रागोपासकस्य सर्वान्नानुज्ञानमापद्विषयं भवति। अनापद्विषयमिव तच्छ्रवणं तु तत्तद्विद्यास्तुत्यर्थं, न तु शमादिवत् प्राणविद्याङ्गतया विधीयते इति फलितार्थः VedāntKau. 370.16 (on iii. 4.31); तद्विजव्यतिरिक्तविषयमनापद्विषयं गवादिव्यतिरिक्तविषय वेति DaṇḍaVi. 42.11.

अनापद्विषयत्व (anāpadviṣaya-tva) *n.* the state of having reference to (the time of) non-distress or absence of trouble (i.e. normal circumstances) राजक्रयाग्नीषोमीयावध्योश्चापदनापद्विषयत्वाद् विरोधपरिहारः कार्यः MīmāKau. i. 14.9 (on i. 3.3); माधवीये देवलस्तु — आ त्रिपक्षाद् त्रिरात्रम् … इत्याह। तत्रापदनापद्विषयत्वेन व्यवस्था NirṇaSi. 378.10.

अनापद्विहित (anāpad-vihita) *adj.* enjoined in (the time of) the absence of trouble एवं चैतेषां धर्मत्ववचनादेतदभावेऽन्येष्वनापद्विहितेषु वृत्तिकर्मसु प्रवर्तितव्यम् ManvaMu. 447.12 (on 10.115)

अनापद्वृत्ति (anāpad-vṛtti) *f.* livelihood at the time of non-adversity अनापद्वृत्तीरुक्त्वापद्वृत्तीः प्रस्तौति अजीवन्निति ManvaVi. 1319.17 (on 10.81)

अनापन्न (an-āpanna) *adj.* [*f.* -ā] 1 not reached, not covered अथैतेषु दशसु विचारयन्ति। कानीमान्यहानि स्युरिति। ज्योतिष्टोम इत्येके। एषोऽधिकृतः पुरस्ताद् भवति। अनापन्नान्येतानि पृष्ठ्यानि NidāSū. 183.17 (10.8); 2 not guilty of a sin तत्र कोशाम्बकानां वैशालकानां च भिक्षूणामुत्पन्नः कलहो भण्डनं विग्रहो विवादो बहुत आपन्न इति वा अनापन्न इति वा GiMs. iii(2). 176.6; iii(2). 192.12; iii(2). 194.2 [cf. आपन्न, DBHS.]; 3 which has not attained or acquired (a state or condition) विषयत्वमनापन्नैः शब्दैर्नार्थः प्रतीयते VākyaP. 1.56; VyaktiVi. 101.24; न तु यदो नास्तीत्येवं 'केवलो' धर्मिणः कस्यचिद्गुणभावमनापन्नः HetuBiṬ. 184.25; यः स्रष्टा स भावान्तरमनापन्न एव कार्यं सृष्ट्वा पश्चात्प्राविशदिति हि श्रूयते BṛĀraUBh. 98.11 (on i. 4.7); अश्रुतः श्रोत्रगोचरत्वमनापन्नः BṛĀraUBh. 437.18 (on iii. 7.23); न च विषयभावमनापन्नमशक्यप्रतिपादनं च प्रयोजनं भवति PañcPā. 67.20 (on

i. 1.1); (यत्किंचित्स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम्) अगर्हितं शुक्ततामनापन्नम् ManuBh. i. 429.24 (*on* 5.24); तस्य (हिरण्यगर्भस्य) मनसि वेदोऽवस्थान्तरमनापन्नः सुप्तप्रतिबुद्धस्येव प्रादुर्भवति BrahmSūBh.(Bhā.) 61.29 (*on* i. 3. 28); ManvaMu. 11.12 (*on* 1. 21); शब्दसामर्थ्यगोचरत्वमनापन्नोऽप्याकार्याकाराभिधायिशब्दजनितविज्ञानविषयभावं नातिपतति TattvBi. 124.8; शब्दादिष्विन्द्रियगोचरतामापन्नेष्वनापन्नेषु च स्वात्मावलोकनतृप्तो यो न विकारमाप्नोति स एव शान्तिमाप्नोति GītāBh.(Rā.) 153.2 (*on* 2. 70); गोधूमयवगोरसविक्रियाः … भोज्याः, यदि विकारान्तरमनापन्नाः Mitā. 56.26 (*on* 1. 169); 67.11 (*on* 1. 192)

अनापन्नधर्मान्तर (anāpanna-dharmāntara) *adj.* who has not acquired a different property or nature नैवं यस्मादनापन्नधर्मान्तर इहोच्यते। कार्ये प्रविष्टः स्रष्टैव पुमान् वेश्मेव तत्कृतम् BṛĀraUBhVā. i. 4.534.

अनापन्नयौगपद्यत्व (anāpannayaugapadya-tva) *n.* the state of being that which has not acquired simultaneity न स्वरूपभेद एवानुपेयते। नाप्यपरसमवधाननिबन्धनः, नियतक्रमवृत्तितयानापन्नयौगपद्यत्वेन SphoṭSi. 102. 2.

अनापन्नविकार (anāpanna-vikāra) *adj.* which has not acquired change अनापन्नविकारः सन्नयस्कान्तवदेव यः। बुद्ध्यादींश्चालयत्येव सोऽहमित्यवधारय VākyaVṛ. 19.

अनापन्नसत्त्वभाव (anāpanna-sattvabhāva) *adj.* which has not (yet) acquired the nature of (solid) substance अस्ति क्रिया किंतु कर्त्रादिभ्यः पृथगाख्यातुमशक्यम्, अनापन्नसत्त्वभावात्, अनिर्लुठितगर्भवत्। यथा गर्भोऽनापन्नसत्त्वभावः कललावस्थायामाशयतः पृथगाख्यातुं न शक्यते, तथा क्रियापि साधनेभ्यस्साध्यावस्थायाम् ŚṛṅgāPra. 266. 21.

अनापन्नस्वत्वरूप (anāpanna-svatvarūpa) *adj.* which has not acquired the nature of being one's own property अत एव धारेश्वरेणैवमेवोक्तम् — 'दायशब्देन पितृद्वारा मातृद्वारागतं च द्रव्यमेवोच्यते' इति।… एवशब्दस्त्वनापन्नस्वत्वरूपमिति ज्ञापनार्थः SmṛtiCan. iv. 597. 17.

अनापन्नादिमध्यान्त (anāpannādimadhyānta) *adj.* which has not got a beginning (i. e. creation), middle (i.e. existence) and an end (i.e. dissolution) प्राप्य सर्वज्ञतां कृत्स्नां ब्राह्मण्यं पदमद्वयम्। अनापन्नादिमध्यान्तं किमतः परमीहते GauḍKā. 4. 85 (Śaṅ. आदिमध्यान्ता उत्पत्तिस्थितिलया अनापन्ना अप्राप्ता यस्य); यावत्किंचिज्जगत्यस्मिन्भेदकं वस्तु लक्ष्यते। अनापन्नादिमध्यान्तं सदेव तदितीष्यते BṛĀraUBhVā. (Sambandha.) 936; अनापन्नादिमध्यान्तं ब्राह्मण्यं लभते तदा BṛĀraUBhVā. iv. 4. 1295; उत्कृष्यमाणो यत्रायं परां निष्ठां प्रपद्यते। अनापन्नादिमध्यान्तं तद्ब्रह्मेत्यवधारयेत् TaiUBhāVā. 139.2(2)

अनापराधिन् (anāparādhin) *adj.* not an offender, who has committed no offence मघवान्।… अनापराधिनं यस्मात्पुत्रं हिंसितवान्मम MahāBhā. v. 9.41; cf. [3]अन (Gr.)

अनापलिङ्गकूस्क (a-nā--pa-liṅ-ga-kū-ska) *n.* (pl.) (Purāṇas) Agni, Nārada, Padma, Liṅga, Garuḍa, Kūrma and Skanda संप्रवक्ष्यामि पुराणानि …। मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्। अनापलिङ्गकूस्कानि पुराणानि पृथक्पृथक् DevīBhāP. i. 3. 2.

अनापस्तम्ब (an-āpastamba) *m.* (pl.) other than the followers of the Āpastamba school तस्मादसोमयाजिब्राह्मणनिमित्तकम् अग्नीषोमीयहविरुत्कर्षः -- प्रागग्निष्टोमादग्नीषोमीयानुष्ठानस्य बारकः। स च सर्वशाखाप्रत्ययन्यायेनानापस्तम्बेस्वप्य(? °म्बेष्व)पि प्रवर्तते BālamBha. i. 248. 23 (*on* 1. 89)

अनापाक (an-āpāka) (Gr.) not after *āpāka* (when it is used in Loc. sg.) परमेभ्योऽनापाके CaturA.(Śau.) 2.94.

अनापाकर (anāpākara) *m.* [w.r. for अपामाकर] NānārthāSaṁ. iii. 57.356.

अनापातार्थ (anāpātārtha) *adj.* meant for the sake of non-application स्वाश्रमाविरोधिशब्दः स्त्रीसंसर्गादिनिमित्तप्रायश्चित्तादेर्गृहस्थादिष्वनापातार्थः ŚrutaPra. ii. 559.27 (*on* iii. 4.42)

अनापादकत्व (anāpādaka-tva) *n.* the state of being that which does not lead to (the desired result) अनेकत्र नियतयोरेकत्र प्रसञ्जनमिति चेद् न। प्रसञ्जकस्य तद्द्वयस्यैकत्र स्थितिनियतताप्रमितावविरोधस्यानेवंभावे चानापादकत्वस्यापत्तेः KhaṇḍanKhā. 979. 16; सव्यभिचारोऽपि त्रिविधः साधारणासाधारणानुपसंहारिभेदात् तत्र सव्यभिचारः साध्यतदभावप्रसञ्जक इति न त्रितयसाधारणं लक्षणम् एकस्योभयं प्रत्यसाधकत्वात् अनापादकत्वाच्च TattvCin. ii(1).788.1.

अनापादन (an-āpādana) *n.* the act of not leading to (the desired result) भावनिवृत्त्यनिवृत्त्योरेव तयोः प्रयोजकत्वे च भावविलक्षणाविवादौ ताभ्यां तयोरनापादनात् AdvaiSi. 545. 12.

अनापादयत् (an-āpādayat) *adj.* which does not lead to (the desired result) वृत्त्यादिविकल्पाश्चाप्रामाण्यमनापादयन्तोऽपि तद्वत् प्रामाण्यं विघ्नन्ति Kāśi. ii. 23. 19 (*on* 5(1). 26): दण्डान्तरनिरपेक्षं स्वस्मिन् दण्डित्वमनापादयति दण्डे व्यभिचारश्च परिहृतः स्यात् ŚrutaPra. iA. 105. 3 (*on* i. 1.1)

अनापादितपुटाकृति (anāpādita-puṭākṛti) *adj.* (leaf) in which the form of a cup is not brought about पर्णनिषेधोऽत्र पात्रान्तरसद्भावविषयः। अनापादितपुटाकृतिविषयो वानुसंधेयः CaturCin. iii(1). 626.4.

अनापाद्य (an-āpādya) *ger.* 1 not having let (the cows) in इ यथा व्रजे गा अनपाद्य (? अनापाद्य) अर्गलेनापिहन्यात् तादृक् तत् JaimiBr. 1. 141; 2 not having brought about, not having effected अपि च विधिः साध्यसाधनभावमनापाद्य…न पर्यवस्यति TātpaṬ.(U.) 100.18 (*on* 2. 213); 107. 9 (*on* 2. 229); 189. 23 (*on* 5(1). 15); उन्नमनव्यापारः स्वविषयस्य तुलाद्रव्यस्योर्ध्वदेशसंबन्धं न साधयितुमलं तत्कालमेव तस्योर्ध्वदेशसंबन्धमनापाद्य Pañc-Pā. 38. 17 (*on* i. 1. 0); अत्यर्थं हयविनोदोऽङ्गभङ्गमनापाद्य न तिष्ठति NītiVā. 32.49; इह वस्तुत्वाम्युगममनापाद्यैव वार्त्तिककृता दोषबाहुल्यादतिप्रसङ्गोऽभिहितः Kāśi. i. 277.15 (*on* 4.196); परस्वत्वोत्पादनं दानशब्दार्थः -- परस्वत्वापादनं च न प्रतिग्रहमनापाद्य सिध्यति CaturCin. iii(1). 160.10.

अनापाद्य (an-āpādya) *adj.* which cannot be determined, cf. **अनापाद्यनिमित्तक**.

अनापाद्यनिमित्तक (anāpādyanimitta-ka) *adj.* the cause of which cannot be determined शाकादिष्वेवाशौचप्रतिषेधश्चानापाद्यनिमित्ताशौचविषयः BālamBha. iii. 58.23 (*on* 3. 17)

अनापान (anāpāna) *m.* name of a prince, son of Aṅga [PW., pw., MW.]

अनापायम् (anāpāyam) *adv.* without trouble or calamity श्रीमतो राज्यपालस्य …। निष्कण्टकमनापायं परिपालयतो भुवम्। सूनुः EI. xxii. 155.7; cf. **अनपायम्**.

अनापि (án-āpi) *adj.* having no friends, friendless अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ṚV. viii. 21. 13 = AV. xx. 114.1; SV. I. v(1). 2. 1 = II. vi(2).4.1; युवं वामहे … मह्यं शिक्षतम्। अनापिरज्ञा असजात्यामतिः ṚV. x. 39. 6.

अनापिवस् (an-āpivas) *adj.* who has not obtained अन्नु …। स विमृश्य वये(? °ने)ष्वनापिवानटनीखातसमुच्छ्रितं पयो RāghPāṇ.(Dha.) 4. 40 (comm. अलब्धवान्)

अनापिष्ट (an-āpiṣṭa) *adj.* not pressed or rubbed against यदि हि प्राणशरीरसंघातमात्रो भोक्ता स्यात् संघातमात्राविशेषात् सदा आपिष्टस्य अनापिष्टस्य च प्रतिबोधे विशेषो न स्यात् BṛĀraUBh. 234.5 (*on* ii. 1.15)

अनापीडत्व (anāpīḍa-tva) *n.* 1 the state of being without a crest-ornament धनदेन गदा तस्य महती मूर्ध्नि पातिता। अभित्त्वा पौष्पमापीडमनापीडत्वमादधे Yādavā. 16. 39; 2 painlessness, Yādavā. 16. 39.

अनापूयिता (án-āpūyitā) *adj.* (*f.*) which has not become putrid ता हैता अनापूयिता आपः ŚatBr. I. i. 3.5; ŚatBr.(K.) II. i. 3.2.

अनापूर्य (an-āpūrya) *ger.* not having paid in full अरे कुरुपते: स्वर्णमनापूर्येति किं त्वया। आरब्धमित्यूचानेऽस्मिन् राड् ह्रियाधोमुखोऽभवत् PārśvC. 3. 959.

अनापृच्छा (an-āpṛcchā) *f.* absence of taking leave हस्तप्रहस्तनामानौ लङ्कातो निर्गतौ नृपौ। अनापृच्छापि तत्काले स्वामिनो राजते तयोः। दोषोऽपि हि गुणीभावं प्रस्तावे प्रतिपद्यते PadmP.(Ra.) 57.44.

अनापृच्छ्य (an-āpṛcchya) *ger.* 1 not having taken leave or bidden farewell अनापृच्छ्य च राजानं गते मयि न संशयः। अजातशत्रोर्नृपतेर्मम चैवाप्रियं भवेत् MahāBhā. i. 205. 16; जटायुर्मामनापृच्छ्य निपपात मही ततः Rāmā. iv. 60. 13; परलोकम् … अनापृच्छ्य गतासि मामितः RaghuVa. 8.49; अनापृच्छ्य न गन्तव्यं भवेत्प्रियहिते रतः KūrmaP. 536. 8 (2. 14) = PadmP. i. 53. 10; अनापृच्छ्य भूपालं मन्त्री नीतिविदस्ततः।… प्रतस्थे MalliC. 7. 635; 7. 926; एवमनापृच्छ्यैव गच्छामि RasSa. 179(3); 2 not having asked permission तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम्। अनापृच्छ्य तु गृह्णानो हस्तच्छेदनमर्हति BṛhaspaSm. 182. 25; एकाक्यस्मानना पृच्छ्य भवदेवः कश्चिद्व्रजेत् PariPar. 1. 344; तातपादांस्त्वनापृच्छ्य न किंचित् कर्तुमीश्महे TriṣaŚaPuC. i. 4.826; ii. 1. 190; एकोऽम्बामन्यनापृच्छ्य …। आगमं प्रभुपादान्ते PrabhāC. 80. 20; 85.13; 88. 21; राजकुमारः … पितरावनापृच्छ्य यदृच्छया गच्छन् … पुरे प्राप्तः PrabaCin. 112.2; अस्मद्राज्यस्य … वत्स त्वमसि जीवितम्। चिरंजीविन् अनापृच्छ्य कथं निस्सरितो गृहात् UttaKuC. 478; अस्माभिन मातापितरावनापृच्छ्यात्र समागतः PrabaK. 26. 24; 30.13; मामनापृच्छ्य त्वया दीक्षा न ग्रहीतव्या KathāK. 128. 23; अतः खलु मामनापृच्छ्यैव कृतं साहसं पुत्रवत्सलेन AdbhuDa. 2.11(4)

अनापृच्छ्यचारिन् (anāpṛcchya-cārin) *adj.* who moves about

without seeking permission तथा स एव गणम् अनापृच्छ्य चरति क्षेत्रान्तरसंक्रमादि करोतीत्येवंशीलोऽनापृच्छ्यचारी SthānṬ. 302A. 2.

अनापृष्ट (an-āpṛṣṭa) *adj.* what is not asked or enquired about अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम। अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः BhāgP. iii. 7. 36; प्रपन्नाय च भक्ताय ···। अनापृष्टं च गोप्यं च ब्रूयुः सानुग्रहाः प्रभो BṛDharmaP. i. 3. 3; मया ज्ञानमनापृष्टं यद्यदस्ति सुरोत्तम। तन्मे कथय PañcaRā.(Nā.) i. 9. 13; i. 15. 24.

अनापृष्टकथ (anāpṛṣṭa-katha) *adj.* who tells (or explains) even what is not asked or enquired about पुत्रः शत्रुजितस्तात नाम्ना ख्यात ऋतध्वजः।··· अनापृष्टकथो वाग्मी MārkP. 20.20.

अनापेक्षिक (an-āpekṣika) *adj.* not relative, not depending (on any other thing), absolute यदि ह्रस्वापेक्षाकृतं दीर्घं, ह्रस्वमनापेक्षिकं किमिदानीमपेक्ष्य ह्रस्वमिति गृह्यते। अथ दीर्घापेक्षाकृतं ह्रस्वं, दीर्घमनापेक्षिकम् NyāyBh. 266. 2 (*on* iv. 1. 40); NyāyVār. 484. 11 (*on* iv. 1. 40); ज्यायस्त्वं ह्यनापेक्षिकं परमात्मन्येवैकस्मिन् आम्नातम् BrahmSūBh.(Śaṅ.) 69.10 (*on* i. 1. 22); किं महिमगुणशालित्वमेव वैशेषिकोक्तमुपक्र(पग ?)म्यापेक्षिकमनापेक्षिकं च महत्त्वम् NyāyKu. 146. 4.

अनाप्त (án-āpta) *adj.* [*f.* -ā] **1A** not reached or attained यस्यानाप्तः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति ṚV. i. 100. 2; अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे AV. iv. 7. 7 = v. 6. 2; AV.(P.) vi. 11. 2; अनाप्ता या वः प्रथमा यस्यां कर्माणि कुर्वते KāṭhS. 38. 14 (iii. 116. 10); अनाप्ता चानाप्या चानाप्ता तत्पृथिव्यनाप्या तद्द्यौः इति AitBr. 24. 6(645); KauṣīBr. 27. 5 (132. 13); ĀśvaŚS. II. ii. 13. 13; तस्यैतत् त्रिवृद्रूपं मृत्योरनाप्तं शुक्लं कृष्णं पुरुषः JaimiUBr. i. 25. 7; अध्वर्यो येषां वा अनाप्तां प्रजापतेस्तन्वं विद्वान्होता भवत्यनाप्तो वै स होता भवत्यनाप्तास्ते यजमाना भवन्ति ŚāṅkhāŚS. x. 19. 2; अनाप्ता या वः प्रथमा यस्यां कर्माणि कृण्वते ĀpaŚS. xvi. 18. 7 = HirŚS. xi. 6. 29 (46. 11) = VaikhāŚS. 18. 15; तत्र 'अनाप्ता ये' इत्यनुष्टुप् BṛSarva-Anu. 3.2 (5.6); AVPari. 32. 17; 32. 18; प्राण एवैको मृत्युना अनाप्तः BrahmSūBh.(Śaṅ.) 507. 16 (*on* ii. 4. 9); 516. 12 (*on* ii. 4. 19); BṛĀraUBh. 204. 17 (*on* i. 5. 22); AṇuBh. 161. 1 (*on* ii. 4. 10); GoviBh. 174. 1 (*on* ii. 4. 10); एवमविद्यया आत्मभूतमपि ब्रह्म अनाप्तं स्यात् TaiUBh. 228. 19 (*on* 2. 1); द्रष्टुर्दृष्ट्या न चानाप्तोऽनात्मा कश्चित्प्रसिध्यति BṛĀraUBhVā. i. 4. 1383; तदनाप्तं तमोमात्रात्प्रसिद्धयैव हि तद्यतः TaiUBhāVā. 41. 13(2); विद्यया तदवाप्नोति यदनाप्तमविद्यया TaiUBhāVā. 153. 22(2); गतेर्नैवानाप्ते SiddhaHe. ii. 2.63; (सः) दध्यौ रात्रौ ··· वर्षिम्णानाप्तोऽपि त्रपीयान् कदाचित् DvyāśraKā. 20. 55; आयाते मुनिभिर्द्वारेऽनाप्ते गुरुरुदैरयत् PrabhāC. 17. 23; **1B** not completed, not perfect, deficient मनसाधारयति मनसा ह्यनाप्तमाप्यते TaiS. II. v. 11. 4; एकस्मादक्षरादनाप्तं प्रथमं पदं तस्माद् यद्वाचोऽनाप्तं तन्मनुष्या उप जीवन्ति TaiS. V. i. 9. 1; VI. i. 2. 7; VādhūŚS. iv. 31. 3; iv. 31. 4; अनाप्तश्चतूरात्रः TaiS. VII. i. 10. 3; अनाप्तां वाचमुपेयुः TaiS. VII. iv. 5. 3; सर्वान् वो वृञ्जेऽनाप्तेन छन्दसा MaiS. iv. 2. 11 (iv. 35. 4); येषा ँ संवत्सरेऽनाप्तेऽर्थ। एकादशिन्याप्यते TaiBr. I. ii. 5.1; एतद्ध वै तद्वाचोऽनाप्तं यदेतन्न्यूनमिवोपस्थ एव स्त्रीणाम् VādhūŚS. iv. 31. 5; अथापीदं यदनाप्तमेतदन्तेऽभिरूपम् NidāSū. 181.23 (10.7); तथा च श्रुतिः 'तस्माद्यद्वाचोऽनाप्तं तन्मनुष्या उपजीवन्ती'ति। अनाप्तम् अपूर्णं तिसृभिर्विरहितमित्यर्थः LalitāSaBh. 100. 5 (*on* 132); **1Ci** not obtained, not acquired, not received होतानाप्तस्यापयिता TaiS. VII. i. 5.6 = BaudhŚS. ii. 253.4; अतिरिक्तमात्मन्जायते यदनाप्त ँ वि यज्ञश्छिद्यते क्षोधुको यजमानो भवति MaiS. i. 4. 11 (i. 59. 11); अनाप्तमाप्नोत्यनवरुद्धमवरुन्द्धे MaiS. i. 5. 7 (i. 75. 7); ii. 2. 12 (ii. 25. 1); ii. 5. 2 (ii. 49. 10); KāṭhS. 10.8 (i. 134. 20); व्रतं सप्तमस्याह्नः पृष्ठं भवति तद्ध्यनाप्तमन्नं वै व्रतमन्नाद्यमेवैतेनाप्नोति PañcBr. xxii. 4. 5; एते ह ते ह वा उ प्रैषाश्च निगदाश्च यदृग्भिर्यज्ञस्यानाप्तं तदेभिः सर्वमाप्स्याम इति KauṣīBr. 28.1 (134. 9); तद्यदेवास्यात्र संभारैर्वा नक्षत्रैर्वर्तुभिर्वाधानेन वानाप्तं भवति तदेवास्यैतेन सर्वमाप्तं भवति ŚatBr. II. i. 4. 29; ŚatBr.(K.) I. i. 4. 26; एतदेवानाप्तमनवरुद्धं भवति यद्वाकोवाक्यं ब्राह्मणं तदेवैतेनाप्नुवन्ति ŚatBr. IV. vi. 9. 20; ŚatBr.(K.) V. viii. 3. 18; यदस्य किं चानाप्तम् ŚatBr. IX. v. 2. 3; IX. v. 2.9; IX. v. 2.10; X. i. 3. 10; X. i. 3.11; प्रजापतिरश्वमेधेनेष्ट्वा पुरुषमेधमपश्यत्। तस्य यदनाप्तमश्वमेधेनासीत्तत्सर्वं. पुरुषमेधेनाप्नोत् ŚāṅkhāŚS. xvi. 10. 1; यद् एवास्यास्मिन् लोकेऽनाप्तं तदेवास्य तेनाप्नोति VādhūŚS. iv. 11. 17; iv. 11.19; iv. 11. 21; अनाप्तैरिव पर्याप्तं हे पादौ पादभूषणैः TriṣaŚaPuC. ii. 6. 22; धनादनाप्ताः सारङ्गैः कतिपयपयःशीकरकणाः SaduktiKa. 273.10; 'मूलकर्मणि' वशीकारकर्मणि। 'अनाप्ते' फल इत्यर्थः VyavaNi. 511. 16; **1Cii** not fulfilled सर्वं हैवास्याप्तं भवति सर्वं जितं न हास्य कश्चन कामोऽनाप्तो भवति य एवं वेद JaimiUBr. i. 31.10; i. 10. 8; तत्क्षये पूर्ववदनवाप्तोऽ(v. l. अनाप्तो)वाप्तव्य इति कामः समुल्लसति PañcPā. 60. 6 (*on* i. 1. 1); **2A** which has not reached or gained (the other end) (आपः) ता नातिहृत्य सादयेन्नोऽअनाप्ताः सादयेत् ··· यदतिहृत्य सादयेद्युऽअनाप्ताः सादयेत् ŚatBr. I. i. 1.21; ŚatBr.(K.) II. i. 1. 14; **2B** not fit or capable, unskilful, ignorant प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति। युग्यस्थाः प्राजकेऽनाप्ते सर्वे दण्ड्याः शतं शतम् ManuSm. 8. 294; आप्तो निवारणसमर्थः। अनाप्ते तु तस्मिन्युगस्था यानस्थाः सर्वे प्रत्येकं शतं दण्ड्याः Aparā. 863. 22 (*on* 2. 298); अनाप्ते अज्ञे युग्यस्थानरथस्थाः ··· दण्ड्याः ManvaVi. 1050.17 (*on* 8. 294); **2C** (Buddh.) not belonging to the sphere of existence (प्राप्तिः) अनाप्तानां चतुर्विधा AbhidhK. 2. 37; **2D** not beneficial, not useful पुष्पमूलफलादिकम् ।··· अनाप्तं भावदूषितम्। ··· वर्जयेत PāraS. 2.118; **3** (*adj.* used as noun) **3A** untrustworthy or unreliable (person) न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनात्। नादित्यं संधिवेलयोः। अनाप्तम् ŚāṅkhāGS. iv. 11. 3; KauṣīGS. iii. 11. 35 (*but* comm. अनाप्तमिति चण्डालम्); अनाप्तैर्दत्तमादत्ते नरः शस्त्रमलोहजम् MahāBhā. i. 133.22; अनाप्तः सन्नाप्ततमस्य वाचं सुयोधनो विदुरस्यावमन्य MahāBhā. v. 26. 11; अनाप्तानां प्रग्रहात्त्वं नरेन्द्र ···। भूमिं स्फीतां दुर्बलत्वादनन्तां न शक्तस्त्वं रक्षितुं कौरवेय MahāBhā. v. 32. 29; xii. 71. 5; अनाप्तौ च वधार्हौ च कृत्वा भोजजनार्दनौ। शक्तोऽपि शाठ्याद्धार्दिक्यं नाक्रूरोऽभ्युपपद्यत HariVaṁ. 29. 13; तत्रैकस्य वचनस्य कथंचित् संवादेनावशिष्टस्य तद्वचनराशेस्तथाभावे न कश्चित् पुरुषोऽनाप्तः स्यात् PramāVāSvopVṛ. 117. 29; आप्तं मूर्खमनाप्तं च मन्त्रिणं परिवर्जयेत् NītiSā. 12. 4; बलिदानं न कारयेत्। अभ्यागतेष्वनाप्तेषु दीनानाथजनेष्वपि PāraS. 19. 36; कालेनैतावतानाप्तः कथं न प्रलयं गतः NyāyVi. 2. 419; PramāSaṁ. 3. 7; आप्ता नेदृशानि वाक्यानि प्रयुञ्जते, प्रयुञ्जाना वानाप्ताः स्युः TātpaṬ.(U.) 60. 14 (*on* 2. 62); (राजा) मन्त्रं कुर्यात्तु मन्त्रिभिः।··· न च मूर्खैर्न चानाप्तैः AgniP. 234. 10; आप्तत्वं दर्शयित्वा तु यदनाप्तेन भाषितम् ViṣṇuDhaP. iii. 5. 14; अर्थाभावेऽप्यनाप्तानां विवक्षोपलब्धेर्न विवक्षातोऽर्थसिद्धिरिति NyāyKa. 215. 4; अनाप्तो ह्यन्यथा विजानन्नन्यथा विवक्षति Kāśi. i. 145.9 (*on* 2. 160); आप्तानामृष्यार्यम्लेच्छानामुपदेशः शब्दो न त्वनाप्तानां मायामोहनिर्मितानां बुद्धर्षभादीनाम् TātpaṬ.(Vā.) 202. 2 (*on* i. 1.7); सा त्वनाप्तस्यानवगताप्तभावस्य च वाक्यादुदीयते NyāyRa. 913. 18 (*on* 7. 246); ततश्च यो नामानाप्त एवाप्तबुद्ध्या गृहीतः ŚāstrDī. 24. 20 (*on* i. 1.2); अनाप्तेन तु विवक्षायां प्रयुज्यत एव NyāyKuA. ii(2). 85. 5; न ह्यनाप्तेनाप्येवंप्रायाणि प्रयुज्यन्ते NyāyKuA. ii(2). 85. 9; वितर्कयन्ती स्वजनममित्रमनाप्तमाप्तवर्गम्। वितरति मतिविप्लवं नृपाणामियमुपसर्पणमात्रकेण लक्ष्मीः VikraDeC. 6.36; ग्राहितोऽसि व्रतं भ्रात्रा छद्मनापि हितैषिणा। तमप्यनाप्तं मा मंस्था मयि पापरतौ रतः PariPar. 1. 372; पितृभिर्भ्रातृभिर्भ्रातृपुत्रैरन्यैश्च बन्धुभिः। अनाप्तैरिव पर्याप्तं भवभ्रमणहेतुभिः TriṣaŚaPuC. i. 3. 646; अनाप्तायेव तस्मै सोऽकुप्यद् भक्तिचिकीर्नृपे TriṣaŚaPuC. i. 5.186; न ह्यनाप्तः कदाचित् प्रमावान्न भवति NyāySu.(Ja.) 84A.3 (*on* i. 1. 1); 6A. 13 (*on* i. 1. 1); भेषजादिप्रयोगे अनाप्तैरहितैषिभिः क्रियमाणे DaṇḍaVi. 309. 22; सांख्यस्मृतिः स्वकपोलकल्पितानाप्तेति न तद्व्यर्थतादोषाद् वि(? वि)भीमः GoviBh. 86.3 (*on* ii. 1.1); **3B** (person) not related, not a relative अभिचारेषु सर्वेषु कर्तव्यो द्विशतो दमः। मूलकर्मणि चानाप्तेः(? प्तैः) कृत्यासु विविधासु च ManuSm. 9. 290; आप्ताः पौत्रभार्यादयस्ततोऽन्येऽनाप्ताः ManuBh. ii. 318. 8 (*on* 9.290); अनाप्ते असंबन्धिनि विषये ···। भर्त्रादौ तु संबन्धिनि वशीकरणे कृते न दोषः। अनाप्तैरिति पाठेऽसंबन्धिभिरित्यर्थः ManvaVi. 1256. 27 (*on* 9. 290); **3C** not an acquainted person (i. e. a stranger), cf. **अनाप्तोपज्ञ**; *m.* name of a category of devotees of Viṣṇu एकान्तिनस्तथाप्तैश्च(नाप्तः ?)युक्तानाग्नेयदिग्गतान्। निवेश्य विप्र नैरृत्यां भक्तान्वैखानसैः(सान् ?) सह JayāS. 20. 266; PāraS. 12. 312; आ कोटेर्दानहासस्तु अनाप्तानामतः शृणु। अनाप्ते लक्षगुणितं ब्राह्मणे परिकीर्तितम् JayāS. 21. 82; (श्रोतुमिच्छामि भगवन् वैष्णवानां च लक्षणम्) वर्णधर्ममनुज्झित्य ह्याप्तादिष्टेन कर्मणा। यजन्ति श्रद्धया देवमनाप्तास्ते प्रकीर्तिताः JayāS. 22. 35.

अनाप्तकर्तृकत्व (anāptakartṛka-tva) *n.* the state of being composed by an untrustworthy person तत्र ह्याप्तप्रणीतत्वं शिष्टस्वीक(? का)रनिश्चितम्। अनाप्तकर्तृकत्वं च न श्रुतेः श्रूयते क्वचित् ĪśānŚiPa. ii. 1. 49(42); सांख्यादीनामनाप्तकर्तृकत्वमभिधाय NyāySu.(Ja.) 425B. 7 (*on* ii. 2.12)

अनाप्तकर्तृकत्वशङ्का (anāptakartṛkatva-śaṅkā) *f.* doubt of being composed by an untrustworthy person अनाप्तकर्तृकत्वशङ्कायां कथं दोषाभावनिश्चयः NyāyPari. 384. 10; महाजनपरिग्रहादेवानाप्तकर्तृकत्वशङ्कोन्मूलनात् NyāyPari. 384.11.

अनाप्तकाम (an-āptakāma) *adj.* whose desires are not fulfilled आप्तकामाः स्विद् देवाः स्तूयन्ता ३ अनाप्तकामा इति NidāSū. 26. 16 (2.3); अथापीहैवं पश्याम आप्तकामतराणामेवानाप्तकामैरिप्साम् NidāSū. 26.23 (2. 3); कुतोऽनाप्तकामान् प्रतिव्यभविष्यदिति NidāSū. 27. 4 (2. 3); अप्राप्तप्राप्तौ हि

संभ्रमः स्यादनाप्तकामस्य ChāndoUBh. 176.16 (*on* iii. 14. 2); (ब्रह्म) कामयितृत्वादस्मदादिवदनाप्तकाममिति चेत्, न, स्वातन्त्र्यात् TaiUBh. 257. 2 (*on* 2.6); यस्य हि अन्यत्वेन प्रविभक्तः कामः, तत् अनाप्तकामं भवति, यथा जागरितावस्थायां देवदत्तादिरूपम् BṛĀraUBh. 571. 9 (*on* iv. 3. 21); आप्तकामः परमेश्वरः, अल्पैश्वर्योऽनाप्तकामो जीवः ŚvetāUBh. 103. 3 (*on* 1. 9); अनाप्तकाममस्योक्तमात्माविद्यैकहेतुकम् रूपम् BṛĀraUBhVā. iv. 3. 1296; अनाप्तकामं तत्सर्वमपेक्ष्येदमिहोच्यते BṛĀraUBhVā. iv. 3. 1335; मुनिर्हिमाचलशिखरे तपस्यन्ननाप्तकाम एव हिमाचलेन स्वहिममहिमगलज्जलप्रायशरीरः कृतः Manmatho. 2. 17 (433. 15)

अनाप्तकामत्व (anāptakāma-tva) *n.* the state of being one whose desires are not fulfilled कार्यत्वं हि स्वभावदृष्टविग्रहवत्त्वानाप्तकामत्वानीश्वरत्वासार्वज्ञ्यादिव्याप्तिविरयुपयुक्ततरानेकविशेषानुपक्तम् ĀgaPrā. 16. 18.

अनाप्तकामिनीसंभोग (anāpta-kāminīsambhoga) *adj.* who has not had sexual intercourse with a woman आगतश्च गृहम् -- अनाप्तकामिनीसंभोगस्य रतिसुखमनार्जितयशसो यशश्चेत्यादिभिश्चतुर्वर्गफलो निवन्ध इति -- निर्वृतिमवाप UdaySuKa. 157. 14.

अनाप्तगिर् (anāpta-gir) *f.* speech of an untrustworthy (person) जन्म तुल्यं हि बुद्धीनामाप्तानाप्तगिरां श्रुतौ ŚlokaVār. 7. 246 (914.1); NyāyRaMā. 92. 23; एतावानेव भेदः स्यादाप्तानाप्तगिरां मम। यत्रानाप्तोक्तिजातायाः प्रामाण्यं स्थाप्यते धियः NyāyRaMā. 93.4.

अनाप्तगोत्रस्खलना (anāpta-gotraskhalanā) *adj.* (*f.*) I in which falling of the mountains has not taken place तामाविशत् ··· गणाधिपः। ··· अनाप्तगोत्रस्खलनामविपक्षामिव स्त्रियम् HarVi. 32. 18 (comm. गोत्राः पर्वताः); II who has not experienced (the husband's) calling by wrong names, HarVi. 32.18 (comm. गोत्रं च नाम)

अनाप्तचर्या (anāpta-caryā) *f.* untrustworthy (i. e. heretical) practices अनाप्तचर्यागमदुर्विदग्धमधःपतन्तं नरलोकमेनम्। ··· पोतं प्रसन्नानिलवद्भियत VarāṅgaC. 22. 49.

अनाप्तचोदना (anāpta-codanā) *f.* injunction of an untrustworthy person सर्वशब्दः सर्वनामत्वात् प्रकृतवैदिककृत्स्नचोदनाप्रतिज्ञापादनार्थः। तेनानाप्तचोदनापेक्षया नाभ्युपगमविरोधः TātpaṬ.(U.) 40. 25 (*on* 2. 28)

अनाप्तजाड्यादि (anāpta-jāḍyādi) *adj.* dullness or stupidity etc. of an untrustworthy person अनाप्तजाड्यादिविनिर्मितित्वसंभावनासंभविविप्रलम्भाः। परोपदेशाः परमाप्तकृप्तपथोपदेशे किमु संरभन्ते MahāVISt.(H.) 2.15.

अनाप्तज्ञान (anāpta-jñāna) *n.* knowledge coming from an untrustworthy person वाक्यश्रवणानन्तरमेव ह्याप्तानाप्तज्ञानानपेक्षैरेव पदार्थैर्वाक्यार्थोऽवगम्यते ŚāstrDī. 73. 9 (*on* i. 1.5)

अनाप्तता (anāpta-tā) *f.* the state of being untrustworthy, untrustworthiness असर्वज्ञतानाप्ततयोः साध्यधर्मयोः संदिग्धो व्यतिरेकः NyāyBi. 3.130.

अनाप्तत्व (anāpta-tva) *n.* the state of being untrustworthy, untrustworthiness आप्ते तु कल्प्यमानेऽर्धजरतीयं स्यात्, अर्धे तस्याप्तत्वमर्धे च कथमनाप्तत्वमिति तदिदमनुपपन्नम् NyāyMañ. i. 227.12; भगवच्छब्देन शंकरादिवत् अनाप्तत्वं नास्तीत्यभिप्रेतम् ŚrutaPra. iA. 9. 15 (*on* i. 1.1); बुद्धस्यानाप्तत्वेन प्रत्युक्ते अस्तु तर्हि सत्त्वानुमानादित्यादि NyāyPari. 177.9; न चात्र शब्दः प्रमाणं, वादिनोरनाप्तत्वात् TattvCin. ii(2).7. 1; न वा भगवतो दुःखमपकर्मोपदेशकत्वेनानाप्तत्वम् TattvCin. ii(2). 170. 19; तथा च वक्तुर्दर्शनाभावादनाप्तत्वम् AṇuBh. 62. 17 (*on* i. 2. 17); तेषामसांप्रदायिकश्रुतिपाठकल्पनेनानाप्तत्वं तावद् सिध्यति ŚivārkaMaDī. i. 481. 26 (*on* i. 3.35); तदेवं सांख्यादिस्मृत्योर्वेदविरुद्धत्वेनानाप्तत्वे निर्णीते वेदेऽपि तद्विरोधिनः केचित् सांख्यादयः संशयीरन् GoviBh. 89. 1 (*on* ii. 1. 4)

अनाप्तत्वप्रसङ्ग (anāptatva-prasaṅga) *m.* undesired contingency of untrustworthiness अज्ञातसंदिग्धानुवादादिवाक्यप्रयोक्तुरनाप्तत्वप्रसङ्गात् TattvPradī.(Ci.) 272. 7; NyāySu.(Ja.) 6A.10 (*on* i. 1. 1); अनिवृत्ताविषश्चेद् भ्रान्तत्वादेव पूर्ववदनाप्तत्वप्रसङ्गः ŚatDū. 143.13; विपक्षे शिवस्यानाप्तत्वप्रसङ्गो बाधकः NyāySu.(Ja.) 108A. 8 (*on* i. 1. 3); ईश्वरमनङ्गीकुर्वन्तं सांख्यं प्रति ··· तस्मिन्ननुमानं प्रमाणमुपन्यस्यतः सूत्रकारस्यानाप्तत्वप्रसङ्गात् ŚivārkaMaDī. i. 171. 23 (*on* i. 1. 4)

अनाप्तत्वशङ्का (anāptatva-śaṅkā) *f.* doubt about untrustworthiness तदेतत्सर्वमुभयानुमतसाक्षिविषयम् । बहुत्ववदुभयसंमतत्वस्याप्यनाप्तत्वशङ्काव्युदासकत्वात् SmṛtiCan. iii. 175.17.

अनाप्तत्वादि (anāptatvādi) *adj.* untrustworthiness etc. अबाधादिति। कलहादिस्थलेऽनाप्तत्वादिना वाक्यार्थज्ञानस्य भ्रमत्वेऽपि श्रौतज्ञानस्योक्तरीत्या भ्रमत्वज्ञानरूपबाधासंभवात् GuruCandr. ii. 248.13.

अनाप्तत्वापत्ति (anāptatvāpatti) *f.* undesired contingency of untrustworthiness यावत्प्रमाणदृष्टं तावत एव वक्तेति चेन्न। अज्ञातसंदिग्धानुवादवाक्यप्रयोक्तुरनाप्तत्वप्रसङ्गात् । मीमांसकस्यापि कदाचिच्चाटुवादित्वसंभवेनानाप्तत्वापत्तेश्च NyāySu.(Ja.) 6A.10 (*on* i. 1. 1); (गायत्र्याः) मात्रादेरपि वत्सलतरायास्तस्या एवंभूतमिथ्यात्वोपदेशे सर्ववञ्चकतयानाप्तत्वापत्तेः VedāntRaMañ. 1. 1 (9. 8)

अनाप्तत्वाभाव (anāptatvābhāva) *m.* absence of untrustworthiness यदा तु पुनरनाप्तत्वाभावेऽमीषामप्रयोगः, तत् किं शब्दाभावादयथार्थज्ञानानुत्पत्तिः, आहोस्वित् दोषाभावादिति संदिग्धो व्यतिरेकः TātpaṬ.(U.) 60.17 (*on* 2. 61)

अनाप्तत्वायोग (anāptatvāyoga) *m.* non-possibility of untrustworthiness न चाप्तत्वमीदृग्वाक्यप्रयोक्तृत्वेन विरुध्यते, तथाविधशब्दोच्चारणे सत्यप्याशयदोषाभावादनाप्तत्वायोगात् TātpaṬ.(U.) 60.21 (*on* 2.61)

अनाप्तत्वाशङ्का (anāptatvāśaṅkā) *f.* doubt about untrustworthiness आप्तवाक्यस्य तु पौरुषेयत्वे सति अनाप्तत्वाशङ्कापाकरणायाप्तप्रणीतत्वमपेक्ष्यते, न प्रामाण्ये PrakaVi. 49. 22.

अनाप्तदक्षिण (anāpta-dakṣiṇa) *adj.* (sacrifice) in which the sacrificial fee is not obtained नानाप्तदक्षिणैर्यज्ञैर्यजन्ते विषये मम MahāBhā. xii. 78.10; पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः। अनाप्तदक्षिणैर्यज्ञैर्न यजेत कथंचन MahāBhā. xii. 159.22.

अनाप्तदेशवन्मृद्वत् (anāptadeśavanmṛd-vat) *adv.* like the clay which has places not reached (by it) कपालाद्यात्मना कुम्भं मृद्वद्व्याविशज्जगत् (ब्रह्म) ।-- अनाप्तदेशवन्मृद्वत्प्रवेशो व्यापिनः कथम् TaiUBhāVā. 118.7(2)

अनाप्तनरोक्ति (anāptanarokti) *f.* statement of an untrustworthy person स्वप्रत्ययान्तरापेक्षा स्यादनाप्तनरोक्तिषु। आप्तोक्तिषु नरापेक्षा नोभयं चोदनासु नः ŚlokaVār. 5(1). 16 (2.2.3)

अनाप्तनिद्र (anāpta-nidra) *adj.* who did not get sleep पत्रावलीचित्रकपोलपालिं प्रातः सपत्नीमवलोक्य काचित्। तुतोष लाक्षाक्तमनाप्तनिद्रं पुनः प्रियं वीक्ष्य विषादमाप BhāvŚ. 18; अनाप्तनिद्रस्य तथा नरेन्द्र व्यायामहीनस्य च नान्नपाकः YaśasCam. i. 507. 6.

अनाप्तनिर्द्वय (anāpta-nirdvaya) *adj.* who has not attained the non-dual (Brahman) (स जीवः) परमात्मापरिज्ञानमात्रयानाप्तनिर्द्वयः BṛĀraUBhVā. i. 4. 1758.

अनाप्तपर्यन्तवृत्ति (anāpta-paryantavṛtti) *adj.* which has not attained the nature of limitation विस्तीर्णतादि गगनोदधिभूभृतां यश्चक्रे स संकटमनाः स्फुटमन्य एव। येन व्यधायि महतां हृदयेष्वनाप्तपर्यन्तवृत्ति तदसावपरोऽस्ति वेधाः HarVi. 13.30.

अनाप्तपाखण्डस्मृति (anāptapākhaṇḍa-smṛti) *f.* *smṛti*-text composed by an untrustworthy heretic नात्मानं घातयेत्प्राज्ञ इत्याद्याप्तमन्वादिस्मृत्या केदारे पातयेद्देहमित्याद्यनाप्तपाखण्डस्मृतिर्बाध्यते VīraMi. (Paribhāṣā.) 26. 22.

अनाप्तपुण्योपचय (anāpta-puṇyopacaya) *adj.* who has not secured accumulation of merit अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री। तुल्या भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतबलाहकायाः Kirātā. 3.5 = SarasKaṇṭhā. 397. 23.

अनाप्तपुरुषार्थ (anāpta-puruṣārtha) *adj.* who has not attained the goal of human life अनाप्तपुरुषार्थोऽयं निःशेषानर्थसंकुलः। इत्यकामयतानाप्तान् पुमर्थान् साधनैर्जडः BṛĀraUBhVā. i. 4.1814; अनाप्तपुरुषार्थानामाशीर्वादो हि युज्यते TaiUBhāVā. 16. 2(1)

अनाप्तपुरुषोक्तत्व (anāptapuruṣokta-tva) *n.* the state of being stated by an untrustworthy person अनाप्तपुरुषोक्तत्वं हेतुस्ते न प्रयोजकः स्यादनाप्तोक्ततामात्रादप्रामाण्यं न च श्रुतेः SarvaSiSaṁ. 8.14.

अनाप्तपूर्व (anāpta-pūrva) *adj.* not obtained before नृपाभिषेको नृपनः पुरातनैरनाप्तपूर्वः VarāṅgaC. 21. 52; अनाप्तपूर्वं किमपेक्षितं ते Yādavā. 2. 17.

अनाप्तप्रणीत (anāpta-praṇīta) *adj.* composed by an untrustworthy person द्विविध एव लौकिकः शब्दः — आप्तप्रणीतोऽनाप्तप्रणीतश्च TātpaṬ. (U.) 61. 14 (*on* 2.62); अनाप्तप्रणीते हि वाक्ये प्रतिपत्तृप्रमाणसंवादेन प्रामाण्यम् TātpaṬ.(U.) 191.13 (*on* 5(0).16); पौरुषेयवाक्यमनाप्तप्रणीतत्वेन दुष्यति। तद्धि तदप्रणीतमर्थादनाप्तप्रणीतं भवेद् Kāśi. 1. 99. 9 (*on* 2. 70); वेदोऽनाप्तप्रणीतः आप्तप्रणीतवाक्यत्वात् ··· इत्यपि न प्राप्नोति अनुकूलतर्काभावात् PrakaVi. 286. 22; वेदः ··· विमतोऽनाप्तप्रणीतो न भवति अपौरुषेयत्वाद् व्योमवत् NyāySu.(Ja.) 237B. 11 (*on* ii. 1.2)

अनाप्तप्रणीतता (anāptapraṇīta-tā) *f.* the state of being composed by an untrustworthy person पौरुषेयमपि हि नाप्तप्रणीतत्वेनाप्रमाणम्, अपि तु अनाप्तप्रणीततया Kāśi. 1. 99. 12 (*on* 2.70)

अनाप्तप्रणीतत्व (anāptapraṇīta-tva) *n.* the state of being

composed by an untrustworthy person प्रतिवादिनो वेदस्याप्रणीतत्वात् वादिनश्चानाप्तप्रणीतत्वात् सिद्धो हेतुः TātpaṬ.(U.) 40. 11 (*on* 2.27); 64. 16 (*on* 2. 72); अप्रमाणमशेषं च शास्त्रं बुद्धादिकल्पितम् । स्यादनाप्तप्रणीतत्वात् SarvaSiSaṁ. 6. 23; 8.12; 8.15; शाक्यादयो वेदानामनाप्तप्रणीतत्वं मन्यमानाः हेत्वसिद्धिमुक्त्वैव कृतार्थाः स्युः NyāyRa. 372. 21 (*on* 5(4).81); पौरुषेयमाप्तवाक्यम् । अपौरुषेयं च वेदवाक्यम् । उभयमप्यनाप्तप्रणीतत्वदोषविरहात् ··· प्रमाणम् ŚāstrDī. 72. 4 (*on* i. 1. 5); विष्णुकाण्वायनस्मृत्योश्च ··· अनाप्तप्रणीतत्वं शङ्कमानस्य स्वकीयब्राह्मणत्वेऽप्यनाश्वासः स्यात् VedāntKa. 487. 9 (*on* iii. 4. 18); कारणदोषजन्यत्वात् मिथ्यात्वस्य अनाप्तप्रणीतत्वस्य च शब्ददोषत्वात् पौरुषेयत्वाद् वेदेऽनुपपत्तेः वेदार्थज्ञानस्योत्पन्नस्य मिथ्यात्वज्ञापनलक्षणबाधायोगात् NyāySu.(So.) 1237. 5 (*on* iii. 3. 14); अनाप्तप्रणीतत्वं गुण इति चेत् तर्ह्याप्तप्रणीतत्वं दोषोऽपि किं न स्यादिति स एव प्रसङ्गः NyāySu.(Ja.) 321A. 7 (*on* ii. 2. 1)

अनाप्तप्रयुक्त (anāpta-prayukta) *adj.* employed by an untrustworthy person किं चाप्तानाप्तप्रयुक्तयोर्नद्यास्तीरे पञ्च फलानि सन्तीति वाक्ययोरस्ति कश्चिद्विशेषो न वा NyāySu.(Ja.) 76A. 8 (*on* i. 1. 1)

अनाप्तप्रयोक्तृकता (anāptaprayoktṛka-tā) *f.* the state of having an untrustworthy person as the speaker (विपर्ययज्ञानोत्पत्तिः) सा च शब्दोच्चारणसंनिधानेऽप्यनाप्तप्रयोक्तृकतां विना न दृष्टा TātpaṬ.(U.) 62. 10 (*on* 2. 62)

अनाप्तबीज (anāpta-bīja) *adj.* who has not attained the cause (of emancipation) स्वामिन्नभव्यो भव्यो वा प्लयः पुरुषब्रुवः । भगवानाह भव्योऽयमथ वेलंधरोऽवदत् । आप्तबीजोऽथवानाप्तबीजोऽथ भगवाञ्जगौ । अनाप्तबीजः SamarāSaṁ. 9. 749.

अनाप्तब्रह्मस्वरूप (anāpta-brahmasvarūpa) *adj.* who has not attained the nature of Brahman तस्यैवमविद्यया अनाप्तब्रह्मस्वरूपस्य, प्रकृतसंख्यापूरणस्यात्मनः ··· विद्यया तदाप्तिरुपपद्यत एव TaiUBh. 228. 20 (*on* 2. 1)

अनाप्तभाषितत्व (anāptabhāṣita-tva) *n.* the state of being spoken by an untrustworthy person आप्तानाप्तभाषितत्वे विशेषो नास्ति शब्दगः ŚivDṛ. 2. 77.

अनाप्तमास्य (ánāpta-māsya) *adj.* [P. v. 1. 81] (foetus) which has not attained the age of a month, not one month old अ̲नाप्तमास्यो वा̲ ए̲ष । भवति यो̲ऽविज्ञातो ग̲र्भः ŚatBr.(K.) V. vi. 4.1; V. vi. 4. 3.

अनाप्तवक्तृ (anāpta-vaktṛ) *m.* untrustworthy speaker चक्षुरादिप्रत्यक्षं हि क्वचिद्यथार्थज्ञानं क्वचिदयथार्थज्ञानं जनयदपि प्रमाणमङ्गीक्रियत एव । दोषसदसद्भावाभ्यां तत्र भेद इति चेत् । तर्ह्यत्राप्यनाप्तवक्तृसदसद्भावाभ्यां भेदो भविष्यति NyāySu.(Ja.) 79A. 11 (*on* i. 1. 1)

अनाप्तवचस् (anāpta-vacas) *n.* statement of an untrustworthy person अबाधितमपि त्वर्थे प्रमाणांशेऽपबाधनात् । तत्राप्रमाणतामेति बुद्धानाप्तवचो यथा BrahmSi. 95. 20; मायोगेऽपि न मानत्वमनाप्तवचसः क्वचित् BṛĀraUBhVā. (Sambandha.) 708; न च तत्राप्यनाप्तवचः प्रमाणम् Kāśi. ii. 16.11 (*on* 5(1). 16); तस्मादनाप्तवचसां सत्येवाप्रामाण्ये वक्तृदोषाधीनत्वाद्वेदे च तदभावात्प्रामाण्यमेव वक्तव्यम् ŚāstrDī. 24.22 (*on* i. 1. 2)

अनाप्तवत् (anāpta-va(n)t) *adj.* who has not attained तथाप्युत्तमया राज्यश्रिया तृप्तिमनाप्तवान् । सौदासः कुत्सितं कर्म तथाविधमसेवत PadmP.(Ra.) 83. 62.

अनाप्तवत् (anāpta-vat) *adv.* 1 like that of an untrustworthy person अनाप्तः सन् (v. l. अनाप्तवच्च) आप्ततमस्य वाचं सुयोधनो विदुरस्यावमन्य । ··· विशतेऽधर्ममेव MahāBhā. v. 26. 11; 2 as if not obtained or acquired अवाप्यते मनुष्यत्वं कष्टं नष्टमनाप्तवत् PadmP.(Ra.) 112.81; संसारदशायामावृतानन्दस्य अनाप्तवदवभासमानस्य आत्यन्तिकसुखात्मिका मुक्तिर्मे स्यात् LalitāTriBh. 299. 6 (*on* 27); अविद्यामात्रविध्वस्तौ यतोऽनाप्तवदाप्यते (ब्रह्म) BṛĀraUBhVā. iv. 2.34.

अनाप्तवाक्य (anāpta-vākya) *n.* statement of an untrustworthy person 'वाक्यत्वात्' इति चानाप्तवाक्यैरनैकान्तिकः TātpaṬ.(U.) 41. 8 (*on* 2. 28); अनाप्तवाक्येऽपि वक्तृदोषाः संक्रान्ता विपर्ययज्ञानहेतवः TātpaṬ.(U.) 61. 15 (*on* 2. 62); अनाप्तवाक्ये हि दृष्टव्यभिचारित्वात् तज्जनितात् प्रत्ययात् प्रत्ययान्तरं स्वीयमर्थावधारणायापेक्षते Kāśi. ii. 16. 10 (*on* 5(1). 16); अनाप्तवाक्यमपि श्रोतुरिन्द्रियविषयभूतमवितथमित्युच्यते NyāyRa. 77.8 (*on* 2. 104); तदनाप्तवाक्येनैवेयं वाक्यार्थधीः NyāyRa. 913. 22 (*on* 7. 246); अनाप्तवाक्यस्य स्वप्रामाण्यं न मूलविरहात् ŚāstrDī. 44. 2 (*on* i. 1. 5); तथाभूतस्यानाप्तवाक्यस्य संसर्गज्ञानपूर्वकत्वाभावात् NyāyKuA. ii(1).210.5; स आप्तानाप्तवाक्याभ्याम् ··· संसर्गज्ञानपूर्वकत्वाभावात् ... ; भवत्पक्ष इव यथार्थ संसर्गं प्रतिपद्यमानेऽर्थे ··· प्रतिबोधनीयः KhaṇḍanKhā. 423. 1; भवत्पक्ष इव यथार्थ संसर्ग प्रतिपद्यमानेऽर्थे ··· प्रतिबोधनीयः KhaṇḍanKhā. 423. 1; बोध्यमिच्छद्भिरस्माभिरपि हेत्वपेक्षा अनाप्तवाक्येषु नियत (नीयत) इति (किं) नोपपद्यते NyāyKu. 59.2; वक्तुरानुकूल्याभावाज्जैनाद्यनाप्तवाक्यम् NyāySu.(Ja.) 6A. 5 (*on* i. 1. 1); ननु नदीतीरे पञ्च फलानि सन्तीत्यनाप्तवाक्ये व्यभिचारान्नेदमनुमानम् Upask. 398. 5 (*on* ix. 2. 3); अनाप्तवाक्ये योग्यतादिविरहान्न व्यभिचारः SarvaDaKau. 67. 3; अनाप्तवाक्यं चेल्लिङ्गाभास एव व्यभिचारात् TantrRaha. 37. 12; प्रातिभासिकयोग्यतादिमतानाप्तवाक्येन च तात्त्विको व्यावहारिको वार्थः ··· सिध्येत् Nyāyāmṛ. 106B. 7; SiddhāLeSaṁ. 320. 3.

अनाप्तवाक्यज (anāptavākya-ja) *adj.* arising from the statement of an untrustworthy person अनाप्तवाक्यजबोधस्य वा नाप्रमात्वं स्यात् KhaṇḍanKhā. 436. 23.

अनाप्तवाक्यजन्यत्व (anāptavākyajanya-tva) *n.* the state of being produced from the statement of an untrustworthy person व.लहादिस्थले वाक्यार्थज्ञानस्यानाप्तवाक्यजन्यत्वादिना भ्रमत्वेऽपि श्रोतज्ञानस्योक्तरीत्या भ्रमत्वज्ञानरूपबाधासंभवात् LaCandr 519. 29.

अनाप्तवाक्यत्व (anāptavākya-tva) *n.* the state of being the statement of an untrustworthy person लिङ्गव्यापारस्तु तत्राप्यविशिष्टः, निर्वाहिकायास्तु फलवत्तायाः प्रमाणाभावाद् न निर्वहति । तदभावश्चानाप्तवाक्यत्वात Kāśi. ii. 16.6 (*on* 5(1). 15); YuktiSneha. 48. 22 (*on* i. 1. 5); अनाप्तवाक्यत्वपरस्परविरुद्धार्थत्वादिभिर्बौद्धाद्यारोपिताप्रामाण्यशङ्कापङ्कपरिक्षालनपरत्वात् ···तर्कशास्त्रं वेदोपाङ्गं भवति SarvaMaSaṁ. 11. 16; 16. 18.

अनाप्तवाक्यत्वाविशेष (anāptavākyatvāviśeṣa) *m.* sameness of being the statement of an untrustworthy person अनाप्तवाक्यत्वाविशेषाद्वस्तुतो द्वयोरनादरणीयत्वेऽपि योगसिद्धसार्वज्ञवाक्यत्वाविशेषाभिमानात् भवति प्रतिरोधः NyāyPari. 309. 19.

अनाप्तवाक्यविषय (anāptavākya-viṣaya) *adj.* referring to the statement of an untrustworthy person विप्लवते खल्वपीत्यादि त्वनाप्तवाक्यविषयम् NyāyRa. 94.14 (*on* 2. 162)

अनाप्तवाक्यादिजन्य (anāptavākyādi-janya) *adj.* produced from the statement etc. of an untrustworthy person अनाप्तवाक्यादिजन्यपरोक्षविभ्रमोऽप्यविद्यावृत्तिरेवेत्यभ्युपगमो वेदान्तविदाम् SiddhāBi. 124. 5.

अनाप्तवाक्योत्थ (anāptavākyottha) *adj.* arising from the statement of an untrustworthy person नापि चतुर्थः (कल्पः)। अनाप्तवाक्योत्थविभ्रमप्रत्यये ··· चातिव्याप्तेः TattvPradī.(Ci.) 232. 5.

अनाप्तविगीतस्मृति (anāpta-vigītasmṛti) *f.* blamable *smṛti*-text (coming) from an untrustworthy (source) आप्ताविगीतस्मृत्यानाप्तविगीतस्मृतिः (बाध्यते) TantrVā. 879. 13 (*on* iii. 3.14)

अनाप्तवित्ता (anāpta-vittā) *adj.* (*f.*) who has not obtained money तयापि दूनया श्रेष्ठिसदनेऽनाप्तवित्तया । प्रोचे हस्तौ कथं छिन्नौ SamarāSaṁ. 7.500.

अनाप्तसंसर्ग (anāpta-saṁsarga) *m.* association with an untrustworthy person अङ्गुल्यग्रादिवाक्यानां तु अनाप्तसंसर्गादर्थास्पर्शित्वम् VivaPraSaṁ. 296. 16.

अनाप्तसंदृब्ध (anāpta-sandṛbdha) *adj.* composed by an untrustworthy person महता खलु प्रयत्नेन शिष्याचार्यपरंपरया वेदान् धारयन्तो दृश्यन्ते, तदर्थं चानुतिष्ठन्तः । तदनाप्तसंदृब्धानामनुपपन्नम् Kāśi. i. 110.23 (*on* 2. 98½)

अनाप्तसमय (anāpta-samaya) *m.* inappropriate time, improper time अनाप्तसमये तस्य न ययुः पथि रक्षिणः RājTa.(Ka.) 8. 3273.

अनाप्तसमागम (an-āptasamāgama) *m.* non-arrival of the lover तत्र प्रियस्यानाप्तसमागमा(? मे) सखीनां पुरतः स्वचित्तविनोदनार्थं वेषगतिहसितभणितैरनुकृतिर्या क्रियते सा लीला NāṭaLaRaK. 2606.

अनाप्तसाधारण्य (anāpta-sādhāraṇya) *n.* sameness regarding an untrustworthy person पदार्थमात्रे चाभ्रान्तत्वसिद्धावपि न किंचित् अनाप्तसाधारण्यात् Kiraṇā. 310. 24.

अनाप्तसौष्ठव (anāpta-sauṣṭhava) *adj.* 1 who has not attained (physical) excellence सरस्वतीमातुरभूच्चिरं न यः कवित्वपाण्डित्यघनस्तनंधयः । कथं स सर्वाङ्गमनाप्तसौष्ठवो दिनादिनं प्रौढिविशेषमश्नुते ŚrīKaC. 2. 27 = Subhāṣi. 170; 2 who has not attained excellence (in acquiring skill), ŚrīKaC. 2.27 (comm. अनाप्तमलब्धं सौष्ठवं व्युत्पत्तिगर्भत्वं येन सः); Subhāṣi. 170.

अनाप्तस्पर्श (anāpta-sparśa) *m.* contact with an untrustworthy person अपौरुषेये तु वेदे यद्यप्याप्तप्रणीतत्वं नास्ति तथापि प्रामाण्यस्य तदपेक्षाभावादनाप्तस्पर्शनिमित्तदोषाभावाच्चानपोदितं प्रामाण्यं भवति ŚāstrDī. 44. 5 (*on* i. 1. 5)

अनाप्तहस्त्यश्वपदातिपार (anāpta-hastyaśvapadātipāra) *adj.* the other end or limit of whose elephants, horses and foot-soldiers cannot be reached (i. e. counted) संख्यानदीष्णैरपि राजपुंभिरनाप्तहस्त्यश्वपदातिपारः अम्भोधिरुद्वेल इवाविवेश प्रतर्दनो नाम निशाचरेन्द्रः RāmC. App.(1) 38. 48.

अनाप्ताकृतवाक्य (anāptākṛta-vākya) *n.* statement not made by

an untrustworthy person चोदनावाक्यजनितप्रत्ययस्य प्रमाणता। आप्तवाक्यसमुद्भूतप्रत्ययस्यैव सिध्यति। यतोऽयं प्रत्ययस्तावदनाप्तकृतवाक्यजः। कालाबस्थादिभेदेऽपि विसंवादोऽस्य नास्ति यत् TattvSam. 2349.

अनाप्ताखिलशैलादिप्रतिबिम्ब (anāptākhilaśailādipratibimba) *adj.* which has not received the reflection of everything like mountains etc अनाप्ताखिलशैलादिप्रतिबिम्बे हि यादृशी। स्याद्दर्पणे दर्पणता केवलात्मस्वरूपिणी YogVā. iii. 4. 57 = SāṅkhyaPraBh. 85. 3 (*on* 2. 34)

अनाप्तानुक्त (anāptānukta) *adj.* not stated by an untrustworthy person अनाप्तानुक्तवाक्यजनितं तदर्थविज्ञानं तत् प्रमाणम् NyāyPari. 361. 1; अनाप्तानुक्त इत्युक्तत्वाद्वेदस्य पौरुषेयत्वमतनिरासः YatīndraDī. 25. 8.

अनाप्तानुप्रवेश (anāptānupraveśa) *m.* inclusion of an untrustworthy person अनाप्तानुप्रवेशश्च शब्दे दोषः, स च संवन्धग्रहणं निराकरिष्यते TātpaṬ.(U.) 70.18 (*on* 2. 100)

अनाप्तप्रणीतत्व (anāptapraṇīta-tva) *n.* the state of not being composed by an untrustworthy person नन्वसिद्धमेवानाप्तप्रणीतत्वं दोषवर्जनं च वेदस्यानाप्तप्रणीतत्वात् NyāyRa. 102. 15 (*on* 2. 186); अन्योन्याश्रयत्वात् परस्परविरोधेन प्रामाण्यसंदेहे सत्यनाप्तप्रणीतत्वादिना प्रमाजनकत्वव्याप्तिवेदप्रामाण्यनिश्चये जाते ... इत्यन्योन्याश्रयः AdvaiSi. 355.8.

अनाप्ताप्रणीतवाक्य (anāptāpraṇīta-vākya) *n.* statement not composed by an untrustworthy person अनाप्तप्रणीतवाक्यस्य जगत्याप्तप्रणीतत्वनियमदृष्टेः, अन्यथा वक्तुरभावे वाक्यस्योत्पत्तिप्रतीत्योरसंभवात् TattvPradī. (Ci.) 157. 11.

अनाप्ताप्रणीतवाक्यत्व (anāptāpraṇītavākya-tva) *n.* the state of being a statement not composed by an untrustworthy person वेदः प्रमाणम्, अनाप्ताप्रणीतवाक्यत्वात्, मन्वादिवाक्यवत् VivaPraSam. 280. 7; (वेदः) विमतो विपरीतबोधको न भवति। अनाप्ताप्रणीतवाक्यत्वात्संप्रतिपन्नवाक्यवत् NyāySu.(Ja.) 237B.10 (*on* ii. 1. 2)

अनाप्ताप्रणीतोक्ति (anāptāpraṇītokti) *f.* statement not composed by an untrustworthy person अनाप्त(?प्त MUSS. 13)प्रणीतोक्तिजन्यत्वाद् बाधवर्जनात्। देशकालादिभेदेन चास्योक्तिप्रत्ययो यथा ŚlokaVār. 2. 185 (102. 3); एतेनानाप्ताप्रणीतोक्तिजन्यत्वादित्येतस्याश्रयासिद्धतोक्ता TattvSamPañ. 743.3 (*on* 2604); नन्विदमदुष्टकारणजनितत्वमनाप्ताप्रणीतोक्तिजन्यत्वं चासिद्धं, सर्ववाक्यानां कृतकत्वात् Kāśi. i. 155. 7 (*on* 2. 186); iii. 221.16 (*on* 5(10). 2)

अनाप्ताभाव (anāptābhāva) *m.* absence of an untrustworthy person ननु गुणाधीने तु प्रामाण्ये चोदनाया नित्यत्वमाकाङ्क्षासंनिधियोग्यपदार्थपूर्वकत्वं वा अनाप्ताभावलक्षणो वा गुणोऽस्तीति तज्ज्ञानस्य प्रामाण्यं स्यात् TātpaṬ. (U.) 48. 5 (*on* 2. 46); अनाप्ताभावोऽपि न गुणः, अप्रमादकेष्वपि व्योमादिषु द्विचन्द्रादिज्ञानेषु च दर्शनात् TātpaṬ.(U.) 48. 10 (*on* 2. 46)

अनाप्तार्थ (anāptārtha) *adj.* which has not attained the main goal (of life) आप्ताशेषपुमर्थोऽपि प्रत्यग्याथात्म्यमोहतः। अस्तर्ज्ञो भवेदात्मा तथानाप्तार्थ एव च BṛĀraUBhVā. i. 4. 1015.

अनाप्ति (an-āpti) *f.* 1 non-obtainment, non-attainment कृत्स्नानन्दस्य चानाप्तिरवाप्तिरसुखस्य च BṛĀraUBhVā. iv. 4. 260; सर्वात्मनोऽप्यनाप्तिः स्यादशमस्येव मोहजा TaiUBhāVā. 46. 17(2); मोहादेवमनाप्तिः स्यादात्मनोऽपि ममात्मनः TaiUBhāVā. 134. 14(2); 2 untrustworthiness, cf. अनाप्तिमूलत्व.

अनाप्तिकृत् (anāpti-kṛt) *adj.* which causes non-attainment सदा लब्धात्मकस्यापि यतोऽज्ञानमनाप्तिकृत् TaiUBhāVā. 134. 1(2)

अनाप्तिनिमित्त (anāpti-nimitta) *n.* cause of non-attainment यदि तावद्वास्तवेनैव वृत्तेन ब्रह्म प्राप्तमात्मस्वाभाव्यात्केवलमासुरमोहापिधानमात्रमेवानाप्तिनिमित्तम् NaiṣkaSi. 40. 2.

अनाप्तिभी (anāpti-bhī) *f.* fear of non-obtainment निशि वियोगवतां पततां गणा निखिलमेव रवेः पपुरातपम्। पुनरनाप्तिभिया पपुरातपं दिनकृतः किममूण्यधिकं रुचेः। रथपदाह्वपतत्त्रिमिथुनानि नो यदमुना व्यपहन्त सहासितुम् HammīMaKā. 7. 12.

अनाप्तिमूलत्व (anāptimūla-tva) *n.* the state of being based on untrustworthiness फलव्यभिचारतस्तदंशस्यानाप्तिमूलत्वस्थितौ पशुपतिप्रणीतत्वादेस्तत्र व्यभिचारतः कथमनुमानं स्यात् NyāySu.(Ja.) 234B. 12 (*on* ii. 1.1)

अनाप्तीच्छु (anāptīcchu) *adj.* desirous of non-obtainment सा भवेच्छाप्त्यानाप्तीच्छोः प्रवृत्तिः सुखदुःखयोः। यतोऽपि प्राणिनः कामविभवेच्छे च ते मते PramāVār. 2. 184.

अनाप्तुम् (an-āptum) *inf.* not to obtain (i. e. to avoid) नलात्स्ववैश्वस्त्यमनाप्तुमानता नृपस्त्रियो भीममहोत्सवागताः। तदङ्घ्रिलाक्षामदधन्त मङ्गलम् NaiṣC. 15.55.

अनाप्तृ (an-āptṛ) *adj.* who does not obtain निशमय्य तदूर्जितं शिनेर्वचनं नप्तुरनाप्तुरेनसाम्। ... अभिपत्ते स्म वचो वचोहरः ŚiśuVa. 16. 38.

अनाप्तेक्षणसंस्तवा (anāptekṣaṇasaṁstavā) *adj* (*f.*) whose sight and hence acquaintance are not obtained yet (i. e. not yet seen and so not become acquainted with) अनेकरूपालिखनप्रगल्भया मुदिक्षणया वर्तिकदेव चिन्तया। स तामनाप्तेक्षणसंस्तवां पुरा लिलेख चित्ते मुकुरन्यथान्यथा NavaSāC. 4. 6.

अनाप्तोक्त (anāptokta) *adj.* uttered by an untrustworthy person संसृष्टत्वप्रकारकप्रतीतिपरत्वं तत्प्रकारकप्रतीतिपरहंनिमित्तत्वं वा अनाप्तोक्ते निराकाङ्क्षे च व्यभिचारि TattvCin. iv(1). 33.2; तन्त्वर्थसत्तानपेक्षप्राप्तत्वज्ञानमात्रात्। प्रवृत्त्याऽनाप्तोक्तेनापि प्रवृत्तिः स्यात् NyāySu.(So.) 58. 22 (*on* i. 2. 10); नन्वेते पदार्थाः संसृष्टा एवेति वा साध्यम्, संभावितसंसर्गा इति वा, नाद्यः अनाप्तोक्ते व्यभिचारात् Upask. 399. 2 (*on* ix. 2. 3)

अनाप्तोक्तता (anāptokta-tā) *f.* the state of being uttered by an untrustworthy person अनाप्तपुरुषोक्तत्वं हेतुस्ते न प्रयोजकः। स्यादनाप्तोक्तत्वाप्रामाण्यं न च श्रुतेः SarvaSiSam. 8.14; यत्रानाप्तोक्तताधीर्न भवति विहितानपि संभावनायां किं व्याख्या TattvMu. 4.110.

अनाप्तोक्तत्व (anāptokta-tva) *n.* the state of being uttered by an untrustworthy person नाप्तोक्तत्वनर्थप्रतीतिरङ्गमिति भ्रमः, किं त्वनाप्तोक्तत्वशङ्कानिरासः NyāyKuA. ii(1). 214. 4; कपिलकणादिसमयानामुक्तानुपलब्ध्यानाप्तोक्तत्वेन निराकृतत्वात् TattvPrakā. 94A.4 (*on* ii. 2. 1)

अनाप्तोक्तपदकदम्ब (anāptokta-padakadamba) *n.* group of words uttered by an untrustworthy person एते पदार्था मिथःसंसर्गवन्त इति संसृष्टा एवेति नियमो वा साध्यः संभावितसंसर्गा इति वा। न प्रथमः, अनाप्तोक्तपदकदम्बस्यापि तैरनैकान्तात् NyāyKuA. ii(1). 206. 2; Kiraṇā. 310. 15.

अनाप्तोक्तवाक्य (anāptokta-vākya) *n.* statement uttered by an untrustworthy person न चानाप्तोक्तवाक्यं प्रमाणं कारणदोषबाधकदर्शनात् NyāyPari. 361. 2.

अनाप्तोक्ति (anāptokti) *f.* statement of an untrustworthy person अनाप्तोक्तिरपि सत्या भवति यदि दृढयमानार्थवादनाप्तो भवति Kāśi. 1. 113. 20 (*on* 2. 104); अनाप्तोक्तौ व्यभिचारदर्शनात् तुल्यापि सामग्री संदेहेन विशिष्यते NyāyKuA. ii(1). 213.5; न चानाप्तोक्तिजाता धीर्लिङ्गाद्युत्पन्नमहोति NyāyRaMā. 92.24; 93. 5.

अनाप्तोक्तितस् (anāptokti-tas) *adv.* from a statement of an untrustworthy person ये त्वनाप्तोक्तितो बुद्धेरुत्पत्तिं प्रचक्षते। लिङ्गत्वं चाप्तवाक्यस्य तेनानैव तु दूषणम् NyāyRaMā. 93. 2.

अनाप्तोक्तिसत्यता (anāptokti-satyatā) *f.* truthfulness of the statement of an untrustworthy person दृढयमानार्थवादित्वे स्यादनाप्तोक्तिसत्यता ŚlokaVār. 2. 104 (77. 1)

अनाप्तोपज्ञ (anāptopajña) *adj.* originating from an unacquainted person (i. e. a stranger) अनाप्तोपज्ञमपि निर्मूल्यमाश्वासनावचनमापदि MohaRāPa. 3.47(36)

अनाप्त्वा (an-āptvā) *ger.* not having obtained क हि तदाप्स्यतीति यदितो नाप्त्वा(?यदितोऽनाप्त्वा, VIŚVA.) प्रैति JaimiBr. 1.233; स्थानिमनाप्त्वैव रञ्जिता जगती ĀryāSaŚa. 31.

अनाप्नुवत् (an-āpnuvat) *adj.* [*f.* -tī, -ntī] A not attaining स एषः पुरुषो विराजं संविपाद्यिषन्नेऽन्नमनाप्नुवन्नास्ते JaimiBr. 1. 233; तम् ... प्रजाः ...। नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिः RaghuVa. 2. 73; गर्भो वृद्धिमनाप्नुवन्नुपविशद्गुरुशुष्यति वा AṣṭāSam. i. 214.21 (2.4); अन्यथा स्थूलतामनाप्नुवन्नेकोऽपि परमाणुः ... प्रत्यक्षतानियात् ĀtmaTaVi. 647.6; कार्यं हि हेतुना विनात्मानमनाप्नुवद्धेतुमत्तया कर्तारमाक्षिपति Kiraṇā. 4. 10; B not obtaining, not receiving, not getting अन्नावपि ... तत्पृष्ठमाश्रिताः। तदनुक्रमशो यथास्थानभाज उपासिताः। अन्ये चानाप्नुवन्तोऽनुपदं धावन्ति Tantrākhyā. 116. 14; PañcaTa. 3 93(26) (358. 6); तदपरे स्थानमनाप्नुवन्तस्तस्यानुपदमेव धावन्ति Pañcā. 222. 17; एता मिथो रूढविमानमार्गा लताग्रजं पुष्पमनाप्नुवन्त्यः। भवन्ति भारानमिताङ्गकेषु बद्धाभ्यसूयाः स्तनमण्डलेषु NavaSāC. 14. 67; विभूतेरनुत्पत्तौ कामा न पूर्यन्ते, अपरितुष्टकामो याचते, याचमानस्तदनाप्नुवन् धनिनः सेवते SaraKaṇṭhā. 723. 13; वृत्तिं तस्माल्लुब्धादनाप्नुवन्। ... विजयमङ्गोऽभूद्देशान्नानुं कृतोद्यमः RājTa.(Ka.) 7.760; 7. 1595; अनाप्नुवन्तो विधुरे राज्ञि राजकुलादन्नम्। दुर्भिक्षे तत्र सामन्ता अपि क्षिप्रं प्रपेदिरे RājTa.(Ka.) 8. 1208; 8. 1601; दारानभीप्सुर्वतते विवाहितांस्तान्प्राप्य तेभ्यस्तनयानमीप्सति। अनाप्नुवन्दुःखमसौ सुतीव्रं प्राप्नोति चेष्टेन वियुज्यते पुनः ŚaṅkaDigVi.(Mā.) 14. 86; C not finding दुरुपमितमितम्सत्यां हेतुं पृथगनाप्नुवन्। वीतशोकं तथाकाममयं पदमश्नुते GaṇḍKa. 4.78; इदमुक्त्वा तिरोऽभूत्सा भ्राम्यंश्चाहमनाप्नुवन्। राजर्षिं तं शुचात्मानं लब्धुमिच्छंस्तथेक्षितः

KathāSaSāg. xii. 5. 201; विश्वास्यापि तथा हन्तुं तं प्रसङ्गमनाप्नुवन् । उद्ताम्य-द्दिवारात्रं तल्पोपर्यवशं लुठन् RājTa.(Ka.) 8. 2113; तत्परोक्षे त्वहम् ··· तमनाप्नु-वती पुरुषान्तरं वीक्षितुमपि नोत्सहे PurusPa. 125. 6; D not reaching, not perceiving आरोपणीयं च रजतं ज्ञानेनानाप्नुवन् न रजतभ्रमवान् भवति Brahm-Si. 94. 19; अनाप्नुवन्पुमांसं तं सोऽपि मत्तो मतङ्गजः । जघान वटशाखाम् PariPar. 2. 208; पृथ्वीहरानुजः सुञ्जि निर्जित्य मनुजेश्वरः । परं पारं वितस्तायाः सेतुच्छेदाद-नाप्नुवन् RājTa (Ka.) 8. 1061; उपायैर्मिच्छद्भिः पक्षभूमिमनाप्नुवन् ।··· धर्मो मृग्यताम् MānaMe. 32. 7.

¹अनाप्य (an-āpyá) *adj.* [*f.* -ā] 1A unattainable वि ये दधुः शरदं मासमादहर्यज्ञमक्तुं चादृचम् । अनाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजान आशत RV. vii. 66. 11; सदोत्सेनुत्पाद्योऽनाप्यश्चापि तथात्मनः । - अयम् (आत्मा) Br-ĀraUBhVā. iv. 4. 1114; 1B unapproachable, unreachable प्रजापतेस्तनूः ···अनाप्ता चानाप्या चानाप्ता तत्पुथिव्यनाप्या तद्द्यौः AitBr. 24. 6(645); KauṣI-Br. 27. 5 (132. 13); ĀśvaŚS. II. ii. 13. 13; ŚāṅkhāŚS. x. 19. 2; अन्त-रिक्षमिवानाप्यम् ··· भूयासम् AitĀ. V. i. 1. 23; आप्योऽपि रंहसा गच्छन्ननाप्यो मारुतेन यः । सैन्धवः सैन्धवाद्भर्भीदुत्तरात स पाण्डरः NīlaVi. 110. 11; 1C un-obtainable तल्लक्षकोटिभिरनाप्यमपीदमायुः कालो निकृन्तति VairāŚ.(Pa.) 86; **2** (Gr.) A not having a grammatical object (i. e. intransitive verbal base) गत्यर्थानाप्यादाधारे च CāndraVyā. i. 2. 70; i. 2. 97; गतिबोधाहार-शब्दार्थानाप्यानां प्रयोज्ये CāndraVyā. ii. 1. 44; ŚākaṭāVyā. iv. 3. 55; तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्च SiddhaHe. iii. 3. 21; iii. 3. 107; B [Loc.] when the grammatical object is not present कोपस्थानेऽनाप्ये CāndraVyā. ii. 1. 76; वौन्मुचोऽनाप्येऽचः ŚākaṭāVyā. iv. 1. 59.

²अनाप्य (an-āpya) *adj.* 1 not born or originated from water, NīlaVi. 110. 11; 2 not belonging to the (element) water, cf. ²अनाप्यत्व.

अनाप्य (an-āpya) *ger.* 1 not having obtained तनुमपि तनुजां रुजं त्वनाप्य व्रजति नरः स समाशतस्य पारम् AṣṭāSam. i. 69. 11 (1. 10); 2 not having reached अस्मिन्नलं विहरणेन खलु स्थितेनातिक्रम्य यद्गगनमिन्दुरनाप्य चास्तम् (वर्तते) DvyāśraKā. 13. 109; सरोजिनीमनाप्य हंसो न हि याति विश्रमम् RasSa. 142; परस्परं वेगितमाप्नुवन्तो न पेतुरुद्विग्य शरा इवाश्च । तेऽन्योऽन्य-सेनामुभयेऽप्यनाप्य स्वं श्लाघमाना इव तीक्ष्णभावम् RaghPāṇ.(Dha.) 16. 24.

¹अनाप्यत्व (anāpya-tva) *n.* the state of not being what is to be attained न च आप्यत्वेनापि कार्यापेक्षा, स्वात्मस्वरूपत्वे सत्यनाप्यत्वात् Brahm-SūBh.(Śaṅ.) 24. 5 (*on* i. 1. 4); द्रव्यपरत्वे चानुत्पाद्यत्वादविकार्यत्वादना-प्यत्वादसंस्कार्यत्वात् संस्कृतस्य च कार्यान्तरे उपयोगाभावादसंस्कार्यत्वम् PañcPā. 42. 11 (*on* i. 1. 1)

²अनाप्यत्व (anāpya-tva) *n.* the state of not belonging to the (element) water (सुवर्णस्य) नैमित्तिकद्रवत्वाधारत्वेन चानाप्यत्वं प्रसाध्य ··· रूपवत्वे(? त्वे)न तेजसत्वं साधनीयम् SarvaDaKau. 8. 27.

अनाप्यप्रापिका (anāpya-prāpikā) *adj.* (*f.*) which causes to attain (even) the unattainable प्रमाणं नयन्तीभिरनाप्यप्रापिकाः पुरुषकारशक्तीः ··· उक्तिभिरुत्सार्यमाणनिर्वेदो राजा ··· पितरमब्रवीत् UdaySuKa. 107. 18.

अनाप्यमानत्व (anāpyamāna-tva) *n.* the state of not being reached तद्व्यापारेण वानभिभूतव्यापारं कर्म तेनानाप्यमानत्वात्कर्मत्वं हित्वाविर्भूतव्यापारतया कर्तृत्वमेव प्रतिपद्येत TantrVā. 946. 20 (*on* iii. 4. 13)

अनाप्यायमान (an-āpyāyamāna) *adj.* not becoming strong (i. e. getting emaciated) (पुरुषस्य) तस्यानाप्यायमानस्य विषमाशनोपचिता दोषाः -- भूयः शरीरमुपशोषयन्ति CaraS. ii. 6. 10 (1941 Ed.)

अनाप्यायित (an-āpyāyita) *adj.* [*f.* án-āpyāyitā] not becoming strong (i. e. not nourished) यो हैनामुचैर्जपति ··· तमु हैषानाप्यायिता परुषं करोति तस्मादुपा॑ंश्वेव जपेत् ŚatBr.(K.) V. viii. 4. 13; चाक्षुषं तेजो बाह्य-सौर्यादितेजआप्यायितं रूपादि प्रकाशयति नानाप्यायितम् Bhām. 226. 15 (*on* i. 3. 22); प्राणः ··· मूर्च्छायां किंचिदाप्यायितः, अनाप्यायितस्य प्राणस्योपलम्भानर्हत्वात् ŚrutaPra. ii. 434. 7 (*on* iii. 2. 10)

अनाप्यायितबल (anāpyāyita-bala) *adj.* who has not increased his virile power न त्वनाप्यायितबलं(? लः) समागच्छेतु योषितः BhelaS. 10. 12 (1. 7)

अनाप्रीत (án-āprīta) *adj.* 1 not propitiated with the Aprī hymns एतानि पशुशीर्षाणि ··· अनाप्रीतानि हि तानि ŚatBr. VI. ii. 1. 37; **2** not used (before), fresh अनाप्रीतेन शरावेण ··· उदकमाहृत्य BhārGS. 1. 22 (22. 13); 2. 7 (38. 2); ĀpaGS. vi. 14. 14 (comm. अनाप्रीतेन अनुदक-लिप्तेन अस्पृष्टोदकेनेत्यर्थः); HirGS. ii. 7. 2 (comm. अनाप्रीतेन नवेन); अनाप्रीते मृन्मये भोक्तव्यम् ĀpaDS. i(5). 17. 9.

अनाप्लवमान (an-āplavamāna) *adj.* not plunging (in water) उन्मृज्ती(? द्री, *but* Kashikar दी)तानाप्लवमानः LāṭyāŚS. ix. 2. 18; Drāhy-ŚS. xxv. 2. 18 (comm. स्नानमकुर्वन्)

अनाप्लुत (an-āpluta) *adj.* not washed or bathed लोकः ···। नाना-प्लुताङ्गैः (v. l. नानाप्लुतैश्च) तीर्थेषु ··· द्रष्टुं शक्यः कथंचन MahāBhā. iii. 44. 5; आप्लुतानाप्लुते काये यस्य गन्धाः शुभाशुभाः । व्यत्यासेनानिमित्ताः स्युः स च पुष्पित उच्यते CaraS. v. 2. 12 (1941 Ed.); AṣṭāHṛ. ii. 5. 24.

अनाप्लुतवदन (anāpluta-vadana) *adj.* who has not washed his mouth (अग्निम्) नानाप्लुतवदनो न नग्न उपस्पृशेत् CaraS. i. 8. 19.

अनाप्लुताङ्ग (anāplutāṅga) *adj* who has not washed or bathed his body स लोकः ···। नानाप्लुताङ्गैस्तीर्थेषु यज्ञदानबहिष्कृतैः ।··· द्रष्टुं शक्यः कथंचन MahāBhā. iii. 44. 5.

अनाप्लुत्य (an-āplutya) *ger.* not having washed नानाप्लुत्य शिरः स्नायात् AṣṭāSam. i. 10. 24 (1. 3)

अनाफित (anāphita) *m.* name of a person [लिखितम्] इदं महासंधि-विग्रहाधिकरणाधिकृतानाफितेन EI. xii. 35. 34.

अनाबद्धवैर (an-ābaddhavaira) *adj.* who has not formed (i. e. developed) hostility तादृकारि: कथमनाबद्धवैरः MahāvīC. 4. 2(5)

अनाबन्त (an-ābanta) *adj.* not ending in (the feminine suffix) -ā marked with the indicatory sound -p (कपि) अनाबन्तस्यापि ह्रस्वो वेति केचित् । सुसोमपाक्रः । सुसोमपकः PrakriKau. i. 616. 8.

अनाबय (anābaya) [w. r. for अनाबयु] [PW.]

अनाबयु (án-ābayu) *m.* name of a plant आबयो अनाबयो रसस्त उग्र आबयो । आ ते करम्भमद्मसि AV. vi. 16. 1; cf. अनावयु.

अनाबाध (an-ābādha) *adj.* [*f.* -ā] 1A not having obstruction or impediment आपतन्तमनाबाधे पथि सिद्धनिषेविते । अनुगन्तुं न पर्याप्तो गरुडो वायुना सह Rāmā. iii. 750*(15); 1B free from trouble वाह्योपवने ··· नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः । आहूतं मन्यते पान्थो यत्र कोकिल-कूजितैः । यदृच्छयागतां तत्र ददर्श प्रमदोत्तमाम् BhāgP. iv. 25. 19 (Śrīdhara अनाबाधे आबाधा महती पीडा तत्कृतोपद्रवरहिते); 1C free from hindrance निर्वासितं तु धर्मेण मोक्षं प्राप्नोति मानवः । अनौपम्यमनाबा(? बा)धं सुखं यत्रान्त-वर्जितम् PadmP.(Ra.) 6. 298; ध्रुवं परमनाबाधमुपमानविवर्जितम् । आत्म-स्वाभाविकं सौख्यं सिद्धानाम् PadmP.(Ra.) 105. 180; यत्प्रसन्नम् ··· अनाबाधं सुखं कस्य एतत् भवति PraśnaUBh. 269. 7 (*on* 4. 1); अनाबाधेऽविकारे स्वे सुखे परमपावने । संकल्पोपशमे यत्नं पौरुषेण परं कुरु AdhyāRā. vii. 6. 53; YogVā. iv. 53. 43; 1D which is without damage (of any kind), undamaged अनूषरामनाबाधां पात्रे बहुगुणान्विते ।··· दत्त्वा भूमिं महात्मने । दशकल्पानि वसति स्वर्गे विगतपातकः CaturCin. i. 507. 15; 2 not injurious पित्तान्तं वमनं कुर्यात् कफान्तं च विरेचनम् । स्वयं चोपरतं श्रेष्ठमनाबाधम् KāśyaS. 155B. 13.

अनाबाध (an-ābādha) *m.* [Inst.] without harm or injury अनाबाधेन मनसो वपुषश्च निरन्तरम् । यथाशक्ति तपःकर्म स्थानमेतच्चतुर्दशम् Triṣa-ŚaPuC. i. 1. 896.

अनाबाधकर (an-ābādhakara) *adj.* not causing any harm विरे-चनम् । यदसक्तं महावेगैः सुखेनाशु प्रवर्तते । अनाबाधकरं नातिग्लपनं दोषशोधनम् । ··· शुद्धिकृदावहेत् KāśyaS. 276B. 15.

अनाबाधम् (anābādham) *adv.* without any trouble तिर्यङ्नरामरा लीला स्वस्वस्थाननिवेशिनः । प्रभुप्रभावाद् मान्ति स्मानाबाधं तत्र कोटिशः PārśvC. 6. 242.

अनाबाध्य (an-ābādhya) *ger.* not having caused harm or injury कदाचित्परस्य द्रव्यप्राणानाबाध्य कदाचिदनाबाध्य ··· ज्ञानावरणादीनि कर्माणि बध्नाति TattvPradI.(A.) 211. 1 (*on* 2. 57)

अनाभङ्ग (an-ābhaṅga) *adj.* [w. r. for अनासङ्ग], AbhisaAlaā. 8. 8 (cf. AbhisaAlaĀ. 524. 19)

अनाभयिन् (án-ābhayin) *adj.* fearless इदं वसो सुतमन्धः पिबा सुपूर्ण-मुदरम् । अनाभयिन्ररिमा ते RV. viii. 2. 1; SV. I. ii(1). 3. 10; II. i(2). 8. 1.

अनाभरणता (anābharaṇa-tā) *f.* the state of not being an orna-ment मुक्तावली भ्राजते न च्युता तव कुचद्वयात् । ग्रैवेयकं च्युतं कण्ठादनाभरणतां गतम् BallāC. 26. 6.

अनाभरणसंपन्ना (an-ābharaṇasampannā) *adj.* (*f.*) not embel-lished or decked with ornaments अनाभरणसंपन्ना परमाम्बरवर्जिता । शोभय-त्यधिकं भद्रे वनमप्यनलंकृता MahāBhā. iii. 599*(1)

अनाभरणोद्घ (anābharaṇodgha) *adj.* [P. iii. 3. 86] excellent (i. e. beautiful) without ornaments जितमदनस्य तवेश महत्त्वं वपुरिदमेव हि

शास्ति मनोज्ञम् । न विकृतिभाग्न कटाक्षनिरीक्षा परमविकारमनाभरणोद्वम् MahāP. 23. 128.

अनाभव (ánābhava) [Viśva.]

अनाभात (an-ābhāta) *adj.* not manifested, not perceived तन्वाभासवस्तुत्ववदेऽनाभातस्य अग्नेरवस्तुत्वम्, इत्यनाभातेन कथं धूमो जन्यते PratyabhiVi. ii. 182. 1 (*on* ii. 4. 12); अनाभातस्य — पर्वतस्थत्वेन आभासाविषयतां गतस्य Bhāsk. ii. 182. 20 (*on* ii. 4. 12)

अनाभातपूर्व (an-ābhātapūrva) *adj.* not perceived before, not known before अनुमानमनाभातपूर्वं नैवेष्यम् ĪśvaPraSū. i 5. 8; यत् सर्वथा अनाभातपूर्वम् अननुभूतचरं तत्र अनुमानम् ... नैव केनचित् वादिना इष्यते PratyabhiVi. i. 231.5 (*on* i. 5. 8)

अनाभाषण (an-ābhāṣaṇa) *n.* absence of speaking अभ्याद्युत्पातः संभ्रमः, वसु(वस्तु?)वियोगादिव्यसनम्, एतेष्वनाभाषणे सर्वथैव निस्स्नेहता स्यात् AbhinBhā. iii. 219.16 (*on* 22. 264)

अनाभाषणपूर्वम् (an-ābhaṣaṇapūrvam) *adv.* without speaking (about terms) before (न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि) कः पुनरेषः शुल्को नाम । आभाषणपूर्वं वराद् गृहीतम् । यत्र तूष्णींधनगणो भवति, कन्यागुणापेक्षमूल्यव्यवस्था, स क्रय एव । इह तु महागुणाया अपि कन्यायाः स्वल्पं धनम् । अनाभाषणपूर्वं वा ग्रहणम् ManuBh. i. 233.1 (*on* 3. 51)

अनाभाष्य (an-ābhāṣya) *adj.* not fit to be spoken to व्यसने ... अनाभाष्योऽपि संभाष्यः प्रियः NāṭyaŚā. 22.264.

अनाभाष्य (an-ābhāṣya) *ger.* **i** not having commented upon भाष्यकारेण त्वविशेषपक्षमनाभाष्य तुशब्दार्थवत्त्वाय सिद्धान्तोपक्रमः कृतः TantrVā. 996.4 (*on* iii. 4.34(† 28)); **ii** not having spoken to जनयित्रीमनाभाष्य भूतभीतिं विहाय च । ध्रुवोऽच्युतध्यानपरः ... बभूव SkandP. iv. 20.75; दृष्ट्वापि मामनाभाष्य SkandP. vi. 8. 102.

अनाभास (an-ābhāsa) *adj.* **1** non-illusory, not having illusory appearance **2** not having illumination (from anything else), self-illuminated **3** not shining, unmanifest **4** non-fallacious **5** having no range or scope (of action) (i.e. substantially inactive) **1** non-illusory, not having illusory appearance सर्वं शान्तं निरालम्बं व्योमस्थं शाश्वतं शिवम् । अनामयमनाभासम् MahāU. 5(45); YogVā. iii. 119.22; तदनेनारूप्यनिदर्शनमप्रतिघमनाभासमविज्ञप्तिकमनिकेतमिति निर्विकल्पस्य ज्ञानस्य यथास्वं लक्षणमभिद्योतितं भवति MaYānaSū.(App.) 191.22; आत्मेति काश्यप अयमेकोऽन्तः । नैरात्म्यकमित्ययं द्वितीयोऽन्तः । यदेतदनयोरन्तयोर्मध्यं तदरूप्यम् ... अनाभासमविज्ञप्तिकम् PrasaPa. 358.11; यदा न लीयते चित्तं न च विक्षिप्यते पुनः । अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा GauḍKā. 3.46; अस्पन्दमानमलातमनाभासमजं यथा । अस्पन्दमानं विज्ञानमनाभासमजं तथा GauḍKā. 4.48; वैमल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासम् ... प्रणमत गोविन्दं परमानन्दम् GovindA. 3; अतीन्द्रियमनाभासं परं तत्त्वं परात्परम् । ... मनस्येवं महादेवं हृत्पद्मे वापि चिन्तयेत् LingaP. i. 8. 106; अप्रतर्क्यमनाभासं सन्मात्रमिदमिखिलम् YogVā. iv. 22. 39; तदेतद्वियुक्तज्ञानक्रियारूपम् ... तदुपदेशभावनादिषु तथाभासमानमनाभासमपि वस्तुतः शिवतत्त्वम् PratyabhiVi. ii. 216.3 (*on* iii. 1.1); ततो लक्ष्यमनाभासमद्भावविवर्जितम् । सर्वाङ्कलनाहीनं कथं कालो निहन्ति तम् ŚārṅgaPa. 4608; अनाभासस्यैवारोप्यनिषेधः Nyāyāmṛ. 35A. 6; **2** not having illumination (from anything else), self-illuminated सर्वाभासमनाभासम् ... । तेनेदं तदभिव्यक्तं यत्रस्वस्समतां व्रजेत् PauṣkS. 1.40; परं ज्योतिरनाभासं सर्वतोभासकमम् PramāSaṃ. 3.8; **3** not shining, unmanifest अनाभासे च नास्ति विकल्परूपस्य अनुमानस्य व्यापारः PratyabhiVi. i. 234. 2 (*on* i. 5.9); केनापि प्रकारेण प्रत्यक्षात्मना अनुमेयात्मना वा आभासनम् आभासो बाह्यस्य अनाभासस्य न कदाचिद् अभूत् PratyabhiVi. i. 235. 8 (*on* i. 5. 9); ii. 19. 4 (*on* ii. 1. 6); **4** non-fallacious अव्यतिरेकिलिङ्गं चेदनाभासम् Upask. 67.18 (*on* ii. 1.1); लिङ्गम् असिद्धविरुद्धानैकान्तिकेभ्योऽन्यत् अनाभासमित्यर्थः Upask. 161. 15 (*on* iii. 1.18); **5** having no range or scope (of action) (i.e. substantially inactive), cf. **अनाभासचित्ता** [DBHS.]

अनाभास (an-ābhāsa) *m.* **1** disappearance, vanishing (*lit.* non-appearance) इहास्रवो निरवशेषमनाभासमस्तं गच्छतीति LaliVi. 252.26; 252.28; अनाभासः निराभासः अनिमिषः MahāVyu. 245.251 [DBHS.]; **2A** absence of illusory modification or change भावाभावदशादेशविशेषैर्वितततोदितैः । संविदो यदनाभासस्तन्मौनं परमं विदुः YogVā. vi(1). 68. 23; **2B** not an illusion (i.e. real entity) न चाभासप्रसक्त्यानाभासस्यापि प्रसक्तिः Nyāyāmṛ. 424B.4; **3** not the range or scope (of a sense-organ), cf. **अनाभासगत 2.**

अनाभासगत (anābhāsa-gata) *adj.* **1** gone to disappearance (i.e. vanished) यान्येकेषां श्रमणब्राह्मणानां पृथग्लोके दृष्टिगतानि भविष्यन्ति । — तान्यस्य तस्मिन् समये प्रहीणानि भवन्ति परिज्ञातानि ... तालमस्तकवदनाभासगता[नि] आयत्यामनुत्पादानि रोधधर्माणि PrasaPa. 594. 4; ĀryaŚāS. 19. 6; **2** (anābhāsagata) not coming into the range or scope (of a sense-organ) अथ न कंचित्सत्त्वं दरिद्रं पश्यति । तेनैवं चित्तमुत्पादयितव्यम् । सत्त्वानाभासगताः सत्त्वा ये मम चक्षुष आभासं नागच्छन्ति ŚikṣāSa. 129.3 [DBHS.]

अनाभासगतत्व (anābhāsagata-tva) *n.* the state of being what does not come into the range or scope (of a sense-organ) नैव ह्यावृते चक्षुर्विज्ञानमुत्पद्यत इति । अनाभासगतत्वाद्विषयस्य Sphuṭā. i. 93. 16 (*on* 1.42)

अनाभासचित्ता (anābhāsa-cittā) *adj.* (*f.*) whose mind has no range or scope (of action), whose mind is substantially inactive (चक्रवर्तिदुहिता) सा सुप्रमत्तमाहितचित्ता ... समाश्वासितचित्ता अनाभासचित्ता GaṇḍVyū. 214. 19 [DBHS.]

अनाभासता (anābhāsa-tā) *f.* the state of being non-fallacious (reason) न चैकीकरणाद्यकरणाभ्यां तस्यानाभासता स्यात् । येनान्यतरपर्युदासे प्रयत्नेन NyāyPari. 283. 2.

अनाभासत्व (anābhāsa-tva) *n.* the state of being non-fallacious (reason) ननु सुखं न तावत् पृथिवी निर्गन्धत्वात् न जलं स्नेहसांसिद्धिकद्रवत्वशून्यत्वात् ... अत एव न वायुर्न वा कालादि ततो नवभ्यो भिद्यत इति चेन्न आयद्वितीययोरनाभासत्वम् Upask. 20.6 (*on* i. 1.5)

अनाभासत्वग्रह (anābhāsatva-graha) *m.* knowledge of non-fallaciousness (of reason) अनाभासत्वग्रहश्च तत्र ... व्याप्तिग्रहणार्थमेवापेक्षितः AdvaiSi. 444.6.

अनाभासत्वानुपपत्ति (anābhāsatvānupapatti) *f.* untenability of non-fallaciousness परस्परार्थप्रतिक्षेपकयोरुभयोरनाभासत्वानुपपत्तेः ĀtmaTaVi. 557. 18.

अनाभासधूम (anābhāsa-dhūma) *m.* smoke which is non-illusory परमते आभासस्यालीकत्वेनानाभासधूमगतधूमत्वायोगात् साधर्म्यान्तिरमाह - अनाभासेति LaCandr. 758. 27.

अनाभासन (an-ābhāsana) *n.* non-shining यदि अस्य सोऽभिनवत्वेन भासमानः पूर्वं न भासते, न भासनं (*v.l.* अनाभासनं) चेत् जडतैव PratyabhiVi. i. 56. 1 (*on* i. 1. 1)

अनाभासमान (an-ābhāsamāna) *adj.* not shining एष रूपभेदः ... अनाभासमानपूर्वधर्मनवलक्षणः PratyabhiVi. ii. 51. 2 (*on* ii. 2. 4)

अनाभासरूप (an-ābhāsarūpa) *adj.* **1** not of the nature of light आभासाद् बाह्यः पुनरनाभासरूपः, स च आभासते इति विप्रतिषिद्धम् PratyabhiVi. i. 234. 1 (*on* i. 5. 9); **2** not of the nature of illusion तदुपदेशभावनादिषु तथाभासमानमनाभासमपि (*v.l.* अनाभासरूपमपि) वस्तुतः शिवतत्त्वम् PratyabhiVi. ii. 216. 3 (*on* iii. 1.1)

अनाभासरूपत्व (anābhāsarūpa-tva) *n.* the state of not having the nature of unreality द्वितीयमतसिद्धस्तु — न पुनराक्षेपः । तत्र निषेधस्यानाभासरूपत्वात् RasGaṅ. 567. 16.

अनाभासविषय (anābhāsa-viṣaya) *m.* object of non-illusion प्रत्यक्षाभासोऽयमिति चेत्, तर्हि क्वचिदनाभासविषयोऽपि Upask. 178. 12 (*on* iii. 2.9); *adj.* concerning non-illusory object अनाभासविषयसंस्कारजन्यज्ञानविषयत्वादेराभासानाभाससाधारणस्य दृष्टान्तेऽपि सत्त्वाच्च AdvaiSi. 758. 9.

अनाभाससद्वैलक्षण्य (anābhāsasad-vailakṣaṇya) *n.* distinctness from what is non-illusory and non-existent जगदादावनिर्वाच्यभूताभासासद्वैलक्षण्यमेव न त्वनाभाससद्वैलक्षण्यमित्यापाताच्च Nyāyāmṛ. 35A. 9.

अनाभि (a-nābhi) *adj.* **A** not having kinsmen अनाभिरस्मि न हि मेवं तन्त्यां बद्धः AV.(P.) xx. 41. 2; **B** not coming (i.e. not churned out) from the navel-like depression (in the *udumbara*-wood) विष्णोर्नाभा अग्निश्चेतव्यो योऽनाभिमग्निं चिनुते यजमानस्य नाभिमनुप्रविशति KāṭhS. 20. 7 (ii. 26. 8); KapiKaS. 31. 9 (156.25)

अनाभिधर्मिकीय (an-ābhidharmikīya) *adj.* not in keeping with the Abhidharma doctrine सर्वे धर्मा आस्रवाणामालम्बनमित्यनाभिधर्मिकीयमेतत् Sphuṭā. i. 14.21 (*on* 1.4)

अनाभिभक्ष (an-ābhibhakṣa) *adj.* [*w. r.* for अनाभिभाष्य] VāyuP. ii. 8. 193.

अनाभिभाष्य (an-ābhibhāṣya) *adj.* who is not to be addressed अनाभिभाष्या विक्रान्ताः सर्वलोकनमस्कृताः । ... असुराः सर्वेशः स्मृताः VāyuP. 69. 199 (ASS. Ed. 49, 1905)

अनाभिभू (an-ābhibhū) *adj.* having no superior तथागतोऽहं भगवाननाभिभूः संतारणार्थं इह लोकि जातः SaddhaPuṇ. 87.16; 121.29

[DBHS]

अनाभिभूत (an-ābhibhūta) *adj.* unconquered एतादृशः सो भगवान् भविष्यति ··· अनाभिभूतो द्विपदानमुत्तमः SaddhaPun. 50.8 [DBHS.]

अनाभिमुख्य (an-ābhimukhya) *n.* absence of being face to face प्रातःकालकरणं तत्काल एव कर्तव्यार्थम्, अन्तरस्य वा सवितुरपराङ्गेऽनाभिमुख्यात् ChāndoUBh. 76.18 (*on* i. 12.3)

अनाभिसंस्कारिक (an-ābhisaṁskārika) *adj.* not characterized by accumulation (of *karman*) आभिसंस्कारिकस्य हि सभागहेतोर्न्यूनं फलं नेष्यते। नानाभिसंस्कारिकस्य Sphuṭā. ii. 134.20 (*on* 2.53) [cf. आभिसंस्कारिक, DBHS.]

अनाभिसंस्कारिकत्व (anābhisaṁskārika-tva) *n.* the state of not being characterized by accumulation (of *karman*) अधिमात्राधिमात्रा मृदुमृदूनां यावदधिमात्राधिमात्राणां सभागहेतुः। न समविशिष्टानामेव। अनाभिसंस्कारिकत्वात् Sphuṭā. ii. 134.19 (*on* 2.53)

अनाभु (án-ābhu) *m.* epithet of Rudra (*lit.* not empty) अनाभो मृड धूर्ते नमस्ते(?स्ते) अस्तु रुद्र मृड MaiS. i. 8.5 (i. 121.10) (*but* pw., MW. अनाभू); शिष्ट्वा भूयिष्ठमनाभो मृड धूर्तेति समर्यासि निरुद्दङ्ङुदिशति MānŚS. 35.24 (*but* GELDER अनाभू, disobedient one); अनाभो मृड धूर्त इति निरुदीची सुचमुद्दरति VārāŚS. I. v. 2.40.

अनाभुक्त (an-ābhukta) *adj.* not enjoyed (before) (i. e. not worn or used) अनाघ्रातं पुष्पं किसलयमलूनं कररुहैरनाविद्धं (v.l. अनाभुक्तम्) रत्नं मधु नवमनास्वादितरसम्। ··· न जाने भोक्तारं कमिह समुपस्थास्यति विधिः Śāk. 2.10 (KALE Ed., 1969); ŚatTrayī. 203 (v.l.)

अनाभुव (an-ābhuva) AV(P.) xx. 59.4. [VIŚVA]?

अनाभू (án-ābhū) *adj.* not a follower, opponent आभूभिरिन्द्रः श्रथ्यन्ननाभुवः ṚV. i. 51.9 (Sāy. आभिमुख्येन भवन्तीति आभुवः स्तोतारः। तैः अनाभुवः तद्विपरीतान्); घ्नन्तु कृष्णामिव त्वचं सुभागमस्तु मे मुखम्। अनाभुरोऽस्यनाभुवे अनाभुवो भूयास्म AV.(P.) xx. 59.4 (*but* VIŚVA अनाभुव)

अनाभोग (an-ābhogá) *adj.* 1 having no enjoyment अनाभोगाः परं मृत्युम्। पापाः संयन्ति सर्वदा। आभोगास्त्वेव संयन्ति। यत्र पुण्यकृतो जनाः TaiĀ. i. 8.5 (56.3) (Sāy. अनाभोगाः सुखलेशेनापि हीनाः); 2 effortless, impassive, spontaneous अनाभोगमनाभ(?स)ङ्गमव्याघातं सदा स्थितम्। सर्वप्रश्नापनुद् बौद्धं प्रणिधिज्ञानमिष्यते AbhisaAlaṅ. 8.8; 4.28; तत्र कतमो बोधिसत्त्वानामनाभोगो निर्निमित्तो विहारः BodhiBhū. 239.3; 219.24; स हि रत्नमेघे ···अनन्तधर्मारामरतिनिरामिषापरान्तकल्पकोटयनाभोगनिर्विकल्पप्रीतिवेगालोकप्रतिलब्धः ··· पठ्यते ŚikṣāSa. 7.15 [DBHS.]; 3 not having *ābhoga* (*ābhoga* is the fourth or last part (*dhātu*) of a musical composition or *prabandha*) लम्भपदम्···अनुलम्भः ··· उपलम्भकः। एते त्रयोऽप्यनाभोगाः SaṁgīRa. ii. 265.6 (4.174) (Kalānidhi एते त्रयोऽपीति। लम्भपदानुलम्भोपलम्भाः। अनाभोगाः, न विद्यत आभोगो येषां ते तथोक्ताः। एतेन भेदान्तरेष्वाभोगः कर्तव्य इत्युक्तं भवति)

अनाभोग (an-ābhoga) *m.* 1 absence of effort, non-effort, impassivity कतमानि दश स्थानानि। ··· अनाभोगाभोगमात्रसर्वार्थसिद्धिविनिश्चयस्थानं च AbhidhSa. 104.6; प्रवेशायानिमित्ताय अनाभोगाय संभृतिः। अभिषेकाय निष्ठायै धीराणामुपचीयते। ·· सप्तम्यां भूमावनाभोगाय MaYānaSū. 140.8 (18.41); अनाभोग निरासङ्ग अव्याघात समाहित। सदैव सर्वप्रश्नानां विसर्जक नमोऽस्तु ते MaYānaSū. 184.21 (20.46) [DBHS.]; [Abl.] impassively यदुक्तमादावव्याकरणादित्यनाभोगादेतदनागतं भगवता न व्याकृतमिति कस्यचित् स्यात् MaYānaSū. 3.19 (1.7); [Inst.] impassively आभ्यां श्लोकाभ्यामनाभोगेन बुद्धकार्यं साधयति MaYānaSū. 37.12 (9.18-19); सर्वसत्त्वानामनाभोगेन सर्वार्थ(?न्त)रणसमर्थो निर्विकल्पकज्ञानविशेषात्मकः सुगतः MadhyāViṢaṬ. 5.10; समस्तकल्पनाजालरहितज्ञानसंततेः। तथागतस्य वर्तन्तेऽनाभोगेनैव देशनाः TattvSam. 1856; तेनादर्शनमप्याहुः सर्वे सर्वविदं जिनम्। अनाभोगेन निःशेषसर्ववित्कार्यसंभवात् TattvSam. 2050; 2 ignorance, indiscrimination अनाभोगः - अज्ञानम् SthānṬ. 43A.11; 313A.14; [name of a Yakṣa, DBHS.]

अनाभोगकारित्र (anābhoga-kāritra) *n.* effortless activity or action सर्वज्ञताधिकारधर्मदैशिकत्वेनानाभोगप्रवृत्तसत्त्वार्थोपसंहाराद्आश्रया भवन्तीत्यनाभोगकारित्रं तावत् कथयन्नाह AbhisaAlaṅĀ. 360.5.

अनाभोगक्रिया (anābhoga-kriyā) *f.* 1 effortless or spontaneous action अनाभोगक्रिया नास्ति क्रिया चेद्दृष्टिसंकरः LaṅkāSū. 10.694 (153.1); 2 action (of sitting or placing materials) without proper inspection and cleansing (of the floor), JainaL.

अनाभोगगत (anābhoga-gata) *adj.* which arrives effortlessly or spontaneously बोधिसत्त्वाः ··· । महाकरुणोपायकौशल्यानाभोगगतेन महामते प्रयोगेन ··· मायोपमसमाधिं प्रतिलभन्ते LaṅkāSū. 2.98 (19.26)

अनाभोगगति (anābhoga-gati) *f.* the state of non-striving (i. e. effortlessness) अनाभोगगतिः शान्ता प्रणिधानैर्विशोधिता LaṅkāSū. 10.258 (124.15)

अनाभोगचरि (anābhoga-cari) *f.* life of imagelessness विमाने पद्मसंकाशे मायागोचरसंभवे। तस्मिन् प्रतिष्ठितो भवत्यनाभोगचरिं गतः। करोति सत्त्वकार्याणि LaṅkāSū. 10.18 (108.9)

अनाभोगतस् (anābhoga-tas) *adv.* without effort, effortlessly तत्र चानाभोगतः प्रेमगौरवसिद्धिरित्येष सामान्यसंवरधर्मः ŚikṣāSa. 12.1 [DBHS.]

अनाभोगनिक्षेप (anābhoga-nikṣepa) *m.* placing (something) without proper inspection (of the floor), JainaL.

अनाभोगनिर्याण (anābhoga-niryāṇa) *n.* effortless deliverance आभोगे सत्यविकलसत्त्वार्थो न निष्पद्यत इत्यतोऽनन्तरमनाभोगनिर्याणं वक्तुमाह AbhisaAlaṅĀ. 103.13.

अनाभोगनिर्वर्तित (anābhoga-nirvartita) *adj.* brought about or caused by ignorance or lack of thought, JainaL.

अनाभोगप्रवृत्त (anābhoga-pravṛtta) *adj.* who proceeds effortlessly तत्र सर्वज्ञताधिकारधर्मदैशिकत्वेनानाभोगप्रवृत्तसत्त्वार्थोपसंहाराद्आश्रया भवन्ति AbhisaAlaṅĀ. 360.4.

अनाभोगप्रेक्षिका (anābhoga-prekṣikā) *f.* [Inst.] with impassive look बोधिसत्त्वः ··। न शनैर्मन्दं मन्दं क्रमानुत्क्षिपति न निक्षिपति युगमात्रप्रेक्षिकया सविश्वस्तप्रेक्षिकयानाभोगप्रेक्षिकया ŚikṣāSa. 268.1 [DBHS.]

अनाभोगबकुश (anābhoga-bakuśa) *adj.* (monk) who adorns his body and accessories indiscriminately शरीरोपकरणभूषयोः ··· सहसाकारी अनाभोगबकुशः SthānṬ. 337A.6.

अनाभोगबुद्धकार्य (anābhoga-buddhakārya) *n.* effortless or spontaneous activity of a Buddha तत्खलु पुनर्मैत्रेय धर्मचक्रम् ··· अनाभोगबुद्धकार्य(?र्या)प्रतिप्रश्रब्धचक्रम् LaliVi. 306.31; (तथागतः) अनाभोगबुद्धकार्याप्रतिप्रस्रब्धः MahāVyu. 19.61 [DBHS.]

अनाभोगमार्गवाहन (anābhoga-mārgavāhana) *adj.* travelling on the way without effort अनभिसंस्कारोऽनाभोगमार्गवाहनो निर्निमित्त एव विहारः BodhiBhū. 217.20.

अनाभोगयोगपूर्वक (anābhogayogapūrva-ka) *adj.* preceded by the action brought about by ignorance कर्मप्रत्ययमनाभोगयोगपूर्वकं करणविशेषमुत्पाद्य ··· कर्मापवर्तयति TattvāBh. (*on* 2.52) (comm. अत्यन्तापरिज्ञानमनाभोगः अनाभोगकृतो योगः योगः - चेष्टाविशेषः अनाभोगयोगः)

अनाभोगवत् (an-ābhogava(n)t) *adj.* indiscriminate, not mindful अनायुक्तः - अनाभोगवाननुपयुक्त इत्यर्थः SthānṬ. 43A.13.

अनाभोगवाहन (anābhoga-vāhana) *adj.* moving effortlessly or automatically (बोधिसत्त्वस्य ··· शमथः) पारमार्थिकसांकेतिकज्ञानफलं सर्वप्रपञ्चसंज्ञासु अनाभोगवाहनः BodhiBhū. 177.20.

अनाभोगवाहिन् (anābhogavāh-in) *adj.* moving without effort निष्क्रमणचित्तमनभिसंस्कारवाह्यनाभोगवाहीति युक्तोऽस्य निष्क्रमणचित्तस्य विपाकजादीनामन्यतमस्वभावस्य प्रायोगिकचित्तानन्तरमुत्पादः Sphuṭā. ii. 183.14 (*on* 2.72)

अनाभोगसंमुखीभाव (anābhoga-sammukhībhāva) *m.* the state of being face to face with impassivity अनाभोग निरासङ्ग ··· नमोऽस्तु ते। अत्र षड्भिराकारैः प्रणिधिज्ञानविशेषं भगवतः संदर्शयति। अनाभोगसंमुखीभावतः MaYānaSū. 184.23 (20.46)

अनाभोगात्मिका (anābhogātm-ikā) *adj.* (*f.*) of the nature of indifference or detachment प्रसंख्यानबलादनाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञा वैराग्यम् YogBh. 19.10 (*on* 1.15); न वैतृष्ण्यमात्रं वैराग्यमपि तु दिव्यादिव्यविषयसंप्रयोगेऽपि चित्तस्यानाभोगात्मिका। ··· वशीकारसंज्ञा TattvVai. 19.25 (*on* 1.15); विरागोऽनाभोगात्मिकोपेक्षाबुद्धिः Bhām. 52.18 (*on* i. 1.1) (VedāntKa. आभोगो मनस्कारः। आदर इति यावत्। अतदात्मिका); मुक्तोऽप्य(?प्य)नाभोगात्मिकया प्रख्यया सांसारिक इव विहरति Bhām. 638.3 (*on* iii. 3.32); अनाभोगात्मिकयेति। अविस्तारात्मिकया प्रख्यया प्रतीत्या दृढाभिमानेन रहितयेत्यर्थः VedāntKa. 445.2 (*on* iii. 3.32)

अनाभोगादिवर्जम् (anābhogādivarjam) *adv.* except (in the case of) ignorance etc. अनाभोगादिवर्जं च कथंचिज्जानता मया। अद्यप्रभृति न ग्राह्यो दोषः कस्यापि PārśvC. 2.992.

अनाभोगानिमित्तविहारिन् (anābhogānimitta-vihārin) *adj.* wandering impassively and aimlessly तथा शुद्धाध्याशयिनः साभोगानिमित्तविहारिणोऽनाभोगानिमित्तविहारिणो नियतचर्याप्रतिपन्नाः सम्यगेकजातिप्रतिबद्धाश्चेत्येवमप्रमेयमहाबोधिसत्त्वपर्षदपि ज्ञेया AbhisaAlaṅĀ. 14.13.

अनाभोगावस्थितता (anābhogāvasthita-tā) *f.* the state of remaining without effort or impassively उपेक्षा कतमा। -- या संक्लिष्टविहारवैरोधिकी चित्तसमता चित्तप्रशठता चित्तस्यानाभोगावस्थितता AbhidhSa. 6.24.

अनाभोगिक (anābhog-ika) *adj.* based on ignorance or indiscrimination मिथ्यादर्शनं च पञ्चधा — अभिग्रहिकानभिग्रहिकाभिनिवेशिकानाभोगिकसांशयिकभेदादुपाधिभेदतो बहुतरभेदं वेति SthānṬ. 27A.5; मिथ्यात्वम्। -- अनाभोगिकं विवेकविचारशून्यस्यैकेन्द्रियादेर्वा विशेषज्ञानविकलस्य KumāPraPra. 71.17.

अनाभ्याख्यायिक (an-ābhyākhyāyika) *adj.* who does not declare or cause ill fame, not bringing ill fame or calumny अशनयामेव तत्क्षुधं पाप्मानं ब्रह्महत्यामहते। अनाभ्याख्यायुकं (v. l. °ख्यायिकम्) हास्याक्रोशुकंभावुकं भवति, अस्मिंश्च लोकेऽमुष्मिंश्च य एवं वेद VādhūSS. iv. 60.12 [better v. l. would be अनाभ्याख्यायक]

अनाभ्याख्यायुक (an-ābhyākhyāyuka) *adj.* who does not declare or cause ill fame, not bringing ill fame or calumny अशनयामेव तत्क्षुधं पाप्मानं ब्रह्महत्यामपहते। अनाभ्याख्यायुकं हास्याक्रोशुकंभावुकं भवति अस्मिंश्च लोकेऽमुष्मिंश्च य एवं वेद VādhūSS. iv. 60. 12.

अनाभ्युदयिक (an-ābhyudayika) *adj.* not leading to prosperity, inauspicious कथमभिमुखमनाभ्युदयिकं श्रमणकदर्शनम् Mṛcch. 7.9(1)

[1]अनाम् (a-nām) (Gr.) other than the Genitive plural ending *nām* न पदान्तात्टोरनाम् P. viii. 4. 42; अनामिति किम्। षण्णां भवति काश्यपः। क्षत्वल्पमिदमुच्यतेऽनामिति। अनान्नवतिनगरीणां चेति वक्तव्यम्। षण्णाम् षण्णवतिः षण्णगरी MahāBh. iii. 463.18 (*on* viii. 4.42); टोः पदान्तेऽनाम्नगरीनवतेः ŚākaṭāVyā. i. 1. 140; णुणिकोऽध्यनामि MugdhaBo. 3. 92 (24. 12); अनामिति लुप्तषष्ठीकं पदम्। पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात् SiddhāKau. 28A. 4 (*on* viii. 4. 42)

[2]अनाम् (an-ām) (Gr.) other than the suffix *ām* which forms the periphrastic perfect कारितस्यानामिड्विकरणे Kātan. iii. 6. 44; अनामिड्विकरण इति किम्। कारयामास। कारयिता KātanVṛ. *on* iii. 6.44; अनाम्लादेशाः परस्मैपदानि SaraKaṇṭhā.(Gr.) i. 1. 23.

[1]अनाम (an-āma) *adj.* 1 who is without disease, free from disease प्रभावतो नामनवासवस्य प्रभावतो नाम नवासवस्य। प्रभावतोऽनाम न वा सवस्य विच्छित्तिरासीत्त्वयि विष्टपस्य Kāvyāda. 3. 63 (comm. हे अनाम नास्ति आमो रोगो यस्य यस्माद्वा तत्संबुद्धौ); Kāvyānu.(He.) 252.12; 2 not raw (i. e. properly cooked) क्षारम् …। अनामं चाप्यदग्धं च दर्विलिप्तमथोद्धरेत् Hastyāyur. 110.21 (1.15); पटोलम् … तैलेन सह पाचयेत्। ज्ञात्वादग्धमनामं च ततस्तदवतारयेत् Hastyāyur. 270.29 (2.50)

[2]अनाम (a-nāma) *adj.* who is without obeisance (i. e. who does not bow in obeisance before others), Kāvyāda. 3.63 (Prabhā अनाम नमनं नामः। न विद्यते नामः यस्य स अनामः। तत्संबुद्धिः।… शरणत्वेन अकृतप्रणाम इत्यर्थः) = Kāvyānu.(He.) 252. 12; NaiṣC. 3. 23; *m.* absence of bowing विवितततगगनानाममजजनाना (समुद्रतीरभूः) KāvyālaṅSū. iv. 1. 2 (39. 3); SaraKaṇṭhā. 210.13 (comm. अनामेन अनमनेन मजन्तो जना यस्यां सा)

अनामिका (anāmi-kā) *f.* [AltGr. II. i. 103] **1** ring-finger (*lit.* having no name) **2** toe next to the little toe **3** name of the second *śruti* of the *madhyamagrāma*, middle basic scale, in the lower octave **1** ring-finger (*lit.* having no name) पुनरङ्गुष्ठयो धिष्ण्या यथास्थानं कल्पन्तामित्यनामिकाङ्गुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृञ्ज्यात् ŚatBr. XIV. ix. 4.5: BṛĀraU. vi. 4. 5; श्रीविष्णुवल्लभाय अनामिकाभ्यां हुम् GāruU. 624. 5; यो वै भूमा अनामिकाभ्यां हुम् ŚukRaU. 258. 4 (1.18); 258. 19 (2.5); BhaviP. 385A. 2 (ii(2). 20(?19).170); TantrSā. (K.) 74. 8; परस्परं कनीयसेदं मध्यमाबद्धे अनामिके दण्डिन्यौ TripuTāU. 538. 4; जुहोमि। अनामिकयापाने PrāṇāU. 1. 6; तर्जनीमध्यमानामिकाभिः ... भस्म संगृह्य ... मूर्धन्यग्रे न्यसेत् BhasmJāU. 562. 3; ॐ महः नमो भगवते पातालगरुडहनुमते अनामिकाभ्यां नमः LāṅgU. 213.14; VaDuU. 426. 12; पुनरादाय देवस्य त्वेत्यनामिकाङ्गुष्ठाभ्यामन्नेऽङ्क्ष्वेति प्राश्नाति KātyŚS. ii. 2. 18; VaikhāŚS. 7. 1; LāṭyāŚS. iv. 11. 13 = DrāhyŚS. xii. 3. 12; VaitāSū. 3. 11; KauśiSū. 91. 5; प्रक्षाल्य पाणी हिरण्यं बध्नीतेऽनामिकायाम् KātyŚS. vii. 6.27; VaikhāŚS. 12. 17; KātyŚS. xvi. 3. 4; xvi. 6. 29; VaikhāŚS. 6. 10; 12. 10; 12. 12; तस्मिन्नङ्गुष्ठानामिके अवधायाक्षिणी विमार्जीत LāṭyāŚS. ii. 10. 11; DrāhyŚS. vi. 2.11; अनामिकया चाङ्गुष्ठेन च त्रिः प्रदक्षिणमालोड्य ĀśvaGS. i. 24. 14; अनामिकायाः सूर्यः कनिष्ठिकस्येन्द्र इत्यधिदेवता भवन्ति VaikhāGS. 1. 2; अनामिकोपान्ताभ्यां समृदोदकेन त्रिः प्रदक्षिणमावर्त्य शिरो मार्ष्टि VaikhāGS. 1.3; अग्निमुपसमाधाय बर्हिररत्निमात्रं षट्त्रिंशदङ्गुलं तिस्रः शम्याः परिधयो मध्यमाङ्गुल्यानामिकया कनिष्ठिकयेति ĀgniveGS. ii. 3.1 (55. 9); ii. 6. 1 (93.9); ii. 7.8 (115. 2); सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रयौति PāraGS. i. 3. 18; अनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं वा PāraGS. i. 16.4; iii. 10. 19; अङ्गुष्ठेनानामिकया चादाय कुमारं प्राशयेत् DrāhyGS. ii. 2.34; i. 2.14; उपकूलमकूले कूपं खात्वा सव्यहस्तस्यानामिकया सकृदुदकं प्रोहति JaimiGS. 2. 5 (30. 11); इयं वीरुदिति मधुवमणिं लाक्षारक्तेन सूत्रेण विग्रथ्यानामिकायां बध्नाति KauśiSū. 76.8; मध्यमानामिकाभ्यां तु स्पृशेन्नासापुटे क्रमात् ŚaṅkhaLiDS. 456; 457; 458; CaturCin. iii(1). 999. 1; BhaviP. 13A.13 (i. 3.82); अनामिकायां षड्जस्तु कनिष्ठायां तु धैवतः MāṇḍūŚi. 2. 2; NāraŚi. i. 7. 4; कनिष्ठिकानामिका च मध्यमा च प्रदेशिनी। नीचस्वारधृतोदात्तानङ्गुष्ठाग्रेण निर्दिशेत् KauhaŚi. 38; वक्रान्तानामिकाकेशनखरोमदशास्पृशः।... दूतास्ते चापि गर्हिताः SuśruS. i. 29. 10; पताके तु यदा वक्रानामिका त्वङ्गुलिर्भवेत् NāṭyaŚā. 9.28; अङ्गुष्ठेन प्रदेशिन्या ...। घ्राणं संस्पृश्य ... अनामिकया श्रुती BṛParāSm. 2. 33; 6.120; VṛHārīSm. 8. 264; अङ्गुष्ठानामिकाभ्यां तु श्रवणौ समुपस्पृशेत् ŚaṅkhaSm. 10. 8; BālamBha. i. 77. 5 (*on* 1. 21); अधोमुखे वामहस्ते मध्यमानामिके यदा। अङ्गुष्ठस्य तु संसक्ते कनिष्ठा तर्जनीद्वयम् JayāS. 8.28; मध्यमानामिकान्यूना मुष्टिवत्पाणिमध्यगाः JayāS. 8. 31; LakṣmīT. 34. 31; तर्जन्यौ दण्डवत्कृत्वा मध्यमोपर्यनामिके BrahmāṇḍP. iii. 42.4; यन्मेऽद्य रेत इत्याभ्यां स्कन्नं रेतोऽभिमन्त्रयेत्। स्तनान्तरं भ्रुवोर्मध्यं तेनानामिकया स्पृशेत् YājñaSm. 3. 278; पञ्चाङ्गुलानि मध्या प्रदेशिनी मध्यपर्वदलहीना। अनया तुल्या चानामिका कनिष्ठा तु पर्वोना (प्रतिमायाः) BṛSaṁ. 58. 27; अङ्गुष्ठतर्जनीमध्याः पूर्वदक्षिणपश्चिमाः। उत्तरानामिका चेति दिशो ज्ञेया अनुक्रमात् NāgaSa. 6.3; 36.2; शरयुगयवाधिकांशानामिकातर्जनीयौ MānaSā. 61. 29; उपस्पृशेत्। अङ्गुष्ठानामिकाभ्यां च चक्षुः श्रोत्रं पुनः पुनः GobhiSm. 1. 6; DakṣaSm. 2. 24; BṛDharmaP. ii. 4.42; अनामिकया चादाय नवनीतं तथा दधि LaghvāśvaSm. 9.10; अङ्गुष्ठानामिकाभ्यां तु हृदयेन समुद्धरेत् PāraS. 7. 22; ParaS. 14. 6; न याति भूतम् ... कलङ्कमुक्तं तनुमध्यनामिका Kāvyāda. 3. 59 = SaraKaṇṭhā. 218.12; संयोज्य ...। कन्यसानामिके चैषा धेनुरीशप्रदर्शिनी MṛgendraT. ii. 5. 8; कनिष्ठानामिके देवि युक्त्वा तेन क्रमेण तु। तर्जनीभ्यां समाक्रान्ते ...। इयं सा खेचरी नाम मुद्रा NityāṢoḍa. 3.16; तर्पयेदलिबिन्दुभिः। अङ्गुष्ठानामिकाभ्याम् KulārT. 6. 95; मध्यमां धनदां विद्यात् शान्तिकर्मण्यनामिका KulārT. 15. 52; कनिष्ठिकानामिका। स्वमध्यमवराङ्गुलात्मपरिणाहसंस्कारितानि KalyāKā. 8. 49; दक्षानामिकायामङ्गुलीयकम् PārāSū. 5. 18; 43.17; अनामिकाकनिष्ठमध्यमातर्जन्यो वा एताश्चतस्रस्त्रिपर्वाः PārāSū. 55. 22; मध्यानामिकयोर्मध्ये यत्पर्वणी ते उभे मेरुर्भवत्येतस्याः PārāSū. 55. 23; कृताञ्जली करौ कृत्वा व्यत्यस्येत्तदनामिके TantrRā. 4.33; कनिष्ठानामिकयोः पृष्ठे स्यादङ्गुष्ठः TantrRā. 4.39; अस्त्वनामिके भुग्ने तर्जन्यावङ्कुशाकृती TantrRā. 4.47; मध्यमानामिकाभ्याम् ...। चैव समिधां परिहोमयेत् LakṣmīT. 49.18; अनामिका शान्तिदोक्ता SkandP. ii(5). 3. 19; LiṅgaP. i. 85. 114; ŚivaP. vii(2). 14. 39 (560B. 12); अस्यैकानामिका वक्रा त्रिपताका तथा भवेत् ViṣṇuDhaP. iii. 26. 17; मध्यमानामिकयोरङ्गुष्ठयोश्चाग्रयोगे चक्रः ViṣṇuDhaP. iii. 32. 0 (328A.6); iii.

32.0 (328A.15); तर्जनीमध्यमयोर्मध्यमानामिकयोर्वा मध्येनाङ्गुष्ठं निष्काश्य बद्धा मुष्टिर्विद्धा JayaMa. 153.9 (*on* 2.7); SamarāSū. 83.47; अनामिका वक्रा कनीयसी AbhinBhā. ii. 32.10 (*on* 9.28); करशाखां तथाङ्गुष्ठमध्यमानामिकां न्यसेत् LiṅgaP. ii. 22.16; अनामिका तथा सूर्यः (प्रोक्तः) BhaviP. 13A.19 (i. 3.85); अङ्गुष्ठानामिकाभ्यां च ··· रेखामथ च योजयेत् BhaviP. 373A.24 (ii(2). 14(113).17); अङ्गुष्ठानामिकाभ्यां तु स्पृशेच्चक्षुर्द्वयं ततः PadmP. i. 52.21; SaurP. 17.21; अनामिकायां तु धृत्वा स्वर्णाङ्गुलीं बुधः । तर्पयेत् पितृसंदोहन् PadmP. v. 46.57; मध्यानामिकयोस्तु नाहसदृशाः शस्ताः कनिष्ठाधमाः ĪśānŚiPa. i. 7.9 = ii. 9.9; कनिष्ठानामिकामध्यासंश्लेषान्मोहनी भवेत् ĪśānŚiPa. i. 21.156; मध्यमानामिकाभ्यां च तदङ्गुष्ठं निपीडयेत् MālinīT. 7.19; कनिष्ठानामिकामध्यास्ता-(स्ता)सामूर्ध्वं प्रदेशिनी । अङ्गुष्ठ ऊर्ध्वतस्तासां कर्तव्योऽसौ क्रमेण तु Mānaso. iii. 1.532; मुद्रा । तथापरा तर्जनिमध्यमे स्यादनामिकामध्यमिके च मध्या PañcaRā. (Nā.) iii. 8.18; अनामिकाभ्यां नमः PañcaRā.(Nā.) iv. 3.8(9); अनामिका उपकनिष्ठिका Aparā. 41.4 (*on* 1.21); SmṛtiCan. ii. 258.4; ii. 285.17; CaturCin. iii(1). 635.16; एकैकमस्थिखण्डमङ्गुष्ठानामिकाभ्यां गृहीत्वा ··· पुंसः कुम्भे ··· अवदध्युः HārLa. 185.6; अस्मिन्ना(?न्ना)मिकाङ्गुष्ठौ श्लिष्टौ चान्याः प्रसारिताः । मयूरहस्तः कथितः AbhinDa. 108; मध्यमानामिकाभ्यां तु बहिर्यातोऽत्र संधितः SaṁgīRa. iii. 240.15 (6.73); दक्षिणस्यानामिकया नमस्यावेति मन्त्रेण मधुपर्कं त्रिः प्रयौति CaturCin. i. 144.23; अङ्गुष्ठतर्जनीमध्यानामिकासु ···। न्यसेद् न्यासोक्तविधिना साधकः MahNirvāT. 3.41; मध्यमानामिकाङ्गुष्ठैरङ्गुल्यग्रेण पार्वति । दद्याच्च विमलं गन्धं मूलमन्त्रेण साधकः TantrSā.(K.) 54.4; कनिष्ठानामिकामध्यमास्तां तु पृष्ठे च विन्यसेत् TantrSā.(K.) 76.1; Kuval. 164(3); अनामिका तर्जनीवत् कनिष्ठा षड्यवोन्मिता ŚilpaRa. ii. 5.33; त्रिपर्वी तर्जनीमध्यमानामिकानां चरमपर्वरूपा VīraMi. 37.6 (*on* 1.17); एकीकृत्य । तिसृभिः तर्जनीमध्यमानामिकाभिः VīraMi.(Āhnika.) 85.16; अनामिकायां त्रिविक्रमाय नमः VīraMi. (Pūjā.) 131.5; त्रैलोक्यरक्षणचक्राय स्वाहा अनामिकाभ्यां नमः VīraMi.(Bhakti.) 87.5; BālamBha. i. 19.15 (*on* 1.11-12); अनामिका कनीनिकासमीपाङ्गुलिः VīraMi.(Saṁskāra.) 193.20; अनामिकाकवचाय हुम् NityoNi. 19.6; [PañcTaPra. 7.12 gives *anāmikā* as a synonym of *anāmā*]; **2** toe next to the little toe पतति भुवि कनिष्ठानामिका वा द्वयं वा न यदि, वरणकृत्ये कन्यका वर्जनीया RatiRaha. 11.7; अनामिका च मध्या च यस्या भूमिं न संस्पृशेत् SkandP. iv. 37.20; पादे अनामिका यस्याः क्षितिं न स्पृशते यदि । द्वितीयं पुरुषं हत्वा तृतीये सा प्रतिष्ठिता BhaviP. 61B.1 (i. 28.22); (चित्रगतशरीरस्य पादस्य) आयामोऽनामिकायाश्च यवा विंशतिरिष्यते Mānaso. iii. 1.336; अङ्गुष्ठादधिका भवेत्तदुपगा पादे तथानामिका AnaṅgaRa. 8.5; **3** name of the second *śruti* of the *madhyamagrāma*, middle basic scale, in the lower octave [BharataK.]

अनामिकाग्र (anāmikāgra) *n.* tip of the ring-finger स्पृशंस्त्वनामिकाग्रेण कंचिदालोकयन्नपि । अनुमन्त्रणीयं सर्वत्र सदैवमनुमन्त्रयेत् GobhiSm. 3.151; अङ्गुष्ठानामिकाग्राभ्यां चक्षुःश्रोत्रे ··· उपस्पृशेत् SkandP. iv. 35.72; मध्याग्रेऽर्कोऽनामिकाग्रे सुरेन्द्रः ĪśānŚiPa. i. 9.49 = ii. 3.45; मध्यमानामिकाग्राभ्यामङ्गुष्ठो मिश्रितो यदि । शेषौ प्रसारितौ यत्र स सिंहास्यकरो भवेत् AbhinDa. 142; कनिष्ठां दक्षिणां वामेऽनामिकाग्रे नियोजयेत् MālinīT. 7.33; ŚilpaRa. ii. 16.31.

अनामिकाग्रक (anāmikāgraka) *n.* tip of the ring-finger वामे तु परहस्ते तु विस्मयं परिकल्पयेत् । उष्णीषान्तं समुद्धृत्य विस्मयेऽनामिकाग्रकम् ŚilpaRa. ii. 22.172.

अनामिकाग्रतस् (anāmikāgra-tas) *adv.* from the tip of the ring-finger (अङ्गुष्ठेन) तेनाक्रामेत्प्रथममनामिकापर्वमूलतः ··· पञ्चममनामिकाग्रतः PārāSū. 55.25.

अनामिकाङ्गुल (anāmikāṅgula) *n.* ring-finger अनामिकाङ्गुलस्याद्यद्वितीयपर्वायतम् (?)। दक्षिणस्य करस्याङ्गुर्मिलित्वा मानसाधनम् ŚilpaRa. ii. 35.20.

अनामिकाङ्गुलायत (anāmikāṅgulāyata) *n.* length of the ring-finger सप्तांशं तत्तलायामं सार्धाङ्गैर्मध्यमाङ्गुलिः । सपादभूतभागं स्यादनामिकाङ्गुलायतम् ŚilpaRa. ii. 5.30.

अनामिकाङ्गुलि (anāmikāṅguli) *f.* ring-finger (गोपीचन्दनम्) गृहस्थो ललाटादिस्थलेष्वनामिकाङ्गुल्या विष्णुगायत्र्या केशवादिद्वादशनामभिर्वा धारयेत् GopīU. 66.11; VāsuU. 405.27; वृष्टिरसीत्यप उपस्पृश्य पूपासीति द्विरनामिकाङ्गुल्याशिअन्नतिहाय दतः प्राश्याचम्य पुनः प्राश्नाति VaikhāŚS. 2.5; मध्यमानामिकाङ्गुल्योर्मध्ये तु प्रतिलोमतः । अङ्गुष्ठेन कृता रेखा त्रिपुण्ड्रस्याभिधीयते SkandP. iii(3). 16.42; ViṣṇuDhaP. iii. 26.26; (वंशवादनम्) अन्यथा वर्णयन्तीह केचित् सप्तस्वरोदयम् ।··· वामस्यानामिकाङ्गुल्या षड्जो मध्यमया पुनः SaṁgīRa. iii. 326.2 (6.448) [NānārthāSaṁ. gives *anāmikāṅguli* as the meaning of *sāvitrī*, ii. 217.1952]

अनामिकाङ्गुलिनाह (anāmikāṅguli-nāha) *adj.* having the circumference (i.e. thickness) of the ring-finger अनामिकाङ्गुलिनाहा मुख्याः कनिष्ठिकाङ्गुलिनाहा मध्यमा न्यूननाहा गौणाः ।– परिधयः VaikhāŚS. 11.11.

अनामिकाङ्गुलिमूल (anāmikāṅguli-mūla) *n., m.* root of the ring-finger यस्य चायुर्लेखा अनामिकाङ्गुलिमूलादूर्ध्वा याति स धर्मरतो ज्ञेयः VīraMi. (Lakṣaṇa.) 19.10.

अनामिकाङ्गुष्ठ (anāmikāṅguṣṭha) *n.* [P. ii. 4.2] ring-finger and thumb (held together) अनामिकाङ्गुष्ठेन च त्रिर्निरूक्षयति PāraGS. i. 3.19.

अनामिकाङ्गुष्ठग्राह्य (anāmikāṅguṣṭha-grāhya) *adj.* to be grasped between the ring-finger and the thumb आहुतिग्रहणमनामिकाङ्गुष्ठग्राह्यात्रग्रहणार्थम् VīraMi.(Āhnika.) 467.5.

अनामिकाङ्गुष्ठभिन्न (anāmikāṅguṣṭha-bhinna) *adj.* other than the ring-finger and the thumb नाङ्गुल्या धावयेत् ··· अत्राङ्गुलिपदमनामिकाङ्गुष्ठभिन्नाङ्गुलिपरम् VīraMi. (Āhnika.) 128.14; BālamBha. i. 319.12 (*on* 1.98)

अनामिकाङ्गुष्ठमान (anāmikāṅguṣṭha-māna) *n.* measure (of length or span) between tips of the ring-finger and the thumb गोकर्णोऽनामिकाङ्गुष्ठमाने NānārthSaṁ. 32.18; AnekāTi. 3.101.

अनामिकाङ्गुष्ठव्यतिरिक्त (anāmikāṅguṣṭha-vyatirikta) *adj.* (fingers) other than the ring finger and the thumb 'न दन्तकाष्ठान् पादयेत्त्वाङ्गुलीभिर्दन्तान् प्रक्षालयेत्' इति । एतदनामिकाङ्गुष्ठव्यतिरिक्तविषयम् SmṛtiCan. ii. 281.12.

अनामिकाङ्गुष्ठोन्मान (anāmikāṅguṣṭhonmāna) *n.* measure (of length or span) between the ring-finger and the thumb अनामिकाङ्गुष्ठोन्मानगतश्च पुंसि गदितो गोकर्ण एवं बुधैः KośaKaTa. 2.4965.

अनामिकातस् (anāmikā-tas) *adv.* as compared to the ring-finger कनिष्ठिकानामिकातोऽङ्गुलोना च प्रकीर्तिता ŚukraNī. 4(4).103.

अनामिकात्रय (anāmikā-traya) *n.* three joints of the ring-finger अनामिकात्रयं पर्व कनिष्ठा च त्रिपर्विका । मध्यमायाश्च त्रितयं तर्जनीमूलपर्वणि TantrSā.(K.) 18.6.

अनामिकादि (anāmikādi) *adj.* ring-finger etc. (श्रीपाञ्चरात्रप्रामाण्यम्) तत्रिष्ठा स्यात् कनिष्ठा, नमति न विदुषोऽनामिकादिः परस्मै TattvMu. 4.123.

अनामिकाद्वय (anāmikā-dvaya) *n.* **1** pair of ring-fingers कुर्यात्तादृग्विधं बन्धं तं त्यक्त्वानामिकाद्वये JayāS. 8.73; पाणिद्वये पुरा । संलग्नमग्रेश तु प्रोन्नतं मध्यमायुगम् । प्रदेशिनीयुगं तद्वत्तथैवानामिकाद्वयम् LakṣmīT. 34.70; बद्धाञ्जलिं तु हस्ताभ्यां निगृह्यानामिकाद्वयम् ।··· द्रव्यमुद्रा प्रकीर्तिता ĪśānŚiPa. ii. 7.15; **2** two joints of the ring-finger अनामिकाद्वयं पर्वकनिष्ठा च त्रिपर्विका TantrSā.(K.) 18.13.

अनामिकाद्वयसंघट्ट (anāmikādvaya-saṅghaṭṭa) *m.* close contact of the two ring-fingers रोचनाचन्दनस्य मङ्गल्यतिलकादिना स्वीकारादिकं व्याचष्टे । रोचनया अरुणरुचिर्लक्ष्यते, तत्रानामिकाद्वयसंघट्टेनाभिनयः AbhinBhā. ii. 33.22 (*on* 9.32)

अनामिकानिविष्ट (anāmikā-niviṣṭa) *adj.* put on the ring-finger प्रभुः (रामः) ··· विससर्ज विभूषणं च हैमं निजनामाङ्कमनामिकानिविष्टम् RāmC. 8.19.

अनामिकान्तम् (anāmikāntam) *adv.* up to the ring-fingers मिथस्संमुखासक्तयोः पाण्योः कनिष्ठाद्वययोगेन शेषाङ्गुलिभिरलये अङ्गुष्ठद्वयमारभ्यानामिकान्तं यावत् द्विमुखत्रिमुखचतुर्मुखपञ्चमुखा नाम मुद्रा भवन्ति SmṛtiCan. ii. 387.18.

अनामिकान्तिम (anāmikāntima) *adj.* last (i.e. the uppermost joint) of the ring-finger अनामिकान्तिमं पर्व समानीता कनिष्ठिका ।··· येषां ते चिरजीविनः VīraMi.(Lakṣaṇa.) 20.23; कनिष्ठिका अनामिकान्तिमं पर्व समानीता अन्तिमपर्वस्पृष्टा VīraMi.(Lakṣaṇa.) 20.25.

अनामिकान्वया (anāmikānvayā) *adj.* (*f.*) connected with the ring-finger संश्लेऽप्यु(?प्यू)र्ध्वभागे तु मध्यमानामिकान्वया ।··· कटको हस्त उच्यते AbhinDa. 168.

अनामिकापरीणाह (anāmikā-pariṇāha) *m.* girth or circumference of the toe next to the little toe (चित्रगतशरीरस्य पादस्य) अनामिकापरीणाहः कार्योऽष्ट(ष्टा)दशभिर्यवैः Mānaso. iii. 1.337; ŚilpaRa. ii. 8.119; *n.* girth of the ring-finger (चित्रगतशरीरस्य भुजस्य) अनामिकापरीणाहं त्र्यङ्गुलं परिकीर्तितम् । अनामिकापरीणाहाद् द्वियवोना कनिष्ठिका Mānaso. iii. 1.362.

अनामिकापर्वन् (anāmikā-parvan) *n.* joint of the ring-finger अनामिकापर्वं यदा विलङ्घयते कनिष्ठिकाग्रेण शतं स जीवति VīraMi.(Lakṣaṇa.) 20.17; 20.21.

अनामिकापर्वमूलतस् (anāmikāparvamūla-tas) *adv.* from the root-joint of the ring-finger प्रथममनामिकापर्वमूलतः ।··· गणयति PāraSū. 55. 24.

अनामिकापृष्ठसंलग्ना (anāmikāpṛṣṭha-saṁlagnā) *adj.* (*f.*) closely attached to the back of the ring-finger तयोरधः कनिष्ठिकं व्यत्यस्ते अनामिकापृष्ठसंलग्ने स्थापयेत् SetuBa. 131. 1.

अनामिकाप्रान्ताधिक्य (anāmikāprāntādhikya) *n.* the state of going beyond the extremity (i. e. the first joint) of the ring-finger आयुर्लेखायाः अनामिकाप्रान्ताधिक्ये पञ्चायुर्ज्ञेयम् VīraMi.(Lakṣaṇa.) 18. 16.

अनामिकामध्यगता (anāmikāmadhya-gatā) *adj.* (*f.*) touching or reaching the middle (portion) of the ring-finger अनामिकामध्यगते तथैव हि कनिष्ठिके BrahmāṇḍP. iii. 42. 17 = NityāṢoḍa. 3. 27.

अनामिकामध्यदेश (anāmikā-madhyadeśa) *m.* middle part of the ring-finger अनामिकामध्यदेशादधोऽवामक्रमेण च । तर्जनीमूलपर्यन्तं जपस्यैष क्रमः करे BrahmVaiP. ii. 23. 18; प्रजपेत् प्राङ्मुखो द्विजः । अनामिकामध्यदेशादधोऽवामक्रमेण DevīBhāP. ix. 26. 18.

अनामिकामध्यमाङ्गुलिपरिणाह (anāmikāmadhyamāṅguli-pariṇāha) *adj.* having the circumference of the ring-finger and the middle finger सांवत्सरिकाष्टद्विरष्टवर्षाणां पञ्चदशाङ्गुलप्रमाणानि कनिष्ठिकानामिकामध्यमाङ्गुलिपरिणाहानि ··· विदध्यान्नेत्राणि (बस्तेः) SuśruS. iv. 35. 7.

अनामिकामूल (anāmikā-mūla) *n.* root of the ring-finger तर्जन्याद्यास्तत्र श्लिष्टाः कनिष्ठा प्रसृता यदि । अङ्गुष्ठोऽनामिकामूले तिर्यक् चेच्चतुरः करः AbhinDa. 150.

अनामिकामूलपरिधि (anāmikāmūla-paridhi) *m.* circumference of the bottom-portion (*lit.* root) of the ring-finger तर्जन्यनामिकामूलपरिधिस्सार्धत्र्यङ्गुलः ŚukraNī. 4(4). 125.

अनामिकामूलपर्व (anāmikā-mūlaparva) *n.* root-joint of the ring-finger नखद्विगुणमानं तदग्रपर्वायतं तथा ।··· तर्जन्यनामिकामूलपर्व षोडशभिर्यवैः ŚilpaRa. ii. 5. 37.

अनामिकायाम (anāmikāyāma) *n.* length of the ring-finger सयवत्र्यंशकं चैवानामिकायाममिष्यते MānaSā. 65. 13.

अनामिकायुग्म (anāmikā-yugma) *n.* pair of the ring-fingers अस्यास्त्वनामिकायुग्ममधः कृत्वाङ्कुशाकृति BrahmāṇḍP. iii. 42. 10 = NityāṢoḍa 3. 13; प्रक्षिप्यानामिकायुग्मं तर्जनीयुगलं तथा । मुद्रैषा कामधेन्वाख्या LakṣmīT. 34. 89.

अनामिकारक्त (anāmikā-rakta) *n.* blood from the ring-finger चूर्णं शिरसि विकीर्णमनामिकारक्तमिश्रमपि तादृक् (वशीकरणम्) RatiRaha. 14. 36.

अनामिकावर्ज्य (anāmikā-varjya) *adj.* in which the ring-finger is to be excluded (आलापिनी वादनप्रकारम्) वामस्यानामिकावर्ज्यास्त्रयः स्युः पञ्चमादयः SaṁgīRa. iii. 284. 5 (6. 254)

अनामिकाविशेषण (anāmikā-viśeṣaṇa) *n.* qualifier of the word *anāmikā* कनिष्ठाङ्गुष्ठयोर्विते इत्यनामिकाविशेषणम् SetuBa. 125. 30.

अनामिकावेष्टन (anāmikā-veṣṭana) *adj.* which encircles the ring-finger (पुवः संज्ञायाम्) पवित्रम् । येनाज्यमुत्पूयते, यच्चानामिकावेष्टनम् SiddhāKau. 515B. 21 (*on* iii. 2. 185)

अनामिकाष्टभाग (anāmikāṣṭabhāga) *m.* one-eighth part of the ring-finger अनामिकाष्टभागेन कनिष्ठा चापि हीयते MatsyaP. 258. 49.

अनामिकासदृशस्थूल (anāmikāsadṛśa-sthūla) *adj.* as thick as the toe next to the little toe पादाङ्गुष्ठसदृशस्थूलः अष्टवितस्तिर्दण्डस्तदूर्ध्वमनामिकासदृशस्थूलाः ··· त्रयः शूलाः PāraSū. 38. 23.

अनामिकासमा (anāmikā-samā) *adj.* (*f.*) equal to the ring-finger रेखाः ··· स्युः ···। द्विहस्तेऽङ्गुष्ठमात्रा वा हस्ते वानामिकासमाः ĪśānŚiPa. ii. 8. 49.

अनामिकासमायोग (anāmikā-samāyoga) *m.* contact with the ring-finger तर्जनीमध्यमामध्ये यत्र पुङ्खः प्रपीड्यते । अनामिकासमायोगान्मुष्टिः स्यादेकलव्यकः Mānaso. iv. 1. 122.

अनामिकासाहचर्य (anāmikā-sāhacarya) *n.* association with (the word) *anāmikā* अन्ये तु स्कन्नस्य रेतसोऽशुचित्वेन स्पर्शकर्मण्ययोग्यत्वात्तेनेत्यनामिकासाहचर्यात् स्वबुद्धिस्थाङ्गुष्ठपरत्वेन व्याचक्षते Mitā. 473. 19 (*on* 3. 278)

अनामिकास्थूलवर्ति (anāmikāsthūla-varti) *f.* wick as thick as the ring-finger आज्येनानामिकास्थूलवर्तिं प्रज्वाल्य ··· देवीं ध्यात्वा विधिवदर्चयेत् KulārT. 10. 76.

अनामिकोपरि (anāmikopari) *adv.* on the ring-finger मध्यमे अनामिकोपरि विन्यस्य कनिष्ठिकाङ्गुष्ठतोऽधीते TripuTāU. 537. 29.

अनामिक्ष्य (an-āmikṣya) *adj.* not meant for *āmikṣā* (i. e. coagulated milk) आमिक्षीयमनामिक्ष्यात् ··· अत्यशेत DvyāśraKā. 17. 123 (comm. शृते क्षीरे दधि क्षिप्तमामिक्षा तस्यायिदं दध्यामिक्षीयमनामिक्ष्यात्सकाशादतिशेते)

अनामितत्व (anāmita-tva) *n.* the state of not being caused to bend or bow down (before anyone) श्रीमाधवस्य राज्ञः (मूर्धशेखरप्रसूनरेणुप्रकरः) उच्चैस्तर उन्नततरः । सार्वभौमतया केनाप्यनामितत्वादिति भावः AlaṅkāMañ. 72. 15.

अनामितर्जनीन्यूनशाखा (anāmi-tarjanī-nyūnaśākhā) *f.* the ring-finger, the index finger and the little finger अनामितर्जनीन्यु(? न्यू)नशाखानां तु क्रमेण तु । अर्धार्धाङ्गुलहीनं स्यात् PāraS. 16. 315.

अनामिन् (á-nāmin) *adj.* [a-nāmín in TaiBr.] **1** unbending, invincible शुचिमर्कैर्बृहस्पतिमध्वरेषु नमस्यत । अनाम्योज आ चके RV. iii. 62. 5; अस्मा॑कमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यम् RV. vi. 8. 6 = TaiS. I. v. 11. 2; MaiS. iv. 11. 1 (iv. 161. 5) = KāṭhS. 4. 16 (i. 43. 15); अध्वरेषु नमस्यत । अनाम्योज आचके TaiBr. II. iv. 6. 4; **2** (Gr.) vowels that do not cause retroflection (i. e the vowels *a* and *ā*) रेफप्रकृतिर्विसर्जनीयो नामिनः परोऽनामिनः परोऽपि KātanVṛ. *on* i. 5. 14.

अनामिपर (anāmi-para) *adj.* which follows after the vowels *a* or *ā* रप्रकृतिरनामिपरोऽपि Kātan. i. 5. 14.

अनामिश्रण (an-āmiśraṇa) *n.* non-mixing up शब्दस्य आभासान्तरैः देशकालादिरूपैः — आमासमात्रे प्रवर्तते — ततो देशकालाभासयोः ··· अनामिश्रणात् PratyabhiVi. ii. 75. 8 (*on* ii. 3. 2); ईदृशयोः देशकालाभासयोः अनामिश्रणात् — मिश्रीभावाभावात् Bhāsk. ii. 75. 23 (*on* ii. 3. 2)

अनामिश्रवाद्य (anāmiśra-vādya) *n.* stroke(s) not mixed up (with the sound of drums of other types) अष्टावसंकराः । दर्दुरवाद्याक्षराणामेवं संकरः । तेन कृता शुद्धिः । अनामिश्रवाद्यम् AbhinBhā. iv. 425. 25 (*on* 34. 90)

अनामिष (an-āmiṣa) *adj.* [*f.*-ā] **1A** unprofitable, unattractive अनामिषमिदं कर्म कथं वा मन्यते भवान् MahāBhā. iii. 255. 38; **1B** not containing an allurement अनामिषा अनिःश्रितलाभसत्कारा लोके MaYānaSū. 79. 3(12. 7); **2** who has not (brought) any meat or flesh गतसूर्येऽहनि प्राप्तो मम पुत्रो ह्यनामिषः Rāmā. iv. 58. 10; **3** in which (eating of) flesh or meat is excluded तत्र बान्धवभूतस्य गुरोः शासनतो मया । अनामिषं व्रतं शुद्धं गृहीतं क्षुद्रशक्तिना PadmP.(Ra.) 30. 46; *n.* other than meat (i. e. not belonging to the category of meat, vegetarian food) धान्ये मसूरिका प्रोक्ता गवां दुग्धमनामिषम् PadmP. iii. 21. 17.

अनामिषत्व (anāmiṣa-tva) *n.* the state of being devoid of allurement औदार्यानामिषत्वं च महार्थाक्षयतापि च । दानादीनां समस्तं हि ज्ञेयं गुणचतुष्टयम् MaYānaSū. 109. 16 (16. 42)

अनामिषभ्रम (anāmiṣa-bhrama) *m.* delusion or mistaken notion of (food with meat) being meatless (वारयात्रिकाः) यथामिषे जगुरनामिषभ्रमं निरामिषे चामिषमोहमूहिरे NaiṣC. 16. 81.

अनामिषाशन (an-āmiṣāśana) *n.* non-eating of meat यथामति ब्राह्मणानां धर्मान् वक्ष्यामि शाश्वतान् ।··· अनामिषास(? श)नं चैव तपस्या देवपूजनम् । धैर्यं चानशनं चैव BṛDharmaP. ii. 2. 4.

अनामुक्त (an-āmukta) *adj.* A (jewel) not put on or worn अनामुक्तं रत्नं मधु नवमनास्वादितरसम् ।·· न जाने भोक्तारम् Śāk. 2. 11 = SaraKaṇṭhā. 426. 9 (v. 1.) = Subhāṣi. 1332; **B** not covered with, unoccupied अस्य किल महात्मनस्तिलमात्रमपि नोपलक्ष्यते शरीरावयवेषु यदनामुक्तमग्राम्यैर्वीरव्रणकिणाभरणैः AvantiKa. 145. 18.

अनामुखा (an-āmukhā) *adj.* (*f.*) not presenting (itself) before, not present, not at hand आमुखा अन्तिके समवहितप्रत्ययत्वात् । अनामुखा दूरे विपर्ययात् MaYānaSū. 50. 11 (10. 2)

अनामृण (an-āmṛṇá) *adj.* [AitGr. II. 1. 181] invulnerable, not having any enemy (who can do injury) (इन्द्रः) अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः RV. i. 33. 1.

अनामृत (án-āmṛta) *adj.* not affected by death (i. e. imperishable, immortal) इष्टकेन वै असा अनामृतमिच्छन्तो नाविन्दन् ते देवाः TaiS. V. ii. 3. 1; KāṭhS. 20. 1 (ii. 18. 10); KapiKaS. 31. 3 (150. 5); अनामृत एवाग्निं चिनुते TaiS. V. ii. 3. 2; यत्पृथिव्यां अनामृतं संबभूव त्वे सचा KāṭhS. 7. 12 (i. 74. 19); KapiKaS. 6. 2 (60. 17); BaudhŚS. i. 59. 3; BhārŚS. v. 5. 5; ĀpaŚS. v. 9. 8; MānŚS. 31. 16; VārāŚS. I. iv. 3. 1; HirŚS. iii. 3. 27 (308. 1); यदन्तरिक्षस्य यद्दिवो अनामृतं संबभूव त्वे सचा KāṭhS. 7. 12 (i. 74. 21); KapiKaS. 6. 2 (60. 19); अस्या अनामृतं यदीयं तदेतदुत्सर्पति

यदेवास्या अनामृतं यज्ञीयं तस्मिन् जुहोति KāṭhS. 22.6 (ii. 61.14-15); KapiKaS. 34.1 (175.4-5); यदस्यै पृथिव्या॒ऽअनामृतं देवयजनं तच्चन्द्रमसि निदधामहै ··· स यदस्यै पृथिव्याऽअनामृतं देवयजनमासीत्तच्चन्द्रमसि न्यदधत ŚatBr. I. ii. 5.18; ŚatBr.(K.) II. ii. 3.17; MantrBr. i. 5.11 (Sāy. अनामृतम् अमृतममरणधर्मकम्); अन्वाहार्यपचनस्यायतने निवपति यदन्तरिक्षस्यानामृतं संबभूव त्वे सचा BaudhŚS. i. 59.15; BhārŚS. v. 5.6; VārāŚS. I. iv. 3.7; HirŚS. iii. 3.28 (308.5); आहवनीयस्यायतने निवपति यद्दिवोऽनामृतं संबभूव त्वे सचा BaudhŚS. i. 59.20; BhārŚS. v. 5.7; VārāŚS. I. iv. 3.22; HirŚS. iii. 3.28 (308.6); VaikhāŚS. 1.9.

अनामृशत् (an-āmṛśat) *adj.* not touching अनामृशन्तः कचिदेव मर्म ··· शरा मुनेः प्रीतिकरा बभूवुः Kirātā. 17.33.

अनामृश्य (an-āmṛśya) *adj.* not to be touched or reached अनामृश्यं वाचामनिशमुदयानामपि कदा दरीदृश्ये देवं दरदलितनीलोत्पलरुचिम् KṛṣṇaKa. 1.48.

[1]**अनामृष्ट** (an-āmṛṣṭa) *adj.* A not touched, untouched ततस्तमाश्रमम् ··· ददृशुः पाण्डवाः ··· अनामृष्टं रवेः करैः MahāBhā. iii. 145.24; चतुरुदधिकल्लोलपटलैरनामृष्टं दंष्ट्राशिखरमधिशेते वसुमती SaraKaṇṭhā. 69.5; B not associated with (i. e. unaffected by) शब्दश्च आभासान्तरैः देशकालादिरूपैरनामृष्टे एकत्रैवाभासमात्रे प्रवर्तते PratyabhiVi. ii. 75.6 (*on* ii. 3.2)

[2]**अनामृष्ट** (an-āmṛṣṭa) *adj.* not wiped away (रामः) अवसन्नरुचिं वनागतं तमनामृष्टरजोविधूसरम् समपश्यद् (वधूशिरोमणिम्) Bhaṭṭi. 10.33 (comm. अनामृष्टेन अनुपनुन्नेन)

अनामृष्टतत्त्वान्तर (anāmṛṣṭa-tattvāntara) *adj.* i who has not considered the difference in the real nature (i. e. not considering the true nature of others) खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां धिक् सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम् BhallaŚ. 69 = KāvyPra. 788.2 = VyaktiVi. 104.10 = Subhāṣi. 1001; SāhiDa. 429.10; ii not having connection with the difference in the real nature, BhallaŚ. 69 = KāvyPra. 788.2 = VyaktiVi. 104.10 = Subhāṣi. 1001; SāhiDa. 429.10.

अनामृष्टात्युन्नतहृदय (anāmṛṣṭātyunnatahṛdaya) *adj.* having an unaffected noble heart, whose noble heart is not affected दौर्मेरन[ा*]मृष्टात्युन्नतहृदयः ··· परमम[ा*]हेश्वरः EI. viii. 191.23; viii. 197.24; i. 86.17; iv. 77.16; xxii. 117.16.

अनामोद (an-āmoda) *m.* deficiency of joy बुद्धप्रणीतानुष्ठानादर्वागस्थानचेतनात् । तद्धानिवृद्ध्या सत्त्वेषु अनामोदः प्रमोदना MaYānaSū. 74.9 (11.70); *adj.* 1 devoid of fragrance विभीषणपरित्यक्तम् ···पुष्पेषु विकसत्स्वपि । अनालोकमनामोदमभूल्लङ्कापुरं तदा RāmC. 24.2; 2 devoid of joy, RāmC. 24.2.

अनामोदमनस्कार (anāmoda-manaskāra) *m.* mental activity of deficiency of joy अनामोदमनस्कारो दानादिभिर्हीयमानेषु··सत्त्वेषु MaYānaSū. 74.11 (11.70 (2))

अनाम्नगरीनवति (a-nāmnagarīnavati) (Gr.) other than the Genitive plural termination *nām* and (the words) *nagarī* and *navati* पदान्ताट्टवर्गादनाम्नगरीनवतेः SiddhaHe. i. 3.63 (comm. पदान्तस्थाट्टवर्गात् परस्य नाम्नगरीनवतिवर्जस्य तवर्गस्य सस्य च टवर्गषौ न स्याताम् । षण्णयम् । षण्णयाः । षट्सु । अनाम्नगरीनवतेरिति किम् । षण्णाम् । षण्णगरी । षण्णवतिः)

अनाम्नवतिनगरी (a-nāmnavatinagarī) (Gr.) other than the Genitive plural termination *nām* and (the words) *navati* and *nagarī* अनाम्नवतिनगरीणां चेति वक्तव्यम् Vār. *on* P. viii. 4.42 (RSGM. 30, 1938); (न पदान्ताट्टोरनाम्) अनामिति किम् । षण्णां भवति कश्यपः ।··· अनाम्नवतिनगरीणां चेति वक्तव्यम् । षण्णाम् षण्णवतिः षण्णगरी MahāBh. iii. 463.18 (*on* viii. 4.42); KāśiVṛ. *on* viii. 4.42; SiddhāKau. 28A.7 (*on* viii. 4.42)

अनाम्नात (an-āmnāta) *adj.* not mentioned or not prescribed in the sacred texts अथातश्छन्दस्यनाम्नातानि हुतानुमन्त्रणानि व्याख्यास्यामः BaudhŚS. iii. 340.10; यद्यनाम्नातं सादनं स्यात् BhārŚS. xiii. 14.12; यत्रानाम्नातं तत्र क्रियेतेत्यालेखनः ĀpaŚS. ix. 16.6; तदिदं गर्भिणिप्रायश्चितं सर्वत्र क्रियेतेत्याश्मरथ्यः । यत्रानाम्नातं तत्र क्रियेतेत्यालेखनः ĀpaŚS. ix. 19.14; अनाम्नातास्त्वमन्त्रा यथा प्रवरोहनामधेयग्रहणानीति ĀpaŚS. xxiv. 1.35; यजमानमनाम्नातं वा जुहुयात् MānŚS. 177.15; धर्मविनियोगेऽनाम्नाते यथार्थं मन्त्रान् संनमयेत् VārāŚS. I. i. 1.68; I. i. 3.6; उपांशुवदनाम्नातवरशेषासेचनवर्जम् KātyŚS. ix. 6.2; द्रव्यहविर्मन्त्रकर्मादीनामतिपन्नस्कन्नभिन्नभग्ननष्टदुष्टविपरीतदग्धाशृत्यनिकृतानामनाम्नातेषु जुहुयात् BaudhGS. iv. 5.2; शुश्रूषालोपे एतैश्चान्यैश्चानाम्नातेषु प्रायश्चित्तम् BaudhGS. iv. 11.1; यद्ज्ञातमनाम्नातमर्थस्य कर्मणो मिथः । अग्ने त्वं नस्तस्मात्पाहि स हि वेत्थ यथायथम् KauśiSū. 119.2; तेषामज्ञातप्रायश्चित्ते यद्ज्ञातमनाम्नातमिति मध्ये जुहुयात् AVPari. 72(4).3; रौद्रीं रोगार्तस्यानाम्नातेषु च कामेष्वापत्सु विविधासु च AVŚāntikalpa. 17.3; अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः स्यात् MīmāSū. ii. 1.34; अनाम्नाते च दर्शनात् MīmāSū. x. 8.21; अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् । यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः ManuSm. 12.108; अनाम्नातेषु [च] कथं कार्यमिदिति चेद्वदेत् । यमाशिषं द्विजा ब्रूयुः स धर्म(? र्मः) परमः स्मृतः LaŚātāSm. 129; अनाम्नातेषु मन्त्रत्वं न स्यादभिधायकेष्वपि ŚābaBh. 437.12 (*on* ii. 1.34); 1757.12 (*on* ix. 3.24); अनाम्नातानि कार्याणि ···। उपायैः सामभेदाद्यैरेतानि शमयेन्नृ(? नृ)पः KātySm. 951; न चानाम्नातस्य स्मृतिमूलत्वम् TantrVā. 192.9 (*on* i. 3.18); निक्षेपपक्षे चाग्नीनां प्रतिपत्त्यन्तरमनाम्नातम् ManuBh. i. 499.13 (*on* 6.9); ii. 486.16 (*on* 12.108); अनाम्नातस्य च वेदत्वव्याघातेनानुमानायोगात् NyāyKuA. i. 128.3; अनाम्नातेषु वाक्यपाठादेवानिर्णीयमानेष्वित्यर्थः Aparā. 22.2 (*on* 1.9); येषां तु शाखिनामनाम्नातं तेषां तु विकल्प एव SmṛtiCan. i. 56.9; ii. 511.8.

अनाम्नातऋक्संचाराभाव (anāmnātaṛksañcārābhāva) *m.* absence of the transformation of the *ṛc* not mentioned in the sacred text गानस्य योनिवदुत्तरयोरध्ययनसिद्धत्वे अनाम्नातऋक्संचाराभावेनोह्यत्वं न स्यात् MayūMāli. 601.2 (*on* ix. 2.1)

अनाम्नातगुण (anāmnāta-guṇa) *m.* unmentioned quality विद्यैक्ये सत्यनाम्नातगुणानामुपसंहारन्यायतः प्राप्तेः । अनाम्नातगुणोपसंहारार्थमेव हि सर्वत्र विद्यैक्यसाधनम् ŚivārkaMaDī. ii. 299.20 (*on* iii. 3.10)

अनाम्नातत्व (anāmnāta-tva) *n.* the state of not being mentioned or prescribed in the sacred text अन्यस्यानाम्नातत्वात् सर्वस्मृतीनां चासति विरोधे एकार्थत्वादिहाप्येवमेवानुष्ठानम् ManuBh. i. 115.18 (*on* 2.75); ii. 169.4 (*on* 8.203); सर्वदा च तस्याश्रवणम्, अनाम्नातत्वात् PrakaPañ. 251.11; 251.12; तत्पुत्रकर्तव्यप्रायश्चित्तस्य विशिष्यानाम्नातत्वात् MīmāKau. ii. 33.15 (*on* ii. 3.4); सोमार्योष्णपक्षौ अनाम्नातत्वेन पाठतः संनिधिर्न भवतीत्यर्थः MayūMāli. 11.9 (*on* i. 2.2); 319.4 (*on* iii. 7.4)

अनाम्नातद्क्षिण (anāmnāta-daṣkiṇa) *adj.* for which a sacrificial fee is not (specifically) mentioned or prescribed एवमनाम्ना(माम्ना)तदक्षिणानि (कृत्यानि) ऋत्विग्भिरेव कार्याणि । अनाम्नातदक्षिणानि स्वयमापद्यप्यविज्ञा Aparā. 126.3 (*on* 1.99)

अनाम्नातप्रतिपद्प्रायश्चित्त (anāmnāta-pratipadaprāyaścitta) *adj.* (sins) for each of which no expiation is specifically prescribed तथापीदमनाम्नातप्रतिपदप्रायश्चित्तनिमित्तेष्वसंविदितेषु कृतसंभावनायामाम्नायते ManuBh. ii. 439.27 (*on* 11.220)

अनाम्नातप्रतिषेध (anāmnāta-pratiṣedha) *m.* prohibition of what is not mentioned or laid down अनाम्नातप्रतिषेधाच्च KātyŚS. viii. 5.41 = xvi. 7.16.

अनाम्नातप्रायश्चित्त (anāmnāta-prāyaścitta) *adj.* for which expiation is not mentioned अनाम्नातप्रायश्चित्तानां चापदि 'त्वं नो अग्ने ···' एताभिर्जुहुयात् MānŚS. 95.6; होमकालेऽपि सर्वत्रानाम्नातप्रायश्चित्तेषु व्याहृतिभिरेव जुहुयात् MānŚS. 95.7; *n.* expiation which is not prescribed सर्वत्र चानाम्नातप्रायश्चित्ते गौतमीयं 'कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति सर्वप्रायश्चित्तमि'त्येतद् व्यस्तसमस्ततया योज्यम् BālaKrī. ii. 130.14 (*on* 3.253-54 (? 259-60))

अनाम्नातप्रायश्चित्तकर्मन् (anāmnātaprāyaścitta-karman) *n.* act for which expiation is not mentioned वेदोक्तनित्यसंध्यादिकर्मनध्ये अनाम्नातप्रायश्चित्तकर्मलोपे ManvaVi. 1446.9 (*on* 11.203)

अनाम्नातप्रायश्चित्तविशेष (anāmnāta-prāyaścittaviśeṣa) *adj.* for which specific expiation is not mentioned यदनुचितं कृतम् अशक्यपरिहारमनाम्नातप्रायश्चित्तविशेषं त्वयि एतत्तदपैति ManuBh. i. 129.15 (*on* 2.102)

अनाम्नातमन्त्र (anāmnāta-mantra) *adj.* [f.-ā] for which no (specific) *mantra* is mentioned खरे पात्राणि प्रयुनक्ति यान्यनाम्नातमन्त्राणि भवन्ति ĀpaŚS. xii. 1.6; xiv. 12.2; अनाम्नातमन्त्रास्वादिष्टदेवतासु 'अमुष्मै स्वाहामुष्मै स्वाहे'ति जुहुयात् स्वाहाकारेण शुद्धेन ŚāṅkhāGS. i. 9.18; KauṣīGS. i. 6.3.

अनाम्नातमन्त्रक (anāmnātamantra-ka) *adj.* for which no (specific) *mantra* is mentioned अनाम्नातमन्त्रके वा कर्मणि निवेशोपपत्तेः MīmāKau. ii. 225.21 (*on* iii. 2.1)

अनाम्नातयाज्यानुवाक्या (anāmnāta-yājyānuvākyā) *adj.* (*f.*) in which the offering and the invitatory verses are not mentioned अना-

म्नातयाज्यानुवाक्यानामेते वैश्वानरीयाणाम् MānŚS. 118.19.

अनाम्नातयाज्यानुवाक्याका (anāmnātayājyānuvākyā-kā) *adj.* (*f.*) in which the offering and the invitatory verses are not mentioned यास्त्वनाम्नातयाज्यानुवाक्याका विकृतयस्तत्र सति संभवे आनीयमाना ऋचश्चोदकातिदिष्टधर्मका एवानेया इति सिध्यति BhāṭṭCan. 119.7 (*on* xvi. 3.12)

अनाम्नातवचन (anāmnāta-vacana) *n.* statement not mentioned in the sacred text अनाम्नातवचनमवचनेन हि वङ्क्रीणां स्यान्निर्देशः MīmāSū. ix. 4.14; न खल्वप्यस्मिन् पक्षे सर्वमेवाम्नातमुच्यते, अनाम्नातवचनमपि प्रतीयत इति ŚābaBh. 1773.7 (*on* ix. 4.14)

अनाम्नातविनियोजकत्व (anāmnātaviniyojaka-tva) *n.* the state of being that which lays down something that is not mentioned in the sacred texts तस्मादनाम्नातविनियोजकत्वादमन्त्रत्वं सूर्यपदादीनाम् TantrVā. 419.20 (*on* ii. 1.34)

अनाम्नातशेष (anāmnāta-śeṣa) *adj.* whose auxiliary rite is not mentioned तथानाम्नातशेषाणां शेषिणां सप्तमादिभिः। शेषसद्भावतद्रूपपरिमाणादिनिर्णयः TantrVā. 655.19 (*on* iii. 1.1)

अनाम्नातसंस्थ (anāmnāta-saṁstha) *adj.* for which the concluding rites (by chanting specific lauds) are not direcctly mentioned अग्निष्टोमादिशब्दाः ··· प्राप्यत्वाम्नातसंस्थान् प्रथममथ न ते यान्त्यनाम्नातसंस्थान् VidhiRa. 35 (186.13)

अनाम्नातसोम (anāmnāta-soma) *adj.* for which the Soma (cups or goblets) are not prescribed रात्रिपर्यायेषु अनाम्नातसोमानि स्तुतशस्त्राणि SaṅkarKāBh. 162.2 (*on* iii. 3.31); BhāṭṭCan. 93.1 (*on* xv. 3.16)

अनाम्नातेतिकर्तव्यताक (anāmnātetikartavyatā-ka) *adj.* in which the procedure of performance is not (specifically) mentioned सर्वत्रानाम्नातेतिकर्तव्यताकस्थले आम्नातेतिकर्तव्यताकस्यातिदेशः BhāṭṭDī. ii. 366.21 (*on* vii. 4.1)

अनाम्नातोपजल्पिन् (anāmnātopajalpin) *adj.* speaking what is not stated in the sacred text अनाहूतोपसृप्तानामनाहूतो (v.l. °मनाम्नातो)·पजल्पिनाम्। ये लोकास्तान् इतः कर्ण मया त्वं प्रतिपत्स्यसे MahāBhā. i. 126.18.

अनाम्नान (an-āmnāna) *n.* non-mention, non-prescription अशिरस्को वा अनाम्नानात् HirŚS. xxv. 6.63 (961.14); ĀpaŚuS. vi. 21.4; ग्रावस्तुतो भक्षो न विद्यतेऽनाम्नानात् MīmāSū. iii. 5.27; अनाम्नानादशब्दत्वमभावाच्चेतरस्य स्यात् MīmāSū. ix. 3.24; न वानाम्नानात् SaṅkarKā. i. 2.9 (AOR.); प्रजापतिर्यज्ञमन्वेतीत्यत्र देवतानामादेशो न विद्यते अनाम्नानात् SaṅkarKā. ii. 3.3 (AOR.); ii. 4.15 (AOR.); पुरुषविद्यायामिव चेतरेषामनाम्नानात् BrahmSū. iii. 3.24; ततः परं त्वन्यस्यानाम्नानात्तावत्येवोपक्षीयते TantrVā. 439.13 (*on* ii. 1.48); छन्दोगानामुत्पत्तिप्रकरणेऽनाम्नानात् BrahmSūBh.(Śaṅ.) 435.14 (*on* ii. 3.8); कल्पान्तरस्यानाम्नानाद्दशाह एव युक्तः ManuBh. i. 454.15 (*on* 5.71); अनाम्नानमेव कस्मादिति चेत् PrakaPañ. 251.11; विकृतिषु तु करणोपकारजनकपदार्थवर्गाणामनाम्नानात् ··· अध्याहारः कर्तव्यः PrakaPañ. 254.9; विधिशब्दस्यानाम्नानादनध्याहाराच्च ··· समिदादीनामैदमर्थ्यं सिध्येत् ŚāstrDī. 82.24 (*on* i. 1.5); अनाम्नात् (? अनाम्नानात्) अनभिधानात् SaṅkarKāBh. 91.13 (*on* ii. 3.3); 69.7 (*on* ii. 1.50); 70.6 (*on* ii. 1.54); एकस्यां शाखायामाम्नातानां गुणानामन्यत्रानाम्नानात् BrahmSūBh. (Rā.) 633.5 (*on* iii. 3.24); VedāntDī. 178.18 (*on* iii. 3.24); ŚivārkaMaDī. ii. 290.12 (*on* iii. 3.5); सवनत्रयादीनां चैकत्राम्नातानामन्यत्रानाम्नानात् VedāntSā.(Rā.) 302.4 (*on* iii. 3.24); BrahmSūBh.(Śrī.) ii. 323.9 (*on* iii. 3.24); केषांचिद्गुणानामनाम्नानात् BrahmSūBh.(Ma.) 55A.4 (*on* iii. 3.25); सौर्यादिष्वनाम्नानात् VedāntKa. 106.22 (*on* i. 1.5); क्वचित्कस्यचिदनाम्नानस्याज्ञाननैरर्थक्यनिबन्धनत्वाभावात् ŚrutaPra. ii. 495.20 (*on* iii. 3.31); हिरण्यगर्भनिर्माणसुवर्णपरिमाणस्यानाम्नानात् यावता यजमानस्य प्रवेशधारणोपायिकं कुण्डं भवति तावता घटनीयम् CaturCin i. 220.9; प्रकाराणामन्यत्रानाम्नानाद्विद्याभेदः VedāntPāSau. 315.5 (*on* iii. 3.24); अन्यत्रान्यत्रानाम्नानादनुक्तत्वात् VedāntKau. 315.20 (*on* iii. 3.24); अनन्तचरणाधारे हि महीमण्डले कुत्रचिदप्यश्रवणमनाम्नानात् TantrRaha. 39.23; काण्वपाठे 'अन्नस्यान्नम्' इत्यस्यानाम्नानेन ŚivārkaMaDī. i. 527.12 (*on* i. 4.11); न च पाशुपतविद्या सकलविद्याप्रकृतिरिति वक्तुं शक्यम्, तस्यां विद्याङ्गविद्यासहकारिकर्मगतिचिन्तनादीनामनाम्नानात् PūrvottaVāNaMā. 309.5; द्रव्यदेवतयोराम्नानेऽपि संस्काराणामनाम्नानात् MayūMāli. 697.14 (*on* x. 4.1); 765.19 (*on* x. 7.14); दर्शपूर्णमासप्रकरणे अस्या अनाम्नानादिति भावः MayūMāli. 861.4 (*on* xii. 2.5); संख्यान्तरस्यानाम्नानात् BhāṭṭCan. 44.10 (*on* xiv. 1.31); न चैवं सति ··· भेदापत्तिः। चक्रन्यासविधावुभयोरपि कर्मणोरनाम्नानेनान्यतरस्याप्युत्पत्तिशिष्टत्वाभावात् SetuBa. 288.21.

अनाम्नानोपपत्ति (anāmnānopapatti) *f.* justification of non-mention (in the sacred texts) उपासनार्थत्वेन विनाप्यनाम्नानोपपत्तेः ŚrutaPra. ii. 495.21 (*on* iii. 3.31)

अनाम्नाय (an-āmnāya) *m.* **1A** epithet of Viṣṇu (*lit.* distinct from (i.e. beyond) the Vedas) द्वे विद्ये त्वमनाम्नाय परा चैवापरा तथा ViṣṇuP. v. 1.35; **1B** other than (the metres used in) the Vedas चित्रमनाम्नायो नूतनच्छन्दसामवतारः UttaRāC. 2.5(1); **2** absence of sacred tradition असंनिबेरसत्त्वाच्च व्यभिचारादमानतः। प्रतियोगाद(ना)म्नायात्तच्छेपत्वेन संस्थितेः TarkSaṁ.(Ā.) 5.4; **3** lack of transmission, cf. **अनाम्नायमल.**

अनाम्नायप्रकल्पित (an-āmnāyaprakalpita) *adj.* not provided in the sacred tradition of the Vedas दोषवत्करणं यत् स्यादनाम्नायप्रकल्पितम् NāraSm. 164.7.

अनाम्नायमल (anāmnāya-mala) *adj.* having impurity due to lack of transmission अनाम्नायमला वेदाः MahāBhā. v. 39.64.

अनाम्भोधि (anāmbhodhi) *m.* not an ocean रामचन्द्रमुनिर्यावत् प्रकाशं वक्तुमैहत। उत्कल्लोलमनाम्भोधिः श्रीकपर्दी तदावदत् KumāDeC. (So.) 28.26.

अनाम्य (a-nāmya) *adj.* **A** unbendable, not to be (i.e. difficult to be) bent तानेवेन्द्रस्य हि धनुरनाम्यं नमतोऽब्रवीत् MahāBhā. v. 37.2; अतोऽहं ब्रवीमि। नानाम्यं नाम्यते दारु Tantrākhyā. 45.12; PañcT. 1.151 (150.7); 1.151(18) (152.7); Pañcā. 108.2; **B** not to be made inferior, to be rendered superior, not to be overpowered मूलेनानाम्ये। मूलात्तृतीयान्तादनमनीयेऽर्थे यद् भवति। मूलेनानाम्यं मूल्यम्। अनाम्य (however later comms. read आनाम्य, cf. KāśiVṛ. *on* iv. 4.91) इत्यत एव वचनाण्ण्यत् CāndraVṛ. *on* iii. 4.89; **C** not to be curved or uprooted नाम्नीत्येव। मूलेनानाम्यं काष्ठम् CāndraVṛ. *on* iii. 4.89.

अनाम्या (a-nāmyā) *f.* ring-finger उभौ प्रसार्य वै हस्तौ मध्ये सार्धेन संस्थितौ। शेषानाम्या ततश्चैव अङ्गुष्ठाग्रं तथा क्रमात्। मुद्रा गभस्तिनी नाम BhaviP. 309A.30 (i(2).214.30)

अनाम्युपध (anāmy-upadha) *adj.* having vowels which do not cause retroflection (viz. *a* and *ā*) in the prefinal position सः सा सौ सं पदान्तेभ्यः पूर्वोऽनाम्युपधस्तथा। यकारो वा वकारो वा पुरस्ताच्चेदसंधिजः ṚPrāti. 13.8.

अनाम्रेडित (an-āmreḍita) *adj.* (word) not repeated, non-iterative अनाम्रेडितान्याम्रेडितसदृशानि APrāti. 146.

अनाम्लानि (an-āmlāni) *adj.* not even slightly faded चन्द्रोदयकृतस्तस्य यशः केन न शस्यते। यदाकल्पमनाम्लानि सतां शेखरतां गतम् MahāP. 1.48.

अनाम्लायिन् (an-āmlāyin) *adj.* which does not fade even slightly चन्द्रोदयकृतस्तस्य यशः केन न शस्यते। यदाकल्पमनाम्लानि (v.l. °नाम्लायि) सतां शेखरतां गतम् MahāP. 1.48.

अनाम्स्वर (anām-svara) *m.* [Loc.] before a vocalic case ending excluding the Genitive plural case *ām* अनाम्स्वरे नोऽन्तः SiddhaHe. i. 4.64.

[1]**अनाय** (anāya) *m.* word listed in the *aśvādigaṇa* (name of a person) अश्व इत्येवमादिभ्यः पौत्रादावपत्ये फञ् भवति। आश्वायनः ···अश्व···अनाय। अतव ··· खदिर CāndraVṛ. *on* ii. 4.31.

[2]**अनाय** (an-āya) *m.* fish-net (*lit.* from which moving out is not possible) जाले त्वनाय आनायो वडिशं मत्स्यबन्धनम् ParyāŚaRa. 1910.

[3]**अनाय** (a-nāya) *m.* bad or improper conduct नगोपगोऽस्ति क्षर मे पिनाकेऽनायोऽजने धर्मधनेन दानम् RāmKṛViKā. 16 (comm. नयो नीतिस्तत्संबन्धी नायः न नायः अनायः। अनीतिरित्यर्थः)

[1]**अनाय** (an-āya) *adj.* **i** not yielding income अनायव्ययकर्तारम् (v.l. अनायं च व्ययं कृत्वा) ··· नरः शीघ्रं विनश्यति CāṇaSāSaṁ. 2.19; **ii** not having any income अनायः व्ययकर्ता च – । नरः शीघ्रं विनश्यति PārśvC. 6.553.

[2]**अनाय** (a-nāya) *adj.* not having political prudence कार्याकार्यमनायैः (v.l. अनायैः, Ind. Spr. 3915) उन्मार्गनिरर्गलैर्गलन्मतिभिः। नाकर्ण्यते विकीर्णैर्नयोक्तिभिर्युक्तमुक्तमपि Pañcā. 59.26.

अनायक (a-nāyaka) *adj.* [*f.* -ā or -ikā] **1** having no commander or general निरस्य विदुरं द्रोणं भीष्मं शारदतं कृपम्। विग्रहे तुमुले तस्मिन्नहन् क्षत्रं परस्परम् (v.l. तस्मिन् हतक्षत्रमनायके) MahāBhā. i. 1.94; कर्शितं व्याधितं क्लिन्नमपानीयमघासकम् (v.l. अनायकम्)। ··· प्रहर्तव्यमरेर्बलम् MahāBhā. i. App. I. 81 (157); अनायका – सेना सर्वान् दोषान् समर्छति MahāBhā. vii. 40*(2); यथा ह्यगोपाः पशवो यथा सैन्यमनायकम्। एवं प्रजाः प्रजापाल भवन्ति

ह्यनधिष्ठिताः Rāmā. ii. 282*(13); आलस्योपहता विद्या परहस्तगताः स्त्रियः। अल्पबीजं हतं क्षेत्रं हतं सैन्यमनायकम् CāṇaNīDa. 5.7; किंवदन्ती च यथा किलानायकं साधनं मत्वा जिघृक्षुः सुदुर्मतिरेतामपि भुवमाजिगमिषतीति विज्ञापिते प्रभुः प्रभवतीति HarṣaC. 251.12; बलं युद्धाय नेष्यते … न युध्यते भिन्नकूटं भिन्नकूटमनायकम् NītiSā. 14.90; युद्धं हि नायकप्राणं हन्येत तदनायकम् NītiSā. 20.35; AgniP. 241.45: विना पुनस्त्वदिवमनायका चमूः RāmC. 15.43; सर्वेऽपि राजानः -- तं नारायणरूपं व्यज्ञपयन्। देव हतं सैन्यमनायकम् Pañcā. 57.10; PāṇḍaC. 7.663; 13.868; अधिकं युध्यते चित्रं सैन्यमेतदनायकम् RukmiHa. 4.19; 2 having no head, lord or master यथा गावो ह्यगोपालास्तथा राष्ट्रमनायकम् MahāBhā. xiii. App I. 15 (1278); अराजकं (v. l. अनायकम्) हि नो राष्ट्रं न विनाशमवाप्नुयात् Rāmā. ii. 61.7; ii. 73.3; उपद्रुतमिदं सर्वमनालम्बमनायकम् Rāmā. ii. 1042*(1); अनायकं च तद्राज्यमस्मदायत्तमेव च DaśKuC. 90.17; 141.2; नहुषप्रभावसमयं समग्रमेव चक्षमे सहस्राक्षः। पुनरमुष्मिन् … अजगरभूयं गतवलनयवृत्तं कलत्रमनायकां च नाकलक्ष्मीं प्रापयत AvantiKa. 48.7; (अधिवसेत्) न देशं व्याधिबहुलं नावैद्यं नाप्यनायकम् AṣṭāSaṁ. i. 13.9 (1.3); न नन्दति जगत्सर्वं त्रैलोक्यं सचराचरम्। यथा विहीनचन्द्रार्कं तथा राज्यमनायकम् SkandP. v(3). 118.25; ततस्सप्तविंशतिवर्षाणि दैवदुरीहया वेंगीमहिरनायिका[भू]त् EI. vi. 338.24; v. 76.30; अनु दानार्ण(र्णो)वादा[दा]सीद् दैवदुश्चेष्टया ततः [।] सप्तविंशतिवर्षाणि वेंगीमहिरनायि(य)का EI. iv. 306.48; vi. 354.40; अनायकां बहुनायकां वा सभां न प्रविशेत् NītiVā. 29.90; स्त्रीनायकं वरं स्थानमथवा बालनायकम्। अनायकं वरं यावन्न चैवं बहुनायकम् BṛKathāMañ. iii. 1.205; KathāSaSāg. iii. 4.136; अशरण्यमहो विश्वमराजकमनायकम् TriṣaŚaPuC. iii. 2.149; EI. iv. 235.54; अनायका विनश्यन्ति नश्यन्ति बहुनायकाः SūktiRa. 163.56; RājTa.(Śrī.) 3.474; KāmVa. 7.12; अनायके न वस्तव्यं न वसेद्बहुनायके ŚārṅgaPa. 1466; सदैकनायकं राज्यं कुर्यान्न बहुनायकम्। नानायकं क्वचिदपि कर्तुमर्हति भूमिपः ŚukraNī. 1.342; 3 having no guide or refuge, helpless (मन्त्री) तथैवानभिजातोऽपि काममस्तु बहुश्रुतः। अनायक इवाचक्षुर्मुह्यत्यूहेषु कर्मसु MahāBhā. xii. 84.25; कन्दमूलफलं हृत्वा को मां प्रियमिवातिथिम्। भोजयिष्यति कर्मण्यमप्रग्रहमनायकम् Rāmā. ii. 58.29; अनायकैकनायकम् … नमामि तं विनायकम् GaṇePañ. 1; गजेषु नष्टेष्वगजेष्वनायके रथेषु भग्नेषु मनोरथेषु च। न शून्यचित्तं पुथि राजपुत्रकं पुरातनं चित्रमिवाशुभङ्गुरम् RāghPāṇ.(Dha.) 6.30; 4 not having a central gem न नाम शुशुभे … तदा मौक्तिकदामेव तदनीकमनायकम् PāṇḍaC. 13.868.

अनायक (a-nāyaka) *m.* a bad leader क्रूरं व्यसनिनं स्तब्धमप्रगल्भमनायकम्। मूर्खमन्यायकर्तारं नाधिपत्ये नियोजयेत् SūktiRa. 94.9.

अनायकपुरुष (anāyaka-puruṣa) *m.* person or character other than a hero (यः कश्चित्कार्यवशाद्गच्छति पुरुषः प्रकृष्टमध्वानम्। तत्राप्यङ्कच्छेदः कर्तव्यः पूर्ववत्तज्ज्ञैः) अनायकपुरुषस्त्वविच्छिन्न एवाङ्के निष्क्रामति AbhinBhā. ii. 423.15 (*on* 18.32)

अनायकसमारम्भा (a-nāyakasamārambhā) *adj.* (*f.*) not having a reference to the actions of a hero (i. e. completely imaginary) परस्त्रीराजविद्विष्टलोकविद्विष्टसंश्रयाम्। अनायकसमारम्भां न कथां कथयेद्बुधः YaśasCam. ii. 349.22.

अनायकावकाशदेश (anāyakāvakāśa-deśa) *m.* country in which there is no room for a king (i. e. kingless country) अस्ति … वनम्।-- अपरैरपि सत्त्वैरनायकावकाशदेशमिव बाध्यमानपरस्परजीवितम् YaśasCam. ii. 200.5 (comm. अनायकावकाशदेशमिव नृपरहितदेशमिव)

अनायकीभूता (anāyakī-bhūtā) *adj.* (*f.*) which has become bereft of a commander एतामनायकीभूतां विद्याधरवरूथिनीम्। पलायनोद्यतां पश्य PadmP.(Ra.) 60.111.

अनायत् (an-āyat) *adj.* A (keeper) who is not coming forward (to protect an animal) अजाविके तु संरुद्धे वृकैः पाले त्वनायति। यां प्रसह्य वृको हन्यात् पाले तत्किल्बिषं पतेत् ManuSm. 8.235; दिवा पशूनां वृकाद्युपघाते पाले त्वनायति पालदोषः ViṣṇuSm. 5.137; अनायत्यनागच्छति पाले ManuBh. ii. 181.23 (*on* 8.235); दिवा पशूनां वृकाद्युपघाते पाले त्वनायति पालकदोषो विनष्टपशूनां मूल्यं स्वामिने दद्यात् VīraMi.(Vyavahāra.) 348.19; 348.33; B not coming back, not returning तावच्च तं महीपालं स्वस्रा युक्तमरण्यगम्। पितर्यनायत्याक्रन्दविधुरं शङ्किताशुभम्। ददर्श तेन मार्गेण सार्थवाहः KathāSaSāg. ix. 6.37.

अनायत (án-āyata) *adj.* [*f.* -ā] 1 not tied or fastened अना॑यतो अनिबद्धः कथायं न्य॑ङ्ङुत्ता॒नोऽव॑ पद्यते न ṚV. iv. 13.5 = iv. 14.5; 2 not too long निर्व्यलीकमनायतमविषमं च बस्तिं संनिवेश्य SuśruS. iv. 7.30; AṣṭāSaṁ. ii. 81.1 (4.13); बस्तावौषधं प्रक्षिप्य -- अनायतमबुद्बुदम् … औषधासन्नमुपसंगृह्य SuśruS. iv. 38.3; अनायतो यदि व्योम्नि व्यवर्धिष्यत हेलया। तदा जगत्कुटीमध्ये समुमास्यत् क्व सोऽचलः MahāP. 4.102; गजवदनः।-- (ध्येयोऽनायतदोःपत्सरसिरुहः) संपदे सदा मनुजैः ŚilpaRa. ii. 25.54; 3 not extended, close अनुरागाद्दयिततमामपरश्चिरं प्रतीक्ष्य। तदनुगमवशादनायतानि न्यधित मिमान इवावनिं पदानि ŚiśuVa. 7.13 (comm. अनायतान्यनन्तरालानि); 4 not long in duration प्रायेण च निसर्गत एवानायतस्वभावभङ्गुराणि सुखान्यायतस्वभावानि च दुःखानि Kād. 175.18; 5 not broad, narrow न खलु धियानायतया क्रोडव्यन् Nalo. 4.10.

अनायतक्षेत्र (an-āyatakṣetra) *n.* other than the longish quadrilateral figure परिधेः पादेन भजेदनायतक्षेत्रसूक्ष्मगणितं तद् GaṇiSāSaṁ. 6.223½.

अनायतता (anāyata-tā) *f.* the state of not being long, shortness सोऽयम् …आयत ताम्। वहति दिनेऽनायततां पुरीं प्रियेणाश्रिताम् Nalo. 4.26.

अनायतन (an-āyataná) *adj.* [*f.* -ā] 1 not having any support अ॒प्र॒ति॒ष्ठा॒नो॑ऽनायत॒नो म॑रिष्यसि AV. xi. 3.49; AV.(P.) xvi. 58.4; अप्रतिष्ठान एवानायतनो य एवं विदुष उपद्रष्टा भवति AV.(P.) xvi. 58.5; रु॒द्रा घातुका अनायत॒नाः TaiS. VII. i. 5.4; ते देवाः सर्वस्तम्भेन सर्वस्तम्भं वैराजयन्तानायतना आसन् MaiS. iii. 8.1 (iii. 92.2) = iii. 10.5 (iii. 136.14); KāṭhS. 29.1 (ii. 166.8); KapiKaS. 38.3 (207.5); आयतनवन्तोऽसुरा आसन्ननायतना देवाः MaiS. iii. 10.5 (iii. 136.13); यतः संयत्तयोरनायतनो भवति परा स जयते KāṭhS. 10.3 (i. 127.21); 21.8 (ii. 47.22); त्रिष्टुबोजसैवैनं वीर्येणायतनाच्छिनत्ति सोऽनायतनः पराभवति KāṭhS. 28.3 (ii. 156.8); KapiKaS. 44.3 (258.13); KāṭhS. 29.1 (ii. 166.7); KapiKaS. 45.2 (267.13-14); GopBr. ii. 2.7 (172.7); त एताः पुरोऽकुर्वत ता एतामनायतना नाध्रियन्त KāṭhS. 29.1 (ii. 166.8); 34.9 (iii. 43.2); अनायतनं वा एतत् साम यदनिधनम् PañcBr. v. 2.5; आ सप्तमात् पुरुषादनायतनो भवति यमेतेनाभिचरन्ति ṢaḍviBr. iii. 9.6; 2 having no abode or resting place आ॒यत॑नवती॒र्वा अ॒न्या आहु॑तयो हू॒यन्तेऽनायत॒ना अ॒न्याः TaiS. III. i. 9.2; याः सौ॒म्यास्ता अनायत॒नाः TaiS. III. i. 9.3; BaudhŚS. ii. 159.19; द्वौ वा अग्निमयोनिमनायतनं चिनु॒तेऽयोनिरनायतनौ भवति MaiS. iii. 4.10 (iii. 57.9); द्वे वा एते छन्दसी गायत्रं च त्रैष्टुभं चाछन्दस्कमनायतनं गृह्णी॒तेऽनायतनौ यजमानो भवति MaiS. iv. 7.6 (iv. 101.15); अयोनिर्वा एषोऽनायतनो य आरोहोऽयोनिमेवैनमनायतनं करोति KāṭhS. 26.3 (ii. 125.15-16); KapiKaS. 41.1 (236.7-8); यदनायतने निनयेदनायतनस्स्यात् KāṭhS. 35.18 (iii. 64.9); KapiKaS. 48.16 (307.4); यदनिधनेनाध्ये स्तुयुरनायतनो यजमानः स्यात् PañcBr. vii. 3.12; प्र॒स्त॒रम् …। यत्र गृ॒ह्णीयात्। अ॒ना॒य॒तनः स्या॑त् TaiBr. I. vi. 8.8; यदना॑यतने नि॒नये॑त्। अ॒ना॒य॒तनः स्या॑त् TaiBr. III. vii. 2.1; न हि कश्चिदनायतनः निराश्रयः रमते BṛĀraUBh. 720.13 (*on* v. 12.1); यद्यपि प्रवृत्तिरेव साक्षाद् दुःखहेतुस्तथाप्यनायतनस्य तस्यानुत्पत्तेरन्तरा जन्म करोति TātpaṬ.(Vā.) 92.8 (*on* i. 1.1); 3 not having a sacred place or temple न ह्यनायतनं देशमास्तिकानां द्विजास्ति वै PauṣkS. 36.104.

अनायतन (an-āyataná, án-āyatana) *n.* 1 other than a sacred or proper place, a bad place, not an adequate place अन्तोऽध्वर्युः स्याद्यदनायतने जुहुयात् MaiS. i. 6.11 (i. 104.4) = iii. 1.4 (iii. 5.11) = iii. 4.4 (iii. 49.15) = iii. 7.7 (iii. 83.12) = iv. 5.2 (iv. 65.2) = iv. 8.5 (iv. 112.14); यदनायतने निनयेदनायतनस्स्यात् KāṭhS. 35.18 (iii. 64.8); KapiKaS. 48.16 (307.4); यदना॑यतने नि॒नये॑त् TaiBr. III. vii. 2.1; यस्या॑नायत॒नेऽन्यत्राग्नेराहु॑तीर्जुहोति TaiBr. III. viii. 8.3; ŚatBr. XIII. i. 3.6; न॒ ह्यनायतने कु॒श्चन र॒मते ŚatBr. VI. ii. 1.14; VI. iii. 1.18 = XIII. v. 1.18; ताभ्यां देवद्विष्टाभ्यामन्वितः स रथोत्तमः। अनायतनमासाद्य सीदते गुणवानिव MatsyaP. 136.55; जीवानां भवभीतानाम् --। एतेभ्योऽन्यानि दुःखाय सन्त्यनायतनानि BṛKathāK. 7.103; मूढत्रयं मदाश्चाष्टौ तथानायतनानि षट्। अष्टौ शङ्कादयश्चेति दृग्दोषाः पञ्चविंशतिः YaśasCam. ii. 324.13; i. 143.7; गीतावासो रतिर्धर्मे अनायतनवर्जनम्। निग्रहश्च कषायाणामेतद् धीराणां शासनम् SthānṬ. 9A. 14; 2 an unworthy object मा त्वम् अनायतने प्रसादमुत्पादय (COWELL Ed. p. 419) अपि तु बुद्धधर्मसंघे प्रसादमुत्पादय DivyāvA. 272.7 [DBHS.]

अनायतनकर (anāyatana-kara) *adj.* having non-industrious hands दीनान् आयतनस्थो नानायतनकरोऽस्य सौन्देऽधिकृतः। नानायतनकरो लीनान् आयत नः पथ्य् उवाचाथ रहः Nalo. 4.9 (*but* comm. अनायतनकरः न आयतो दीर्घः करो हस्तो यस्य तादृशः कुब्जो ना पुरुषः)

अनायतनप्रयोग (anāyatana-prayoga) *m.* undertaking of efforts with respect to unworthy objects कुशलस्य चीर्ण्यावरणानि — अप्रयोगोऽनायतनप्रयोगोऽयोनिशः प्रयोगश्च MadhyāVIBh. 58.17 (comm. अनायतनप्रयोगो बोधेर्नैर्याणिकानां च कुशलमूलानां यद् प्रवचनमनुपरिहारं तदायतनम्, तस्मादन्यदनायतनम्। तस्मिन् प्रयोगोऽनायतने प्रयोग एतस्माद् बाह्येष्वपि)

अनायतनवत् (an-āyatanava(n)t) *adj.* not having a resting place यं कामयेतानायतनवान्स्यादित्यविराजास्य यजेद्गायत्र्या वा त्रिष्टुभा वान्येन वा छन्दसा वषट्कुर्यादनायतनवन्तमेवैनं तत्करोति AitBr. 12. 11(348); 9. 8(257)

अनायतनसेवन (anāyatana-sevana) *n.* visiting a place unworthy (of worship) अनायतनसेवनं च तदाराधनधृतधिषणानामसंशयं तद्दर्शनं तिमिरयति YaśasCam. i. 143. 7 (comm. अनायतनसेवनं च कुत्सितदेवतागृहगमनम्)

अनायतपक्षा (an-āyatapakṣā) *adj.* (*f.*) not having long or spread out wings तेषां शकुनिरूपा जातहारिणी प्रसज्जते महाग्रहः। सा काकी … गर्भिणीं सूतिकां बिभीषयति … रौद्रानायतपक्षा KāśyaS. 196B.36.

अनायतप्राणम् (anāyataprāṇam) *adv.* without controlling the breath अनायतप्राणमसंयताक्षमब्रह्मचर्यानशनादिखेदम्। चित्तं महेशे निभृतं निधातुं सिद्धः कवीनां कवितैव योगः ŚivLī. 1. 26.

अनायतम् (anāyatam) *adv.* continually आप्तैः श्रुतान्वितैः प्राज्ञैर्मन्त्रं कुर्यादनायतम्। तैर्निश्चितं स्वबुद्ध्या तत्सर्वाङ्गं परिशोधयेत् KathāSaSāg. vi. 8.199.

अनायतमानम् (an-āyatamānam) *adv.* without prolonged anger या न ययौ प्रियमन्यवधूभ्यः सारतरागमना यतमानम्। तेन सहेह बिभर्ति रहः स्त्री सा रतरागमनायतमानम् ŚiśuVa. 4. 45 (comm. अनायतमानमदीर्घरोपं यथा तथा रतरागं सुरताभिलापं बिभर्ति)

अनायतस्वभावभङ्गुर (anāyatasvabhāva-bhaṅgura) *adj.* perishable because of being not durable in nature प्रायेण च निसर्गत एवानायतस्वभावभङ्गुराणि सुखान्यायतस्वभावानि च दुःखानि Kād. 175.18.

अनायता (anāya-tā) *f.* the state of having no income दीनायानायतया विवाससेऽस्मै विहीनयानाय तया Nalo. 4.10 (comm. आयो धनागमः न आयो यस्यासावनायस्तद्भावस्तत्ता)

अनायतार्गल (an-āyatārgala) *adj.* the bolts of which are not fastened इदं गृहं भिन्नमनायतार्गलं विशीर्णसंधिश्च महाकपाटः Mṛcch. 6. 3.

अनायतासु (anāyatāsu) *adj.* having unrestrained breath जपेदनायतासुर्वा त्रिः सकृद्वाघमर्षणम् GobhiSm. 2. 10; 'जपेदनायतासुर्वा त्रिः सकृद्वाघमर्षणम्' … अनायतासुः अनिरुद्धश्वासः VīraMi.(Āhnika.) 282.15; VīraMi. 58. 5 (*on* 1.22)

अनायति (an-āyati) *adj.* in which there is no income धर्माधिगतः पूर्वैः स्वयं वा हेमरूप्यप्रायः … दीर्घामप्यापदमनायतिं सहेतेति कोशसंपत् ArthŚā. ii. 227. 9 (6. 1); *f.* A no future (i. e. absence of prosperity in future) न कामांश्चरेत् — अशौचमनायतिं चैते पुरुषस्य जनयन्ति KāmSū. 23. 10 (1. 2) (JayaMa. अनायतिमप्रभावम्); तत्र व्यावर्तनकारणानि — गमिष्यतीत्यनायतिरन्यत्र प्रसक्तमतिरिति च KāmSū. 258.11 (5.1) (JayaMa. अनायतिर्भविष्यत्कालाभावः); तेषाम् (अनर्थानाम्) फलं कृतस्य व्ययस्य निष्फलत्वमनायतिः KāmSū. 352. 22 (6. 6) (JayaMa. अनायतिः प्रभावहानिः); B [Inst.] without any other course being left, helplessly महाप्रलये क्षणव्यवहारो यद्यस्ति तदानायत्या ध्वंसेनोपपादनीयः SiddhāMu. 23.7 (*on* 45); प्रतिपत्तिमूढेन मया … रोदितुमेव प्रवृत्तम्। समनन्तरमनायत्यैव विधिवद् विहितं सकलमेव कर्म CaitaCan. 108. 18(4); VyutpaVā. 119.20; निरूढादिपु त्वनायत्यान्यः शूद्रादिः शमिता स्यात् BhāṭṭCan. 8. 5 (*on* xiii. 1.15)

अनायतिक्षम (an-āyatikṣama) *adj.* not enduring for a long time (about result) अदेशकालार्थमनायतिक्षमं यदप्रियं लाघवकारि चात्मनः।… न तद् वचः Tantrākhyā. 103. 15=PañcT. 3. 54(311. 3)=Pañcā. 193. 4.

अनायतिविशुद्धा (an-āyativiśuddhā) *adj.* (*f.*) not faultless (i.e. not good) in the future (इच्छा) सविलम्बफला अविलम्बफला च। तत्र प्रथमावश्यमेव दुःखहेतुः। द्वितीयाप्यनायतिविशुद्धा तद्विपरीता च NyāyVārPari. 79.9.

अनारतरताभिरता (anārata-ratābhiratā) *adj.* (*f.*) continuously engaged in sexual enjoyment अनारतरताभिरताभ्यः। दीयते स्म शयितुं शयनीये न क्षणः क्षणदयापि वधूभ्यः ŚiśuVa. 10.89.

अनारतरसत् (anārata-rasat) *adj.* sounding incessantly सेनयोः क्षुब्धयोरासीद्युद्धमुद्धतदानवम्।… अनारतरसन्मत्तकलशाभ्रदुन्दुभि YogVā. iv. 26.55.

अनारतवति (anārata-vati) *adj.* involving constant service अक्षतेनौजसा काशिमवमत्य निहत्य च। साध्वनैषीद्देशार्णेशमनारतवतिं नतिम् DvyāśraKā. 9.33 (comm. अनारता निरन्तरा वतिः सेवा यस्यां तां नतिम्)

अनारतवहत् (anārata-vahat) *adj.* **A** continuously blowing संसारिणो विरचिता मुग्धापवरका गणाः।… अनारतवहद्वाता बहुवातायनान्विताः YogVā. iv. 52.18; iv. 53.19; **B** continuously flowing (अविद्या) अनारतवहच्छून्यजगन्मृगनदीशता। रजोराशिमयी रूक्षा YogVā. vi(2). 160.20; **C** moving or rotating constantly (ददृशतुर्व्योम) अनारतवहद्धिष्ण्यचक्रलक्षितपक्षकम् YogVā. iii. 24.27.

अनारतविकस्वर (anārata-vikasvara) *adj.* constantly blooming or flowering अनारतविकस्वरव्रततिपुञ्जपुष्पावलीविसारिवरसौरभोद्गमरमाचमत्कारिणी। … शरणमस्तु वृन्दाटवी StavMā. 300.21.

अनारतविवेक (anārata-viveka) *adj.* having constant discretion अनारतविवेकेन तेन सद्यः सनातनम्। पुनः कलङ्कं नैवाप्तम् YogVā. v. 12.4.

अनारतविहारिन् (anārata-vihārin) *adj.* always living भजे …। यमिनामनारतविहारि मानसे यमुनावनान्तरसिकं परं महः KṛṣṇaKa. 3.3.

अनारतसंयोगविभागाधिकरण (anāratasaṁyogavibhāgādhikaraṇa) *n.* substratum of continuous conjunctions and disjunctions न च मूलादग्रमग्राच्च मूलं गच्छति शाखामृगे तरावप्यनारतसंयोगविभागाधिकरणे चलतीति प्रत्यय उदयते NyāyKa. 194.17.

अनारतसमुद्भव (anārata-samudbhava) *adj.* having continuous births (and rebirths) अनारतमृतावस्मिन्ननारतसमुद्भवे। संसारसंभ्रमे युक्ता न तुष्टिर्न च दुःखिता YogVā. v. 14.35.

अनारतसेवन (anārata-sevana) *n.* constant enjoyment निकामं कामकामात्मा तृतीया प्रकृतिर्भवेत्। अनन्तवीर्यपर्यायस्तस्यानारतसेवने YaśasCam. ii. 359.24.

अनारतस्रुत (anārata-sruta) *adj.* oozing continuously द्विपाधिपाः …। सद्यस्ततस्तेरुरनारतस्रुतस्वदानवारिप्रचुरीकृतं पयः ŚiśuVa. 12.72.

अनारतस्रुति (anārata-sruti) *adj.* streaming forth continuously करद्वयं सपदि सुधन्वनो निर्जरैरनारतस्रुतिभिरधाव्यताम्बुभिः ŚiśuVa. 17.8 (comm. अविरतस्रावैः)

अनारतहत (anārata-hata) *adj.* struck continuously अनिलैरनारतहतः कियच्चिरं न महीरुहस्त्यजति मूलमात्मनः RāmC. 20.31.

अनारताज्ञाकरप्रिया (anāratājñākara-priyā) *adj.* (*f.*) whose lover is always obedient (to her) अनारताज्ञाकरप्रिया स्वाधीनपतिका ŚṛṅgāraL. 158.14.

अनारताश्रुधारा (anāratāśrudhārā) *f.* continuous stream of tears वन्धुसुन्दरी … अनारताश्रुधाराधौतगण्डस्थलस्थापितोभयाग्रकरतलाम् … अवलोक्य माम् … अवादीत् TilaMañ. 294.22.

अनारतास्तंगता (anāratāstaṅgatā) *adj.* (*f.*) disappearing or hiding forever सुदीनाचारधर्मिण्या नित्यं प्राकृतकान्तया। अनारतास्तंगतया चित्रमन्धीकृतं जगत् YogVā. iii. 113.60.

अनारतोज्ज्वलत् (anāratojjvalat) *adj.* shining continuously अच्युतो ध्येयः … अनारतोज्ज्वलद्रत्नधारौघकलसं स्पृशन्। वामपादाम्बुजाग्रेन PañcaRā. (Nā.) iii. 15.8.

अनारतोत्सव (anāratotsava) *m.* unending festival भज निराकुलमनारतोत्सवान् TilaMañ. 285.18.

अनारतोदय (anāratodaya) *adj.* rising constantly विनाशायैव जायन्ते जडा देहेष्वबुद्धयः। अनारतोदयाः पापा बुद्बुदा जलधेरिव YogVā. v. 14.16.

अनारतोदीरित (anāratodīrita) *adj.* sung (*lit.* uttered) continuously विनोदयितुमिव तस्यारतिमनारतोदीरितमधुरकेकागीतिभिः समारम्भि ताण्डवमुद्दण्डबर्हमण्डलैर्गृहशिखण्डिभिः TilaMañ. 180.5.

अनारदाह्लादिन् (a-nāradāhlādin) *adj.* which does not please Nārada नानारदाह्लादि मुखं श्रितोरुर्व्यासो महाभारतसर्गयोग्यः NaiṣC. 7.96; AlaṅkāKau.(Vi.) 194.14.

अनारब्ध (án-ārabdha) *adj.* [*f.* -ā] **A i** not started, not begun यस्यागृहीता अभि निम्रोचेदनारब्धोऽस्य यज्ञः स्यात् TaiS. VI. iv. 2.1; एतेन वै संवत्सरमारभन्त एतेन स्तोमांश्च च्छन्दांसि चैतेन सर्वा देवता अनारब्धं वै तच्छन्दोऽनारब्धा सा देवता यदेतस्मिन्नहनि नारभन्ते AitBr. 17.6 (470); कच्चिद्राजन्कृतान्येव कृतप्रायाणि वा पुनः। विदुस्ते वीरकर्माणि नानवाप्तानि (v.l. नानारब्धानि) कानिचित् MahāBhā. ii. 5.22; क्रियासंतानोऽनारब्धश्चिकीर्षितोऽनागतः कालः — पक्ष्यतीति NyāyBh. 111.1 (*on* ii. 1.44); अनुतिष्ठेत्समारब्धमनारब्धं प्रयोजयेत् NītiSā. 12.37; न चेदारब्धकार्येषु ज्ञानस्वातन्त्र्यमिष्यते। अनारब्धेषु नितरां पुंसोऽपि स्याद्यथेष्टता BṛĀraUBhVā. i. 4.1534; अनारब्धा यदा भित्तिर्द्वारं चाप्यकृतं यदा। द्वारोद्देशप्रदेशेन तदा देवं प्रवेशयेत् IśānŚiPa. ii. 47.43; सूत्रे ह्यारब्धमात्रस्य भोगेनैव क्षयो ध्रुवः। अनारब्धस्य भोगेन त्वितरे इति चोदितः AnuVyā. 53A.9 (*on* 3.3); कर्माण्यनारब्धान्यागामिजन्मकारणानि JīvanVi. 9.5; 45.8; यस्य पापस्य कार्यं दुःखं भोक्तुमनारब्धं तस्यैव ज्ञानेन विनाशः TattvPrakā. 204B.2 (*on* iv.1.15); AṇuBh. 312.10 (*on* iv. 1.15); एतत् काम्यव्रतपरम्। नित्यं त्वनारब्धमपि कार्यमिति गौडाः NirṇaSi. 21.9; 127.29; BālamBha. i. 548.14 (*on* 1.249); **A ii** not referred to before, not prescribed before अर्थित्वाच्च गमने प्रसक्ते कालविधानपरतैव युक्ता वाक्यस्य। अन्यथानारब्धोऽर्थ उपदिष्टः स्यात् ManuBh. i. 229.25 (*on* 3.45); (अ)प्रवृत्ते चरुनिधानं चोद्यते चरमायामिष्टकायां ओषधयोऽनारब्धे एव स्थले SaṅkarKāBh. 61.1 (*on* ii. 1.20); चरुसर्वौषधयोरपि स्थलनिर्वर्तकत्वाविशेषादिष्टकाधर्माः कर्तव्या इति प्राप्तेऽनारब्ध एव स्थण्डिले सर्वौषधवपनस्य समाप्ते BhāṭṭCan. 39.17 (*on* xiv. 1.10); **B** not brought about तैमिरिकाणां च पुरुषाणां विकीर्णानामसंयुक्तानां केशानां समूह उपलभ्यते अनारब्धेऽप्यवयविनि Sphuṭā. iii. 108.17 (*on* 3.101); अनारब्धे च गोशब्दे गोशब्दत्वं कथं भवेत्। वर्णसामान्यवच्चापि न तत्कल्पनमर्हति ŚlokaVār. 5(11).66 (526.7); यस्तु द्व्यणुकारम्भकः स एव परमाणुः स चानारब्ध एव TarkBhā.(Ke.) 64.6; 64.9.

अनारब्धकर्मन् (anārabdha-karman) *n.* action which has not commenced (to take effect) अनारब्धकर्मरूपसामग्रीनिवृत्त्यैव भाविदेहारम्भप्रागभावपरिपालनसिद्धेः JīvanVi. 45.13.

अनारब्धकर्मनिमित्त (anārabdhakarma-nimitta) *adj.* caused by actions which have not begun (to operate) अनारब्धकर्मनिमित्तं विदुषां शरीरग्रहणं न भवति PrakaVi. 867.21; 867.19.

अनारब्धकर्मबन्ध (anārabdhakarma-bandha) *m.* bondage of the actions which have not started (to operate) प्रारब्धकर्मवेगेण जीवन्मुक्तो यदा भवेत्। कंचित्कालमनारब्धकर्मबन्धस्य संक्षये VākyaVṛ. 52.

अनारब्धकर्मविषया (anārabdhakarma-viṣayā) *adj.* (*f.*) referring

to actions which have not yet commenced (to take effect) 'क्षीयन्ते चास्य कर्माणि' इति श्रुतिस्तु अनारब्धकर्मविषया VivaPraSam. 337. 2.

अनारब्धकलिकाजालक (anārabdha-kalikājālaka) *adj.* which has not produced a multitude of buds निःकीर्णकुसुमस्तरनारब्धकलिकाजालकोऽपि कृता मालानेनेति कृतमाल इत्यभिधीयते SaraKaṇṭhā. 663. 9.

अनारब्धकार्य (anārabdha-kārya) *adj.* 1 (action) the effect of which has not (yet) commenced अनारब्धकार्ये एव तु पूर्वे तदवधेः BrahmSū. iv. 1.15; अनारब्धकार्ये एव त्विति । अप्रवृत्तफले एव पूर्वे जन्मान्तरसंचिते अस्मिन्नपि च जन्मनि प्राग्ज्ञानोत्पत्तेः संचिते BrahmSūBh.(Śaṅ.) 790. 12 (*on* iv. 1. 15); विद्योत्पत्तेः पूर्वे सुकृतदुष्कृते अनारब्धकार्ये अप्रवृत्तफले एव विद्यया विनश्यतः BrahmSūBh.(Rā.) 723. 20 (*on* iv. 1. 15); विद्योत्पत्तेः पूर्वकृतयोः पुण्यपापयोरविशेषेण विनाश उतानारब्धकार्ययोरेवेति संशयः VedāntDī. 225. 12 (*on* iv. 1.15); अनारब्धकार्ये एव पूर्वे पुण्यपापे विनश्यतः BrahmSūBh.(Ma.) 68A. 5 (*on* iv. 1. 15); विद्यया खलु किलारब्धकार्ययोरनारब्धकार्ययोश्च सुकृतदुष्कृतयोः कर्मणोरविशेषेण विनाशो भवत्याहोस्विद् (विशेषतः) अनारब्धकार्ययोरेवेति VedāntKau. 393.25 (*on* iv. 1. 15); 394. 5 (*on* iv. 1. 15); निवृत्तायामविद्यायां कर्मसु चाविशेषेणारब्धकार्येष्वनारब्धकार्येषु च निवृत्तेष्वारब्धविपाकसंस्काराच्छरीरिणं भोक्तारमिव चायमात्मानं प्रत्येति BrahmSi. 131. 16; अतिक्रान्तानेकजन्मान्तरकृतस्य स्वर्गनरकादिप्राप्तिफलस्य अनारब्धकार्यस्य उपभोगानुपपत्तेः क्षयाभावः इति चेत्, न GītāBh.(Śaṅ.) 552. 6 (*on* 18. 66); आ भावादर्जितानां तु सर्वेषामपि कर्मणाम् । क्षयोऽनारब्धकार्याणां सम्यग्ज्ञानप्रसूतितः BṛĀraUBhVā. iii. 2. 82; विद्यया अनारब्धकार्येषु बन्धहेतुषु कर्मसु नाशितेषु अनुवर्तमानस्य प्रारब्धस्यापि यावच्चरमदेहावसानभावित्वाच्चरमदेहावसाने प्रारब्धेऽपि नष्टे सति पुनर्ब्रह्मप्राप्तिविघ्नहेत्वभावात् BrahmSūBh.(Śrī) ii. 465. 15 (*on* iv. 2. 18); 2 (cause) which has not (yet) begun to produce effect न च समाहारः कारणमपि तु अनारब्धकार्यं चरमद्रव्यं कारणम् NyāyVār. 237. 13 (*on* ii. 1. 31); सावयवस्य हि पटादेस्तन्त्वादयोऽनारब्धकार्याश्च प्रतीयन्ते TātpaṬ.(U.) 445. 17 (*on* 5 (11).11); परमाणवः किल कंचित्कालमनारब्धकार्या यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणाश्च तिष्ठन्ति BrahmSūBh.(Śaṅ.) 364.12 (*on* ii. 2.11); परमाणवस्ते च नित्या निरवयवा रूपादिमन्तः पारिमाण्डल्यपरिमाणाः प्रलये अनारब्धकार्या अवतिष्ठन्ते VedāntKau. 185.4 (*on* ii. 2. 11); सावयवे हि वस्तुनि द्विधावयवा दृश्यन्ते आरब्धकार्याश्चानारब्धकार्याश्चेति, इह पुनरारब्धकार्या अनारब्धकार्या वा पटे तन्त्वादय इव वर्णे न केचिदवयवा उपलभ्यन्ते न चानुमीयन्ते लिङ्गाभावात् NyāyMañ. i. 193.1; ii. 114. 24; सत्त्वादीनामनारब्धकार्याणां सूक्ष्मावस्थायिनामप्रत्यक्षत्वाच्छब्दव्यवहारगोचरत्वात् प्रश्नः Pradī. iv. 23A. 15 (*on* iv. 1. 3); अनारब्धकार्याः समानजातिगुणकर्माणः परमाणवो मुक्तात्मानश्च परस्परव्यावर्तकधर्मवन्तः जातिमत्त्वात् कुम्भवद् SarvaDaKau. 61. 26.

अनारब्धकार्यकर्मन् (anārabdhakārya-karman) *n.* action whose effect has not (yet) commenced अनारब्धकार्यकर्मसंबन्धस्य विद्यया विनष्टत्वात् । आरब्धकार्यकर्मसंबन्धस्यापि यावच्चरमदेहभावित्वात्संबन्धहेत्वभावेन ब्रह्मप्राप्तिरस्ति VedāntDī. 234. 3 (*on* iv. 2. 18)

अनारब्धतुल्यत्व (anārabdhatulya-tva) *n.* the state of being similar to (action) which has not (yet) commenced (to take effect) विद्यायोनिशरीरावसाने प्रारब्धस्यापि कर्मणो विरतव्यापारत्वात्, विरतव्यापारस्यानारब्धतुल्यत्वेन विद्याविनाश्यत्वात् ŚrutaPra. ii. 592. 17 (*on* iv. 1. 19)

अनारब्धत्व (anārabdha-tva) *n.* **1** the state of not being effected or produced न घटे प्रविभज्यमाने कपालशर्कराद्युपलभ्येत तेषामनारब्धत्वात् Bhām. 394. 13 (*on* ii. 2. 11); Kiraṇā. 18. 2; कार्यद्रव्यारम्भकस्य कार्यत्वाव्यभिचारात् कथमनारब्धत्वम् । उच्यते । न । अनन्तकार्यपरंपरादोषप्रसङ्गात् TarkBhā.(Ke.) 64. 7; NyāySu.(Ja.) 452A. 13 (*on* ii. 3. 18); **ii** the state of being (the topic) not introduced प्रथमाधिकरणत्वाच्छ्रुतिविचारस्याप्यनारब्धत्वान्नाधिकरणश्रुतिसंगती च TattvPrakā. 4A. 2 (*on* i. 1.0)

अनारब्धद्रव्य (anārabdha-dravya) *adj.* which has not (yet) begun to form a substance नीलपीतादिषु मिथः संसृष्टेष्वनारब्धद्रव्येष्वपि कर्बुरप्रत्ययो भवतीति चेत्, सत्यम्, द्रव्यान्तरोत्पादाभिमानात् स्थौल्यातिशयप्रत्ययवदुपपत्तेः ĀtmaTaVi. 616.3; स्तिमितवायुस्तु परमाणुसमूह एवानारब्धद्रव्यः SaptaPa. 14(7); ततस्तदवयवतदवयवक्रियाविभागादिन्यायेन परमाण्वन्तं कार्यं नश्यति । ततोऽनारब्धद्रव्यादिकाः चतुर्विधपरमाणवस्तिष्ठन्ति SarvaDaKau. 12. 24.

अनारब्धद्रव्यत्व (anārabdhadravya-tva) *n.* the state of being that which cannot produce a substance (मनः) न च सावयवं स्पर्शरहितद्रव्यत्वेनानारब्धद्रव्यत्वात् । स्पर्शवतामेव द्रव्यारम्भकत्वनियमाद् SarvaDaKau. 24. 12.

अनारब्धद्रव्यराशि (anārabdhadravya-rāśi) *m.* collection (of those atoms) which has not (yet) begun to form a substance एवं तर्ह्यनारब्धद्रव्यराशिषु का वार्तेति चेत्, न तावद्देशव्याप्तिसाम्येन तावत्परिमाणद्रव्यत्वारोपः ĀtmaTaVi. 643. 12.

अनारब्धपीडन (anārabdha-pīḍana) *n.* injury that is not begun सामिप्रमापितस्यापि रात्रौ तस्यां विवर्जयेत् । प्राणभृद्दिसनं यस्मात् किं त्वनारब्धपीडनम् BṛĀraUBhVā. i. 5.213.

अनारब्धफल (anārabdha-phala) *adj.* (action) which has not (yet) commenced to bear fruit आरब्धफलं यावत् जन्मनापि नानुक्तं क्षीयते कर्म ... इति क्षपयन्, अनारब्धफलेषु यथैधांसि समिद्धोऽग्निः इति परिहारेण भस्मीकरणम् MāṭhVṛ. 81. 15 (*on* 68); प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकम् BrahmSūBh.(Śaṅ.) 538. 17 (*on* iii. 1. 8)=542.4 (*on* iii. 1. 8); 543.13 (*on* iii. 1. 8); यदि नाम अनारब्धफलकर्मक्षयार्थानि नित्यानि कर्माणि TaiUBh. 189. 4 (*on* 1. 1); 188.14 (*on* 1. 1); यथा पूर्वोपात्तानां दुरितानाम् अनारब्धफलानां संभवः, तथा पुण्यानाम् अनारब्धफलानां स्यात् संभवः GītāBh.(Śaṅ.) 552. 16 (*on* 18. 66); 397. 10 (*on* 13. 23); अनारब्धफलानीह सन्ति कर्माणि कोटिशः TaiUBhāVā. 5. 25(1); BṛĀraUBhVā. i 4. 1531; यान्यनुपभुक्तफलान्यनारब्धफलानि तानीश्वरेणापि केनचिदपि न शक्यन्ते परित्यक्तुम् NaiṣkaSi. 46. 8; VedāntKa. 169. 7 (*on* i. 3. 28); विलम्ब अत्यनुरोधेनानारब्धफले एव नश्यतः ŚrutaPra. ii. 588. 16 (*on* iv. 1.15); (आत्मा) न चानारब्धफलानां कर्मणां तत्त्वसाक्षात्कारेण नाशोप्यः VīraMi. 886.23 (*on* 3. 162); संचिते पापपुण्ये द्विविधे । अनारब्धफले आरब्धफले च GoviBh. 294. 10 (*on* iv. 1. 15); *n.* uneffected result, cf. अनारब्धफलावच्छेद.

अनारब्धफलक (anārabdhaphala-ka) *adj.* (action) which has not yet commenced to bear fruits अनारब्धफलकानां चोत्पन्नकर्मणां फलानुत्पादः क्लेशाख्यसहकार्युच्छेदात् YogSā. 34. 17(2)

अनारब्धफलत्व (anārabdhaphala-tva) *n.* the state of being that (action) which has not (yet) commenced to bear fruit न हि अनारब्धफलत्वसामान्येन आत्यन्तिकोपभोग्यफलमप्यनेकं कर्म एकस्मिन् प्रायणे युगपदभिव्यक्तं सत् एकां जातिमारभत इति शक्यं वक्तुम् BrahmSūBh.(Śaṅ.) 542. 11 (*on* iii. 1. 8); प्रवृत्तफले चोपभुक्ते अनारब्धफलत्वाविशेषात् सर्वमेव कर्मैकं जन्मारभते PrakaVi. 721. 20.

अनारब्धफलावच्छेद (anārabdhaphalāvaccheda) *m.* determination (of time) by result which has not (yet) taken effect अभिनिर्वृत्तफलावच्छेदात्मा परिस्पन्दसंततिरतीता भवति अपाक्षीदिति तदवच्छेदात् कालोऽप्यतीत उच्यते, अनारब्धफलावच्छेदाद् भविष्यन्ती क्रियोच्यते पक्ष्यतीति NyāyMañ. i. 127. 1.

अनारब्धफलेहा (anārabdhaphalehā) *f.* action which has not (yet) commenced to bear fruit अनारब्धफलेहानां गम्यते संस्थितिः BṛĀraUBhVā. (Sambandha.) 95.

अनारब्धमङ्गलगीति (anārabdha-maṅgalagīti) *f.* auspicious song not commenced अपराह्णसमये नास्ति कुमार इति ... प्रवृत्तायामनिष्टवार्तायाम् ... अप्रहततूर्येष्वनारब्धमङ्गलगीतिषु ... स्कन्धावारे सेनाधिपतिः ... इमं क्षेममग्रतो दृष्टवान् TilaMañ. 193.8.

अनारब्धवस्त्वन्तर (anārabdha-vastvantara) *adj.* which has not produced any other thing विरुद्धं च सर्वप्रमाणैर्विनष्टस्यासतोऽनारब्धवस्त्वन्तरस्य कार्यारम्भकत्वमवस्थानं च क्षणमात्रवर्तिनः प्रमाणविरुद्धमेव ŚāstrDī. 104. 20 (*on* ii. 1. 2)

अनारब्धवादत्व (anārabdhavāda-tva) *n.* the state of being an unconnected statement (i. e. a general statement) (चतुर्गृहीतं जुहोतीति सामान्यवचनं प्रयाजानूयाजयोर्विशेषतोऽष्टगृहीतविधानाद् बाध्यते) (चातुर्गृहीतवाक्यस्यानारब्धवादत्वेन सर्वहोमविषयत्वात्) प्रयाजानूयाजव्यतिरिक्तविषयं तद् वाक्यम् MayūMāli. 364. 19 (*on* iv. 1. 17)

अनारब्धविपाक (anārabdha-vipāka) *adj.* whose result is not (yet) effected अनारब्धविपाकानां तावत् कर्माशयानां तत्त्वज्ञानाग्निना बीजभावो दग्धः SāṃkhyaTaKau. 501. 1 (*on* 68); Bhām. 722. 20 (*on* iv. 1.15)

अनारब्धव्य (an-ārabdhavya) *adj.* **1** not to be introduced भूतानुवादमात्रं तत्तु ... गतमित्यनारब्धव्यम् TantrVā. 43. 18 (*on* i. 2.26); **ii** not fit to be undertaken वाक्यं तावदनिश्चितप्रामाण्यं कथं प्रयोजननिश्चयाय प्रभवति ... इति शास्त्रमनारब्धव्यं स्यात् NyāyMañ. i. 6.18; विचारशास्त्रमनैयत्येनानारब्धव्यमिति पूर्वपक्षो वैयत्येनारब्धव्यमिति राद्धान्तः SarvaDaSaṃ. 12. 104.

अनारब्धव्यत्व (anārabdhavya-tva) *n.* the state of not being fit to be undertaken प्रथमसूत्रे हि शास्त्रस्यानुपादानात् जिज्ञासापदाभिधेययोश्च ज्ञानेच्छयोः प्रमाणवस्तुपरतन्त्रत्वेन अकृतिसाध्ययोः अनारब्धव्यत्वात् ... अधिकारार्थत्वमथशब्दस्य नाश्रितम् MīmāKau. ii. 134.1 (*on* iii. 1. 1)

अनारब्धव्यापारक (anārabdhavyāpāra-ka) *adj.* operation of which has not commenced अनारब्धव्यापारकाणि तत्त्वज्ञानेन आरब्धव्यापार-

ज्ञानेन आरब्धव्यापारकाणि तु पापानि भोगेन क्षीयन्ते ManiKa. 60. 8; सोऽयमनारब्धव्यापारकः कर्मगणो विलीयते AmṛUda. 4. 79(5)

अनारब्धशरीरभोग (anārabdhaśarīra-bhoga) *m.* enjoyment through the body which is not (yet) produced न चारब्धशरीरभोग इव, अनारब्धशरीरभोगोऽपि कश्चिदात्मविदो भवितुमर्हतीति प्रमाणमस्ति IṣṭaSi. 77.1.

अनारब्धसुरतक्रिया (anārabdha-suratakriyā) *adj.* (*f.*) who has not experienced sexual intercourse अनारब्धसुरतक्रियाणां बालिकानां प्रथमतः करणविशेषप्रयोगो न वशीकरणाय भवति RasSa. 223.3.

अनारब्धस्वभावभेद (anārabdha-svabhāvabheda) *adj.* in which a change of nature has not appeared इह खलु यदनारब्धस्वभावभेदम् ... तद्द्रव्यम्। तत्र हि द्रव्यस्य स्वभावोऽस्तित्वसामान्यान्वयः TattvPradī.(A.) 124. 3 (*on* 2. 3)

अनारब्धहिंसन (anārabdha-hiṁsana) *n.* injury which has not (yet) begun कलाभिरस्तः कृत्ताभिः कृकलास इति स्मृतः। हिंसां न कुर्यात्तस्यापि किं त्वनारब्धहिंसनम् BṛĀraUBhVā. i. 5. 212.

अनारब्धाक्षेपम् (an-ārabdhākṣepam) *adv.* without starting to abuse or reproach अनारब्धाक्षेपम् ...। कृशाङ्ग्या यत् पापे व्रजति मयि नैराश्यपिशुनं श्लथैरङ्गैरुक्तं हृदयमिदमुन्मूलयति तत् SaduktiKa. 127. 6; Subhāṣi. 1333.

अनारब्धावयविन् (anārabdhāvayavin) *adj.* which has not begun to form a composite whole (अवयव्यवयवेषु) येषु त्वारोप्यते ते भेदेनैव भान्ति किन्त्वनारब्धावयविषु तेष्वारब्धावयवितया विभ्रम्यते KhaṇḍanKhā. 1142. 2; प्रत्येकमुपलम्भायोग्यानामपि संहतिविशेषरूपावस्थाभेदादैन्द्रियकत्वं तत्तारतम्यादिकं च हिमानीचूर्णपुञ्जादिष्वनारब्धावयविषु लोकसिद्धम् NyāyPari. 19.4.

अनारब्धावयविरूपकार्य (anārabdhāvayavirūpakārya) *adj.* which has not begun to form the effect in the form of a composite whole अनारब्धावयविरूपकार्याः परमाणव एवैते संचयविशिष्टाः सन्तो लोकयात्रां वहन्तीत्येतदपि न समीचीनम् NyāyMañ. ii. 74. 8.

अनारब्धावान्तरव्यापार (anārabdhāvāntaravyāpāra) *adj.* which has not commenced an intermediate operation न हि विनष्टस्यासतोऽनारब्धावान्तरव्यापारस्योत्तरानुग्राहकत्वं संभवति NyāyRa. 536.10 (*on* 5(11). 101)

अनारब्धृ (an-ārabdhṛ) *adj.* who has not undertaken (the performance of a sacrifice) स स्वाम्यप्युत कर्तैव स्वामी तत्स्थानगत्वतः। अनारब्धुः फलाभावादस्वामी कर्तृमात्रता NyāyMāVi. 323.9 (*on* vi. 3. 9)

अनारब्धेष्टकार्य (anārabdheṣṭakārya) *n.* desired effect which has not begun अनारब्धेष्टकार्याणां नित्यं चेद् ध्वस्तये मतम्। नैवं, स्वात्मा क्रियाहेतुं यतोऽनर्थं निहन्ति तत् TaiUBhāVā. 6. 17(1)

अनारभमाण (an-ārabhamāṇa) *adj.* 1 not touching सक्तून् ... अनारभमाणस्त्रिः प्रसव्यं मन्थमुपमन्त्यति शलाकास्तम्बं मन्थं करोति HirŚS. v. 4. 36 (480.26); **2A** not introducing याज्ञिकाः खल्वपि संज्ञामनारभमाणा विभाषेत्युक्तेऽनित्यत्वमवगच्छन्ति।... आचार्यः खल्वपि संज्ञामारभमाणो भूयिष्ठमन्यैरपि शब्दैरेतमर्थं संप्रत्याययति MahāBh. i. 105.17 (*on* i. 1.44); द्विधा हि वादी पराजीयते यथा कर्तव्यतामनारभमाणो विपरीतं वा प्रतिपद्यमानः NyāyMañ. ii. 190.27; **2B** not undertaking (anything) अन्यनारभमाणस्य विभोस्तत्पादिताः परैः। व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः ŚiśuVa. 2. 91.

अनारभ्य (án-ārabhya) *ger.* **1A** not having resorted to यो वै श्रद्धामनारभ्य यज्ञेन यजते नास्येष्टाय श्रद्दधते TaiS. I. vi. 8.1; KāṭhS. 32.7 (iii. 26.12); **1BI** not having touched directly दक्षिणोपमन्थति। दक्षिणावृद्धि पितॄणाम्। अनारभ्योपमन्थति। तद्धि पितॄन् गच्छति TaiBr. I. vi. 8.5; KāṭhS. 36.11 (iii. 78.13); BaudhŚS. i. 144.18; ĀpaŚS. viii. 14.14; VaikhāŚS. 9.6; **1BII** not having taken hold of स यद् वानारभ्य यज्ञमध्वर्युराश्रावयेद् वेपनो वा ह स्यादन्यां वार्तिमार्छेत् ŚatBr. I. v. 1.2; ŚatBr.(K.) II. iv. 3.1; **2** not having connection (with a specific rite or context or rule), not having limitation in application (to specific rite), not having introduced (in a specific context) ये केचन पौर्णमासीममावास्यां वा धर्मा अनारभ्याम्नायन्त उभयत्रैव ते क्रियन्ते BhārŚS. i. 1.9; अथ कः पृष्ठशमनीयः स्यादिति। याथाकामी पथ्यानां दक्षिणावतामिति वार्षगण्यः। अनारभ्य वदति, तस्मादुदवसाय दक्षिणावता यजेत NidāSū. 96.7 (6.1); 111.11 (6.13); यदेतानि सामानि न च्यवन्त इति ... सर्वत्र गवामयनेऽनारभ्य ह्यच्यवनं विदधाति LāṭyāŚS. x. 8. 8 = DrāhyŚS. xxix. 3.19 (Allahabad Ed.); (ज्योतिष्टोमेन) इष्ट्वैवानारभ्य दोषवचनात् DrāhyŚS. xxiii. 1.6 (Allahabad Ed.); इष्टित्वेन तु संस्तुते होमः स्यादनारभ्याग्निसंयोगादितरेषामवाच्यत्वात् MīmāSū. vi. 8.7; vi. 8.9; अनारभ्याधीयते किंचित् — वायव्यं श्वेतमालभेत भूतिकामः ŚābaBh. 597.13 (*on* ii. 3.12); 1121.8 (*on* iii. 8.18); 1378.15 (*on* vi. 1.31); 1582.7 (*on* vii. 4.20); अनारभ्य च सौवर्णं हिरण्यं भार्यमित्ययम्। रूपसंपत्तये चैवं भवितव्यं सुवाससा BālaKrī. i. 15.1 (*on* 1.7); 'योऽग्निं चिनुत' इत्यनारभ्य कंचिद् विशेषमाम्नायते SaṅkarKāBh. 70.13 (*on* ii. 1.55); 96.15 (*on* ii. 3.23); अनारभ्य विहितानां त्वत्यन्ताप्रतीतक्रतुसंबन्धात् सोऽपि लघीयानेव TantrRa. 33.5; 215.14; उपासनविशेषमनारभ्य। अप्रस्तुतस्येत्यर्थः ŚrutaPra. ii. 483.29 (*on* iii. 3.23); दक्षिणान्तरेण कर्तव्यमित्येवमादिवाक्यैरनारभ्य विहितं प्रकृतत्वान्नित्यस्नाने यज्ञोपवीतम् CaturCin. iii(1). 1114.1; NyāyMāVi. 96.25 (*on* ii. 3.5); सप्तदशसामिधेनीरनुब्रूयादितिलनारभ्य श्रूयते VidhiRa. 8(38.14); 2 (6.21); ŚivārkaMaDī. i. 145.24 (*on* i. 1.3); अनारभ्य स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयते इति श्रुतम् BhāṭṭDī. iv. 116.1 (*on* x. 8.10); अनारभ्य श्रुतं वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्यः इति MīmāKau. ii. 25.20 (*on* ii. 3.4); MayūMāli. 453.15 (*on* vi. 1.7); **3A** not having begun or commenced or undertaken अनारम्भात्तु कार्याणां (v.l. अनारभ्य हि कार्याणि) नार्थः संपद्यते क्वचित् MahāBhā. x. 2.33; इति कर्माण्यनारभ्य कामं छन्दाद् विमोक्षते BrahmāṇḍP. ii. 4.19; अनारभ्योक्तकाले च वेदान् कन्यां य उद्वहेत्।... स्यात्सर्वकर्मबहिष्कृतः LaghvāśvaSm. 12.4; **3B** not having caused or produced न खल्वसमानविग्रहः पुरुषाणामनारभ्य कांचिन्महतीमापदमुपशाम्यति YaśasCam. ii. 17.4; सत्फलानि कर्माण्यनारभ्यैव शरीरं स्वफलं जनयन्ति, इतराणि तु शरीरारम्भद्वारमिति नास्त्यामुष्मिकत्वनियमः TantrRa. 188.20.

अनारभ्य (an-ārabhya) *adj.* [*f.* -ā] **1** not fit or worthy to be commenced or undertaken or introduced अनारभ्या भवन्त्यर्थाः केचिन्नित्यं तथागताः। कृतः पुरुषकारोऽपि भवेद्येषु निरर्थकः MahāBhā. v. 34.20; v. 44.3; सिद्धत्वादनारम्भ इति दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येतस्मिन् प्रकरणे सिद्धम् आत्मव्यतिरेकः सिद्धत्वादनारभ्यं प्रकरणम् NyāyVār. 362.8 (*on* iii. 1.7); 130.6 (*on* i. 1.35); संदेहाभावेनाधिकरणमनारभ्यमाशङ्क्य संदेहकारणं दर्शयितुमाह — तत्र तावदिदं सिद्धमित्यादिना श्लोकपञ्चकेन TātpaṬ.(U.) 241.8 (*on* 5(3).8); नापि द्वारशब्दस्य स्थाने लाटभाषातोऽन्यत्र वारशब्दः संभवति। तेनानारभ्य एवायं विपर्ययाल्लसंभवात् TantrVā. 200.22 (*on* i. 3.18); परिशेषसिद्धत्वाद्ब्राह्मणलक्षणमवचनीयमिति सूत्रमिदमनारभ्यमिति प्रतिभाति TantrVā. 416.18 (*on* ii. 1.33); न ह्यैवात्र प्राणशब्दं प्रतीयत इति पूर्वपक्षाभावादनारभ्यमेवत् Bhām. 158.14 (*on* i. 1.28); TantrRa. 137.2; इदं विचारशास्त्रं विधिप्रसक्त्यानारभ्यमारभ्यं वेति मुख्यो विचारः YuktiSneha. 5.13 (*on* i. 1.1); न ह्यैवात्र इन्द्रप्राणप्रज्ञादिशब्दैरवगन्तव्यमिति। नन्वनारभ्यमेवैतत् प्राक् प्राणचिन्तया गतार्थत्वात् GoviBh. 28.3 (*on* i. 1.31); **2** not possible to be accomplished or produced न हि वचनशतेनाप्यनारभ्योऽर्थः शक्यो विधातुम्। ... उदकेन दग्धव्यमग्निना छेदयितव्यमिति ŚābaBh. 681.2 (*on* iii. 1.12); ननु अनारभ्यो मोक्षः, कथमस्य कर्मकार्यत्वमुच्यते BrahmSūBh.(Śaṅ.) 792.10 (*on* iv. 1.16); आरभ्यत्वाभ्युपगमे मुक्तेस्तस्यायथोदितम्। अनारभ्या त्वियं मुक्तिस्तस्त्विद्वेद्धानहेतुतः BṛĀraUBhVā. iii. 3.17; सोऽनारभ्योऽर्थः प्रतिज्ञातो भवेत् इत्येनचिंतं चिन्वीतेति Kāśi. iii. 143.21 (*on* 5(6).17); **3** not to be connected with any context विदेवनीयादयोऽभिषेचनीयादूर्ध्वं समाम्नायमानाः क्रमादभिषेचनीयाङ्गम्। विरोधे च प्रकरणं बलीय इत्युक्तम्। तस्मादनिर्णीतत्वादनारभ्यम् TupṬ. 41.8 (*on* iv. 4.3); TantrRa. 205.15; **4** not to be practised or followed ननु च ब्राह्मणस्य नियोगप्रतिषेधादनारभ्योऽयम् (कल्पः) BālaKrī. i. 247.10 (*on* 2. 131)

अनारभ्यता (anārabhya-tā) *f.* the state of not being worthy to be undertaken विषयप्रयोजनपरमिदं सूत्रमिति परमतम्। तन्मन्दम्, वेदाध्ययनस्याविवक्षितार्थतया हि नाध्ययनविध्याक्षिप्तं शास्त्रमित्यारम्भहेत्वभावादनारभ्यतां निवर्तयितुम् युक्तम् NayaVi. 4.7 (*on* i. 1.1)

अनारभ्यत्व (anārabhya-tva) *n.* **A** the state of not being possible to be performed अनारभ्यत्वात् KātyŚS. i. 8.3 (comm. अस्यार्थस्यानारभ्यत्वात् नैवारम्भणीयोऽयमर्थः यद्गुणभूतस्य द्रव्यस्यानुरोधेन प्रधानभूतस्य यागस्यावृत्तिः तस्माद्विकल्प एव न समुच्चयः); **B** the state of not being possible to be accomplished or produced कार्याकारोऽपि कारणस्यात्मभूत एव, अनात्मभूतस्यानारभ्यत्वात् BrahmSūBh.(Śaṅ.) 323.13 (*on* ii. 1.18); अनारभ्यत्वान्मोक्षस्य BṛĀraUBh. 386.10 (*on* iii. 3.1); मोक्षस्य नित्यत्वात् अनारभ्यत्वे स्वं फलम् आरभत एव GītāBh.(Śaṅ.) 180.14 (*on* 6.1); अयं परमात्मा देहाद्विकूटस्थभावेन निरूपितः शरीरस्थोऽपि अनादित्वादनारभ्यत्वादव्ययो व्ययरहितः GītāBh.(Rā.) 587.1 (*on* 13.31); हिरण्मय इति ... न मयडत्र विकारमादाय प्रयुज्यते, अनारभ्यत्वादात्मनः VedāntSā.(Rā.) 44.4 (*on* i. 1.21); **C** the state of not being possible to be commenced अथ योगानुशासनमितिवद् ब्रह्मज्ञानेच्छाया अनारभ्यत्वात् PrakaVi. 22.11.

अनारभ्यत्ववचन (anārabhyatva-vacana) *n.* the statement of not being possible to be produced इत्युक्तपरिहारार्थं नैतत्सम्यगितीर्यते । अनारभ्यत्ववचनं तद्धेतुप्रतिपत्तये BṛĀraUBhVā. iii. 3.16 (comm. अनारभ्यत्वान्मोक्षस्येति भाष्यमवतारयति)

अनारभ्यपाठ (anārabhya-pāṭha) *m.* statement made without having connection with a particular context, general statement येनेत्सेत् कर्मणा तत्र जयाहोमेऽखिलार्थता । वैदिकेष्वेव वा सर्वशेषोऽसंकोचकत्वतः । होम आहवनीये स्यात् कृष्यादिषु न सोऽस्ति हि । तेनानारभ्यपाठेऽपि वैदिकेष्वेव ते जयाः NyāyMāVi. 162.9 (*on* iii. 4.13)

अनारभ्यप्रदानसंयोग (anārabhya-pradānasaṁyoga) *m.* association with the (injunction of) giving occurring as an isolated statement without having connection with any particular context अनारभ्यप्रधा(? दा)नसंयोगेन स्वाहाकारवषट्कारौ श्रूयेते ṬupṬ. 289.3 (*on* x. 8.20)

अनारभ्यमाणविभ्रममज्जन (anārabhyamāna-vibhramamajjana) *adj.* where (i. e in the premises of which) sportive bathing is not being undertaken मन्दिरमपि ⋯ असुरापहारभीतभव्याप्सरःपरिहृतस्वेच्छाविहारम् उद्यानवापीष्वनारभ्यमाणविभ्रममज्जनम् उद्विग्नसकलपरिजनं दृष्टम् TilaMañ. 41.15.

अनारभ्यवचन (anārabhya-vacana) *n.* statement made without having connection with a particular context, general statement अस्ति चानारभ्यवचनं वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयत इति ŚābaBh. 2075.17 (*on* x. 8.20)

अनारभ्यवाक्य (anārabhya-vākya) *n.* statement made without having connection with a particular context, general statement अतो नानूयाजेषु इतिवत् पर्युदास एवायमनारभ्यवाक्यशेष उक्तविधप्रथमप्रयोगभिन्ने प्रवृत्त्यात् BhāṭṭDī. i. 289.15 (*on* iii. 3.12); अनारभ्यवाक्ये च क्रतुर्न संनिहितः किंतु सामिधेनीद्वारा कथंचिद् हृदयमागमयितव्यस्ततश्चानारभ्यवाक्यं यावत्सामिधेनीद्वारा क्रतुसंबन्धं बोधयितुं प्रवर्तेत MayūMāli. 781.9 (*on* x. 8.9)

अनारभ्यवाद (anārabhya-vāda) *m.* statement or injunction made without having connection with a particular context, disconnected or isolated statement उपांशुयाजमन्तरा यजत्यजामित्वायेति विज्ञायते । अनारभ्यवाद इत्येकेषाम् BhārPariśeṣaSū. 21; अप्रकरणोत्पत्तिरनारभ्यवाद आश्रयित्वात् सर्वगुणः (विधिः) KātyŚS. i. 3.28; तत्प्रकृत्यर्थं यथान्येऽनारभ्यवादाः MīmāSū. iii. 6.14; विहारदर्शनं विशिष्टस्यानारभ्यवादानां प्रकृत्यर्थत्वात् MīmāSū. vii. 4.20; ŚābaBh. 1582.11 (*on* vii. 4.20); होता वाग्निष्टोमचमसेषु शब्दसंयोगात् । शेषोऽनारभ्यवादः SaṅkarKā. (AOR. 1965) ii. 3.37; पौरुषेयं कथ वस्तु विदध्याच्छाश्वतो विधिः । तेनानारभ्यवादेऽपि विधिर्नैवास्ति तादृशः TantrVā. 218.14 (*on* i. 3.18); एकस्य तूभयत्वे संयोगपृथक्त्वं कारणं तच्चेह प्रकरणानारभ्यवादाभ्यामवगतम् TantrVā. 234.12 (*on* i. 3.25); यथा साप्तदश्यस्यानारभ्यवादेन सामिधेनीसंबन्धितयोत्पत्तेः प्राकरणिकैश्च वचनैर्विनियोगादर्थवत्त्वम् TantrVā. 613.17 (*on* ii. 3.20); 755.2 (*on* iii. 1.22); 900.21 (*on* iii. 3.33); सर्वो ह्यनारभ्यवादो वाक्यसंयोगेनाङ्गं विधत्ते लिङ्गेन वा केनचिद् व्यभिचारिणा TantrVā 992.12 (*on* iii. 4.30(?24)); एवं चानारभ्यवादस्वरसो न भग्नो भविष्यति TantrVā. 994.3 (*on* iii. 4.31(?25)); 1075.6 (*on* iii. 6.8); अनारभ्यवादेनापि योऽर्थो न्याय देव प्राप्यमाणः स एव प्राप्यते ṬupṬ. 17.12 (*on* iv. 1.48); तत्रार्थात्मिका (भावना) ⋯ स्ववाक्यप्रकरणान्यप्रकरणानारभ्यवादस्मृतिलोकाचारप्राप्ततत्तदितिकर्तव्यतावती तत्र तत्र सिध्यति Kāśi. ii. 13.24 (*on* 5(1).15); YuktiSneha. 47.26 (*on* i. 1.5); अनारभ्यवादविचारप्रस्तावागतशेषविषयं विचारं समाप्येदानीं तमेवानारभ्यवादमनुसंधत्ते ŚāstrDī. 296.11 (*on* iii. 6.1); विश्वजिदधिकरणे हि सर्वेषामनारभ्यवादानामश्रुतफलानां क्रतुसंबन्धप्रमाणश्रुत्यादिशून्यानामफलत्वनिराकरणेन फलवत्त्वं साध्यते TantrRa. 31.9; सर्व एवैते सामान्यविधयो दर्शश्राद्धमेवारभ्याम्नायन्ते । न कश्चिदप्यत्रानारभ्यवादोऽस्ति CaturCin. iii(1). 1057.11; iii(1).1116.4; अथोच्येतारभ्याधीतविरुद्धधर्मावरुद्धायां प्रकृतौ अनारभ्यवादस्य विकृतौ निवेशः CaturCin. iii(2). 601.21; अनारभ्यवादेन यागसंयोगश्रुतेः 'स एष सप्तदशः प्रजापतिर्यज्ञमन्वायत्त' इति वचनात् अदृष्टमुपकार इति प्राप्ते ब्रूमः SaṅkarKāBh. 90.9 (*on* ii. 3.1); चतुर्गृहीतं जुहोतीत्यनारभ्यवादेन होमाद्यनुवादेन चतुर्गृहीतमात्रविधानात् MīmāKau. ii. 196.3 (*on* iii. 1.20); BhāṭṭCan. 123.3 (*on* xvi. 4.1); न प्रथमयज्ञ इति वाक्यस्यानारभ्यवादसंनिधिसमाम्नातत्वाभावेन तदेकवाक्यत्वासंभवेन पर्युदासायोगात् MayūMāli. 257.10 (*on* iii. 3.12)

अनारभ्यवादगत (anārabhyavāda-gata) *adj.* belonging to a statement made without having any connection with a particular context अथानारभ्यवादगतं चतुष्ट्वमेवाष्टसंख्यालक्षणार्थं कस्मान्न भवति TantrRa. 111.8; VidhiRa. 34(185.25)

अनारभ्यवादत्व (anārabhyavāda-tva) *n.* the state of being mentioned without having connection with any particular context संनिपातेऽवैगुण्यात्प्रकृतिवत्तुल्यकल्पा यजेरन् ।⋯न वानारभ्यवादत्वात् MīmāSū. vi. 6.3; अनारभ्यवादत्वादेव स्रुवादिसंबन्धस्य प्रकृतिविकृतिष्वविशेषात्सर्वार्थत्वमिति पूर्वः पक्षः TantrVā. 1071.18 (*on* iii. 6.1); 1085.11 (*on* iii. 6.14); तस्मात्वेष्टयर्थमाधानं अनारभ्यवादप्रस्तावादाधानवाक्यस्यानारभ्यवादत्वमेव स्थितम् ŚāstrDī. 301.6 (*on* iii. 6.4); MayūMāli. 301.9 (*on* iii. 6.4); 539.26 (*on* vii. 3.9)

अनारभ्यवादन्याय (anārabhyavāda-nyāya) *m.* procedure adopted in the case of isolated statement (in deciding whether a particular rite, property, statement etc. are meant for the archetype only or for any rite without restriction) अयं तु (क्रतुः) प्रतिषेधत्वात्प्राप्तिमपेक्षमाणो लौकिकव्यापारेभ्यो वैदिकेभ्यश्चाध्ययनाधानाग्निहोत्रदर्शपूर्णमासादिभ्यः प्रवर्ग्यप्राप्त्यभावान्निवर्तमानः सामर्थ्येन सोमं गच्छति तत्राप्यनारभ्यवादन्यायेन ज्योतिष्टोमम् TantrVā. 898.17 (*on* iii. 3.33); 1152.4 (*on* iii. 7.39)

अनारभ्यवादपक्ष (anārabhyavāda-pakṣa) *m.* view which maintains that the statement is general श्रौतमिदं वाक्यं तदापि -- प्रकरणाधीतं चेत्तत्रैव कस्मिंश्चित्कर्मणि निवेक्ष्यते, अनारभ्यवादपक्षेऽपि ⋯ नियतविषयमेव व्याख्यास्यते NyāyMañ. i. 236.21.

अनारभ्यवादप्रतिषेध (anārabhyavāda-pratiṣedha) *m.* prohibition of statement made without having connection with a particular context औत्तरवेदिकोऽनारभ्यवादप्रतिषेधः MīmāSū. vii. 3.25.

अनारभ्यवादप्रस्ताव (anārabhyavāda-prastāva) *m.* mention of the disconnected injunction अनारभ्यवादप्रस्तावेनाध्याधेयस्य प्रथमं तावदनारभ्यवादत्वमेव प्रतिपाद्यते TantrVā. 1084.15 (*on* iii. 6.11); ŚāstrDī. 301.6 (*on* iii. 6.4); MayūMāli. 277.11 (*on* iii. 4.18)

अनारभ्यवादप्राप्त (anārabhyavāda-prāpta) *adj.* [*f.* -ā] applicable through (the rule of) disconnected or general injunction अनारभ्यवादप्राप्तश्च ये यजामहः पर्युदासपक्षे पुनर्नानूयाजशब्दाभ्यां यागान्तराणि ŚāstrDī. 771.4 (*on* x. 8.1); तदिदमनारभ्यवादप्राप्तस्य स्वाहाकारस्य विशेषेषु पुनः श्रवणं साप्तदश्यवदुपसंहारार्थम् ŚāstrDī. 782.7 (*on* x. 8.10); वैमृधादिषु विकृतिष्वनारभ्यवादप्राप्ताः सप्तदश सामिधेन्यः प्राकरणिकेन विधिना पुनर्विधीयमानाः ⋯ वैमृधादेरपूर्वतां गमयन्ति । साप्तदश्यं त्वनारभ्यवादप्राप्तमनूद्यते NyāyMāVi. 607.23 (*on* x. 8.9); VidhiRa. 37(?39) (197.12)

अनारभ्यवादरूप (anārabhyavāda-rūpa) *n.* [Inst.] in the form of disconnected or general injunction यत्तु यज्ञावचरग्रहणं तत्प्रकृतयज्ञाभावादनारभ्यवादरूपेण सर्वत्र विदधाति TantrVā. 755.11 (*on* iii. 1.22); पवमानहविष्याधानाङ्गं उत तान्यप्याधानेन समप्रधानानि ⋯। अनङ्गत्वे तु कथंचिदपि यज्ञसंयुक्तानां प्रकृताधाननिवेशासंभवादिष्टीनां च स्वयमप्रकृतत्वादनारभ्यवादरूपेण सर्वयज्ञेषु भवन्ति ŚāstrDī. 203.15 (*on* iii. 1.12); *adj.* having the form of unconnected or general injunction नन्वेवमनारभ्यवादरूपेऽग्निप्रकरणेऽग्निष्टोमादिवाक्यैः क्रत्वन्वयकरणात् प्रागेव य एवं विद्वानग्निं चिनुत इत्युत्पन्नः शुद्धोऽग्निः श्येनाकृत्यादिगुणफलविधिष्वाश्रयत्वेनान्वेति VidhiRa. 36(189.6)

अनारभ्यवादविधि (anārabhyavāda-vidhi) *m.* injunction stated without having connection with a particular context काठके चानारभ्यवादविधिना सर्वयज्ञगतयजनयाजनसंबन्धोऽध्यापनाध्ययनसंबन्धश्च श्रूयते TantrVā. 124.2 (*on* i. 3.7); न चैतद्वाक्यं स्रुवस्यापि विधायकम् । प्रधानक्रियानुपादाने सति विशिष्टविधानेऽनुपपद्यमाने वाक्यभेदप्रसङ्गात् । तस्मादनारभ्यवादविधिप्रापिते स्रुवस्य खादिरत्वे तद्धर्मातिदेशः कल्पयितव्यः TantrVā. 1073.13 (*on* iii. 6.5)

अनारभ्यवादविध्यधीत (anārabhyavādavidhy-adhīta) *adj.* recited in accordance with the injunction stated without having connection with a particular context यामश्रुतपरिग्रहाच्च सर्वैरनारभ्यवादविध्यधीतो वेदोऽपेक्षित इत्यवश्यं ब्रह्मचर्यकाल एव समस्तो वेदोऽध्येतव्यः TantrVā. 1168.15 (*on* iii. 3.18)

अनारभ्यवादविहित (anārabhyavāda-vihita) *adj.* enjoined by a disconnected statement अग्निरनारभ्यवादविहितः स वाक्येन प्रकृतौ विकृतिषु च कासुचिद् विनियुज्यते ŚāstrDī. 782.17 (*on* x. 8.23)

अनारभ्यवादस्थितत्व (anārabhyavādasthita-tva) *n.* the state of belonging to a disconnected or general context न चास्यानारभ्यवादस्थितत्वेन साधारणप्राप्तिरिति वाच्यम् CaturCin. iii(1). 1116.3.

अनारभ्यवादाधीत (anārabhyavādādhīta) *adj.* mentioned in the disconnected or general statements विज्ञातवक्तावक्तैरपि श्रुत्यादिभिः समाख्यापर्यन्तैर्यावन्तः शेषाः प्रणीयन्ते ते सर्वे शेषिकर्मभावेन प्रार्थिता इत्थंभावेन सहानारभ्यवादाधीतैर्गृह्यन्ते TantrVā. 119.6 (*on* i. 3.5)

अनारभ्यविगर्हित (anārabhya-vigarhita) *n.* blame expressed without having connection to anyone अविदितमिन्नार्थगम्भीरमनारभ्यविगर्हितम्।

-त्वदिदं समुपश्रुत्य साकम्पमिव मे मनः JātaMā. 172.15 (26.26)

अनारभ्यविचार (anārabhya-vicāra) *m.* inquiry not having connection with any specific context प्रकरणस्य पूर्वैः सह विरोधाविरोधविचार-पेटिकायामनारभ्यविचारप्रस्तावसंगतिस्तूत्तराधिकरणे ग्रन्थ एव स्फुटा MayūMāli. 271.20 (*on* iii. 4.12)

अनारभ्यविधा (anārabhya-vidhā) *f* procedure adopted in the case of a disconnected statement यत्र फलवदेकं समाम्नातं स्थलान्तरे चानारभ्यविधयाफलमारादुपकारक तयोश्चोभयोरपि वचनद्वयात्स्वतन्त्रैककालकर्तव्यता MImāKau. ii. 339.14 (*on* iii. 3.12)

अनारभ्यविधान (anārabhya-vidhāna) *n.* injunction not having connection with any particular context, disconnected or general injunction स्याद्वानारभ्यविधानादन्ते लिङ्गविरोधात् MImāSū. ix. 1.32; x. 5.54; प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात् MImāSū. x. 8.1; वाक्यशेषो वा क्रतुना ग्रहणात्स्यादनारभ्यविधानस्य MImāSū. x. 8.19; वाक्यशेषः स्यात्प्रतिषेधः, प्रदेशानारभ्यविधानयोः ŚābaBh. 2059.6 (*on* x. 8.4); न च 'न हिंस्यात् भूतानि' इति वाक्यान्तरावगतिर्भवति अनारभ्यविधानात् Bṛha. 40.12 (*on* i. 1.2); अनारभ्यविधानाद्धोममात्रे चतुर्गृहीतम् ṬupṬ. 16.22 (*on* iv. 1.48); यौ पुनरेकविषयौ विधिप्रतिषेधौ तावेव षोडशिग्रहग्रहणाग्रहणवद्विकल्पेते इति। तदयुक्तं प्रतिषेधप्रदेशेऽनारभ्यविधानेन प्राप्तप्रतिषेधत्वाद्विकल्पः स्यादित्यधिकरणविरोधात् CaturCin. iii(2). 188.1; सामिधेनीसंबन्धोऽपि प्राकरणिकवचनैरेव सिद्ध्यतीति अनारभ्यविधानस्य वैयर्थ्यशङ्का प्राप्नोति VidhiRa. 8(39.2); MayūMāli. 166.14 (*on* ii. 3.5)

अनारभ्यविधि (anārabhya-vidhi) *m.* injunction without having any connection with a particular context, disconnected or general injunction प्रकृतौ चेदस्ति, चोदकेनैव विकृतिं प्राप्नोति। ततो नानारभ्यविधिमाकाङ्क्षति। तस्मादनाकाङ्क्षितत्वादनारभ्यविधिर्न तत्र विदधाति ŚābaBh. 1026.1 (*on* iii. 6.2); न साप्तदश्यं बलवद्विकृतिष्वौपदेशिकम्। अनारभ्यविधेस्तद्धि सामिधेन्यङ्गतां गतम् TantrVā. 1077.18 (*on* iii. 6.9); 1078.5 (*on* iii. 6.9); नन्वेवमनारभ्यविधिरनुवादः स्यात् ṬupṬ. 17.14 (*on* iv. 1.48); अस्ति चानारभ्यविधिः यदाहवनीये जुह्वतीति Kāśi. i. 181.7 (*on* 2.232); (विधिः) प्रकृत्यग्निष्टोमार्थ एव स्यात् अनारभ्यविधेः प्रकृतिगामित्वादित्यर्थः SaṅkarKāBh. 152.21 (*on* iii. 3.2); NyāySu.(So.) 8.12 (*on* i. 2.2); अनारभ्यविधिः सामान्यविधिः ArthSaṁ. 54.1; MImāNyāPra. 215.2; ननु मन्त्रस्य विधायकत्वाभावेनानारभ्यविधिशेषत्वासंभवात्कथमुपसंहारार्थ[त्व]म् MayūMāli. 782.1 (*on* x. 8.10); 'स्वाहाशिरस्केण मन्त्रेण जुहुया'दित्येवं स्वाहाशब्दविधावपि तात्पर्यावगमात्संभवत्यनारभ्यविधिप्राप्तस्वाहाकारोपसंहारार्थत्वमिति भावः MayūMāli. 782.4 (*on* x. 8.10)

अनारभ्यविधित्व (anārabhyavidhi-tva) *n.* the state of being a disconnected or general injunction अनारभ्यवादेऽपि विधिर्नैवास्ति तादृशः। अनारभ्यविधित्वे च न कर्मार्थत्वसंभवः TantrVā. 218.15 (*on* i. 3.18)

अनारभ्यविहित (anārabhya-vihita) *adj.* disconnectedly or generally enjoined, enjoined without having connection with a particular context ये चानारभ्यविहिता ये च प्रकरणे ग्रहाः। सर्वे तत्साधनत्वात्तद्धर्मसंबन्धमाप्नुयुः ŚāstrDI. 309.10 (*on* iii. 6.11); शास्त्रीयमात्मज्ञानं क्रतुविधिभिरपेक्षितं तस्य चानारभ्यविहितस्यापि सामर्थ्येन ... क्रत्वङ्गत्वावधारणात् तद्द्वारेण पुरुषार्थानुबन्धित्वम् NyāySu.(So.) 25.1 (*on* i. 2.7); °साप्तदश्यविधिष्वनारभ्यविहितशास्त्रस्योपसंहारार्थत्वेन तदितरविकृतीनां साप्तदश्यसंबन्धव्यावृत्तिफलकतया परिसंख्यारूपेषु तल्लक्षणाव्याप्तिः स्यात् VidhiRa. 8 (40.23); अत एव हिरण्यधारणादौ अनारभ्यविहिते व्यभिचरितक्रतुसंबन्धाभावेन च पर्णतान्यायानवसरे सति फलाकाङ्क्षायां न तत्कल्पना SiddhāTa. 21.13.

अनारभ्यश्रुत (anārabhya-śruta) *adj.* [*f.* -ā] disconnectedly or generally mentioned, mentioned without having connection with a particular context अनारभ्यश्रुतं हि साप्तदश्यं यावत्सामिधेनीद्वारा सकलविकृत्यङ्गं कल्प्यते तावत्प्राकरणिकैर्वाक्यैर्मित्रविन्दादिसंबन्धे कृते क्षीणार्थापत्तिर्न क्रत्वन्तरसंबन्धं कल्पयति VidhiRa. 8 (38.18); यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेत् इत्यनारभ्यश्रुतेष्टिरग्निमत्कर्मसंबन्ध्यश्वदाननिमित्तिका GuruCandr. i. 324.11; LaCandr. 380.7; BhāṭṭDI. ii. 20.8 (*on* iii. 6.1); अप्रकरणेऽनारभ्यश्रुते वायव्यादिवाक्ये दार्शपूर्णमासिकः संस्कार एवानूद्यते न तु यागो विधीयते MayūMāli. 167.16 (*on* ii. 3.5)

अनारभ्यसमाम्नात (anārabhya-samāmnāta) *adj.* mentioned without having connection with any particular context तत्र प्रकरणादेते तद्वतिग्रहमात्रगाः (धर्माः)। नानारभ्यसमाम्नातग्रहार्थाः स्युरसंनिधेः ŚāstrDI. 309.7 (*on* iii. 6.11)

अनारभ्यस्तनकल्प (anārabhya-stanakalpa) *m.* prescription of (milking of) udders without having connection with a particular context सर्वेषामुपसत्स्वनारभ्यस्तनकल्प आम्नातः ĀpaŚS. x. 16.15.

अनारभ्याग्निसंयोग (anārabhyāgnisaṁyoga) *m.* connection with the sacred fire mentioned without having reference to any particular context इष्टित्वेन तु संस्तुते होमः स्यादनारभ्याग्निसंयोगादितरेषामवाच्यत्वात् MImāSū. vi. 8.7; निर्देशो वानाहिताग्नेरनारभ्याग्निसंयोगात् MImāSū. vi. 8.9.

अनारभ्याधीत (anārabhyādhīta) *adj.* [*f.* -ā] mentioned or prescribed without having connection with a particular context, mentioned or prescribed disconnectedly or generally प्रकृतौ वा निविशेरन्ननारभ्याधीतानि पात्राणि ŚābaBh. 1025.11 (*on* iii. 6.2); एवमेवानारभ्याधीताराद्युपकारकसामवायिकाङ्गवाक्यानि योजयितव्यानि TantrVā. 13.8 (*on* i. 2.7); अनारभ्याधीतं प्रकरणाधीतेन पौर्वापर्येण विरोधे पूर्वं परेण ... बाध्यते TantrVā. 879.21 (*on* iii. 3.14); अनारभ्याधीता जातिविशेषाः क्रत्वर्थाः पुरुषार्थाश्च ṬupṬ. 30.6 (*on* iv. 3.1); अनारभ्याधीतान्यपि हि एतानि ... क्रतुप्रयोगवचनेनैव अङ्गान्तरवत् संस्पृश्यन्ते BrahmSūBh.(Śaṅ.) 685.6 (*on* iii. 3.42); 687.2 (*on* iii. 3.42); तदेवं साधुभिर्भाषितव्यमसाधुभिर्नेति विधिनिषेधयोरनारभ्याधीतयोः श्रूयमाणयोरपि दौःस्थित्यात् NyāyMañ. i. 378.7; अप्राकरणिकस्य कर्मणोऽङ्गमप्यनारभ्याधीतम् ManuBh. i. 294.2 (*on* 3.192); तेषाम् ... अनारभ्याधीतस्य ... साप्तदश्यस्य ... प्रकृतावेव निवेशः PrakaPañ. 461.1; अनारभ्याधीतमपि यस्य पर्णमयी जुहूर्भवतीत्यव्यभिचरितक्रतुसंबन्धजुहूद्वारेण जुहूपदं क्रतुं स्मारयत् Bhām. 93.8 (*on* i. 1.4); ज्येष्ठानां वीर्याणां ब्रह्मणि संभृतिर्द्युव्याप्तिश्च ब्रह्मण इत्येतदनारभ्याधीतमपि न सर्वोपासनशेषभूतम् VedāntSā.(Rā.) 301.4 (*on* iii. 3.23); 'सप्तदश सामिधेनीरनुब्रूयात्' इत्यनारभ्याधीतस्य ... अर्थवता ... उपसंहारः Mitā. 92.28 (*on* 1.256); अनारभ्याधीताः पृश्निप्राणग्रहाः। ते किं प्रकृतौ निविशन्ते उत विकृताविति संदेहः SaṅkarKāBh. 166.3 (*on* iii. 3.46); क्रत्वङ्गत्वम् ... अनारभ्याधीतानां तावन्न शक्यते शङ्कितुम् NyāySu.(So.) 24.4 (*on* i. 2.7); दुर्वर्णोऽस्य भ्रातृव्यो भवतीत्यनारभ्याधीते संशयः VedāntKa. 74.21 (*on* i. 1.4); LaCandr. 502.22; अन्ये तु ... अनारभ्याधीतसर्वविद्यासाधारणकौषीतकिवाक्यैकदेशप्रतिपन्नोपायनस्य सर्वहानवाक्यानां शेषत्वात् केवलहानश्रवणेऽप्युपसंहर्तव्यमित्याहुः ŚrutaPra. ii. 490.8 (*on* iii. 3.26); अनाश्रितविधानविशेषमिण्मात्रमनारभ्याधीतेन प्रतिषेधेन यथा बाध्येतेति PadMañ. *on* KāśiVṛ. *on* P. vii. 2.13; श्रुतिलिङ्गवाक्यादिविरोधप्रतिपत्तिकर्मानारभ्याधीतबहुप्रधानोपकारकप्रयाजादियाजमानचिन्तनम् SarvaDaSaṁ. 12.7; प्रथमे पादे — शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता।... षष्ठे — अनारभ्याधीतानि NyāyMāVi. 6.8 (*on* i. 1.0); YuktiSneha. 3.13 (*on* i. 1.1); अनारभ्याधीतानां प्रकृतिगामित्वं न्याय्यम्, तथापि श्रुतेन पाञ्चदश्येनावरुद्धत्वाद्विकृतिष्वेतन्निविशते NyāyMāVi. 607.22 (*on* x. 8.9); MayūMāli. 62.4 (*on* i. 4.3); 167.3 (*on* ii. 3.5); 'पृथिव्यै स्वाहा' इति मन्त्रपाठोऽयम्। न त्वत्र स्वाहाकारोऽनारभ्याधीतब्राह्मणवाक्येनैव विधीयते NyāyMāVi. 609.3 (*on* x. 8.10); सेयं पर्णता अनारभ्याधीतापि सर्वप्रकृतिष्वेवान्वेति न विकृतिषु ArthSaṁ. 53.5; TantrRaha. 32.5; MImāNyāPra. 214.12; SetuBa. 200.8; अध्ययनं त्वनारभ्याधीतम्। अतो न क्रत्वर्थतया तन्नियमः TantrRaha. 65.21; न च — चमसगोदोहनवदेकप्रकरणगतयोरेव नित्यकाम्ययोः काम्यबलवत्त्वन्यायः प्रकरणाम्नातानारभ्याधीतयोस्तु तयोर्नित्यमपि प्रकरण(?णा)म्नातमेव बलवत् VidhiRa. 32 (177.12); अनारभ्याधीतसाप्तदश्यवाक्यस्यापि प्राकरणिकसाप्तदश्यवाक्यवन्मित्रविन्दादिमात्रशरणत्वे स्यात् VidhiRa. 39 (197.8); ŚivārkaMaDI. i. 145.21 (*on* i. 1.3); MImāNyāPra. 266.29; MayūMāli. 385.25 (*on* iv. 3.10); BālamBha. i. 417.6 (*on* 1.156); 'अथातोऽग्निमग्निष्टोमेनानुयजन्ती'त्यनारभ्याधीते वाक्ये ... क्रतुशेषत्वमवगम्येत ŚivārkaMaDI. ii. 219.32 (*on* iii. 1.25); जुहोतिधातुः ... अनारभ्याधीतांश्च सर्वानपि होमान् ... अनुवदति PūrvottaVāNaMā. 4.4; पदादिशास्त्रस्य अनारभ्याधीताहवनीयादिशास्त्रात्पूर्वप्रवृत्तत्वेऽप्यतादृशयोरुत्सर्गापवादशास्त्रयोः ... युगपत्प्रवृत्तेः GuruCandr. i. 337.13; i. 476.23; अनारभ्याधीतस्य प्रवर्ग्यस्येव ... ज्योतिष्टोमसंयोगो न तु फलान्तरकल्पना युज्यते SiddhāTa. 38.23; शौचप्रकरणानुगृहीतेन ब्रह्माण्डपुराणीयवाक्येनैवानारभ्याधीतस्यापस्तम्बीयवचनस्य संकोचो युक्तः VIraMi.(Āhnika.) 59.24; ज्योतिष्टोमप्रकरणस्थेन निषेधेनानारभ्याधीतस्य स्मार्तस्यासाधुभाषणनियमस्योपसंहारः MImāKau. i. 129.18 (*on* i. 3.27); i. 176.1 (*on* i. 4.3); i. 291.16 (*on* i. 4.27); अनारभ्याधीतकाठकवचनेन सर्वकर्मार्थत्वेनैव विधानात् MImāKau. ii. 198.8 (*on* iii. 1.21); ii. 97.23 (*on* ii. 3.29); ii. 128.6 (*on* ii. 4.26); तथाप्यनारभ्याधीततुल्येनाधानप्रकरणाधीतवाक्येन सर्वेषामाधानाङ्गतया संभाव्यमानानां पूर्णाहुत्यादिहोमानां साक्षादाहवनीयाङ्गत्वावगमात् MImāKau. ii. 207.8 (*on* iii. 1.22); उक्तविधात्मज्ञानस्य चानारभ्याधीतस्यापि ... क्रत्वङ्गत्वाविरोधः MImāKau. iii(1). 29.13 (*on* i. 2.7); iii(2). 201.9 (*on* ii. 2.16); अनारभ्याधीताभ्यां 'वायव्यं श्वेतमालभेत भूतिकामः', 'सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः' इत्येताभ्यां श्वेतचरुगुणौ विधीयेते BhāṭṭDI. i. 151.24 (*on* ii. 3.5); ii. 32.22 (*on* iii.

6.11); ii. 40.10 (*on* iii. 7.1); iv. 122.4 (*on* x. 8.13); अनारभ्याधीते सर्वक्रतूनामुपस्थितविशेषेऽपि — तत्रैवांशदाम्ययोरुत्पत्तिविधी BhāṭṭCan. 92.3 (*on* xv. 3.14); सोमादौ च तन्निषेधप्राप्तेरनारभ्याधीतनिषेधान्तरानर्थक्यं स्यादिति चेन्न। पुरुषार्थक्रत्वर्थभेदेनोभयोरुपपत्तेः VaiyāBhū. 199.14 (*on* 37); अनारभ्याधीतानामुपसंहारे प्रमाणाभावादारभ्याधीतानामेवोपसंहारः GovīBh. 228.12 (*on* iii. 3.12)

अनारभ्याधीतता (anārabhyādhīta-tā) *f.* the state of being mentioned without having connection with any particular context एवं च अहिंसाशास्त्रेण पुरुषार्थहिंसायाः पुरुषार्थो निषेधः क्रियत इति अनारभ्याधीततया संप्रतिपन्नेऽर्थे स्थिते, तेन क्रत्वर्थहिंसाया अपि निषेधः क्रियते PūrvottaVāNaMā. 52.3; यत्र ··· वाक्यान्तरे गुणोपादानं तत्र पूर्ववाक्यस्य नैव विधित्वम्। अपि तु अनुवादत्वमेव गुणविधानार्थम्। तत्र तु तस्यानारभ्याधीतत्वेऽतावान् विशेषः MīmāKau. ii. 328.13 (*on* iii. 3.10)

अनारभ्याधीतत्व (anārabhyādhīta-tva) *n.* the state of being mentioned without having connection with a particular context श्वेतमालभेत चरुं निर्वपेदिति। ··· तत्रानारभ्याधीतत्वोपन्यासः संशयबीजापोनरक्त्य-प्रथमपक्षपरिग्रहतन्निराकरणार्थः TantrVā. 602.21 (*on* ii. 3.12); अयं त्वनारभ्याधीतत्वादवबोधपर्यवसायी सकलफलकर्मानुष्ठानोपयोगितया गम्यमानोऽधिकारः ManuBh. i. 200.18 (*on* 3.1); ii. 445.22 (*on* 11.237); इह तु वाक्यान्तरे स्ववाक्ये वा यत्फलमुक्तं तदेवमुक्तमन्तरङ्गत्वादनारभ्याधीतत्वाच्चेति तदेव स्थितं पृथक्प्रतिबन्धः फलमिति BrahmSūBh.(Bhā.) 200.14 (*on* iii. 3.64); न चानारभ्याधीतत्वेऽपि कर्मबोधकतया कर्माव्यभिचारात् कर्मविध्यनुवादः NayaVi. 11.7 (*on* i. 1.1); अक्रत्वर्थत्वादध्ययनस्य अनारभ्याधीतत्वात् श्रुत्याद्यभावाच्चाक्रत्वर्थत्वम् ŚāstrDī. 6.3 (*on* i. 1.1); 34.2 (*on* i. 1.2); अनारभ्याधीतत्वाद् एषां (गुणानाम्) सर्वासु (विद्यासु) उपसंहारः VedāntDī. 177.19 (*on* iii. 3.23); यथा पर्णमयीत्वस्यानारभ्याधीतत्वेऽपि जुहूद्वारेण 'यस्य पर्णमयी जुहूर्भवति' इति वाक्येन क्रत्वङ्गत्वसिद्धेः प्रयोगवचनप्रयोज्यत्वं तद्वदित्यर्थः PrakaVi. 887.17; VedāntKa. 456.11 (*on* iii. 3.42); NyāySu.(So.) 71.6 (*on* i. 2.19); वाक्यं श्रवणादिविधायकमस्तु, तस्यानारभ्याधीतत्वेनोक्तविरोधाभावात् VivaPraSaṁ. 6.1; 186.4; अनारभ्याधीतत्वान्नास्ति वायव्ये प्रकृतप्रत्यभिज्ञा NyāyMāVi. 99.3 (*on* ii. 3.8); 102.22 (*on* ii. 3.12); अनारभ्याधीतत्वेऽपि द्रव्यार्जननियमानां क्रत्वर्थत्वानङ्गीकारे अधिकारिणः अभावात् Subodhi. 44.27 (*on* 2.100); पिण्डपितृयज्ञः दर्शपूर्णमासाङ्गं वा स्वयं पुरुषार्थो वेति ··· अनारभ्याधीतत्वाच्च नाङ्गम् SarvaDaKau. 102.9; अनारभ्याधीतत्वेनाध्ययनस्याक्रत्वर्थत्वात् YuktiSneha. 6.22 (*on* i. 1.1); कर्मप्रकरणमनारभ्याधीतत्वेऽपि वाक्यादेव क्रतुसंबन्धोपपत्तिः ŚivārkaMaDī. ii. 358.5 (*on* iii. 3.41); न च एतद्दिष्टिविधायकवाक्यस्य अनारभ्याधीतत्वे अश्वदानस्य क्रत्वपूर्वार्थत्वप्रत्यायकं किंचिदस्ति PūrvottaVāNaMā. 47.13; UpaParā. 22.30; किं च। वेदान्ताः किं वेदशेषा वेदा वा। नाद्यः। अनुपयोगात्। अनारभ्याधीतत्वेन तदुपयोगित्वे पूर्वकाण्डविचारेणैव गतार्थत्वं विद्याप्रवेशश्च AnuBh. 11.24 (*on* i. 1.1); (प्रदक्षिणाविषये) सव्यापसव्यवचनानां त्वनारभ्याधीतत्वेन यत्किंचित्प्राचीनमितिवदन्यविषयत्वेन सावकाशत्वात् TristhaSe. 210.27; सामान्यशास्त्रं तु अनारभ्याधीतत्वादुत्पन्नहोमविषयकत्वात् ··· दुर्बलम् GuruCandr. i. 267.12; तस्मात्प्रोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्या इति काठके अनारभ्याधीतत्वाच्छ्रौतम् MīmāKau. i. 38.8 (*on* i. 3.9); ii. 82.19 (*on* ii. 3.24); iii(1). 4.1 (*on* i. 2.1); कौत्सादीनां त्वनारभ्याधीतत्वेन सत्यपि वचनेन क्रत्वङ्गत्वावगमे तदाधारभूताया योनेः प्रकरणपाठाभावेनाङ्गत्वानवगमात् MīmāKau. iii(1). 82.13 (*on* i. 2.44); iii(2). 95.2 (*on* ii. 1.23); न चानारभ्याधीतत्वेन दौर्बल्यम्, निरवकाशत्वरूपप्राबल्ययुक्तेरुभयत्रापि तुल्यत्वात् BhāṭṭDī. ii. 22.6 (*on* iii. 6.2); MayūMāli. 255.13 (*on* iii. 3.12)

अनारभ्याधीतन्याय (anārabhyādhīta-nyāya) *m.* procedure or maxim adopted in the case of *anārabhyādhīta* (in deciding whether a particular rite, property, statement etc. is meant for the archetype only or for any rite without restriction) यत्र तु बहून्यङ्गानि पठित्वा दूरे कचित् वाचनिकाङ्गाम्नानं तत्राल्पानुरोधेन बहूनि विच्छेदकान्यपनीय प्रकरणानुवृत्तिकल्पनायोगात् अल्पस्यैवानारभ्याधीतन्यायेनान्वयः परिकल्प्यते MīmāKau. ii. 201.1 (*on* iii. 1.21); उत्तराङ्गस्यानारभ्याधीतन्यायेन सामिधेन्यङ्गत्वोपपत्तेः नोपवीतविधौ प्रकरणानुवृत्तिः MīmāKau. ii. 201.10 (*on* iii. 1.21); BhāṭṭDī. i. 201.12 (*on* iii. 1.11)

अनारभ्याधीतवचन (anārabhyādhīta-vacana) *n.* statement made without having connection with a particular context आहवनीयादयोऽग्नयोऽनारभ्याधीतवचनैर्होमाद्यनुवादेन विहिताः पर्णतान्यायेन प्रकृतिहोमाद्यर्था एव BhāṭṭDī. ii. 55.8 (*on* iii. 7.20); नानृतं वदेदित्यनारभ्याधीतवचनस्य दर्शपूर्णमासप्रकरणपठितस्य नानृतं वदेदित्यस्यापि च विनिगमनाविरहात् VaiyāBhū. 72.11 (*on* 21)

अनारभ्याधीतवाक्य (anārabhyādhīta-vākya) *n.* statement made without having connection with a particular context आहवनीये जुहोत्याहवनीयस्य होमाधिकरणतया विधानात्तद्रूपस्यालौकिकस्यानारभ्याधीतवाक्यविहितादाधानादन्यतोऽनधिगमात् Bhām. 263.12 (*on* i. 3.34); अनावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीत्यत्रानारभ्याधीतवाक्ये श्रुतः पिण्डपितृयज्ञः क्रत्वर्थः पुरुषार्थो वा VedāntKa. 66.23 (*on* i. 1.4); 424.20 (*on* iii. 3.25); यस्य पर्णमयी जुहूः ··· इत्यादयनारभ्याधीतवाक्येष्वपि — जुह्वादीनाम् ··· सर्वक्रतुप्रकृतिभूतदर्शपूर्णमासयोरेवान्वयः TantrRaha. 59.27; वैदिके दाने ह्यनारभ्याधीतवाक्यात् सिध्यति UpaParā. 18.5; साप्तदश्यस्य ··· अनारभ्याधीतवाक्येन सामिधेनीसंबन्धसिद्धिः VidhiRa. 8 (38.24); ŚivārkaMaDī. i. 145.28 (*on* i. 1.3); अग्निमग्निहोमेनानुयजन्ति इत्यनारभ्याधीतवाक्ये चिलाद्येयिजिशब्दोऽस्याग्नेयत्वस्य अस्याः क्रतुशेषत्वमवगम्यते PūrvottaVāNaMā. 39.4; 149.10; अनारभ्याधीतवाक्यप्राप्तानुवादमात्रं साप्तदश्यपदमङ्गीकृत्य सामिधेनीविधिरेव — अङ्गीकर्तव्यः BhāṭṭDī. iv. 114.23 (*on* x. 8.9); iv. 115.12 (*on* x. 8.9); अनारभ्याधीतवाक्यप्राप्तानुवादकत्वासंभवाच्चेति द्रष्टव्यम् MayūMāli. 205.16 (*on* iii. 1.12)

अनारभ्याधीतवाद (anārabhyādhīta-vāda) *m.* statement made without having reference to a particular context सामिधेनीनां साप्तदश्यं अनारभ्याधीतवादेनोक्तम् UpaParā. 30.1.

अनारभ्याधीतव्यावृत्ति (anārabhyādhīta-vyāvṛtti) *f.* non application of the principle of *anārabhyādhīta* (i.e. mentioned without having reference to a particular context) प्रकरणस्य धर्मविधिषु विशेषणत्वं वक्तव्यम्। विशेषणत्वं विना अनारभ्याधीतव्यावृत्तिरलाभान्न च तत्संभवति MayūMāli. 309.8 (*on* iii. 6.11)

अनारभ्याधीतसंभृति (anārabhyādhīta-sambhṛti) *f.* (quality of) holding together (which is) mentioned without having connection with a specific context पूर्वाधिकरणे नाम्नोः स्थानभेदात् व्यवस्था कृता, तथानारभ्याधीतसंभृत्यादिकस्यापि स्थानभेदाद् व्यवस्थेति संगतिः ŚrutaPra. ii. 483.28 (*on* iii. 3.23)

अनारभ्याधीताग्नि (anārabhyādhītāgni) *m.* fire mentioned without having connection with a specific context अनारभ्याधीताग्निः साप्तदश्यन्यायेन विकृतिष्वेव प्राप्नुयान्न प्रकृतौ VidhiRa. 32 (176.14)

अनारभ्याधीतार्थत्व (anārabhyādhītārtha-tva) *n.* the state of being meant for something mentioned without having connection with a specific context प्राकरणिकग्रहार्था ग्रहधर्मा इति प्रतीतेरनारभ्याधीतार्थत्वमशक्यं प्रत्येतुम् TantrVā. 1104.3 (*on* iii. 6.32)

अनारभ्यापवाद (anārabhyāpavāda) *m.* special rule stated without phrasing a general rule earlier, special rule stated without having reference to a general rule earlier पुरस्तात् पुनः प्रतिषेधे सत्यनारभ्यापवादोऽयं भवति तेन यावानिण् नाम तस्य सर्वस्यैव प्रतिषेधः सिद्धो भवति MahāBh. iii. 282.11 (*on* vii. 2.8)

अनारभ्याम्नान (anārabhyāmnāna) *n.* statement without having connection with a particular context अनारभ्याम्नानेन षोडशिग्रहस्य सामान्यतः सर्वक्रिरात्रक्रतुसम्बन्धस्य स्पष्टत्वात्र तस्योपसंहारो युक्तः UpaParā. 30.11.

अनालोच्य (an-ālocya) *ger.* 1 not having found अनालोच्यैव जगतां त्रातारमपरं हरिः । स्वयमेवांशरूपेण पालयत्यखिलं जगत् AhirbuS. 30. 14; 2 not having considered, not having paid attention to, not having thought over शीलचन्द्रप्रथितकरणिकस्वामिदत्तावलङ्घ्यां संज्ञां मूर्ध्नि कृत्वा श्रुतलवविभवाव्यनालोच्य भारम् । हृद्यामेतामुदारां त्वरितमकुरुतामप्रपञ्चां प्रशस्तिम् EI. xx. 44. 21; अनालोच्य वैषम्यमर्थालंकारडम्बरम् । अपेक्षमाणा ववृधे पौरस्त्या काव्यपद्धतिः Kāvyāda. 1. 50; अल्पं निर्मितमाकाशमनालोच्यैव वेधसा । इदमेवंविधं भावि भवत्याः स्तनजृम्भणम् Kāvyāda. 1. 91 = SaraKaṇṭhā. 132. 16; क्षिप्रमायमनालोच्य व्ययमानः स्ववाञ्छया । अथ(? म)णायत एवासौ धनी वैश्रवणोपमः Hitopa. 2. 85; NītiVā. 18. 10; उत्पाद्यार्थकथाधममनालोच्य समं श्रुतौ । एवं चेदमसंबद्धं परैरत्रोपवर्णितम् TattvSaṃ. 2776; वक्ष्यमाणमनालोच्य संभवेत् परिचोदना ŚlokaVār. 1. 76 (25. 3); केचित्त्वाहुः वचनमनालोच्य पूर्वः पक्षः ṬupṬ. 31. 12 (*on* iv. 3. 4); TantrRa. 157. 2; ṬupṬ. 221. 13 (*on* ix. 3. 32); यदि तावद् वक्ष्यमाणमनालोच्य 'नैतदेवम्' ··· इति चोद्यम् TātpaṬ.(U.) 18. 21 (*on* 1. 82); अनालोच्य प्रेम्णः परिणतिम् ··· त्वयाकाण्डे मानः किमिति सरले संप्रति कृतः AmaŚ. 80; SubhāRaK. 21. 25; SaduktiKa. 96. 23; SūktiMu. 56. 9; Subhāṣi. 1170; श्रुतं पठति मूढधीः । कालाकालमनालोच्य BṛKathāK. 18. 3; कार्याकार्यमनालोच्य ··· क्षपकेणापि सूरिमूले यथास्थिता । आलोचना प्रकर्तव्या BṛKathāK. 45. 32; SkandP. iii(1). 29. 28; साध्यमसाध्यं च विषयमनालोच्य विचरतां विफलीभवत्येव पुंसां प्रयासः UdaySuKa. 31. 19; प्रभूताध्यवसायसाध्ये वस्तुनि न देव्या पुनरप्येवमनालोच्य कर्तव्यम् UdaySuKa. 103. 5; शचीपतिः । अनालोच्यैव यद् वक्ति तत् कस्य हृदयं स्पृशेत् BṛKathāMañ. vi. 1. 122; प्रतीलोवैचित्र्यमनालोच्यैव चर्चितम् । गुणदोषमपदयद्भिर्दूराद्दूरोत्थयोस्तयोः VyaktiVi. 98. 17; इतरेण प्रकारेण योग्यपदान्तरानुच्चारणमनालोच्य स्वरूपमात्रालोचने सर्वत्राकाङ्क्षा भवत्येव NyāySu.(So.) 44. 8 (*on* i. 2. 7); त्वयापायमनालोच्य य उपायः प्रवर्तितः । सर्वमेकपदे तेन मुहूर्तेनैव हारितम् RājTa.(Ka.) 7. 848; व्याप्तिपक्षधर्मतादोषमनालोच्य अन्यथैव बाधस्य दोषत्वम् KhaṇḍanKhā. 817. 20; जगत्कर्तृत्वमन्यत्र ब्रह्मणो नेति दुष्यति । वाचस्पतावुपालम्भमनालोच्योचिरे परे VedāntKa. 213. 2 (*on* i. 4. 16); प्रासिमनालोच्य शङ्कमानस्य ··· शास्त्रेऽनधिकारात् NyāySu.(Ja.) 314A. 13 (*on* ii. 2. 1); देव त्वत्सेवकाः ···। देशकालावनालोच्य कथयन्त्यसुखप्रदम् RājTa.(Śrī.) 1(1). 95; सदैवादमखानः स बाधितस्तदुपाधिभिः । परलोकमनालोच्य स्वार्थं संत्यज्य दूरतः । अस्वस्थः RājTa.(Śrī.) 2. 184; 3. 126; धर्मिकल्पनागौरवमनालोच्यैव कश्चिद् बालः ··· अन्यदेव किंचिज्ज्ञानं कारणमिति मन्यमानः ··· वाक्यस्य तज्जननसामर्थ्यं कल्पयेद् ŚivārkaMaDī. i. 174. 24 (*on* i. 1. 4); नेयं लीला भवयोग्या बीजभूतान्यसंस्तुतेः । अस्या अन्तमनालोच्य कथमन्यामुपेष्यसि BṛBrahmaS. ii. 1. 47; पुत्रो मे भूयात् — इत्येवं भागोपालाङ्गनं साधनत्वमनालोच्यैव इच्छाविषयत्वप्रतीतेर्मुख्यत्वमेव पश्वादिकामनायाः MīmāKau. i. 182. 19 (*on* i. 4. 3); अनालोच्य निजां शक्तिमदृष्ट्वा कार्यगाधताम् । औत्सुक्यादवगाहन्ते मन्दा मज्जन्ति चातलम् NīlaVi. 60. 15; यत्र जातकर्मादिसंस्कारान्तरसहितं विहितं (पुनरुपनयनम्) तत्र निमित्तान्तरकरणपक्षे पुण्यनक्षत्राद्यनालोच्य पर्वदुपदेशेन चौलान्तसंस्कारान् कृत्वा कार्यम् BālamBha. i. 58. 24 (*on* 1. 14); शास्त्रमेतदनालोच्य स्वबुद्ध्या नाटकादिषु । पद्यं वा पदमेकं वा यः करोति स मन्दधीः SāhiSā. 1. 13; 3 not having seen तवाद्य चिरदर्शनेन पर्युत्सुका गावस्त्वामनालोच्य वत्सैरप्यात्मानं न प्रीणयन्तीति विज्ञायते GopāKeCan. 116. 18; 4 (Jain.) not having confessed संपूर्णकोटिवर्षायुरनालोच्य च तन्मृतः । महाशुक्रे विश्वभूतिरुत्कृष्टायुः सुरोऽभवत् TriṣaŚaPuC. iv. 1. 158; सा — । मासान्तसंलेखनामद्यौ कृत्वानालोच्य संस्थिता । ··· सौधर्मे देव्यभूदियम् PāṇḍaC. 4. 385; पतिहत्यात्मकं घोरमनालोच्यैव पातकम् । तपः कृत्वा दिवं साप MalliC. 8. 258; द्विजस्तु ज्ञाततत्त्वोऽपि बलात्प्रव्राजितोऽस्म्यहम् । इति द्वेषं गुरौ बिभ्रदनालोच्य दिवं ययौ SamarāSaṃ. 6. 356; गङ्गसेना ··· ततः पुनश्चारित्रं गृहीत्वा कोपं कृत्वान्तकाले कोपमनालोच्य मृत्वा ईशानेन्द्रस्य कलत्रं जातम् KathāK. 85. 19.

अनालोच्य (an-ālocya) *adj.* not fit to be considered or thought over निशम्य भुभुजो वाक्यमनालोच्यं स सूदकः । श्मशानं प्राप्य वेगेन मृतं बालं ददर्श तम् BṛKathāK. 115. 7.

अनालोच्यकर्तृ (anālocya-kartṛ) *adj.* who acts without due thought or consideration मयैताभ्यां प्रतिश्रुतम् । न ह्यनालोच्यकर्तारः किंकरा भवतामिति BṛKathāŚloSaṁ. 24. 73.

अनालोच्यकारिन् (anālocyakār-in) *adj.* who acts without due thought or consideration जडो जाल्मश्च निर्बुद्धौ सत्त्वेऽनालोच्यकारिणि Vaija. 228. 6; NānārthāSaṁ. i. 40. 9; i. 82. 460.

अनालोच्यकार्यकारित्व (anālocyakāryakāri-tva) *n.* the state of being one who performs acts without forethought तच्चापलमनालोच्य कार्यकारित्वम् (? °च्यकार्यकारित्वम्) इष्यते RasGaṅ. 117. 5.

अनालोच्यवादिन् (anālocya-vādin) *adj.* who speaks without due thought ततोऽवलेपं कोपं वा मुधा दुर्योधन व्यधाः । यद्वा नैवास्ति मर्यादा काप्यनालोच्य वादिनाम् (? °च्यवादिनाम्) PāṇḍaC. 3. 176.

अनालोड्य (an-ālоḍya) *ger.* not having gone deep into शास्त्रमेतदनालोच्य (v. l. अनालोड्य) ⋯ नाटकादिषु । पद्यं वा पदमेकं वा यः करोति स मन्दधीः SāhiSā. 1.13.

अनावच्छा (anāvacchā) ? सहस्रेषुमात्रमूर्ध्वमुददिति । ततो ह स्मानावच्छां क्षितिस्त्रयीविद्ययां सर्वां श्रियं सर्वम् अन्नाद्यम् अपि यद् इदं त्रिरात्रे सहस्रं प्रोच्यते तद् अभिसंबभूव JaimiBr. 2.155.

अनावतप्त (anāvatapta) *m.* [m. c. for *anavatapta*] name of a Nāga-king वरुणो मनस्वी अपि नागराजा अनावतप्तश्च तथैव ना(? सा)गरः LaliVi. 15. 62 [DBHS.]

अनावन (anāvana) *n.* protection of living beings घनाघना घनाघनाद्भुतेह शाखिसंततिः । वनावनावनावनानुरूपसत्फलावृता Yādavā. 6. 71 (comm. अनानां प्राणिनामवने रक्षणे)

अनावयस् (án-āvayas) *adj.* [AltGr. II. 1. 96; II. 1. 294] who cannot impregnate, impotent यथा शेपो अपायातै स्त्रीषु चासदनावयाः AV. vii. 90. 3; cf. **अनावया.**

अनावया (ánāvayā) *adj.* not yielding or desisting [PW., Apte]; cf. **अनावयस्.**

अनावयु (an-āvayu) *adj.* not being consumed आवयोऽनावयो रसस्त उग्र आवय आ ते करंभम् अशीमहि AV.(P.) xix. 5.7; आवयतिः अत्तिकर्मा । तस्माद् औणादिकः कर्मणि उप्रत्ययः । हे आवयो रोगनिवृत्त्यर्थम् अद्यमान सर्षप अनावयो अभक्ष्यमाण सर्षपकाण्ड Sāy. *on* AV. vi. 16. 1; cf. **अनावयु.**

अनावर (an-āvara) *adj.* unobstructed अनावरोऽयं प्रवरः कालः कालयति प्रजाः ParamāKā. 23. 20.

अनावरक (an-āvaraka) *adj.* which does not cover आकाशमनावरकमप्यावृणोति येन सिद्धानामप्यदृशो भवति YogSā. 59.4(3)

अनावरकस्वभाव (an-āvarakasvabhāva) *adj.* not having the nature of covering तत्त्वं नाम, त्रिगुणाश्रयप्रधानकालविलक्षणं प्रकाशात्मकमनावरकस्वभावमचेतनद्रव्यत्वम् VedāntRaMañ. 1. 3 (39. 4)

अनावरकाज्ञान (anāvarakājñāna) *n.* nescience which is no longer covering न चानावरकाज्ञाननाशो मुक्तौ प्रसज्यते VedāntSiSūMañ. 1. 78.

अनावरण (an-āvaraṇa) *adj.* [*f.* -ā] **1** free from obstructions सुधनः श्रेष्ठिदारकः ⋯ तथागतसिंहासनाभिमुखः सर्वरत्नगर्भपद्मासननिषण्णः ⋯ अनावरणेन चित्तेन GaṇḍVyū. 420.23; आत्यन्तिकं सुखमनावरणा च शक्तिर्ज्ञानं च सर्वविषयं भगवंस्तवैव YaśasCam. ii. 255. 8 = ii. 272. 14; TattvPradī. (A.) 54. 9 (*on* 1. 41); ब्रह्म ⋯ स्वयंप्रकाशमनावरणमनुपसर्गं प्रद्योतते TattvVai. 206.12 (*on* 4.22); **2** having no covering, uncovered भृशमदूयत याधरपल्लवक्षतिरनावरणा हिममारुतैः ŚiśuVa. 6. 58; अथापश्यं विमानस्य दूरादवनिमण्डलम् ।⋯ इदमीदृशमाकाशमनावरणमीक्ष्यते BṛKathāŚloSaṁ. 20. 135; असौ वैतालिकः ⋯ अनावरणमपि वपुःप्रभापटलदुकूलोत्तरीयन् ⋯मुनिकुमारकयुगलं विलोक्येदं वृत्तमपाठीत् YaśasCam. i. 159. 3.

अनावरण (an-āvaraṇa) *n.* **1AI** non-obstruction इहाकाशस्यानावरणं लक्षणमुच्यते PrasaPa. 129. 9; यस्यानावरणमेव लक्षणं नान्यलक्षणं तदाकाशम् Sphuṭā. i. 17. 10 (*on* 1. 5); **1AII** the thing which neither obstructs nor is obstructed आकाशमनावृतिः ।⋯ अनावृतिरनावरणम् । कर्तृसाधनं कर्मसाधनं वा । यो धर्मोऽन्यान् धर्मान्नावृणोति, अन्यैर्वा नाव्रियते Sphuṭā. i. 17.2 (*on* 1. 5); **1B** removal of covering (अदृष्टानाम्) अन्योऽन्यावरणात्तेषां स्यात्तेजोविहतिस्ततः । तत्रैकमेव दृश्येत तस्यानावरणे सकृत् । पश्येत्स्फुटास्फुटं रूपम् PramāVār. 3. 414; **1C** non-covering आकाशस्य लिङ्गम् । अनावरणं चोक्तम् YogBh. 163. 3 (*on* 3. 41); अनावरणे चाकाशलिङ्गे सिद्धे यत्र यत्रानावरणं तत्र तत्र सर्वत्राकाशमिति सर्वगतत्वमप्याकाशस्य सिद्धम् TattvVai. 163.25 (*on* 3. 41); अवयवावरणेऽवयविनोऽनावरणे पूर्ववत्कृत्स्नप्रतीतिः स्यादिति चेद्, सत्यं कृत्स्नः प्रतीयते TattvPradī.(Ci.) 293. 7; एकदिग्देशेऽर्थस्यावरणमन्यदिग्देशे चानावरणमिति विरुद्धधर्माध्यासाद् भेदः स्यात् VedāntKa. 291.14 (*on* ii. 2. 28); एतेन प्रधानपरमाणुवासनासंविद्ब्रह्मप्रभृतीनां निरंशानामेव यथाभागपरिणामावरणानावरणानेकविषययोगादिरुपपद्यते NyāySiA. 253. 27; न वा कदाचिदाविर्भूतयोः किंचिदर्थविषयज्ञानक्रियाशक्त्योरामोक्षमनावरणमस्ति ŚivārkaMaDī. i. 110. 23 (*on* i. 1. 2); प्रागभावपरिपालनसाधारणलक्षणानुरोधेनानावरणस्य द्वितीयादिवृत्तिकार्यत्वस्यापि लाभाच्च तद्वैफल्यम् SiddhāLeSaṁ. 142. 3; आधारतावच्छेदकरूपेण हि अधिष्ठानानावरणमध्यासहेतुः, न त्वविद्याविषयरूपेणेत्यविद्योपहितत्वादिरूपेणानावरणात् मनआद्यध्यासोपपत्तिः LaCandr. 768. 24; **2** name of Mahākaruṇā-samādhi स सर्वधर्मानिःसरणमिति विदित्वानावरणं नाम महाकरुणासमाधिं समापद्यते ŚikṣāSa. 236. 8 [DBHS.]

अनावरणकृत्य (anāvaraṇa-kṛtya) *n.* effect in the form of non-obstruction आकाशधातुर्बीजस्यानावरणकृत्यं करोति ĀryaŚāS. 5. 11 = Bhām. 418. 6 (*on* ii. 2. 19)

अनावरणगतिंगत (anāvaraṇagatiṅ-gata) *adj.* who has attained the state of freedom from obstructions सर्वबुद्धसमताप्राप्तः । अनावरणगतिंगतः । अप्रत्युदावर्त्यधर्मः MahāVyu. 19. 6.

अनावरणचक्र (anāvaraṇa-cakra) *n.* cycle of existence which is free from obstructions (धर्मचक्रम्) भूतकोट्यविकोपनचक्रम् असङ्गानावरणचक्रम् LaliVi. 26. 51(12) [DBHS.]

अनावरणज्ञान (anāvaraṇa-jñāna) *adj.* having cognition which is unobstructed विगलितसमस्तक्लेशतद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मन उपरिदेशावस्थानं मोक्ष इत्येके Bhām. 457. 8 (*on* ii. 2. 33); SarvaDaSaṁ. 3. 362; SarvaDaKau. 36. 6; *n.* unobstructed or uncovered knowledge अनावरणज्ञानदर्शनसुखवीर्यस्यात्मन उपरिदेशावस्थानं मुक्तिः ŚivārkaMaDī. ii. 102.12 (*on* ii. 3. 31)

अनावरणज्ञानता (anāvaraṇajñāna-tā) *f.* the state of having unobstructed knowledge मन्त्रो चेमावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः BrahmSūBh.(Śaṅ.) 39.11 (*on* i. 1.5)

अनावरणज्ञानदिश् (anāváraṇajñāna-diś) *f.* quarter of the unobstructed knowledge ये ते अनावरणज्ञानदिशं प्रविष्टा जिनक्षेत्र सत्त्वपरिकल्पविकल्पशान्ता । भावस्वभावरहिता न विमृषन्ति धर्मान् GaṇḍVyū. 372. 27.

अनावरणज्ञानविमोक्ष (anāvaraṇajñāna-vimokṣa) *m.* release or salvation through unobstructed knowledge अनावरणज्ञानविमोक्षविहारीत्युच्यते LaliVi. 26. 51(39)

अनावरणज्ञानविशुद्धगर्भ (anāvaraṇajñānaviśuddhagarbha) *m.* name of a Bodhisattva [PW., pw.]

अनावरणज्ञानविशुद्धिगर्भ (anāvaraṇajñānaviśuddhigarbha) *m.* name of a Bodhisattva [DBHS.]

अनावरणज्ञानविशुद्धिमूल (anāvaraṇajñānaviśuddhimūla) *m.* another name of the text Bodhisattvabhūmi सा खल्वियं बोधिसत्त्वभूमिः ⋯ अनावरणज्ञानविशुद्धिमूलमित्यप्युच्यते BodhiBhū. 282. 11.

अनावरणज्ञानशक्ति (anāvaraṇa-jñānaśakti) *adj.* having unobstructed power of knowledge अहं पुनः नित्यशुद्धबुद्धमुक्तस्वभावत्वाद् अनावरणज्ञानशक्तिरिति वेद GītāBh.(Śaṅ.) 113. 17 (*on* 4. 5)

अनावरणज्ञानस्कन्ध (anāvaraṇajñāna-skandha) *m.* mass of (elements of) unobstructed knowledge सर्वसत्त्वानां परिणायको भवेयमनावरणज्ञानस्कन्धोपनयनतया ŚikṣāSa. 29.20.

अनावरणज्ञानिन् (anāvaraṇajñān-in) *adj.* possessing knowledge free from obstruction यदुत्पादस्थितिभङ्गा न सन्तीत्यवधारितं यत्तदिदमनावरणज्ञानिना मुनिना संस्कृतस्य भिक्षव उत्पादोऽपि प्रज्ञायते PrasaPa. 177. 1; MahāVyu. 30. 27.

अनावरणता (anāvaraṇa-tā) *f.* **I** the state of being free from obstruction अथ खलु सुधनः श्रेष्ठिदारकः ⋯ मार्गगहनतां मार्गानावरणतां मार्गकुटिलतां मार्गर्जुकतामनुविलोक्य एवं चित्तमुत्पादयामास GaṇḍVyū. 143. 4; **II** the state of not being obstructive अनावरणता चेत्स्यात्कपालादेर्घटात्मनि । अन्तर्भावान्न सान्येतद्विभक्तानां भवेद्यतः BṛĀraUBhVā. i. 2. 95.

अनावरणत्व (anāvaraṇa-tva) *n.* the state of not being obstructive घटादिकार्ये कपालचूर्णावयवानामन्तर्भावादनावरणत्वमिति चेद्, न, विभक्तानां कार्यान्तरत्वादावरणत्वोपपत्तेः BṛĀraUBh. 17.11 (*on* i. 2. 1)

अनावरणदर्शन (anāvaraṇa-darśana) *n.* **I** vision free from obstructions निरवशेषसर्वक्लेशानावरणदर्शनदिव्यचक्षुर्ज्ञानबलोपेतत्वान्निरवशेषसर्वक्लेशानावरणदर्शनदिव्यचक्षुर्ज्ञानबलोपेत इत्युच्यते LaliVi. 26. 51(180); **II** perception (of the property) of non-covering अनावरणं चोक्तम् । तथामूर्तेऽस्याप्यन्यत्रानावरणदर्शनाद्विभुत्वमपि प्रख्यातमाकाशस्य YogBh. 163. 3 (*on* 3.41)

अनावरणदर्शिन् (anāvaraṇadarśin) *m.* name of a Bodhisattva अनावरणदर्शिनः -- बोधिसत्त्वस्य ।... जननी भविष्यामि GaṇḍVyū. 347. 31 [DBHS.]

अनावरणदशावत् (anāvaraṇadaśā-vat) *adv.* as in the state of non-envelopment अनावरणदशावत् कतिपयावयवा'वरणेऽपि तथाविधस्थौल्योपलम्भः किं न स्यादिति त्ववशिष्यते ĀtmaTaVi. 588. 3.

अनावरणधर्मगगनप्रभ (anāvaraṇadharmagaganaprabha) *m.* name of a Tathāgata अनावरणधर्मगगनप्रभो नाम तथागत आरागितः GaṇḍVyū. 238. 30 [DBHS.]

अनावरणधर्मता (anāvaraṇadharma-tā) *f.* the state of being characterised by freedom from obstruction अथ खलु सुधनः श्रेष्ठिदारकः ... सर्वावरणप्रपातपर्वतविकिरणोऽनावरणधर्मतानुगतः ... समन्तभद्रस्य बोधिसत्त्वस्य गोचरं विचारयमाणः स्थितोऽभूत् GaṇḍVyū. 420. 13.

अनावरणप्रतिसंविद् (anāvaraṇa-pratisaṃvid) *f.* unobstructed special knowledge अनावरणप्रतिसंवित्प्राप्त इत्युच्यते LaliVi. 26. 51(62)

अनावरणभाव (anāvaraṇa-bhāva) *m.* the state of non-obstruction अनावरणभावेन सर्वधर्माः हेतुः प्रतिज्ञायन्ते न कारकभावेनेति AbhidhKoBh. 83.11 (*on* 2. 50); 91. 12 (*on* 2. 55)

अनावरणभावमात्र (anāvaraṇabhāva-mātra) *n.* mere state of non-obstruction ननु च हेतवोऽपि य उत्पादाय त एवानित्या इति वचनादसंस्कृतस्यानावरणभावमात्रेण कारणहेतुत्वात्प्रतिषेधः AbhidhKoBh. 91. 21 (*on* 2. 55)

अनावरणभूतार्थ (anāvaraṇa-bhūtārtha) *m.* established entity free from veil (of ignorance) श्रुतिश्चैत्कपिलादीनामनावरणभूतार्थगोचरज्ञानातिशयं बोधयति Bhām. 329. 20 (*on* ii. 1. 1); आर्षप्रत्यक्षमूलापि स्मृतिः ... आजानसिद्धा स्वभावसिद्धा च सानावरणभूतार्थमात्रगोचरा च VedāntKa. 229. 17 (*on* ii. 1. 1)

अनावरणमति (anāvaraṇamati) *m.* name of a Bodhisattva [DBHS.]

अनावरणरूपिन् (anāvaraṇarūp-in) *adj.* possessing unobstructed nature शुद्धसत्त्वेन द्रव्येण ह्यनावरणरूपिणा । आविर्बभूव भगवानंशेनाधाररूपतः BṛBrahmaS. i. 13. 94.

अनावरणलक्षण (anāvaraṇa-lakṣaṇa) *adj.* characterised as not veiled घटपटादयो हि स्थूला भासन्ते न तु परमसूक्ष्मास्तत्रेदं नानादिग्देशव्यापित्वलक्षणं स्थौल्यं यद्यपि ज्ञानाकारत्वेनावरणानावरणलक्षणेन विरुद्धधर्मसंसर्गेण युज्यते Bhām. 445. 8 (*on* ii. 2. 28); *n.* non-obstruction as the characteristic यद्यस्मात्पूर्वमाकाशमनावरणलक्षणाल्लक्ष्यं स्यात् PrasaPa. 129. 9.

अनावरणविमोक्ष (anāvaraṇa-vimokṣa) *m.* unobstructed release अनाविलं तच्चक्रं अनावरणविमोक्षप्रतिलब्धत्वात् LaliVi. 26. 51(6); अनावरणविमोक्षप्रतिलब्धत्वादनावरणविमोक्षप्रतिलब्ध इत्युच्यते LaliVi. 26.61(202)

अनावरणसत्त्व (anāvaraṇa-sattva) *n.* existence of non-obscuration पूर्णानन्दस्यावृतत्वेऽपि चिदंशेऽनावरणसत्त्वेनाभ्यासोपपत्तेः LaCandr. 768.23.

अनावरणसंभव (an-āvaraṇasambhava) *m.* non-possibility of obstruction नित्योपलब्धिर्नित्यत्वेऽप्यनावरणसंभवात् PramāVār. 1.254.

अनावरणसौगन्ध्य (anāvaraṇa-saugandhya) *n.* I fragrance (of knowledge) due to removal of obstruction विरुद्धकार्यविरता रसिकाः सज्जनस्थितौ । अनावरणसौगन्ध्यैः परास्पदसुखाशनैः । पूजयन्त्यागतं फुल्ला भृङ्गं पद्मा इवार्थिनम् YogVā. vi(2). 98.7; II fragrance due to opening (of bud), YogVā. vi(2). 98.7.

अनावरणस्वभाव (anāvaraṇa-svabhāva) *adj.* having the nature which is not obstructive and which is not obstructed (आकाशमनावृतिः) अनावरणस्वभावमाकाशं यत्र रूपस्य गतिः AbhidhKoBh. 3.23 (*on* 1.5); यो धर्मोऽन्यान् धर्मान्नावृणोति अन्यैर्वा नाव्रियते तत् अनावरणस्वभावमाकाशम् Sphuṭā. i. 17. 3 (*on* 1.5)

अनावरणस्वरमण्डलमधुरनिर्घोषगर्भ (anāvaraṇasvaramaṇḍalamadhuranirghoṣagarbha) *m.* name of a Bodhisattva [DBHS.]

अनावरणहेतु (anāvaraṇa-hetu) *m.* cause of non-obstruction उक्त आलम्बनप्रत्ययः सूत्रे न त्वनावरणहेतुरिति न सूत्रे सिध्यत्यसंस्कृतस्य हेतुभावः AbhidhKoBh. 91. 22 (*on* 2. 55)

अनावरणात्मक (anāvaraṇātma-ka) *adj.* of the nature of non-obstruction अनावरणात्मकेऽप्याकाशे भवत्यावृतकायः सिद्धानामप्यदृश्यो भवति YogBh. 170. 7 (*on* 3. 45)

अनावरणादि (anāvaraṇādi) *adj.* uncovering etc. पदादेर्हि एकत्र पार्श्वे चाल्यमाने कम्पः अन्यत्र अकम्पः, तच्च तस्यैकत्वे न युज्यते। एवमावरणानावरणादौ ज्ञेयम् Bhāsk. i. 223. 18 (*on* i. 5.6)

अनावरणानना (anāvaraṇānanā) *adj.* (*f.*) having an uncovered mouth स्थाल्यां यथानावरणाननायामघट्टितायां च न साधुपाकः YaśasCam. i. 507.5.

अनावरणापात (anāvaraṇāpāta) *m.* undesirable contingency of non-covering सुषुप्तौ व्यवहाराभावेनानावरणापातात् Nyāyāmṛ. 355B. 5; AdvaiSi. 587. 2.

अनावरणिक (an-āvaraṇika) *m.* one of the four kinds of *cittotpāda* or the origination of thought (*lit.* unobstructed) चतुर्विधो बोधिसत्वानां चित्तोत्पादः । आधिमोक्षिकोऽधिमुक्तिचर्याभूमौ । शुद्धाध्याशयिकः सप्तसु भूमिषु । वैपाकिकोऽष्टम्यादिषु । अनावरणिको बुद्धभूमौ MaYānaSū. 14. 8 (4. 2)

अनावरणिन् (an-āvaraṇin) *m.* name of a religious sect [name of a Buddhist sect, pw.; 'without cover or clothes', N. of a religious sect, (ī = *anambara*, q. v.), MW.]

अनावर्जनसंज्ञा (anāvarjana-sañjñā) *adj.* (*f.*) called *anāvarjana* 'which does not win over' (as it does not have connection with the main sentiment or story and where there is intrusion of extraneous incidents) कार्यान्तरान्तरायेण विच्छिन्नविरसा कथा ।... विच्छिन्नविरसा विच्छिन्ना चासौ विरसा च सा, विच्छिद्यमानत्वादनावर्जनसंज्ञेत्यर्थः VakroJī. 241. 7.

अनावर्जित (an-āvarjita) *adj.* [*f.* -ā] I not bent अनञ्जितासिता दृष्टिर्भ्रूरनावर्जिता नता । अरञ्जितोऽरुणश्चायमधरस्तव सुन्दरि Kāvyāda. 2. 201; SaraKaṇṭhā. 319. 2; II not controlled, cf. **अनावर्जितचित्ता, अनावर्जितमनस्.**

अनावर्जितचित्ता (anāvarjita-cittā) *adj.* (*f.*) I not allowing the mind to be controlled अनावर्जितचित्तापि सर्वमेवानुधावति । न चाप्नोति फलं किंचित्तृष्णा जीर्णेव कामिनी YogVā. i. 17. 22; II who has not controlled her mind, YogVā. i. 17. 22.

अनावर्जितमनस् (anāvarjita-manas) *adj.* who has not controlled the mind भवान् धर्मो धर्मप्रवणमतिरेप प्रतिदिनं भवान् ध्येयो ध्याता पुनरयमनावर्जितमनाः MahāvīC. App. A. (283.19)

अनावर्त (an-āvarta) *adj.* 1 from where there is no return महास्थानमनावर्तमेकमक्षरसंज्ञकम् MahāBhā. xii. 192.123; 2 not having a circular formation of hair or curly lock केसरं च जटाहीनं मृदुदीर्घं प्रशस्यते । अनावर्तौ दृढश्चैव स्कन्धो वाहस्य पूजितः ŚārṅgaPa. 1624.

अनावर्तक (anāvarta-ka) *adj.* not having a circular formation of hair or curly lock पृष्ठं समसुपरिविशालमसिरमलोमकमनावर्तकं प्रशस्यते KāśyaS. 48A. 18.

अनावर्तनीयप्रपत्तितस् (anāvartanīyaprapatti-tas) *adv.* due to the surrender which cannot be repeated विश्वासस्यावर्तनीयायां भक्ताविव यावदावृत्त्यपेक्षितत्वेनानावर्तनीयप्रपत्तितोऽधिकत्वात् Nyāyāmṛ. 644A. 8.

अनावर्तमान (an-āvartamāna) *adj.* not repeating नञ् ... चरितार्थो न लिङ्गमपरं ब्राह्मणवधविधिषु शक्नोत्यनावर्तमानः प्रतिषेद्धुम् TantrVā. 140.14 (*on* i. 3. 7); तस्मिंश्चानावर्तमानेऽर्थाभावादवचनैरपि नावर्तते TantrVā. 1018. 16 (*on* iii. 4.46(140))

अनावर्तयत् (an-āvartayat) *adj.* I not causing or permitting (one) to turn back क्षत्रसंग्रहीतॄणां पुत्रा दण्डिनोऽनावर्तयन्तोऽश्वं रक्षन्ति ŚāṅkhāŚS. xvi. 1.16; (अश्वम्) तमनावर्तयन्तो दिग्भ्यः संवत्सरं रक्षित्वा राजक्रये बध्नीयुः LāṭyāŚS. ix. 9. 5 = DrāhyŚS. xxvii. 1. 7 (B. R. SHARMA Ed., 1983); 2 not repeating कोशलाधिपसुतस्य ... प्रस्तुतामपि विद्याधरविलासवार्तामनावर्तयतः ... ग्रीष्मकालादधिकदुःसहो बभूव वर्षासमारम्भः TilaMañ. 180. 21.

अनावर्तिकधर्म (anāvartika-dharma) *adj.* characterised by no more returning (to rebirth) आयुष्मान् महामौद्गल्यायनः ... पश्यति शुद्धावासकायिकां देवाः ... अनावर्तिकधर्मा अस्मिं लोके अव्यवकीर्णाः MaVastuAva. i. 33. 7 [DBHS.]

अनावर्तिन् (an-āvartin) *adj.* not turning back, not returning अनावर्ती कालो व्रजति ŚatTrayī. 204; प्रज्ञानरूपपाकश्चासंप्रख्यानरूपपाकश्चापां प्राणो रसः। स खल्वावर्ती चानावर्ती च Vṛtti *on* VākyaP. 33.5 (*on* 1. 8) (DCP(R)I Ed.)

अनावलोकयत् (an-āvalokayat) *adj.* not looking at स तेनातिभृशं विद्धः प्रेक्ष्य भीष्मः शिखण्डिनम् । अनिच्छन्नपि संक्रुद्धः (v. l. अनावलोकयन्क्रुद्धः) प्रहसन्निदमब्रवीत् MahāBhā. vi. 104.40.

अनावश्यक (an-āvaśyaka) *adj.* [*f.* -ikā, -ī] not necessary सर्वासु चानावश्यकीषु प्रवृत्तिषु पापदर्शनम् Aparā. 1007. 17 (*on* 3.157); वर्षत्रयपर्यन्तमेव दाहोऽनावश्यकोऽस्तु HārLa. 123.13; गोदोहकालं काङ्क्षेत कृत्वा भूतबलिं द्विजः

इति। अयं च कालनियमः कालान्तरे तस्य निरीक्षणमनावश्यकमिति वक्तुम् SmṛtiCan. ii. 588. 14; धनहारिणो दौहित्रादन्यस्य मातामहश्राद्धमनावश्यकमिति गम्यते CaturCin. iii(1). 87. 1; iii(1). 440.18; त्रिदण्डेन यतिश्चेति लक्षणानीति स्मृत्यन्तरोक्तं लक्षणमनावश्यकमिति दर्शितम् ManvaVi. 721. 14 (*on* 6. 44); निषिद्धकाम्यवर्गेषु व्यर्थानावश्यकेषु शमादिविधिरन्यत्र प्रवृत्त्या न विरुध्यते NyāyPari. 513. 10; एतेन विष्णुस्मृतौ द्वयपदोक्त्या तृतीयानावश्यिका। उभे संध्ये तु कर्तव्ये ब्राह्मणैः स्वगृहेष्वपि इति BālamBha. i. 96. 5 (*on* 1. 24)

अनावश्यकता (anāvaśyaka-tā) *f.* the state of not being necessary तत्र हि तुषारशिशिरीकरणन्यायेनान्यव्यापारस्यानावश्यकतया चमत्कारिताविरहात् RasGaṅ. 614.3; तत्र शक्तिग्रहस्यावश्यकतया पङ्कजादिपदेष्ववयवशक्त्यग्रहेऽपि बोधोदयेन तच्छक्तिग्रहस्यानावश्यकतया पङ्कजादिपदवैलक्षण्यस्य स्पष्टत्वात् BhāṭṭCin. i. 111.4 (*on* i. 1. 4); अत्र 'शरोऽचि' इत्यस्यानुपन्यासेन व्यञ्जनात्परस्यैकस्यानेकस्य वोच्चारणे विशेषाभावेन 'अचो रहाभ्याम्' इत्यस्य तन्निषेधस्य चानावश्यकता सूचिता LaŚabdeŚe. i. 105. 12.

अनावश्यकतापत्ति (anāvaśyakatāpatti) *f.* undesired contingency of not being necessary अतिथिभोजनफलकथनमिदम्। न चानावश्यकतापत्तिः ManvaMu. 107. 16 (*on* 3. 106)

अनावश्यकत्व (anāvaśyaka-tva) *n.* the state of not being necessary वैधर्म्यवचनमनुसंधित्सुः प्रथमं तावदनावश्यकत्वं तस्य दर्शयति NyāyRa. 383.22 (*on* 5(4). 118); प्रवृत्तस्य च तदभिज्ञाचार्यानुग्रहादेव सर्वोपसंग्रहः तथात्रापीति पूर्वं पूर्वतन्त्रश्रवणस्यानावश्यकत्वान्न तदानन्तर्यार्थोऽथशब्दः PrakaVi. 28. 11; किं चैवंविधानां काव्यानां कविप्रतिभामात्रजन्मनां प्रामाण्यानावश्यकत्वेन संदिग्धासिद्धत्वं हेतोः SāhiDa. 269.3; यमादयः प्राणायामान्ताश्च बहिरङ्गत्वेनानावश्यकत्वादत्र नोक्ताः YogSā. 51. 1(2); वैदिककर्मकरणे तात्पर्यमुक्त्वा लौकिकस्यानावश्यकत्वेऽपि तत्समयमाह AṇuBh. 299. 23 (*on* iii. 4. 50); आलिङ्गनादीनां क्रियाणां मन्दादरत्वेनैकाश्रयकत्वस्यावश्यकत्वेऽपि परस्परमेकाश्रयकत्वस्यानावश्यकत्वात् RasGaṅ. 435. 11; 517. 4; LaCandr. 339.15; पदत्वेन वर्णत्वेन वा शक्तत्वे विभक्तेरपि तद्वाचकतासिद्धेः। एकत्वादिशाब्दबोधात्पूर्वं वर्णत्वाद्युपस्थितेरप्यनावश्यकत्वाच्च VyutpaVā. 96. 8; 118. 7; न चादृष्टोद्बोधाभावात् प्रतिसर्गे तदभावः तस्यापि सामग्रीसत्त्वेऽनावश्यकत्वात् GoviBh. 122.3 (*on* ii. 2. 12); मध्यांशे द्विभागात्मकत्वस्य तुर्यसूत्रलोपादर्थसिद्धत्वेन तत्कथनस्यानावश्यकत्वादिति द्रष्टव्यम् SetuBa. 46. 13.

अनावश्यकत्वद्योतन (anāvaśyakatva-dyotana) *n.* indication of not being necessary कल्पितो यदीत्याद्युत्तरवाक्यं तु न तेऽनुकूलम्, विकल्पपदेनोक्तस्य शाखाचार्यादिकल्पनस्य यदिशब्देनानावश्यकत्वद्योतनात् GuruCandr. ii. 296. 22.

अनावश्यकत्वप्रतीति (anāvaśyakatva-pratīti) *f.* knowledge of absence of necessity फलाधिक्यजनकगुणाधिक्यद्वारकत्वेनास्य जयादिहोमवत्सर्वयज्ञाङ्गत्वावगत्यानावश्यकत्वप्रतीतेरावश्यकत्वार्थं दर्शपूर्णमासयोर्वासोविन्यासविध्युपपत्तिः BhāṭṭDī. i. 301. 1 (*on* iii. 4.3)

अनावश्यकत्वमात्र (anāvaśyakatva-mātra) *n.* mere absence of necessity गच्छेत्यादौ तु यदि गच्छसि, तदा गच्छेत्यर्थकत्वेन चेच्छब्दस्यानावश्यकत्वमात्रद्योतकत्वेनोक्तार्थकत्वाभावः LaCandr. 699. 15.

अनावश्यकत्वार्थम् (anāvaśyakatvārtham) *adv.* for the sake of not being necessary अपुत्रस्येति भ्रात्राप्यन्वयः। ज्येष्ठस्येति कनिष्ठस्यानावश्यकत्वार्थम् NirṇaSi. 333. 7.

अनावश्यकविषय (anāvaśyaka-viṣaya) *m.* [Loc.] in the case of what is not necessary (to be performed) सांतपनीयेत्युपलक्षणं प्रारब्धकर्ममात्रस्य। अग्निहोत्रेत्यप्यावश्यकमात्रस्य। अनावश्यकविषये 'अप वा एतद्यज्ञस्य छिद्यते यदन्यस्य तन्त्रे विततेऽन्यस्य तन्त्रं प्रतायते' इति निषेधात् BhāṭṭDī. ii. 175. 19 (*on* v. 1. 17)

अनावश्यकव्ययार्थम् (anāvaśyakavyayārtham) *adv.* for the sake of unnecessary expenditure योऽनावश्यकव्ययार्थं ऋणं कुरुते सः 'ऋणकर्ता' CaturCin. iii(1). 479. 12.

अनावश्यकानात्मज्ञान (anāvaśyakānātmajñāna) *n.* unnecessary knowledge of what is other than the self वेदान्तानुसंधानप्रयुक्तात्मज्ञानस्य लोकव्यवहारप्रयुक्तानात्मज्ञानस्य च समुच्चित्य प्राप्तावनावश्यकानात्मज्ञाननिवृत्त्यर्थस्य परिसंख्याविधेरवकाशोऽस्ति ŚivārkaMaDī. i. 185. 26 (*on* i. 1. 4)

अनावश्यकापसरण (anāvaśyakāpasaraṇa) *n.* unnecessary departure कथामवगाह्यैतद्विच्छो(? च्छे)दमिच्छतोऽनावश्यकापसरणव्याजवचनं विक्षेपः NyāyPari. 207.6.

अनावश्यकार्थ (anāvaśyakārtha) *adj.* meant for the sake of (the meaning) 'other than necessary' अनावश्यकार्थं वचनम्। एषां चजोः कगौ न भवतः। घ्यणि परे KātanVṛ. *on* iv. 6. 60; Nyās. ii. 810.7 (*on* vii. 3. 66)

अनावसथ्य (an-āvasathya) *adj.* who has not set up the domestic fire किं पुनरयं होमो लौकिकेऽग्नावनावसथ्यस्य भवति नेति विचार्यते ManuBh. ii. 440. 15 (*on* 11.221)

अनावह (an-āvaha) *adj.* not causing, not bringing about समाधिरारोहावरोहक्रमः। आरोह उत्कर्षः, अवरोहोऽपकर्षः, तयोः क्रमो वैरस्यानावहो विन्यासः SāhiDa. 458. 4.

अनावादि (a-nāvādi) *adj.* excluding the words belonging to the list '*nau*' etc. यदेतदरानि ब्रवीत्येतदनावादिष्विति वक्ष्यामि। ... न त्वा नावं मन्ये यावत्तीर्णं न नाव्यम् MahāBh. i. 450.20 (*on* ii. 3. 17); KāśiVṛ. *on* ii. 3.17; Nyās. i. 409. 13 (*on* ii. 3. 17); मन्याप्ये कुत्सायामनावादौ वा CāndraVyā. ii. 1. 80; मन्यस्यानावादिभ्योऽतिकुत्सने SiddhaHe. ii. 2. 64.

अनावाप (an-āvāpa) *adj.* not having any addition भक्ष्यमाणो ह्यनावापः क्षीयते हिमवानपि MahāBhā. iii. 33. 9.

अनावाप्त (an-āvāpta) *adj.* (irr.) **1** not completed, not fulfilled कच्चिद्रावजन्हृतान्येव कृतप्रायाणि वा पुनः। विदुस्ते वीर कर्माणि नान(v. l. नाना)वाप्तानि कानिचित् MāhāBhā. ii. 5. 22; **II** not obtained दण्डनीतिं पुरस्कृत्य विजानन् क्षत्रियः सदा। अन(v. l. °ना)वाप्तं च लिप्सेत लब्धं च परिपालयेत् MahāBhā. xii. 70. 29.

अनावार (an-āvāra) *m.* absence of covering अत्राद्युर्दीपधारेव तिरस्कृत्य तमः स्थिता। वृत्तिवारेयनावारो वृत्तीनां क्षेमतः फलम् VedāntSiSūMañ. 1.81 (comm. अनावार आवरणाभावः)

अनावारकता (anāvāraka-tā) *f.* the state of being that which does not cover अज्ञानस्य ईश्वरं प्रत्यनावारकतया तं प्रति जीवभेदानापादनात् SiddhāL-Saṁ. 406. 1.

अनावारकत्व (anāvāraka-tva) *n.* the state of being that which does not cover न चैवं ब्रह्मावगमोत्तरकालेऽनावारकत्वेन स्थितानामज्ञानानां ततोऽप्यनिवृत्तिप्रसङ्गः SiddhāLeSaṁ. 139. 10.

अनावार्य (an-āvārya) *adj.* not to be checked, irresistible अविषह्यमनावार्यं तीव्रवेगपराक्रमम्। पश्यामीवातिताम्राक्षमापतन्तं वृकोदरम् MahāBhā. v. 50. 43; तपन्तमिव को मन्दः पतिष्यति पतङ्गवत्। पाण्डवाग्निमनावार्यं मुमूर्षुर्मूढचेतनः MahāBhā. v. 52. 12; v. 194. 4; द्रोणमेघमनावार्यम् ...। इन्द्रेणाभिप्लुतन्तम् MahāBhā. vii. 73. 7; अप्रसह्यमनावार्यं दुर्लङ्घ्यं जीवितच्छिदम् ...। घातयध्वं दुराचारम् ViṣṇuDhaP. i. 47. 9.

अनावास (an-āvāsa) *m.* not an abode शमीगर्भमश्वत्थम्। यच्छमीगर्भं शुक्लाङ्कुरम् ... बहुपक्ष्यनावासम् ... गत्वा ... प्रणयेत् VaikhāŚS. 1. 1; तस्यापि ... कल्याणवर्म्मनामाभूत्[।*] तनयस्तनोयसामपि यो दोषाणामनावासः EI. xii. 73.14; *adj.* not requiring an abode सदा पश्यन्ति ते देवाः ...। सर्वावासमनावासं नारायणमनामयम् AhirbuS. 6. 26.

अनावाहन (an-āvāhana) *n.* absence of invocation (to the deities) पुष्टिमन्तौ विराजौ संयाज्ये अनिगदे। अन्यत्राप्यनावाहने ĀśvaŚS. I. ii. 18. 6; I. iv. 8.7; मान्यतमाया देवताया अनावाहने हविःस्वीकारस्य दूरापेतत्वादप्रसक्तोऽपि विष्णुर्भविष्यद्यागसिद्ध्यर्थमावाह्यः NyāyMāVi. 481. 26 (*on* x. 1.1)

अनावाहयित्वा (an-āvāhayitvā) *ger.* not having invoked सर्वत्र देवतावाहनेषु भागिनीं देवतामनावाहयित्वा योऽन्यामावाहयेदेतयैव स्रुवाहुतिं जुहुयात् BaudhŚS iii. 322. 9.

अनावाहित (an-āvāhita) *adj.* [*f.* -ā] not invoked अथ यद् पुरस्ताद्वोपरिष्टाद्वा शंयोर्वाजस्यानावाहितान् वाजिनो यजति ... तानेव तद् प्रीणाति KauṣīBr. 5.2 (18. 25); अनावाहिता[ः] स्वाहादेवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्त्विति ĀśvaŚS. I. i. 5. 24; भागिनीदेवतानामनावाहितानां मनसावाहयेयद्वो देवा इत्याहुतिं जुहुयात् VaikhāŚS. 20. 25.

अनावाहितशिव (anāvāhita-śiva) *m.* [Loc.] when Śiva is not invoked अनावाहितशिवे वोद्वासितशिवे वाग्नौ निर्वाणे ... दक्षिणां दद्यात् IśānŚiPa. ii. 63. 83.

अनावाह्य (an-āvāhya) *ger.* not having invoked किंतु देवतामनावाह्य यजेदिति KauṣīBr. 8. 8 (40. 1); अनूयाजानां सूक्तवाकस्य शंयुवाकस्य चेत्यरिष्टाद्वाजिभ्यो वाजिनमनावाह्यादेशन् ĀśvaŚS. I. ii. 16. 13; I. iii. 13. 19; पुरा शंयोर्वाकादूर्ध्वं वानावाह्य वाजिनो यजति ŚāṅkhāŚS. iii. 8. 20; अनावाह्य पूर्वं विष्णुमुल्कनं यजेत् MānŚS. 124. 2.

अनाविक (an-āvika) *adj.* not made of wool अक्षयानन्तरो भिक्षुर्वस्त्रादीनां प्रतिग्रही। आविकं वानाविकं वा तथा पट्टपटानपि। प्रतिगृह्य यतिश्चैतान् पतत्येव न संशयः SaṁnyāU. 2. 95.

अनाविका (a-nāvikā) *adj.* (*f.*) [SiddhaHe. vi. 4. 10] not crossing with a boat कस्यांचिदप्रेयसो जातपुष्पोद्ययश्रमाम्भसि। अनाविकानौर्दुवि(ति ?)क्यवटिकेव ममज्ज दृक् DvyāśraKā. 17. 7.

अनाविग्नमनस् (anāvigna-manas) *adj.* whose mind is not agitated अन्यस्त्वनाविग्नमना धैर्यादविकृतं वचः। प्रोवाच वदतां श्रेष्ठः समासात्कंसमोजसा HariVam. 66.2.

अनाविद्ध (án-āviddha) *adj.* [*f.* -ā] 1A not wounded, unhurt अनाविद्धया तन्वा जय त्वम् RV. vi. 75.1; AV.(P.) xv. 10.1; TaiS. IV. vi. 6.1; MaiS. iii. 16.3 (iii. 185.11); KāthS. v. 6.1 (iii. 172.8); VājaS. 29.38; 1B undamaged, unpierced तस्योपविष्टस्य मुनेरुत्सङ्गे निपपात ह। अवातमशुकादष्टम् (v. l. अमारतमनाविद्धम्) एकमाम्रफलं किल MahāBhā. ii. 16.28; न रथानां न चाश्वानां न ध्वजानां न वर्मणाम्। अतिविद्धैः (v. l. अनाविद्धम्) शितैर्बाणैरासीद् द्व्यङ्गुलमन्तरम् MahāBhā. iv. App. I. 45(6); भग्नं संधिमनाविद्धमहीनाङ्गमनुल्बणम्। सुखचेष्टाप्रचारं च संहितं सम्यगादिशेत् SuśruS. iv. 3.70; अनेन लेपयेच्छलं लिप्तं चाग्नौ प्रतापयेत्। अविशीतमनाविद्धम् ... ततो निर्वापितं तैले लोहं तत्र विशिष्यते ŚārṅgaPa. 1784; 1C unaffected प्रमेहिणो यदा मूत्रमपिच्छिलमनाविलम् (v.l. in comm. अनाविद्धमपिच्छिलम्)। विशदं तिक्तकटुकं तदारोग्यं प्रचक्षते SuśruS. iv. 12.20; मूत्रमनाविद्धमतनुकमनल्पमृजुवेगं प्रशस्यते KāśyaS. 47B. 29; तदा रजस्तमोभावाः कामलोभादयश्च ये। चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति BhāgP. i. 2.19; कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यत्। चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् BhāgP. vii. 15.35; 2 not perforated अनाघ्रातं पुष्पं किसलयमलूनं कररुहैरनामुक्तं (v. l. अनाविद्धम् Kale's Ed., 1969) रत्नम् Śāk. 2.11; ŚatTrayī. 203; Avalo. 52.24 (*on* 3.35); SaraKanthā. 426.9; ŚārṅgaPa. 3271; 3 not mixed (with other *bhāvas*) निकुञ्चितं च कर्तव्यं नृत्ते योज्यं तु रेचितम्। अनाविद्धेषु भावेषु कुर्यात्स्वाभाविकं तथा NāṭyaŚā. 8.129; 4 not complicated (with the use of long Cpds.) अनाविद्धललितपदं चूर्णम्। अनाविद्धान्यदीर्घसमासानि ललितान्युद्धतानि पदानि यस्मिंस्तत् ... चूर्णमिति KāvyālaṅSū. i. 3.24.

अनाविद्धगत (anāviddha-gata) *adj.* having the gait other than the *āviddha* (i.e. without uneven movement) पादैरनाविद्धगतैर्निष्क्रामेयुः समं त्रयः NāṭyaŚā. 5.143.

अनाविद्धवर्ण (anāviddhavarṇa) *m.* name of a former Buddha सम्यक्संबुद्धानां कानि नामानि ... ततो भूयो धुतधर्मधर अतो नन्तरं भगवाञ्चित्रभानुः ... अनाविद्धवर्णः MaVastuAva. i. 140.5; cf. **अनिविद्धवर्ण**.

अनाविद्धाङ्गचेष्टित (an-āviddhāṅgaceṣṭita) *adj.* not involving complex physical efforts अनुद्धतमसंभ्रान्तमनाविद्धाङ्गचेष्टितम्। ...यदीदृशं भवेन्नाट्यं ज्ञेयमाभ्यन्तरं तु तत् NāṭyaŚā. 22.75.

अनाविद्यक (an-āvidyaka) *adj.* not caused by nescience अनाविद्यकमेव वा घटादौ सत्तादात्म्यविद्यापरिणामे जायते तत् GuruCandr. i. 9.1; ii. 140.12.

अनाविद्यककर्तृत्व (anāvidyaka-kartṛtva) *n.* agenthood not caused by nescience कर्तृत्वज्ञातृत्वादिकम् ... अविद्येति चेत्, सत्यमविद्यैव अनाविद्यककर्तृत्वस्य क्वचिदप्यनभ्युपगमात् NyāySiA. 213.4.

अनाविद्यकब्रह्मन् (anāvidyaka-brahman) *n.* Brahman not caused by nescience तस्याप्यनाविद्यकब्रह्माभिन्नत्वेनाविद्यकत्वायोगात् Nyāyāmṛ. 262A. 8; भेदस्याप्यनाविद्यकब्रह्माभिन्नत्वेनाविद्यकत्वायोगः AdvaiSi. 520.13.

अनाविद्यत्व (anāvidya-tva) *n.* the state of not being a product of nescience यच्चोत्तरं दीयते, तदप्यविद्यान्तर्गतमित्येवं शङ्क्यते। अनाविद्यत्वे सत्युत्तरं सिध्येत् NyāyKu. 68.2

अनाविद्यभाव (anāvidya-bhāva) *m.* the state of not being a product of nescience शास्त्रस्यापि ह्यविद्याप्रभृतिभिरुद्यः संमतस्त्वन्मतस्थैः तस्यानाविद्यभावे न हि निखिलमिदापह्नवः शक्यशङ्कः TattvMu. 3.55 (Sarvārthasiddhi शास्त्रस्य ब्रह्मवत् अविद्यावच्च अनादित्वादविद्यामूलत्वं नास्ति)

अनाविरुपर (anāvir-upara) *adj.* (sacrificial post) of which the lower part or bottom is not visible (above the ground) अनाविरुपरं मिनोति BhārŚS. vii. 8.12; अनाविरुपरं कृत्वा ... प्रदक्षिणं पांसुभिः पर्यूह्य ... मैत्रावरुणदण्डेन समं भूमिपरिदृंहणं कृत्वा ĀpaŚS. vii. 10.12; VaikhāŚS. 10.9; अग्निं प्रत्युपनतं बर्हिषि निर्णुतमनाविरुपरं संमिनोति HirŚS. iv. 2.57 (414.1) (comm. अनाविरप्रगट उपरो यस्य)

अनाविर्भवत् (an-āvirbhavat) *adj.* not arising ईदृशविषयेऽनुभवः प्रमाणान्तरेभ्योऽनाविर्भवंश्चोदनामेव मूलमुपकल्पयति ĀgaPrā. 5.13.

अनाविर्भाव (an-āvirbhāva) *m.* 1 non-manifestation न त्वन्यादृशौ आविर्भावानाविर्भावौ स्वरूपस्य संभवतः BrahmSūBh.(Śaṅ.) 176.15 (*on* i. 3.19); ज्ञानाज्ञानकृतावाविर्भावानाविर्भावौ PrakaVi. 256.19; न चैवमपि कैवल्यार्थिनोऽभिलाषोऽस्तीत्यनाविर्भाव एव NyāyKu. 194.14; एतेनाविर्भूतरूपे व्यापकत्वैकरसत्वसच्चिदानन्दत्वादयो धर्मा उपसंहर्तव्याः अनाविर्भूतेऽपीति स्थितम्। एवं सत्याविर्भावेऽनाविर्भावेऽपीश्वरः समानः AṇuBh. 223.25 (*on* iii. 3.19); असति प्रमाणान्तरे गौणार्थप्रकाशनसामर्थ्यस्यैवानाविर्भावात् तत्प्रकाशनस्वरूपयोग्यत्वसद्भावेऽपि न तत्र विनियोगः MayūMāli. 210.18 (*on* iii. 2.1); 2 non-appearance (as a primary meaning) यदा तु प्रज्ञा(? ज्ञ)शब्दान्मत्वर्थीयो णो विधीयते तदा प्रज्ञावतः प्राधान्यात् प्रज्ञानक्रियाया उपलक्षणत्वादनाविर्भावाद् व्याकरणादिभिः कर्मभिः संबन्धाभावः PradI. iv. 352B. 11 (*on* v. 2.101)

अनाविर्भूत (an-āvirbhūta) *adj.* [*f.* -ā] 1 not manifest, concealed अनाविर्भूतं हि तस्य जीवावस्थायां पररूपमविद्याकामकर्मतिरस्कृतत्वात् BrahmSūBh.(Bhā.) 58.5 (*on* i. 3.19); संकर्षणादिषु त्रिषु शास्त्रप्रवर्तनसंहारार्थोपयिकगुणद्वन्द्वयोन्मेषेण चतुष्कमनाविर्भूतम् NyāySiA. 237.2; एतेनाविर्भूतरूपे व्यापकत्वैकरसत्वसच्चिदानन्दत्वादयो धर्मा उपसंहर्तव्याः अनाविर्भूतेऽपीति स्थितम् AṇuBh. 223.25 (*on* iii. 3.19); 2 not evident न चानाविर्भूते सामर्थ्ये तात्पर्ये च शब्दादर्थः प्रतीयते ŚāstrDI. 210.16 (*on* iii. 2.1); पङ्गोर्हि चरणवर्जितत्वाद् गमनशक्तिरनाविर्भूता VedāntKau. 182.6 (*on* ii. 2.7)

अनाविर्भूतगुणाष्टक (anāvirbhūta-guṇāṣṭaka) *adj.* whose group of eight qualities is not manifest तस्यानाविर्भूतगुणाष्टकस्य सत्यसंकल्पत्वादेरघटमानत्वाच्च ... विचारस्यारम्भणीयत्वम् ŚrutaPra. iB. 286.13 (*on* i. 2.1)

अनाविर्भूतगुणाष्टकत्व (anāvirbhūtaguṇāṣṭaka-tva) *n.* the state of being one whose group of eight qualities is not manifest अकामचारशब्दार्थमाह असत्यसंकल्पत्वं चेति। अनाविर्भूतगुणाष्टकत्वं विवक्षितम् ŚrutaPra. ii. 38.14 (*on* i. 3.13)

अनाविर्भूतज्ञानैश्वर्य (anāvirbhūta-jñānaiśvarya) *adj.* whose knowledge and supremacy are not manifest जीवस्य स्वत एवानाविर्भूतज्ञानैश्वर्यात् संकल्पमात्रेण स्रष्टृत्वं न संभवति PrakaVi. 752.17.

अनाविर्भूतत्व (anāvirbhūta-tva) *n.* the state of not being manifest, non-manifestation कैवल्यस्यात्मनो गमनं नोपपद्यते ... करणकलेवररहितस्य प्रवृत्त्यशक्तत्वात्, सत्यसंकल्पत्वादेरनाविर्भूतत्वाच्च ŚrutaPra. ii. 492.26 (*on* iii. 3.29)

अनाविर्भूतदृक्शक्ति (anāvirbhūta-dṛkśakti) *adj.* whose visual power is not manifest अन्धत्वादनाविर्भूतदृक्शक्तिरपि प्रेर्यैः पुरुषस्तद्वचनानुसारेण चेतनत्वात्प्रवर्तते VedāntKau. 182.7 (*on* ii. 2.7)

अनाविर्भूतबाधक (anāvirbhūta-bādhaka) *adj.* sublation (i. e. sublating knowledge) of which has not arisen अदुष्टकरणोद्भूतमनाविर्भूतबाधकम्। असंदिग्धं च विज्ञानं कथं मिथ्येति कथ्यते NyāyMañ. ii. 116.6.

अनाविर्भूतस्वरूप (anāvirbhūta-svarūpa) *adj.* whose essential nature is not manifest विवेकविज्ञानाभावादनाविर्भूतस्वरूपः सन् विवेकविज्ञानादाविर्भूतस्वरूप इत्युच्यते BrahmSūBh.(Śaṅ.) 176.14 (*on* i. 3.19); अनाविर्भूतस्वरूपस्यामुक्तत्वेन मुक्तातिक्रमाव्याघातात् TattvPrakā. 218B.6 (*on* iv. 4.1)

अनाविर्भूतानेकाकारगोचर (anāvirbhūtānekākāra-gocara) *adj.* having for its object numerous unmanifest forms संसारदशायामनाविर्भूतानेकाकारगोचरस्याविर्भावशब्दार्थस्य धर्मभूतज्ञानविकासविशेषस्य ... अस्माभिरभ्युपगमात् ŚatDū. 183.15.

अनाविर्भूति (an-āvirbhūti) *f.* non-manifestation आन्तराणां रागद्वेषादीनामनाविर्भूतिः शमः BrahmSūBh.(Śrī.) ii. 399.11 (*on* iii. 4.27)

अनाविल (an-āvila) *adj.* [*f.* -ā] A i not physically defective, healthy ii not tainted (with sin), pure, unsullied iii not wicked, virtuous iv clean (-shaven, leaving no trace of hair) v not disturbed, pleased B i not affected, perfect ii not muddy or turbid, not impure, clear iii not marshy, wholesome, salubious iv not dim, bright v not dirty vi transparent Ai not physically defective, healthy गुणाश्च षण्मितभुक्तं भजन्ते ...। अनाविलं चास्य भवेदपत्यम् MahāBhā. v. 37.30; स्वमपत्यं विशिष्टं हि सर्वं इच्छत्यनाविलम् MahāBhā. xiii. 28*; वर्षाकाले ... सर्पिस्तैलम् ... पाययेत्। तेन ... स्थिरकठिनशरीरा अनाविलाः ... संभवन्ति (वारणाः) Hastyāyur. 587.17 (4 4); Aii not tainted (with sin), pure, unsullied त्वदीयैश्चरितैरनाविलैर्महीधरः पावित एष सान्वयः KumāSam. 5.37 (comm. अनाविलैरकलुषैः); पूर्वार्जितक्लेशविनाशहेतुस्तपः समुद्दिष्टमनाविलं च VarāṅgaC. 31.71; अहो यशः पूर्वमहीपतीनाम् अनाविलं येन बलाद् विलुप्तम् NavaSāC. 1.63; Aiii not wicked, virtuous नित्याकारणवैराणामकर्तारमनाविलम्। ... कुर्वीत ध्वजिनीपतिम् NītiSā. 19.30; Aiv clean (-shaven, leaving no trace of hair) शिरोलिङ्गं च तस्येष्टं परं मौण्ड्यमनाविलम् MahāP. 38.113 (*but* FN. उष्णीषादिरहितम्); Av not disturbed, pleased वीक्ष्य प्रसीदति वधूर्वितेऽपि मानाश्वानाविला सरसि कौमुदमत्र HarVi. 5.125; कच्चित्तमां चित्तमनाविलं ते NaiṣC. 8.57; अथ पुनरपि यावदाविलं ते व्यधुरुदधिं विबुधाश्च दानवाश्च। समखिलजन्तुम्मतां मनोभिः समजनि तावदनाविला त्रिलोकी NīlaVi. 115.9;

BI not affected, perfect तदेतद्ब्रह्मसाद्भूतं सर्वं जगदनाविलम् MahāBhā. vii. App. I. 8(103); मासि मासि त्रिरात्राणि कृत्वा वर्षाणि द्वादश। गणाधिपत्यं प्राप्नोति निःसपत्नमनाविलम् MahāBhā. xiii. 109.32; संप्राप्य ज्ञानभूयस्त्वं निर्मलीकृतचेतनः। अनाविलमसंक्लेशं वैष्णवं तद्विशेत् पदम् AhirbuS. 14.41; स मणेरंशुचयः ···। व्यक्तसद्विकसद्विलोचनेभ्यो ददवालोकमनाविलं बलेभ्यः ŚiśuVa. 20.38 (comm. अनाविलं प्रसन्नम्); प्रतीहारः ···। उवाचानाविलं वाक्यमल्पाक्षरपरिस्फुटम् SkandP. i(2). 21.241; PadmP. v. 40.2; ब्रह्माश्रयैवाविद्या न पुनर्जीवाश्रयेत्यनाविलमशेषम् NyāyMa. 336.3; 359.10; सुधास्वादं गुरोः पादपद्मः पीत्वा रजस्वलम्। निजां कपिध्वजश्चक्रे चित्रप्रज्ञामनाविलाम् PāṇḍaC. 3.270; तस्मादनाविलं स्वप्रकाशलक्षणम् TattvPradī.(Ci.) 11.11; भोगान् कृष्णभुजङ्गभोगविषमान् ··· विदित्वा त्यजंस्तेष्वासक्तिमनाविलो विलभते मुक्तिं विरक्तः पुमान् SindūPra. 92; तदुक्तिभिस्स्वादुतमाभिरासीदाप्यायितो नूनमनाविलाभिः Yādavā. 13.37; चन्द्रस्वरूपे तु ज्ञातेऽप्यसंकीर्णज्ञानाभावात् बुभुत्सोपपादितैवेति प्रथमानुमानमनाविलम् AdvaiSi. 685.11; SarvaMaSaṁ. 43.16; **BII** not muddy or turbid, not impure, clear भृशं ते खादतो मत्स्यान् पम्पायाः पुष्पसंचये। पद्मगन्धि शिवं वारि सुखशीतमनामयम् (v. l. °विलम्) Rāmā. iii. 69.11; प्रमेहिणो यदा मूत्रमपिच्छिलमनाविलम्। विशदं तिक्तकटुकं तदारोग्यं प्रचक्षते SuśruS. iv. 12.20; SiddhYo. 35.48; कृत्वा मन्थनमेव तु। श्च्योतयित्वा परिस्निग्ध सुप्रसन्नमनाति(वि)लम्। परियोगं समासाद्य साधयेद् गोमयाग्निना BhelaS. 231.1 (7.6); शरदम्भ इवानाविलम् ··· °पादमस्य लक्ष्यते AvantiKa. 79.12; सेव्यतामियमनाविला नदी RāmC. 2.13; यदा प्रमेही ···। सरूक्षसक्षारकदुष्णमूत्रकम्। कदाचिदल्पं विसृजेदनाविलम्। तदा भवेन्मेहविहीनलक्षणम् KalyāKā. 11.56; कतकरजः ··· अनाविलं पाथः करोति Bhām. 43.15 (*on* i. 1.1); NyāyMa. 154.5; CitraMī. 15.2; अपि वर्षसहस्राणि भ्रान्त्वा नो लभ्यते मरौ। तच्छाया दलं मूलं फलं जलमनाविलम् Mānaso. iv. 2.304; शुद्धं शकृन्मूत्रमनाविलं च ग्रासप्रकाङ्क्षा ··· जीर्णस्य तु लक्षणानि Hastyāyur. 92.9 (1.12); अनाविलमिदं ब्रह्मसरः किं नावगाहसे ŚāntiŚ. 4.28; अनाविलमनल्पीयस्तापनिर्वाणकारणम्। स्वयशःसोदरं वारि कारयामास माधवः EI. iv. 312.3; अतिगम्भीरमनाविलमक्षोभ्यम् ··· ऐक्षिपि विज्ञानसागरं महताम् VairāŚ.(A.) 81; **BIII** not marshy, wholesome, salubrious जाङ्गलं सस्यसंपन्नमार्यप्रायमनाविलम्। ··· स्वाजीव्यं देशमावसेत् ManuSm. 7.69 (ManvaMu. रोगोपसर्गाद्यैरनाकुलम्); SūktiRa. 92.5; VīraMi.(Rājanīti.) 197.3; अनाविलं, सर्पव्याघ्रादिभिरनाकुलम् VīraMi.(Rājanīti.) 197.14; **BIV** not dim, bright इह भगिनि राज्ञश्चक्रवर्तिनो मणिर्भवति अष्टांशो वैडूर्यः शुभो जातिमानच्छो विप्रसन्नः अनाविलः GIMs. iii(1). 36.6; अनाविलोन्मीलितबाणचक्षुपः सपुष्पहासा वनराजियोषितः Kirātā. 4.28; वायव्यमस्त्रमतुलं तेन मेघा ययुः क्षयम्। वायव्यास्त्रबलेनाथ निर्धूते मेघमण्डले। बभूवानाविलं व्योम नीलोत्पलदलप्रभम् SkandP. i(2). 21.101; वायसाकृतिनेत्राणि दीर्घापाङ्गानि योषिताम्। अनाविलानि चारूणि भवन्ति हि विभूतये BhaviP. 22B.30 (i. 5.84); अनाविलम् ··· स्फटिकमानयेत् Hastyāyur. 636.7 (4.14); अथ जगन्ति बभूवुरनाविलान्यतिमिरा हरितः प्रचकाशिरे। अभजदेव निशा दिवसश्रियं जननमाजिनि देवदिवाकरे Yādavā. 3.1; नभः। अतिदूरमपास्तमावभौ शरदीवाम्बुधरैरनाविलम् Ragh. 3.46; **BV** not dirty महानसं सुसंमृष्टं चुल्ल्यादिविहितार्चनम्। सर्वोपकरणोपेतमसंबाधमनाविलम् BhaviP. 34A.25 (i. 13.7); **BVI** transparent सदप्यसङ्क्रान्ति वपुष्यनाविलं जलार्द्रभावाद्दृढसक्तिचीवरम्। स्त्रियो दधत्यः स्मरकेलिदोहदं हृदन्तरा कामवतां वितेनिरे VasaViKā 7.68; [Kośas give the following words as the synonyms of *anāvila* — *avadāta*, AbhidhāCin. 1436; ParaNā. 1499; KośaKaTa. 2.405; *ujjvala*, AbhidhāRaMā. 1.132; ParaNā. 1499; KośaKaTa. 2.405; *cokṣa*, AbhidhāCin 1436; ParaNā. 1499; *nirmala*, ParaNā. 1499; KośaKaTa. 2 405; *nirmālya*, KośaKaTa. 2.405; *vimala*, AbhidhāRaMā. 1.132; AbhidhāCin. 1436; ParaNā. 1499; KośaKaTa. 2.405; *viśada*, AbhidhāRaMā. 1.132; AbhidhāCin. 1436; ParaNā. 1499; KośaKaTa. 2.405; *viśuddha*, AbhidhāCin. 1436; ParaNā. 1499; KośaKaTa. 2.405; *vīdhra*, AbhidhāRaMā. 1.132; AbhidhāCin. 1436; ParaNā. 1499; KośaKaTa. 2.405; *śuci*, AbhidhāCin. 1436; ParaNā. 1499; KośaKaTa. 2.405; *śubha*, ParaNā. 1499; and NānārthāSaṁ. ii. 144.1111 gives *anāvila* as the meaning of *prasanna*]; *m.* epithet of Vināyaka अनाविलोऽप्रतिरथः ···। इति वैनायकं नाम्नां सहस्रम् GaṇeP. i. 46.69.

अनाविलकाञ्चन (anāvila-kāñcana) *n.* pure gold तव हृदि लग्ना ··· स्वेदबिन्दुपयोधरेण पयोधरेण वक्षःफलकाञ्चनेन जितानाविलकाञ्चनेन ··· त्वामदयं नदयन्ती ··· परमकमितारं वाञ्छति VāsaDa. 213.2.

अनाविलजलापूर (anāvilajalāpūra) *m.* abundance of clear water सुवर्णमुखरीं तत्र संगता मंगलप्रदा। कल्या नाम नदी ···। अनाविलजलापूरतोषिताशेषमानवा SkandP. ii(1). 35.6.

अनाविलदर्शन (anāvila-darśana) *adj.* sight of which is not defective or hazy साध्यं यथास्थितमनाविलदर्शनं च। ··· नयनम् SuśruS. vi. 19.7.

अनाविलदेहभास् (anāvila-dehabhās) *adj.* having bright body-complexion औज्ज्वल्यकलाविलमनाविलदेहभासो बालोऽपरं परिदधुश्च पुरन्ध्रयस्ताः VasaViKā. 7.69.

अनाविलधी (anāvila-dhī) *adj.* having clear thinking अनाविलधियामन्तश्चिन्तामणिरिव स्फुरन्। दिशत्वभिमतं सर्वमतिरस्कार्यदीधितिः Yādavā. 1.52.

अनाविलम् (anāvilam) *adv.* clearly अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम्। सविधेऽपि न सूक्ष्मसाक्षिणी वदनालंकृतिमात्रमक्षिणी NaiṣC. 2.55 (comm. अनाविलमसंदिग्धं यथा भवति तथा)

अनाविलमनोज्ञा (anāvila-manojñā) *adj.* (*f.*) lucid and charming अनाविलमनोज्ञया गिरा निर्मलां निजदयामिवोद्वमन्। सौम्यदृष्टिरकरोत्सुधाभुजः पर्यवस्थितधृतीन् परः पुमान् Yādavā. 17.129.

अनाविलसंकल्प (anāvila-saṅkalpa) *adj.* of not impure resolve अन्यम इत्युच्यते अनाविलसंकल्पनिर्मलकायचित्तवाहितपापत्वात् LaliVi. 26.51 (38); भावितात्मा। ··· अनाविलसंकल्पः। ··· अप्रमाणगतबुद्धमाहात्म्यः MahāVyu. 19.84 [DBHS.]

अनाविलास्या (anāvilāsyā) *adj.* (*f.*) whose surface is not dirty भयाग्नीभूरिभयाग्नीभूरनाविलास्या Kapphiṇā. 6.50.

अनाविलीभूत (anāvilī-bhūta) *adj.* which has not become soiled प्रकाशस्य शुद्धसंविद्रूपस्य देहादिसंस्पर्शैरनाविलीभूतस्य यः आत्मा जीवितभूतः ··· 'अहम्' इति प्रत्यवमर्शः असौ विकल्पो न भवति PratyabhiVi. i. 302.5 (*on* i. 6.1)

अनाविश् (an-āviś-) VI. P. (pass.) not to be affected ध्रुवमपायेऽपादानम्। ··· तथापाये ध्रुवमुच्यते यदपायेनानाविश्यते उपयुज्यते चापाये, तथार्थादवधिभूतम् PadMañ. *on* KāśiVṛ. *on* P. 1. 4. 24.

अनाविशत् (an-āviśat) *adj.* **A** not reaching स तर्हि भावः ··· स्वभावेन 'नाशमनाविशन्' अप्रतिपद्यमानः कथं नैव नष्टो (कथं नष्टो) नाम HetuBiṬ. 143.8; **B** not taking part (बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि) बाष्पः पुनर्दानक्रियावेशाद् दर्शनक्रियायामनाविशन् SaraKaṇṭhā. 322.16.

अनाविष्करण (an-āviṣkaraṇa) *n.* non-manifestation बाल्यं च शक्तिविद्याभिजनाद्युत्कर्षाणां सतामनाविष्करणमेव NyāySiA. 218.26; तादृशक्रूरत्वप्रयुक्तस्य क्रूरत्वान्तरस्यानाविष्करणमित्यस्ति विशेषः RasGaṅ. 686.12.

अनाविष्कार (an-āviṣkāra) *m.* non-manifestation किं बाल्यस्य कर्म कामचारादिकम् ··· उत विद्यामाहात्म्यानाविष्कार इति संशयः VedāntDī. 218.3 (*on* iii. 4.49); भगवति भोग्यत्वस्य प्रतिबन्धक(कस ?)त्वादनाविष्कारः NyāyKu. 194.11; [Inst.] not manifestly, not openly ज्ञानदानं किमाविष्कारेण कार्यमुतानाविष्कारेणेति संशये ··· आह NyāySu.(Ja.) 611B.7 (*on* iii. 4.9)

अनाविष्कारपरता (anāviṣkārapara-tā) *f.* the state of referring to non-exhibition नाविरतः इत्यादिश्रुतिः किं बाल्यशब्दस्य अनाविष्कारपरतामवगमयति ŚrutaPra. ii. 567.20 (*on* iii. 4.49)

अनाविष्काररूप (anāviṣkāra-rūpa) *adj.* of the nature of non-exhibition बालस्य यत् स्वभावानाविष्काररूपं कर्म तदुपाददानो वर्तेत विद्वान् BrahmSūBh.(Rā.) 711.5 (*on* iii. 4.49); श्रुतावपि, बालकर्म स्वमाहात्म्यानाविष्काररूपं विद्यान्वययोग्यतया विधीयते VedāntSā.(Rā.) 363.7 (*on* iii. 4.49)

अनाविष्कुर्वत् (an-āviṣkurvat) *adj.* not exhibiting, not making known अनाविष्कुर्वन्नन्वयात् BrahmSū. iii. 4.50; अनाविष्कुर्वन्निति। ज्ञानाध्ययनधार्मिकत्वादिभिः आत्मानमविख्यापयन् BrahmSūBh.(Śaṅ.) 756.11 (*on* iii. 4.50); अनाविष्कुर्वन्नन्तर्गतां चेतोवृत्तिं लोकस्याप्रख्यापयन् BrahmSūBh.(Bhā.) 216.16 (*on* iii. 4.48); बालः स्वाभिजनाद्यनाविष्कुर्वन् वर्तेत VedāntDī. 218.9 (*on* iii. 4.49); पाण्डित्य[प्रयुक्त]स्वमाहात्म्याद्यनाविष्कुर्वन् ··· वर्तेत VedāntPāSau. 381.6 (*on* iii. 4.49); श्रवणादिजन्यवैदुष्याद्यनाविष्कुर्वन् ··· तिष्ठासेत् VedāntKau. 381.16 (*on* iii. 4.49); TattvPrakā. 197A.2 (*on* iii. 4.49); आश्रमान्तररूपेणात्मानमनाविष्कुर्वन् अव्यक्तलिङ्गोऽपि पाशुपताश्रमः ··· परमशिवप्राप्तिहेतुः BrahmSūBh.(Śrī.) ii. 415.2 (*on* iii. 4.49); स्वं भगवद्भावमनाविष्कुर्वन् भजेत AṇuBh. 299.17 (*on* iii. 4.49); विद्यामनाविष्कुर्वन्नेवोपदिशेत् GoviBh. 286.3 (*on* iii. 4.50)

अनाविष्कृत (an-āviṣkṛta) *adj.* **A** unmanifest अविद्यातिमिरोच्छित्तौ नानाविष्कृतमप्यपि। कार्यकारणवद्वस्तु BṛĀraUBhVā. (Sambandha.) 1115; **B** not revealed कुशाग्रबोधो गुरुणा ततः सकृत्प्रकाशितां कर्मविरसतामसौ। मनोऽप्यनाविष्कृतमस्य किंचिन्महीसुराग्रेसरसन्नुरभ्यहीत् YātrāPra. 2.46.

अनाविष्कृतकोपचिह्ना (anāviṣkṛta-kopacihnā) *adj.* (*f.*) who has

not displayed or revealed (any) sign of anger अनाविष्कृतकोपचिह्नाया: कस्याश्चित् ··· केनचित् कृतागसा प्रसाद्यमानाया यत् तत्र रोषविषये ··· उक्तं तत् ··· समर्थनीयमेव VyaktiVi. 128. 24.

अनाविष्कृतगमनोत्साह (anāviṣkṛta-gamanotsāha) *adj.* which has not shown eagerness to move चन्द्रापीडस्तु ·· अनाविष्कृतगमनोत्साहं दीनमिन्द्रायुधम् ··· आरुह्य रयेणैव निरगान्नगर्या: Kād. 299.3.

अनाविष्कृततेजःप्रसर (anāviṣkṛta-tejaḥprasara) *adj.* i whose extent of valour is not (yet) manifest दाशरथि: ··· अरणिरिव मन्थनात्पूर्वमनाविष्कृततेजःप्रसर: RāmāCam. 3. 19(6) (comm. अनाविष्कृतोऽप्रकटितस्तेजःप्रसर: प्रभावस्फूर्ति: ·· यस्य स:); ii from which spreading of fire is not (yet) evident, RāmāCam. 3.19(6) (comm. अनाविष्कृतोऽप्रकटितस्तेजःप्रसर: ·· अनलप्रकाशश्च यस्य स:)

अनाविष्कृतदानराजि (anāviṣkṛta-dānarāji) *adj.* in whom line of ichor is not displayed (दिलीप:) आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्र: RaghuVa. 2. 7.

अनाविष्कृतदीपभास् (anāviṣkṛta-dīpabhās) *adj.* not displaying the light of lamps रात्रावनाविष्कृतदीपभास: कान्तामुखश्रीवियुता दिवापि। ·· गवाक्षा: RaghuVa. 16.20 (comm. दीपप्रभाशून्या इत्यर्थ:)

अनाविष्कृतदोष (anāviṣkṛta-doṣa) *adj.* whose fault is not evident यदार्थी प्रतिज्ञातार्थस्यान्तरात्मसाक्षित्वेनानाविष्कृतदोषाणामपि साक्षिणां वचनमर्थविसंवादित्वेनाप्रमाणं मन्यमान: साक्षिष्वपि दोषं कल्पयति Mitā. 185. 28 (*on* 2. 80)

अनाविष्कृतध्वनि (anāviṣkṛta-dhvani) *adj.* A who has not manifested (i. e. uttered) any sound, silent गते भरतराजर्षौ ··· निवातस्तिमितं वार्धिमिवानाविष्कृतध्वनिम् ।··· त्रिजगत्प्रभुम् । प्रपश्यन् ···। सौधर्मेन्द्र: स्तुतिं कर्तुमथारेभे MahāP. 25. 1; B (ocean) whose noise is not manifest (i.e. quiet), MahāP. 25.1.

अनाविष्कृतपाप (anāviṣkṛta-pāpa) *adj.* whose sins are not revealed or known अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत् ManuSm. 11. 226; ViṣṇuDhaP. ii. 73.231; अनाविष्कृतपापा: तत्पापहेतुकर्माविनाभूतव्यतिरिक्तैरज्ञातपापास्तान् ManvaVi. 1457. 6 (*on* 11. 226)

अनाविष्कृतलाञ्छन (anāviṣkṛta-lāñchana) *adj.* whose stain is not manifest दिवापि निष्ठ्यूतमरीचिभासा बाल्यादनाविष्कृतलाञ्छनेन। चन्द्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणे: किं ग्रहणं हरस्य KumāSaṁ. 7. 35 (comm. अदृश्यमानकलङ्केन)

अनाविष्कृतविक्रिय (anāviṣkṛta-vikriya) *adj.* A (king) whose mental perturbation is not revealed कृतापचारोऽपि परैरनाविष्कृतविक्रिय:। असाध्य: कुरुते कोपं प्राप्ते काले गदो यथा ŚiśuVa. 2. 84 (comm. अन्तर्गूढविकार:); B (disease) whose bad effect is not (yet) evident, ŚiśuVa. 2. 84.

अनाविष्कृतसंरम्भा (anāviṣkṛta-saṁrambhā) *adj.* (*f.*) wherein agitation is not manifest or apparent पुरेव लोकपालानां दैत्यानां च निरत्यया अनाविष्कृतसंरम्भा स्थितिरस्तु यथायथम् HarVi. 32.104.

अनाविष्कृतहसित (anāviṣkṛta-hasita) *adj.* not showing a smile भवति यदवलोकनादनाविष्कृतहसितास्मिुखं सुखं जनानाम् KīrtiKau. 8.60.

अनाविष्कृतातप (anāviṣkṛtātapa) *adj.* not manifesting light अनाविष्कृतातपो भयेन ··· सहस्रभानुरपि संकुचितभानुरेव RāmāCam. 1. 21(3) (comm. अनाविष्कृतातपोऽप्रकटीकृतद्योत:)

अनाविष्कृतेर्ष्या (anāviṣkṛterṣyā) *adj.* (*f.*) who has not displayed or shown jealousy उवास पद्मसेनोऽसौ भूयोऽनाविष्कृतेर्ष्यया। आदित्यप्रभया चन्द्रवत्या च सह निर्वृत: KathāSaSāg. vii. 8. 219.

अनाविष्कृतैनस् (anāviṣkṛtainas) *adj.* whose sins are not revealed or known (अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत्) ये त्वनाविष्कृतैनसो द्विजातय: श्रुतिस्मृत्यर्थतत्त्वज्ञाश्च, ते ·· स्वयमेवात्मानं शोधयेयु: BālaKrī. ii. 171. 15 (*on* 3. 296(? 303))

[1]**अनावृष्टि** (an-āvṛṣṭi) *f.* **I** lack of rain, drought (one of the six disasters or ईति) विद्वद्भोज्यान्यविद्वांसो येषु राष्ट्रेषु भुञ्जते। तान्यनावृष्टिमृच्छन्ति VāsiDS. 3. 12; AtriS. 23; अनावृष्ट्यां तु वर्तन्त्यां पर्जन्यं त्वभिपीडितः BṛDe. 6. 137; प्रतीक्षेत सदा शुचिः …। अतिवृष्टिमनावृष्टिम् … विद्युतो दर्शने नरः AvPari. 59(1). 3; अनावृष्ट्यातिवृष्ट्या वा दुर्भिक्षेण भयं भवेद् AVPari. 70B (17).2; व्यशीर्यत ततो राष्ट्रम् … अनावृष्ट्या व्याधिभिश्च समाहतम् MahāBhā. i. 89.32; i. 1742*(1); यवाक्रीतस्य बालस्य धीमतः। अनावृष्ट्यां प्रवृत्तायां बकं MahāBhā. iii. 110.7; iii. 126.39; युगान्तकालान्ते संप्राप्ते चाक्षुषः क्षये।

अनावृष्टिर्महाराज जायते बहुवार्षिकी MahāBhā. iii. 186.56; ViṣṇuP. vi. 3. 14; VāyuP. ii. 38. 137; BrahmāṇḍP. iii. 1.133; AgniP. 367.4; BrahmP. 231. 14; SaurP. 33. 14; रक्तबिन्दूनि कक्षस्य यावन्ति धरणीमियुः । तावद्वर्षाणि राष्ट्रे ते अनावृष्टिर्भविष्यति MahāBhā. iv. App. I. 58(4); ix. 47.30; xii. 139. 13; अनावृष्ट्यां (v.l. अनावृष्टौ) तु वृत्तायां राजा दुःखसमन्वितः । ब्राह्मणान् श्रुतवृद्धांश्च समानीय प्रवक्ष्यति Rāmā. i. 8. 13; ii. 102.9; दश वर्षाण्यनावृष्ट्या दग्धे लोके निरन्तरम् । ...जाह्नवी च प्रवर्तिता Rāmā. ii. 109.9; नावर्षत् पाकशासनः । अनावृष्ट्या तदा राष्ट्रमभवद् बहुधा कृशम् HariVaṁ. 29. 32; VāyuP. ii. 34. 89; BrahmāṇḍP. ii. 71.90; BrahmP. 17. 32; भार्गवः ··· आसुरीं मायामनावृष्टिं चकार ह HariVaṁ. 65. 39; अनावृष्ट्या गजभयान्मूषिकाधैरुपद्रवैः । ... भवेद्धानिः BṛhaspaSm. 366. 10; SmṛtiCan. ii. 473. 6; BālamBha. i. 369.1 (on 1.119); तस्य स्यमन्तकमणेः प्रभावादनावृष्टिमारिकादुर्भिक्षव्यालाद्युपद्रवोपशमा बभूवुः ViṣṇuP. iv. 13.130; iv. 13. 26; उच्छेदः सर्वकर्मणाम् । तदुच्छेदादनावृष्ट्या जगदुच्छेदमेष्यति MārkP. 16. 72; 91. 41; LakṣmīT. 9. 33; भौमस्यान्ते कलियुगे क्षीणे संहारवर्णनम् । ... अनावृष्टिर्भास्कराच्च घोरः संवर्तकोऽनलः VāyuP. i. 1.148; PadmP. v. 2.29; पूर्वे शुष्का ह्यनावृष्ट्या VāyuP. i. 7. 42; BrahmāṇḍP. i. 5. 125; i. 6. 47; LiṅgaP. i. 17.8; अनावृष्ट्या हते लोके ··· । वसिष्ठस्तपसा धीमान् धारयामास वै प्रजाः VāyuP. ii. 9. 81; BrahmāṇḍP. ii. 8. 89; अथ प्रभृत्यनावृष्टिर्भविष्यति महीतले MatsyaP. 2. 3; 20. 4; PadmP. v. 10. 51; PrabhāC. 32.10; अतिवृष्ट्यामनावृष्टयाम् ··· वैष्णवी शान्तिरिष्यते MatsyaP. 228. 7; ViṣṇuDhaP. ii. 133.8; AdbhuSāg. 734. 1; संहारवर्णनम् । ··· अनाद्वृष्टिः (? अनावृष्टिः) BrahmāṇḍP. i. 1. 138; समं स वर्षेत्तुः शक्तिभिः ··· ललिताभक्तदेशांस्तु भूषयन् स्वस्य संपदा । तद्वैरिणां तु वसुधामनावृष्ट्या निपीडयन् BrahmāṇḍP. iii. 32.32; अतिवृष्टिर् (? अनावृष्टिर्) एवासुरी वृष्टिरुच्यते PañcT. 1. 59(20) (63.1); Tantrākhyā. 17. 26; PañcT. 1.126(6) (126. 6); Tantrākhyā. 36.13; सततं दृष्टपाशबन्धनप्रत्यवायाः पतत्रिणो वित्रसन्ते (v. l. अत्र देशे महत्यानावृष्ट्या दुर्भिक्षं संजातम्) PañcT. 2. 25(18) (206. 6); 3. 36(3) (291.3); Tantrākhyā. 98. 2; वर्षास्वसितः करोत्यनावृष्टिम् । -- अर्कः BṛSaṁ. 3.26; 7.3; सौम्येऽब्देऽनावृष्टिः BṛSaṁ. 8.4; NāraS. 2(5). 3; धूमामेऽनावृष्टिर्विदशगुरौ ··· दृष्टे BṛSaṁ. 8.18; NāraS. 2(5). 17; BṛSaṁ. 23.5; 35. 5; दुर्भिक्षमनावृष्ट्याम् BṛSaṁ. 46. 38; AdbhuSāg. 375. 22; नातिक्रामेत पश्चिमेज्या नाडिकापञ्चपञ्चकम् । अतिक्रमेच्चेत् ··· । तद्देशे स्यादनावृष्टिः PāraS. 9. 79; 15. 728; नित्यो नैमित्तिकः काम्यस्त्रिविधः स महोत्सवः । अनावृष्टौ च सर्वत्र ··· शान्त्यर्थं यत् प्रकुर्वीत स नैमित्तिक उच्यते PāraS. 16.5; 19. 449; अतिवृष्टिरनावृष्टिर्मूषिकाः शलभादयः । ··· पशूनां व्यसनं रोगो राष्ट्रव्यसनमुच्यते NītiSā. 14.63; यन्त्रमिदम् ··· । शस्यहानिमनावृष्टिं गवां नाशं करोति तत् ŚāraTi. 24. 32; 'पञ्च सप्त च वर्षाणि न ववर्ष शतक्रतुः' इति द्वादशवार्षिकीमनावृष्टिं कथयन्ति BrahmSūBh.(Śaṅ.) 245.12 (on i. 4.11); एतस्मिन् विषये नूनमनावृष्टिर्भविष्यति BṛKathāK. 131. 35; अनावृष्टिरतीवोग्रा ह्यासीद् भूतविनाशिनी KūrmaP. 181.20 (1. 16); अनावृष्टिश्च पीडादी राष्ट्रव्यसनमुच्यते AgniP. 240.27; नीलवाक्यं न क्रियते भवतीहोदकप्लवः । अतिवृष्टिरनावृष्टिः NīlaP. 872; धुराभङ्गे त्वनावृष्टिः ··· रथस्य तु SkandP. ii(2). 25. 62; ii(9). 9.8; ii(9). 25. 28; प्रवृत्ता लोकेऽस्मिन्ननावृष्टिः सुदारुणा ViṣṇuDhaP. i. 24. 11; ग्रहशान्तिः ··· अनावृष्ट्यां प्रयोक्तव्या ViṣṇuDhaP. i. 105. 2; ii. 2.7; अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः । ···ईतयः ViṣṇuDhaP. ii. 31. 48; Liṅgānu.(He.) 53. 17; NānārthMa. 631; दृष्ट्वा ··· सर्वे अनावृष्टिम् ·· प्रययुर्गौतमम् VarāP. 71. 16; न भवेत् तस्य ग्रामस्य भयं वा तत्र कुत्रचित् । अनावृष्टिः NaraP. 34. 44; अनावृष्टिरधर्मो वा ··· । स्वप्नेऽपि नैव दृश्येत बलौ राज्यं प्रशासति BrahmP. 73. 6; 74. 22; 93. 5; शतवर्षमनावृष्टिः सर्वराज्यं व्यनाशयत् BhaviP. 414B.11 (iii(1). 1.46); 543A.4 (iii(4). 1. 28); धर्मराज्यं बभूव ··· । नानावृष्टिर्न दुर्भिक्षं न मारी दुःखदा नृणाम् DevīBhāP. v. 20. 34; vii. 28. 22; अथाभवदनावृष्टिः कदाचिन्महती तदा PadmP. v. 19. 230; BṛDharmaP. i. 26. 9; द्वादशाब्दमनावृष्टौ नष्टे स्थावरजङ्गमे । ··· देवः संप्रार्थितो हरः GaṇeP. ii. 45. 2; पूर्वं कदाचित् तत्रैव ह्यनावृष्टिरभूत् ŚivaP. iv. 3.9 (352A.3); वेयन्तरम् ··· । कटिमात्रं सदा कार्यं नाभिमात्रमथापि वा । ततोऽधिकेन दुर्भिक्षमनावृष्टिश्च जायते SamarāSū. 45. 21; अनसूयां गिरा पत्युर्ववन्दे जनकात्मजा । ···फलमूलान्यनावृष्ट्यां जह्नुकन्यां च यासूजत् RāmāMañ. 106. 10; अनावृष्ट्यां तस्य (सक्तुघटस्य) मूल्यं चतुर्गुणम् BṛKathāMañ. 16. 553; अनावृष्ट्यतिवृष्टिषु । ·· अघोरयागः सामान्यः ĪśānŚiPa. i. 30. 51; लोलेरयुतसंख्यातैरनावृष्टिर्न संशयः PañcaRā.(Nā.) iii. 14. 45; YogŚā. 11. 30; अत्यन्तवृष्ट्यनावृष्टी ·· जगतोऽप्यपसारयन् TriṣaŚaPuC. i. 6. 57; यदा ज्वलति वाहस्य सर्वगात्रे हुताशनः । तदा विन्द्यादनावृष्टिमब्दमेकं न संशयः AśvaVai. 3. 161; बीजान्युप्तानि रोहन्ति सुभिक्षं चैव जायते । अनावृष्टिर्न भवति Hastyāyur. 437.13 (3. 8); उत्तरकुम्भे संपूर्णजले तिष्ठति श्रावणे सम्यग् वृष्टिर्भवति । शुष्के जलेऽनावृष्टिः AdbhuSāg. 715. 12; विनोत्पातेन शशिजः कदाचिन्नोदयं व्रजेत् । अनावृष्ट्यग्निभयकृत् NāraS. 2(4). 1; अतिवृष्ट्यावनावृष्टौ क्षुद्भयः(? यं) शत्रुतो भयम् VasiS. 45.72; 6. 88; अनावृष्ट्या कृषिर्नष्टा DhūrtaSa. 76. 18; कारीर्यादीनां त्वनावृष्ट्या सस्येषु शुष्यत्सु विधानान्नियतसमनन्तरफलत्वम् VivaPraSaṁ. 111. 5; अस्मिन् संवत्सरे ··· सर्वथानावृष्टिर्भविष्यति SiṁhāDvā. 185. 1(6); Raghunā. 1.46; [Vaija. 25.8 gives *anāvṛṣṭi* as synonymous with *avagraha*]; ॥ absence of shedding (of tears) शास्ति ··· रघुनाथभूपे । आरामवाटीमतिवृष्टिरश्रुलक्ष्मीण्यनावृष्टिरहो प्रजानाम् Raghunā. 1. 46; *m.* name of a Yādava chief born in Vṛṣṇi clan भो भो वृष्णियोधाः । अनावृष्टिशिवकहृदिकपृथुकसोमदत्ताक्रूरप्रमुखाः ··· शीघ्रमागच्छन्तु भवन्तः BālC. 5.11(4); गच्छ शीघ्रं दामोदरस्यादेशादनावृष्टिमाज्ञापय BālC. 5.13(15)

[2]अनावृष्टि (anāvṛṣṭi) *f.* killing of life अमानुषीषु गोवर्जमनावृष्टिर्न दुष्यति MahāBhā. xii. 159.66 (BhārBhāDī. अनावृष्टिः अजीवनं हिंसेत्यर्थः । म्रक्षतेश्छिदिकर्मण इदं रूपम्, *but* MahāBhāraDī. अनावृष्टिः रेतःसेकरहित इति)

अनावृष्टिकर (anāvṛṣṭi-kara) *adj.* causing drought स्वातित्रये पूर्वदिशि पश्चिमे त्रिपञ्चके । अनावृष्टिकरः शुक्रो विपरीतः सुवृष्टिकृत् VasiS. 7.10.

अनावृष्टिकृत (anāvṛṣṭi-kṛta) *adj.* caused by drought विच्छिन्नस्रोतसो नद्यः सरांस्यनुदकानि च । संक्षोभश्चापि सत्त्वानामनावृष्टिकृतोऽभवत् MahāBhā. v. 10.45; Rāmā. vii. 86. 5; महाघोरमनावृष्टिकृतं भयम् । उदभूदन्यदेशेषु दुर्भिक्षोपद्रवासहम् RājTa.(Śrī.) 1(7).19.

अनावृष्टिगण (anāvṛṣṭi-gaṇa) *m.* group (of constellations) which causes drought सोमस्यार्चनं तस्य दक्षिणे रोहिणीगणं वामे चानावृष्टिगणमर्चयति VaikhāGS. 3.21.

अनावृष्टिदोष (anāvṛṣṭi-doṣa) *m.* fault which causes drought प्रशान्त एवासावनावृष्टिदोषः ViṣṇuP. iv. 20. 28.

अनावृष्टिप्रतिक्रिया (anāvṛṣṭi-pratikriyā) *f.* counteraction against or remedy for drought अनावृष्ट्या तया राजा स तदा परिकर्शितः । प्रक्ष्यति ज्ञानिनो विप्राननावृष्टिप्रतिक्रियाम् Rāmā. i. 280*(2)

अनावृष्टिफल (anāvṛṣṭi-phala) *n.* drought as the consequence (इन्द्रधनुषि) जलमध्ये बहुभिर्दृष्टेऽनावृष्टिफलम् AdbhuSāg. 523. 17.

अनावृष्टिभय (anāvṛṣṭi-bhaya) *n.* fear of drought अनावृष्टिभये चैव कोटिहोमं प्रयोजयेत् AVPari. 31(4).5; अनावृष्टिभयं घोरं विद्यात् सोमविपर्यये AVPari. 51(3).5; 69(4). 1; तस्य देशस्य पीडा स्याद् राज्ञो जनपदस्य वा । अनावृष्टिभयं घोरम् MahāBhā. ii. App. 27(31) = ii. App. 28(68); निर्विशेषा जनपदा नरा वृष्टिभिरर्दिताः (v. l. अनावृष्टिभयार्दिताः) । आश्रमानभिपत्स्यन्ति MahāBhā. iii. 188. 71; xii. 194*(10); नानावृष्टिर्भयं चास्मिन् (v.l नानावृष्टिभयं तस्मिन्) ··· । अनरण्ये महाराजे Rāmā. ii. 102. 9; अनावृष्टिभये तस्मिन् गते द्वादशवार्षिके । अभिषिच्य च राज्ये च याजयामास तं मुनिः HariVaṁ. 10. 20; VāyuP. ii. 26. 111; BrahmāṇḍP. ii. 63. 111; BrahmP. 8. 22; ŚivaP. v. 38.17 (450B.5); अनावृष्टिभयप्रायाः प्रजाः क्षुद्भयकातराः । भविष्यन्ति तदा सर्वे गगनासक्तदृष्टयः ViṣṇuP. vi. 1.24; BṛNāraP. 38. 80; NaraP. 54. 46; BrahmP. 229. 24; कलौ प्रमारको रोगः सततं क्षुद्भयानि वै । अनावृष्टिभयं घोरम् VāyuP. 58. 33; MatsyaP. 144. 32; BrahmāṇḍP. i. 31. 34; KūrmaP. 303. 2 (1. 30); SkandP. i(2). 40. 219; LiṅgaP. i. 40. 2; अनावृष्टिभये जाते प्राप्ते विकृतिवर्षणे । जलाशयविकारेषु वारुणी शान्तिरिष्यते MatsyaP. 228. 12; SkandP. vii(1). 226.3; अनावृष्टिभयात्स्थानं निरीक्ष्यं यदि तद् भवेत् JayāS. 20. 380; अनावृष्टिभयाद्भीताः कूलयोरुभयोरपि । आश्रमे ह्याश्रमान्दिव्यान्कारयामो जितव्रताः SkandP. vi(3). 10.32; सौम्यरौद्रोपगे जीवे सौम्यवर्षमुदाहृतम् । ईतयस्सकला यत्र चानावृष्टिभयं तथा ViṣṇuDhaP. i. 82.23; जन्मनक्षत्रपीडासु ह्यनावृष्टिभयेषु च ··· किं कर्तव्यं नरोत्तमैः BhaviP. 818B.23 (iv. 142.8); 820B.35 (iv. 142. 78); अग्निकार्ये च्युते सति । अनावृष्टिभयं राष्ट्रे ĪśānŚiPa. ii. 63. 5; नीरधनदयोर्मध्ये मध्यमं च विनिर्दिशेत् । एषां मध्ये यदा वत्सहस्तन् ··· । अनावृष्टिभयं लोके SamarāSū. 9.25; 17. 172; 45. 27.

अनावृष्टिमत् (anāvṛṣṭi-ma(n)t) *adj.* having drought, not having rain शून्यं नगरमाभाति भाति च्छिन्नलतो द्रुमः । भात्यनावृष्टिमान्देशो न जराजर्जरं वपुः YogVā. i. 22. 17; (मासाः ··· ज्ञेयाः BṛSaṁ. 22. 2) ज्ञेया इत्यनावृष्टिमन्तो ज्ञेया इत्यर्थः AdbhuSāg. 370. 24.

अनावृष्टिमहाभय (anāvṛṣṭi-mahābhaya) *n.* great fear of drought इज्याभिघातादभिभूयते भूः कलावनावृष्टिमहाभयेन PṛthvīVi. 1. 47.

अनावृष्टियोग (anāvṛṣṭi-yoga) *m.* occurrence of drought आ कैलासादा च लङ्कोपकण्ठात् जाते दैवाज्जात्वनावृष्टियोगे । राज्ञः सर्वान्मेलयन्पर्यपृच्छद्राजा पाण्ड्यः कुम्भयोनिं विधेयम् ŚivLī. 13. 73.

अनावृष्टिवश (anāvṛṣṭi-vaśa) *m.* [Abl.] due to drought यदा तु श्रावणेऽनावृष्टिवशाद्दोषीनां न प्रादुर्भावः तदा भाद्रपदे ··· कार्यम् (उपाकर्म) ViraMi. 226. 12 (on 1.142)

अनावृष्टिहत (anāvṛṣṭi-hata) *adj.* [*f.* -ā] I affected or troubled by drought (प्रजाः) अनावृष्टिहताश्चैव वार्तामुत्सृज्य दुःखिताः। प्रत्यन्तांस्तान्निषेवन्ते हित्वा जनपदान् स्वकान् VāyuP. i. 58. 96; MatsyaP. 144. 71; BrahmāṇḍP. i. 31.97; SkandP. i(2).40. 266; LiṅgaP. i. 40. 68; (प्रजाः) अनावृष्टिहताश्चैव परस्परवधेन च ...। वार्तामुत्सृज्य दुःखिताः।... भविष्यन्ति वनौकसः VāyuP. ii. 37. 392; MatsyaP. 273. 29; BrahmāṇḍP. ii. 74. 209; (अस्ति) कदाचिद् द्वादशवार्षिक्यनावृष्टिरापतिता (v.l. अनावृष्टिहते काले पुरा द्वादशवार्षिके) PañcT. 3. 36(2) (291. 3); अन(?ना)वृष्टिहते लोके पर्जन्यं तत्र यो जपेत्।... तन्मन्त्रैः स्याज्जलागमः SkandP. vi. 36.29; v(3). 3. 5; v(3). 10.26; v(3). 60.36; अनावृष्टिहतं सर्वं बभूव वसुधातलम्। क्षुत्क्षाममनानुपप्रायम् ViṣṇuDhaP. i. 24.13; इदम्। मूल्येन तावत् द्विगुणेन योग्य(?ग)मान्नोल्यनावृष्टिहतेऽपि देशे YuktiKa. 119. 4; अनावृष्टिहते काले गुर्वर्थं फलहारिणाम्। पुरा मतङ्गशिष्याणां पतिताः स्वेदबिन्दवः RāmāMañ. 166. 5; अनावृष्टिहते काले भ्रातरो ब्राह्मणास्त्रयः। भार्यास्तिस्रः परित्यज्य पुरा जग्मुर्दिगन्तरम् BṛKathāMañ. i. 2.38; 16.452; II ruined or destroyed by drought कोऽयमेवंविधे काले कालपाशस्थिते मयि। अनावृष्टिहते शस्ये द्रोणमेघ इवोदितः Mṛcch. 10. 26; 10. 39.

अनावृष्ट्यवशेष (anāvṛṣṭy-avaśeṣa) *adj.* having the drought (-period) still remaining अनावृष्ट्यवशेषे च काले बालो बभूव ह। नारं ददौ जन्मकाले तेनायं नारदाभिधः BrahmVaiP. i. 21.7.

अनावृष्ट्यादि (anāvṛṣṭy-ādi) *adj.* drought etc. मानवाः। आत्मानं घातयिष्यन्ति ह्यनावृष्ट्यादिदुःखिताः ViṣṇuP. vi. 1.25; BṛNāraP. 38. 81 (v.l.); अनावृष्ट्यादिसंपर्कात्कृते संक्षालने मुने। समस्तेष्वेव लोकेषु ... आपो ग्रसन्ति वै पूर्वं भूमेर्गन्धात्मकं गुणम् ViṣṇuP. vi. 4.12; बुधः ... प्रायेण शुभकृच्छुक्रादिव्यतिरिच्येत तदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते BhāgP. v. 22.13; DevīBhāP. viii. 16. 30; जन्तुः ... प्रपीड्यते। रोगेण गुरुणा वापि अनावृष्ट्यादिना तथा PadmP. i. 61. 87.

अनावेक्ष्य (an-āvekṣya) *adj.* [P. iv. 4.98] not good in thinking, not perceptive, thoughtless अविवेकमनावेक्ष्यमदाक्षिण्यम् ... जन्म नारीणाम् ĀścaCū. 3.30.

अनावेग (an-āvega) *adj.* not having excitement, not excited तस्यां पुरि विनीतायाम्। कच्चित् कुशलिनी प्रजा ...। परिपृच्छ्येति तूष्णींके स्थिते वृषभनन्दने।... अनावेगः सुवेग इदमभ्यधात् TriṣaŚaPuC. i. 5.86.

अनावेगम् (anāvegam) *adv.* without excitement कच्चिद् विनीतानगरीप्रजानामार्यस्य राज्ये जयवान् प्रमोदः।... एवं समापृच्छ्य नृपे निवृत्तेऽब्रवीदनावेगमिदं सुवेगः KathāK. 141. 14.

अनावेदन (an-āvedana) *n.* absence of experience तदित्थं संबन्धकालेऽनाश्रयणात् प्रत्ययकाले चानावेदनात् अनङ्गे वक्तुरेकत्वे वक्तृभेदेऽपि वर्णोपलब्धिसंस्काराद्यविशेषादुत्पत्तुमर्हत्यर्थज्ञानम् SphoṭSi. 122. 4.

अनावेदित (an-āvedita) *adj.* not made known, not declared अनावेदिते तु ब्रह्मणि ... न ब्रह्मविज्ञानं प्रपञ्चप्रविलयो वा जायेत BrahmSūBh. (Śaṅ.) 593. 16 (*on* iii. 2.21); एष च व्याधिरनावेदितोऽपि विदितो मया TilaMañ. 281. 16; 51. 18; अनावेदितस्यापि वत्सरादिविशेषस्येदानीं लेखनं कार्यम् SmṛtiCan. iii. 80.16; iii. 61.17; धनिनि प्रेते अनावेदिते च व्यवहारे, अनाहूतः सन्, स्वयमेवैत्य मृतपुत्रं निर्दिश्यामुष्यासौ धारयति, अहं साक्षीति यो ब्रवीति VyavaNi. 106. 12; 23. 12.

अनावेदितत्व (anāvedita-tva) *n.* the state of being not conveyed or expressed न तावद् वाच्यवाचकभावः, स्वशब्दैरनावेदितत्वात् Avalo. 93. 17 (*on* 4. 36)

अनावेदितवृत्तान्त (anāvedita-vṛttānta) *adj.* to whom information has not been provided केनाप्यनावेदितवृत्तान्तानां कथमिह ज्ञातीनामागमनम् TilaMañ. 273. 15.

अनावेदितसंप्रविष्ट (anāvedita-sampraviṣṭa) *adj.* who has entered without declaration (of arrival) दूरात् प्रतीहारनतः सः ... अनावेदितसंप्रविष्टः।... ऐक्षिष्ट शैलाग्रमिवेन्द्रशत्रुम् Bhaṭṭi. 12.8.

अनावेदिन् (an-āvedin) *adj.* who does not know भुवनमखिलं भासते यस्य भासा ... पृच्छन्ति स्वहृदयमनावेदिनो विष्णुमन्यान् BhāmiVi. 4. 12.

अनावेद्य (an-āvedya) *ger.* not having informed अनावेद्य तु यो राज्ञे संदिग्धेऽर्थे प्रवर्तते। प्रसह्य स विनेयः स्यात् NāraSm. 18.46; BṛhaspaSm. 115. 101; SmṛtiCan. iv. 388. 5; VyavaMa. 182.5; VīraMi.(Vyavahāra.) 260.8; राजयोग्यं च हस्त्यादिद्रव्यं राजन्यनावेद्यानाख्याय विक्रीतं तद् राजगाम्येव सर्वम् BālaKrī. i. 287. 26 (*on* 2. 266); i. 278.21 (*on* 2. 226); तव योग्येत्यनावेद्य न दत्तासौ मया क्वचित् BṛKathāMañ. iii. 1.25; इयद्दूरमनावेद्य यातोऽस्युबानतः कथम् KathāSaSāg. xi. 1.29.

अनावेद्य (an-āvedya) *adj.* I not describable चिन्तयन्ती — असंख्यैरपि निदर्शनैरनावेद्यहृद्यतास्वरूपेण सारमिव सुधारसस्य ... आदाय ... मकरकेतुना परां स्वादुतामानीतेन भाविता ... विह्वलतामगच्छम् TilaMañ. 313.5; II not to be told or informed अनाप्तसमये तस्य न वयुः पथि रक्षिणः। न स्वप्नवृत्तमभ्यासीदनावेद्यं महीभुजे RājTa.(Ka.) 8. 3273.

अनावेश (an-āveśa) *m.* absence of agitation or excitement विवृतं प्रकारमेकेन अनावेशे आवेशे तु द्वाभ्याम् AbhinBhā. ii. 48. 19 (*on* 9. 95); अप्रत्यक्षभाविभूतपरस्वरूपे तु सात्त्विकावकाशाभावोऽनावेशादिति तत्राधनोऽभिनयः सत्त्वहीनोऽधमः स्मृतः इति वचनात् AbhinBhā. ii. 68. 13 (*on* 9. 173); *adj.* free from agitation or excitement गण्डौ ...। समौ स्वाभाविकौ भावेष्वनावेशेषु तौ मतौ SaṃgīRa. iv. 159. 13 (7.465); NṛtyaK. i. 3. 94.

अनावेशित (an-āveśita) *adj.* not imposed (स्थानेनानेन कर्तव्यः संलापस्तु स्वभावजः) स्वभावजः अनावेशितः AbhinBhā. ii. 109. 13 (*on* 10. 54)

अनावेश्यत्व (anāveśya-tva) *n.* the state of not being imputed or imposed भवति यसौ ... अवश्यं फलदानादैकान्तिकः ... यमनियमादिमत्त्वात् शुद्धः शरीरभेदे पुनरनावेश्यत्वादक्षयफलः MāṭhVṛ. 9. 5 (*on* 2)

अनाव्य (a-nāvya) *adj.* [*f.* -ā] [P. iv. 4.91] not navigable यद्यपोऽनाव्या रथेन तरति हरति चैनाः HirŚS. x. 3.14 (1063. 7); अव्यात् क्रव्यादघूर्णनयनजलसंविग्नु नव्याननाव्यान् पुष्प(?ष्ण)न्ती सिन्धूपूरान् रथचरणफेनैर्भिकादम्बिनी वः SudarŚ. 37.

अनाव्याधा (an-āvyādhā́) *adj.* (*f.*) impenetrable अनाव्याधां देवपुरां प्रपद्य शिवा स्योना पतिलोके वि राज AV. xiv. 1. 64; अन(?ना)व्याधाम् AV.(P.) xviii. 6. 12.

अनाव्यूह (an-āvyūha) *adj.* effortless, free from exertion or striving, cf. अनायूह [DBHS.]

अनाव्यूहत् (an-āvyūhat) *adj.* not exerting स न कंचिद्धर्ममाव्यूहति ... तस्यैवमनाव्यूहतोऽनिर्व्यूहतस्त्रैधातुके चित्तं न सज्जति PrasaPa. 298. 14 = 517.21.

अनाव्रस्क (an-āvraská) *adj.* not harmful, not giving offence to त्रीणि वै वशाजातानि विलिप्ती सूतवशा वशा। ताः प्र यच्छेद् ब्रह्मभ्यः सोऽनाव्रस्कः प्रजापतौ AV. xii. 4.47; AV.(P.) xvii. 20.7.

अनाव्रस्क (ā́n-āvraska) *m.* non-injury एनं प्रतिप्रोच्याग्निमत आत्मनोऽनाव्रस्काय TaiS. III. i. 5. 1; पराञ्चा वर्तेतेऽध्वर्युः पशोः संज्ञप्यमानात् पशुभ्य एव तन्निह्नुत आत्मनोऽनाव्रस्काय TaiS. VI. iii. 8.3; VI. i. 10. 3; नापो रेवत्यै पुरस्तात् किंचन परिहरेदिति तदिह स्थितमनाव्रस्काय KauṣīBr. 11. 8 (52. 23); परोऽक्षमेव तद्देवेभ्य आत्मनोऽवद्युत्त्यनाव्रस्काय TaiBr. I. v. 6.7; III. ix. 9. 3.

अनाव्रीड (an-āvrīḍha) *adj.* not freed from religious disabilities एकेनापि चेद्गुनो विंशतिगणो भिक्षुसंघस्तं भिक्षुमावर्हेत् स च भिक्षुरनाव्रीढ(?ढ)स्ते च भिक्षवो गा(?ग)र्ह्याः PrātiSū. 13. 22 [cf. आव्रीढ, DBHS.]

[1]**अनाश** (an-āśa) *adj.* devoid of desire or hope अनाशं नरि पौरुषम्। विदधे ... सैन्यमनाशम् RāghPāṇ.(Dha.) 18.67 (comm. अनाशम् ... अलोभितया स्वस्थम्); कुर्वीत सततं कर्मानाशोऽसक्तो मदर्पणम् GaṇeP. ii. 139.8; कदापि नानाशः स्याः Nalo. 4. 43; 2. 9; 3. 17; तैः कृतसेनानाशाः कुरवो यदुरेव साध्वसेनानाशाः YudhiVi. 2.3.

[2]**अनाश** (a-nāśa) *adj.* not liable to destruction वपुः ... अनाशः ... यः कफात्मकः BhelaS. 185. 10(6. 18); सुस्थितत्वादनाशं निश्चितान्यः ...। अन्त्यावस्थाकालयोग्योपयोगं क्लेशेऽभीष्टं नागम् ŚiśuVa. 18. 31 (comm. अनाशमनपायम्); संप्रहारे सः ...। व्यधाद् ... नानाशम् ... अहितम् HarVi. 43. 304; RāghPāṇ.(Dha.) 18. 67; उपैमि कदा नु ... शमनाशम् Nalo. 3. 46 [AnekāK. 307 and comm. *on* AnekāSaṃ. 3.231 give *anāśa* as the meaning of *ananta*]; *m.* absence of destruction or loss, non-destruction अनाशाय कृतं कर्म तस्य चेष्टः फलागमः MahāBhā. xv. 42.6; यस्यानाशाच्च नाशोऽस्ति प्रीणिता येन देहिनः AṣṭāSaṃ. i. 104. 16 (1. 19); पाणिपादादिमान् देहो नात्मा ... तत्तच्छक्तेरनाशाच्च न नियम्यो नियामकः ViveCū. 158; जीवः ... अमृतश्च देहनाशेऽप्यनाशात् Bhām. 181.9 (*on* i. 2.18); स च सत्यपि आत्मनि नष्टोऽनुभवः तस्य हि अनाशे इदम् PratyabhiVi. i. 96.3 (*on* i. 2.4); (न्यासः) नाशे मूल्यद्वारेण दाप्यः। अनाशे तु स्वरूपत एव SmṛtiCan. iv. 419.14; अविभागादनाशा(च?) अणुकादि न नश्यति TarkSaṃ.(Ā.) 43. 23; पाशुकदेवतावाहनप्रकाशमन्त्यसंस्कारस्यानाशः इन्द्रादिवाच्यदेवतास्मरणस्य भावित्वात् BhaṭṭDī. iv. 186.2 (*on* xi. 3. 11); [Loc.] in the sense other than destruction वेः क्नः शब्दे चानाशे ŚākaṭāVyā. i. 4. 57; SiddhaHe. iii. 3. 85.

अनाशंस (an-āśaṃsa) *adj.* [*f.* -ā] devoid of desire, desireless विसप्रासेऽप्यनाशंसा सोत्कण्ठा प्रियदर्शने।... बाढं ताम्यति हंसिका SamarāSaṃ. 2. 94; मृत्युजीवितयोर्येऽनाशंसास्तेषां द्वुराः किंतु PrabhāC. 8. 1.

अनाशंसम् (anāśaṁsam) *adv.* without expectation (of anything in return) (दानम्) कालशुद्धं तु यत्किंचित् काले पात्राय दीयते । भावशुद्धं त्वनाशंसं श्रद्धया यत् प्रदीयते TriṣaŚaPuC. i. 1.184.

अनाशंसा (an-āśaṁsā) *f.* cessation of (all) desires, JainaL.

अनाशंसित (an-āśaṁsita) *adj.* [*f.* -ā] **1** unsought for, not expected (कामः) क्लेशादवाप्तोऽयमिति न तेन तथा प्रीयते, यथानाशंसितोपनतेन BrahmSi. 2.23; **2** not spoken of तपस्याथ तावनाशंसिता भृशम् । हृतमांसावुभौ चक्रे ŚāliC. 6.104 (comm. अप्रशंसिता)

अनाशंसु (an-āśaṁsu) *adj.* [P. iii. 2.168] not desirous स एवायम् ··· मणिः, यद्रूपरूपमे वयमनाशंसवः संवृत्ताः SubhaDha. 2.9(22)

अनाशंस्य (an-āśaṁsya) *adj.* not desirable प्राप्तं त्वामेव किल्बिषम् । आकिंचन्यमनाशा(v. l. शं)स्यम् MahāBhā. xii. 8.11.

[1]**अनाशक** (a-nāśaka) *adj.* **1** not a destroyer, cf. **अनाशकत्व**; **ii** (anāśa-ka) not having destruction, imperishable, cf. **अनाशकफल**.

[2]**अनाशक** (ánāśa-ka) *m., n.* **1** fasting, abstention from eating food (also implying not eating at will) ता हेमाः प्रजा अनाशकेन नोत्पराबभूवुः ŚatBr. II. iv. 3.2; II. iv. 3.3; तडउपवसथेऽनाशकमुपेयुरेतद्धै सर्वं तपो यदनाशकः ŚatBr. IX. v. I. 6; IX. v. 1.9; तमेतम् ··· विविदिषन्ति ··· श्रद्धया यज्ञेनानाशकेन ŚatBr. XIV. vii. 2.25; BṛĀraU. iv. 4.22; ŚāṅkhāĀ. 13.1 (47.2); ब्रह्मचर्यम् ··· अथःशायितानाशक इति तपांसि GautDS. iii. 1.15; BaudhDS. iii. 10.14; कामानशनम् अनाशकम्, न तु भोजननिवृत्तिः, भोजननिवृत्तौ म्रियत एव, न आत्मवेदनम् BṛĀraUBh. 646.8 (*on* iv. 4.22); तपसोऽनाशकस्य कामानशनमेव तपो, हितमितमेध्याशिनो हि ब्रह्मणि विविदिषा भवति, न तु सर्वथानश्नतो मरणात् Bhām. 45.19 (*on* i. 1.1); BṛĀraUBhVā. iv. 4.1057; अनाशकेनानशनेन TattvPrakā. 191B.11 (*on* iii. 4.26); उपवासस्तु ··· अनाशकम् Vaija. 95.144; **ii** abstention from eating food (unto death) एष विधिर्वीराध्वाने वानाशके वा ParaHaṁsPaU. 483.12; YājñaU. 601.26 (2); JābālaU. 5; BālamBha. iii. 18.14 (*on* 3.6); अनाशकं वा वृद्धाश्रमं वा गच्छति MānŚS. 183.21; प्रायानाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छताम् GautDS. ii. 5.11; मत्ये त्वग्निमारोहेद् भृगुतुङ्गे त्वनाशन(v. l. क)म् MahāBhā. iii. App. I. 13 (8); अनाशकाग्न्योर्विशतां शूरा यान्ति परां गतिम् MahāBhā. xii. 79.28; मरुं साधयतो राज्यं नाकपृष्ठमनाशके MahāBhā. xiii. 7.18 = xiii. 57.14; xiii. 26.58; प्रव्रज्यानाशकेषु च। प्रत्यावसितवर्णानां कथं शुद्धिर्विधीयते ParāSm. 12.5; चन्द्रक्षयानाशकसंयुगेषु यः प्रेतपक्षे मृतवान् सपिण्डः। ··· भवन्ति तेषामिह पार्वणानि BṛParāSm. 7.146; 8.89; YājñaSm. 3.154; ViṣṇuSm. 22.47; विषप्रपाताद्यिमृते प्रायो(? या)नाशकयोरपि। ··· सद्यःशौचम् MārkP. 35.45; MatsyaP. 191.97; अनाशकान्निवृत्तास्तु ···। चरेयुस्त्रीणि कृच्छ्राणि KūrmaP. 689.6 (2.34); अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप KūrmaP. 747.5 (2.39) = SkandP. v(3).28.132 = v(3).29.30 = PadmP. i. 21.29; अनाशन(v. l. °कं) यः कुरुते SkandP. iv. 64.88; VarāP. 141.13; महायशाः । अनश्नन् देहमुत्सृज्य (v.l. अनाशकं चरित्वा तु) ··· स्वर्गमाप्तवान् BrahmP. 12.48; 125.24; अनाशकस्य राजेन्द्र फलसंख्या न विद्यते Aparā. 880.13 (*on* 3.6); अनाशके मरणपर्यन्तं कृताहारपरित्यागसंकल्पे (सद्यः शौचम्) HārLa. 115.2; BālamBha. iii. 169.3 (*on* 3.280)

अनाशकच्युत (anāśaka-cyuta) *adj.* who has swerved from the vow of fasting (unto death) जलाग्नु(? ग्न्यु)द्बन्धनभ्रष्टाः प्रव्रज्यानाशकच्युताः। ··· चान्द्रायणेन शुध्यन्ति YamaSm. 22; BṛYamaSm. 1.3; Mitā. 476.6 (*on* 3.280); Aparā. 1192.27 (*on* 3.292)

अनाशकत्व (anāśaka-tva) *n.* the state of being a non-destroyer घटं न जानामीत्यज्ञानस्य जातिमानित्यादिज्ञानेन नाशः स्यात्। अनवच्छिन्नघटत्वप्रकारताकत्वस्य निवेशे तु घटत्वमात्रप्रकारकधीप्रकारत्वानित्यस्याप्यनाशकत्वापत्तिर्गौरवं च LaCandr. 678.27.

अनाशकनिवृत्त (anāśaka-nivṛtta) *adj.* who has abandoned the vow of fasting (unto death) अनाशकनिवृत्तश्च गृहस्थत्वं चिकीर्षति। स चरेत् त्रीणि कृच्छ्राणि AṅgiSm. 140; ĀpaSm. 9.7; AgniP. 170.37; ViṣṇuDhaP. ii. 73.210; Mitā. 475.32 (*on* 3.280)

अनाशकफल (anāśaka-phala) *n.* fruit not having destruction, imperishable fruit अनाशकफलं ब्रूहि भगवंस्तत्र कीदृशम् MatsyaP. 108.2; PadmP. i. 45.1.

अनाशकमृत (anāśaka-mṛta) *adj.* who is dead by fasting अनाशकमृतानां च क्षयाहेऽपि च पार्वणम् । संन्यासवद्धि मन्यन्ते केचिद् विदुरवैक्रम् BṛParāSm. 7.151; अनाशकमृताः शूद्रा महाकालवने नराः। ··· यान्ति विमानैरर्कसंनिभैः SkandP. v(1). 7.73.

अनाशकादि (anāśakādi) *adj.* fasting unto death and the like (अनाशकाग्निप्रवेशजलप्रपतनोद्यमी) अतश्च धर्मबुद्ध्यभिमानादनाशकादावुद्युक्तो यः एवंवृत्तः, स बध्यते BālaKrī. ii. 57.15 (*on* 3.155); Aparā. 1192.17 (*on* 3.292); तपो ह्यनाशकाद्यतिबलैरेव शक्यत इति कृते तस्य प्राधान्यम् ManvaVi. 69.21 (*on* 1.86): तपसानाशकादिना ManvaVi. 1457.23 (*on* 11.227)

अनाशकादिप्रच्युत (anāśakādi-pracyuta) *adj.* (person) who has swerved from the vow of fasting unto death and the like अथानाशकादिप्रच्युतप्रायश्चित्तानि Aparā. 1192.15 (*on* 3.292)

अनाशकायन (anāśakāyana) *n.* a course of fasting as a penance अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तत् ChāndoU. viii. 5.3; ज्ञानाद्यज्ञः एषणादिष्टं सत्त्राणात्सत्रायणं मननान्मौनम् अनशनादनाशकायनम् ··· इत्यादिभिर्मिहद्भिः पुरुषार्थसाधनैः स्तुतत्वात् ब्रह्मचर्यं परमं ज्ञानस्य सहकारिकारणम् ChāndoUBh. 495.9 (*on* viii. 5.3)

अनाशकिन् (anāśak-ín) *adj.* who abstains from eating (at will) पराङेत्यज्यामुयी । पराङेत्यनाशकी ··· विद्वान् TaiĀ. i.27.4 (170.1) (*but* Sāy. नाशकः अपमृत्युव(? र्व)न्यक् कर्म वा तद्योगान्नाशकी, तद्राहित्यात् अनाशकी); *m.* mendicant (*lit.* who abstains from taking food at will) यतिः पाराशरी भिक्षुः परिव्राट् पारक्षिकः। अनाशकी Vaija. 96.160; AgaNi. 83.

अनाशङ्क (an-āśaṅka) *adj.* free from doubt प्रायेण तावत् प्रमातॄणामनाशङ्क एव ज्ञानोत्पत्तौ व्यवहारो दृश्यते Kāśi. i. 91.20 (*on* 2.52); यदा तावदाप्तवाक्यादनाशङ्कमेव ज्ञानं जातम् ··· तदा कल्याणमेव Kāśi. i. 146.6 (*on* 2.162)

अनाशङ्कनीय (an-āśaṅkanīya) *adj.* [*f.* - ā] **1** not fit to be doubted or questioned अथ पिङ्गलकः ··· अनाशङ्कनीयम् ··· राजत्वमनुभवन्नास्ते Tantrākhyā. 4.18; Pañcā. 4.32; प्रमातृरूपता तु ज्ञानस्यानाशङ्कनीयैव Bṛha. 254.2; (*on* i. 1.5) अवयवशस्त्ववद्योतनमनाशङ्कनीयमेव SphoṭSi. 92.1; सखे, निरर्गलवागसि। यदनाशङ्कनीयं तदाशङ्कसे ViddhaŚā. 3.5(4); दुष्कृतस्येव सुकृतस्यापि प्रक्षय इति तैः पुनरनाशङ्कनीयमेवाशङ्कितम् Bhām. 634.6 (*on* iii. 3.29); सवनीयस्यापि तुल्यायामुत्पत्तिरितरत्र गुणार्थं श्रवणमिति नास्त्येव ··· प्रकरणम्। अनूबन्ध्यस्य त्वनाशङ्कनीयमेव ŚāstrDī. 304.5 (*on* iii. 6.7); NyāyKu. 189.22; गानविध्यानर्थक्यादनाशङ्कनीयः पर्युदासः MayūMāli. 777.19 (*on* x. 8.6); **2** not fit to be thought of, not fit to be considered शास्त्रप्रामाण्यादनाशङ्कनीयोऽत्र प्रत्यवायप्रसङ्गः BrahmSūBh.(Śaṅ.) 777.16 (*on* iv. 1.5); उपमानमनाशङ्कनीयमेवास्मिन्नर्थे NyāyMañ. i. 228.19; अतस्तद्विरोधोऽप्यनाशङ्कनीयः BālaKrī. ii. 21.6 (*on* 3.45); शब्दविरोधप्रकारास्त्वनाशङ्कनीया एव ĀgaPrā. 31.16; युगपदुत्पादस्तु स्मृतीनामनाशङ्कनीय एव NyāyKa. 269.8; उपमानं तु बाधकमनाशङ्कनीयम्, विषयानतिरेकादिति केचित् NyāyKuA. ii(1).193.1; घटत्वस्याप्रवेशेनानन्तव्यक्तिप्रवेशकल्पना अनाशङ्कनीयैव MīmāKau. i. 145.4 (*on* i. 3.33); अद्राक्षुरविदूर एव ते ··· अनाशङ्कनीयमर्वाचाम् ··· असंभावनीयं मनसापि स्वायंभुवं भवनम् NīlaVi. 40.14; अग्निष्टोमस्तोत्रमाश्रित्य रेवतीनां फले विधिरिति पक्षस्तु अनाशङ्कनीय एव MayūMāli. 156.6 (*on* ii. 2.12)

अनाशङ्कनीयतर (anāśaṅkanīya-tara) *adj.* not to be doubted at all तत्र तावत्कारकविभक्तिनिर्देशादनाशङ्कनीयतरे सति द्रव्यसंबन्धे क्रयसंबन्धः श्रुतिबलीयस्त्वाद् भवेत् TantrVā. 695.6 (*on* iii. 1.12)

अनाशङ्कनीयत्व (anāśaṅkanīya-tva) *n.* **1** the state of being what is not to be considered or thought of प्रामाण्यपरिच्छेदे तु किं तत्प्रमाणमिति चिन्त्यताम्, प्रत्यक्षमनुमानं वा प्रमाणान्तराणामनाशङ्कनीयत्वात् NyāyMañ. i. 155.13; अनवगतेषु स्मरणस्याप्यनाशङ्कनीयत्वात् NyāyKuA. i. 175.3; स्खलद्वृत्तित्वाभावे मुख्यार्थबाधादेर्लक्षणानिबन्धनस्यानाशङ्कनीयत्वात् Loc. 24.7 (*on* 1.4); न चान्यत्प्रमाणमस्ति यन्मीमांसयानुगृह्येत । किं चागमोऽपि भन्वे(? भवन्ने)द एव वक्तव्यः। अन्वयस्यानाशङ्कनीयत्वात् NyāySu.(Ja.) 13A.3 (*on* i. 1.1); 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत 'इति विधिभ्यां तेषां प्रत्यवायपरिहारार्थत्वावगमेन ··· स्वर्गसंबन्धप्राप्तेरनाशङ्कनीयत्वात् VidhiRa. 8(40.2); न चेदं गाव्यादिष्वपि मुख्यार्थान्तराभावेन लक्षणागौण्योस्तावदनाशङ्कनीयत्वात् MīmāKau. i. 124.1 (*on* i. 3.25); iii(2). 145.23 (*on* ii. 2.2); **2** the state of being what is not to be doubted पुरुषबुद्धिदोषकृतस्याप्रामाण्यस्यानाशङ्कनीयत्वाद्विधिवाक्यस्य धर्मे प्रामाण्यं सुस्थितम् NyāyMāVi. 21.13 (*on* i. 1.8)

अनाशङ्कनीयसंश्लेष (anāśaṅkanīya-saṁśleṣa) *m.* innate connection (between word and its meaning) which is not to be doubted अभिधानाभिधेयनियमनियोगः समय उच्यते, यथैवं किमनाशङ्कनीयसंश्लेषपरिचोदनेन तद्दूषणेन NyāyMañ. i. 221.10.

अनाशङ्कम् (anāśaṅkam) *adv.* without any fear प्रसीद यद् ब्रवीषि त्वं तत् करोमि न ते मृषा। ब्रवीम्येतदनाशङ्कं यच्चे कार्यं मयाधुना MārkP. 62.29.

अनाशङ्कमान (an-āśaṅkamāna) *adj.* not doubting अनाशङ्कमानो वा

किं परस्मादुपदेशमपेक्षेत PramāVāSvopVṛ. 40.18; अन्यैरवितर्कयन् अन्यैस्सह दोषमनाशङ्कमानः VīraMi.(Saṁskāra.) 848.8.

अनाशङ्का (an-āśaṅkā) *f.* **i** improper doubt सर्वे प्राणा अनूत्क्रामन्ति इति च प्राणैर्गमनस्य प्राप्तत्वात्। तस्मादुत्क्रामन्तीत्यनाशङ्कैवा ChāndoUBh. 295.10 (*on* v. 10.2); **ii** absence of doubt (about being the experiencer) प्राणबाह्यस्य अन्यस्य अनभ्युपगमाद् भोक्तुः ··· सर्वदेवानां प्राण एव एकत्वोपपादनाच्च। तथा करणभेदेष्वनाशङ्का BṛĀraUBh. 233.17 (*on* ii. 1.15)

अनाशङ्कित (an-āśaṅkita) *adj.* not doubted यदि सांनाय्यं सोमयाजिनः, न कालार्थं श्रवणं भवितुमर्हति।··· अनाशङ्किते तस्मिन्ननाशङ्कितवचनम् ŚābaBh. 2085.15 (*on* x. 8.42); अनन्तरशब्दाध्याहारस्य 'वायोरग्निः' इत्यत्राप्यनाशङ्कितस्य शङ्कार्हत्वे वा, तत्रैव परिहर्तव्यतया पुनः शङ्कानुपपत्तेः ŚrutaPra. ii. 354.4 (*on* ii. 3.17)

अनाशङ्कितत्व (anāśaṅkita-tva) *n.* the state of being that which is not doubted प्रमातृरूपता तु ज्ञानस्यानाशङ्कनीयैव, अनाशङ्कितत्वाद् Bṛha. 254.8 (*on* i. 1.5)

अनाशङ्कितदोष (anāśaṅkita-doṣa) *adj.* of which evil consequences are not suspected उक्तेभ्योऽन्यानि कर्माणि ···। अनाशङ्कितदोषाणि त्वया कार्याणि यत्नतः TaiUBhāVā. 37.10(1)

अनाशङ्कितदोषत्व (anāśaṅkitadoṣa-tva) *n.* the state of being that the defects or faults of which are not feared अपौरुषेयत्वेन तन्मूलत्वेन वानाशङ्कितदोषत्वादिना शोभनानि वाक्यानि NyāySu.(Ja.) 2A.3 (*on* i. 1.1); न तावत् साक्षिणि बाधशङ्का तस्य नित्यानुभवरूपतया वेद इव तात्पर्यभ्रान्तेरप्ययोगेन वेदादप्यनाशङ्कितदोषत्वाद् Nyāyāmṛ. 136B.9.

अनाशङ्कितदोषागम (anāśaṅkitadoṣāgama) *m.* scripture about which defects or faults are not feared पौरुषेयतया शङ्कितदोषानुमानस्यापौरुषेयतया अनाशङ्कितदोषागमानुग्राहकतर्कविशेषत्वात् ··· ब्रह्म लक्ष्यति PrakaVi. 38.10.

अनाशङ्कितपरिभवातङ्क (anāśaṅkita-paribhavātaṅka) *adj.* not apprehending fear of defeat दानवाः ··· महता सेनया साकमागत्य ··· बोधयामासुरनाशङ्कितपरिभवातङ्कसुखशयितानमृताशनान् NīlaVi. 16.11.

अनाशङ्कितभटसिंहनाद (anāśaṅkita-bhaṭasiṁhanāda) *adj.* wherein even the war-cry (*lit.* lion-roar) of soldiers is not apprehended सुरपतिः ··· अनाशङ्कितभटसिंहनादम् ··· आगत्य पुनर्नगरम् ··· जजागार तां रजनीम् NīlaVi. 14.15.

अनाशङ्कितवाक्छल (anāśaṅkita-vākchala) *adj.* who has not suspected any guile in the words सा वागवाञ्छितमां नलेन तेषामनाशङ्कितवाक्छलेन NaiṣC. 10.49 (comm. अनाशङ्कितमननुसंहितं देवानां वाक्छलं येन)

अनाशङ्कितविप्रलम्भभ्रान्त्यादिमूला (an-āśaṅkitavipralambhabhrāntyādimūlā) *adj.* (*f.*) not having doubtful origin involving deception, illusion etc. अनाशङ्कितविप्रलम्भभ्रान्त्यादिमूलाः ··· स्मृतयो निर्व्याजप्रामाण्याः शक्यन्ते धर्मव्यवहाराङ्गत्वेन स्थापयितुम् TantrVā. 83.9 (*on* i. 3.3)

अनाशङ्कितव्यभिचारा (anāśaṅkita-vyabhicārā) *adj.* (*f.*) who is not suspected of unchastity अस्मादेव वचनादनाशङ्कितव्यभिचारायाः सकलधनग्रहणं गम्यते Mitā. 242.29 (*on* 2.135); Subodhi. 70.10 (*on* 2.135); VīraMi.(Vyavahāra.) 502.23; BālamBha. ii. 200.23 (*on* 2.135)

अनाशङ्कितान्रस्तुतोपन्यास (anāśaṅkitāprastutopanyāsa) *m.* putting forth what is undoubtedly irrelevant (स्वर्गादिफलम्) तत् त्वनाशङ्किताप्रस्तुतोपन्यासादसंबद्धमिति पूर्वोक्तमेव न्याय्यः TantrVā. 553.22 (*on* ii. 2.26)

अनाशङ्क्य (an-āśaṅkya) *ger.* not having considered, not having given thought (to it) 'भवन्ति' इति पक्षमनाशङ्क्यैव 'किं वा ते भावयन्ति' इति प्रश्नोऽयुक्तः AbhinBhā. i. 343.11 (*on* 7.1); (ऋतुपर्णः) अन्यायमनाशङ्क्य विकृतिमान् आश्वस्याम् (दमयन्त्याम्) Nalo. 4.17.

अनाशङ्क्य (an-āśaṅkya) *adj.* [*f.* -ā] **A** not fit to be doubted प्रवर्तकाध्यक्षस्य ··· चन्द्रिद्राद्यनुपप्लुतं सदासन्नदेशमनाशङ्क्यव्यञ्जकाधीनान्यथाभिव्यक्ति च वस्तु गृह्णाति DharmoPra. 19.19; कर्मान्तराकरणजन्यप्रत्यवायानुत्पादस्य फलत्वमनाशङ्क्यमेव SiddhāTa. 26.17; न हि व्रीहिनियमेऽप्युपस्तरणाद्यर्थस्यान्यस्य निवृत्तिरिष्टा । अतश्च कल्पादिप्रणयनवैयर्थ्यमनाशङ्क्यम् MīmāKau. i. 90.17 (*on* i. 3.12); **B** not fit to be considered, not fit to be thought of प्रत्यक्षाद्यन्तर्भावस्त्वनाशङ्क्य एवातोऽप्रमाणत्वात् NyāyRa. 858.10 (*on* 7.42); अत्र नामधेयत्वमनाशङ्क्यमिति गुणविधित्वेनैव पूर्वः पक्षः ŚāstrDī. 87.8 (*on* i. 4.16); उपवीतादीनां तु व्यभिचाराद् सहकारित्वमनाशङ्क्यमेव NyāySu.(So.) 11.20 (*on* i. 2.2); 18.6 (*on* i. 2.5); सर्वव्यक्तिसादृश्यं तु तासाम् ··· अनाशङ्क्यमेव MīmāKau. i. 146.11 (*on* i. 3.33); i. 265.8 (*on* i. 4.21); स्तोभानाम् ··· इष्टत्वेन भाव्यत्वानुगमादर्थज्ञानं सामनामपरिपूर्तिश्चेत्यनेकोद्देश्यताप्यनाशङ्क्या MīmāKau. iii(1). 19.16 (*on* i. 2.7); iii(2). 69.2 (*on* ii. 1.9); iii(2). 287.20 (*on* ii. 2.26); शब्दान्तराभ्यासप्रकरणान्तराणि त्वनाशङ्क्यान्येव SetuBa. 288.26.

अनाशङ्क्यक (anāśaṅkya-ka) *adj.* not fit to be doubted अन्वसविम्बाशौचमध्ये विदेशमृतान्यारोहणं त्वनाशङ्क्यकमेव NirṇaSi. 343.13.

अनाशङ्क्यत्व (anāśaṅkya-tva) *n.* **A** the state of not being fit to be considered (as possible) संधिविग्रहौ चात्र क्रमेण तुल्यप्रमाणे।··· द्वौ चेमौ विरुद्धाविति तयोर्युगपत्प्रवृत्ति प्राप्नुतश्चात्र युगपत्प्रकारान्तरस्यानाशङ्क्यत्वाद् AlaṅkāSa. 158.8; रेखाद्वयपक्षस्यैवाश्रितत्वेन वीथ्यन्तराभावेन विनिगमनाविरहस्यानाशङ्क्यत्वाद् SetuBa. 334.26; **B** the state of not being fit to be doubted बीजाङ्कुरयोर्भिन्नप्रतिबन्धस्यानाशङ्क्यत्वादुत्पत्तिः प्रतिबध्येत MīmāKau. i. 4.24 (*on* i. 3.1)

अनाशङ्क्यमानविनाश (anāśaṅkyamāna-vināśa) *adj.* whose destruction is not being doubted अनुपजातावयवक्रियतयानाशङ्क्यमानविनाशेऽन्त्यतन्तौ जातया क्रियया पटनिष्पत्त्यनुमाने क्रियमाणे पटप्रत्यक्षताकाले व्यवधानसंभवात् NyāyMañ. i. 117.25.

अनाशङ्क्यव्यवहार (anāśaṅkya-vyavahāra) *m.* statement (*lit* usage) which is not fit to be doubted स एव निर्वर्ण्यपृष्टो यदि त्रिचतुरज्ञानमात्मन उपदिशति, तावदेव स्वप्रमाणवदनाशङ्क्यव्यवहारसिद्धिः Kāśi. I. 146.13 (*on* 2.162)

अनाशङ्क्यसमुत्थान (anāśaṅkya-samutthāna) *adj.* development of which cannot be guessed अव्या(?व्या)मूलादनाशङ्क्यसमुत्थाने मनोरथे। काम्युन्मीलति निःसीमा सा प्रबन्धस्य वक्रता।··· कन्दात्प्रमूलसंभाव्यसमुद्भेदे समीहिते VakroJī. 222.10.

अनाशतस् (anāśa-tas) *adv.* on account of the absence of destruction असत्त्वे सर्वभावानां नित्यत्वं स्यादनाशतः TattvSaṁ. 371.

[1]**अनाशन** (an-āśana) *n.* **I** act of fasting or abstaining from food unto death पुष्करे तु तपस्तप्येद्दानं दद्यान्महालये। मलये त्वग्निमारोहेद् भृगुतुङ्गे त्वनाशनम् MahāBhā. iii. App. I. 13(8); PadmP. i. 39.85; अनाशनं यः कुरुते मद्भक्त इह सुव्रतः। न तस्य पुनरावृत्तिः SkandP. iv. 64.88; देहत्यागान् परित्यज्य सलिलाग्न्यवह्निषु। अनाशने वा धर्मज्ञ मृताः स्युः स्वर्गगामिनः ViṣṇuDhaP. ii. 117.6; अनाशने भारत चाक्षया गतिः BhaviP. 789B.21 (iv. 126.48); यो मृतोऽमरकण्टके। अग्निप्रवेशेऽथ जले तथा चैव अनाशने। अनिवर्तिका गतिस्तस्य PadmP. i. 13.29; i. 16.14; **ii** act of fasting in general उपवासस्तूपवस्त्रं संन्यासः स्यादनाशनम् NāmaMāli. 393; *adj.* not taking food, fasting नानाशनः स्यान्न महाशनः स्याद् MahāBhā. xii. 261.25.

[2]**अनाशन** (a-nāśana) *adj.* imperishable अक्षरं स्याद् ब्रह्मणि च वर्णे मोक्षेऽप्यनाशने NānārthaMa. 1569.

अनाशनतस् (anāśana-tas) *adv.* from starvation कुलगृहं पितृगृहं तद्वर्गो मातापित्रादिः संरक्षति अनाशनतः संगोपयति JñātāDhaṬ. 119A.2.

अनाशप्रसङ्ग (anāśa-prasaṅga) *m.* undesired contingency of non-destruction न चैकद्रव्यारब्धं द्रव्यम्। कार्यद्रव्यस्यानाशप्रसङ्गात् TattvPradī.(Ci.) 315.6; कर्मैव संयोगनाशकं स्यादिति चेन्न ··· हस्ततत्पुस्तकशरीरतत्संयोगानामनाशप्रसङ्गाद् Upask. 329.5 (*on* vii. 2.10)

[1]**अनाशमनस्** (anāśa-manas) *adj.* whose mind is devoid of desire or hope व्यसनं त्वमुपैषि कदा नु सभीशमना शमनाशन् अनाशमनाः Nalo. 3.46.

[2]**अनाशमनस्** (anāśa-manas) *adj.* not having the mind on destruction व्यसनं त्वमुपैषि कदा नु सभीशमना शन् अनाशन् अनाशमनाः Nalo. 3.46 (comm. अनाशमनाः न विद्यते नाशे विनाशे मनो यस्य सः)

अनाशय (an-āśaya) *adj.* not having residual impressions तत्र ध्यानजमनाशयम् YogSū. 4.6; यदेव ध्यानजं चित्तं तदेवानाशयम् YogBh. 186.3 (*on* 4.6); आशेरत इत्याशयाः कर्मवासनाः क्लेशवासनाश्च। त एते न विद्यन्ते यस्मिंस्तदनाशयम् TattvVai. 186.14 (*on* 4.6); ध्यानजं समाधिजं यत् चित्तं तत् पञ्चसु मध्ये अनाशयं कर्मवासनारहितमित्यर्थः RājMār. 67.12; [Inst.] without intention स्वामिनः समर्पणीयोऽयमित्याद्यवेव सुचितं प्रयोजनमनाशयेन यत्किंचिद्दुक्त्वा गृहीत्वा च वाम्येनन् UdaySuKa. 35.11.

अनाशयित्वा (a-nāśayitvā) *ger.* not having destroyed विद्वांस्तथैव यः शक्तः क्लिश्यमानो न कुप्यति। स नाशयित्वा (v.l. अनाशयित्वा) क्लेष्टारं परलोके च नन्दति MahāBhā. iii. 30.12.

अनाशविनाशकरण (anāśavināśa-karaṇa) *n.* office for the prevention of (temporary) loss and destruction निवृत्तवृद्धिको बाधितस्त्वाक्रान्तमूल्यस्तत्रैवावतिष्ठेत, अनाशविनाशकरणाधिष्ठितो वा ArthŚā. ii. 74.3 (3.12)

अनाशस्त (an-āśastá) *adj.* not having hopes यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि RV. i. 29. 1; AV. xx. 74.1.

अनाशा (an-āśā) *f.* despair, dejection सुखं निराशः स्वपिति नैराश्यं परमं सुखम्। आशामनाशां कृत्वा हि सुखं स्वपिति पिङ्गला MahāBhā. xii. 168. 52; त्वदर्थसिद्धौ संदेहो निःसंदेहं तु भर्त्सनम्। अविलम्बेन यास्यामि मुक्त्वानाशां तथापि हि PariPar. 2.492.

अनाशातना (an-āśātanā) *f.* (Jain.) non-injury to or non-destruction of (Jain religious doctrine through censure) अत्र भावना — तीर्थंकराणामनाशातनायां तीर्थंकरप्रज्ञप्तधर्मस्यानाशातनायां, वर्तितव्यमित्येवं सर्वत्र द्रष्टव्यम् SthānṬ. 408B.7; 408A. 9; 408A. 12.

अनाशातनाविनय (anāśātanā-vinaya) *m.* training or desciplino of the non-injury to (Jain religious doctrine) उचितक्रियाकरणरूपोऽयं दर्शने शुश्रूषणाविनयः, अनाशातनाविनयस्तु अनुचितक्रियाविनिवृत्तिरूपः SthānṬ. 408B.3.

अनाशात्मन् (anāśātman) *m.* imperishable self सदसन्नाश्यनाशात्मपरिकीर्तनमूढया (मैत्रेय्या)। चोदितः पूर्वपक्षोऽयमिति सिद्धान्तमब्रवीत् ŚlokaVār. 5(17). 146 (726. 5)

अनाशापत्ति (anāśāpatti) *f.* undesired contingency of non-destruction प्रपञ्चनाशं प्रति ब्रह्मज्ञानस्य न कारणता, चरमतत्त्वज्ञानजन्यनाशस्यानाशापत्त्या श्रुतिविरोधापत्तेः LaCandr. 169. 27.

अनाशार्थ (a-nāśārtha) *adj.* not having the meaning 'to destroy' अनाशार्थाद् विपूर्वात् क्रगः कर्मण्यसति शब्दे च कर्मणि कर्तर्यात्मनेपदं स्यात् SiddhaHe. iii. 3.85.

अनाशासन (an-āśāsana) *n.* absence of hope (सर्वस्य स्वात्मा महेश्वर इति दूरतरं विप्रकर्षिता प्रत्याशा) प्रत्याशा — अनाशासने प्रवृत्ता आशा Bhāsk. i. 60.21 (*on* i. 1. 3)

अनाशास्य (an-āśāsya) *adj.* I undesirable कथं हि मन्त्र्याग्र्यधरो मनीषी ··· अनानृशंस्यं (v. l. अनाशास्यं) कर्म कुर्यादमूढः MahāBhā. v. 32.19; आकिंचन्यमनाशास्यमिति वै नहुषोऽब्रवीत् MahāBhā. xii. 8.11; इह महितेऽनाशास्यात्त्वापराधान्महीपते नाशा स्यात् YudhiVi. 6. 107 (comm. अनाशास्यात् अस्पृहणीयात्); II not to be expected, unattainable अस्माभिरप्यनाशास्यो रामस्य महिमान्वयः MahāvīC. 4.13.

अनाशास्यजय (anāśāsya-jaya) *adj.* for whom victory is not (a thing) to be sought after ततो वेलातटेनैव फलवत्पूगमालिना। अगस्त्याचरितामाशामनाशास्यजयो ययौ RaghuVa. 4. 44 (comm. अयत्नसिद्धत्वादप्रार्थनीयजयः)

अनाशास्यत्व (anāśāsya-tva) *n.* the state of not being desirable तच्च फलं यजमानगाम्येव, ऋत्विक्फलस्योपस्थानाद्यप्रयोज्यत्वेन तत्प्रकाशने तदङ्गत्वानुपपत्तेः। तस्य यजमानादाशास्यत्वेनाग्निं प्रत्यनाशास्यत्वात् BhāṭṭDī. ii. 68.4 (*on* iii. 8. 6)

[1]**अनाशित** (an-āśita) *adj.* [*f.* -ā] AI not taking food, fasting (as a vow) अनाशितानां ये लोकाः ··· या गतिश्चाग्निहोत्रिणाम् MahāBhā. xiii. App. I. 3(26); AII who has not taken food (स ददर्शाविदूरस्था राक्षसीः) अनाशिताः सदा पुष्टाः सर्वभक्षाः समुन्नताः Rāmā. v. 447*; v. 524*(3); नानाशितो नात्यशितः ··· नारीम् ··· व्रजेद् AṣṭāSaṁ. i. 60.6 (1. 9); i. 150. 1 (1. 28); शयीत किं चिदेवात्र सर्वश्चानाशितो दिवा AṣṭāHṛ. i. 8.29; आस्थापनम् ··· देयमनाशिते SiddhYo. 76(1).20; AIII having no food to eat नेच्छाम्यनाशितं द्रष्टुं कृशं मलिनमेव वा। देहीति चाभिभाषन्तं नगर्यां निर्धनं नरम् HariVaṁ. 86. 60; AIV where food is not available यः पुनर्भिक्षुर्जानन् तथानाशितं श्रमणोद्देशमुपस्थापयेत् ··· पायन्तिका PrātiSū. 26.8; B not fed अनाशितमतिथिं गृहे न वासयेत् ViṣṇuSm. 67. 30; कुटुम्बिनी ···। न मय्यनाशिते भुङ्क्ते BhāgP. iv. 28. 19; तस्यैवं वातगतिव्याध्युपसृष्टस्य प्रातरनाशितस्य सुरा(? राम्) ··· दद्यात् Hastyāyur. 218. 11 (2.21)

[2]**अनाशित** (a-nāśita) *adj.* I not killed राजलोके गते तेन नाशितोऽनाशितो निशि। दृष्ट्वा सैन्यं प्रागकस्मात् कुमारो हालिकं जगौ KumāPraPra. 43.31; II not destroyed, not removed अनिष्कृतमनाशितमेनो यैस्तेऽनिष्कृतैनसोऽकृतप्रायश्चित्ताः ManvaMu. 459.26 (*on* 11. 53)

अनाशितकुटुम्ब (anāśita-kuṭumba) *adj.* wherein (the whole) family has not taken food अनाशितकुटुम्बानि प्रभाहीनजनानि च। अलक्ष्मीकानि पश्यामि कुटुम्बिभवनान्यहम् Rāmā. ii. 1667*(4)

अनाशितंभव (an-āśitambhava) *adj.* [P. iii. 2. 45] by which one does not become satisfied (i. e. not causing satisfaction) भोगैरैन्द्रैर्नैवातृप्तः स किं तप्स्यति मर्त्यजैः। अनाशितंभवैरेभिः तदलं भङ्गुरैः सुखैः MahāP. 7. 50; अनाशितंभवानेतान् विषयान् धिगपायिनः। येषामासेवनं जन्तोः न संतापोपशान्तये MahāP. 11. 194; मकरन्दमिवापीय त्वद्वक्त्राब्जोद्गतं वचः। अनाशितंभवं भव्यभ्रमराः यान्त्यमी मुदम् MahāP. 25. 26; 28. 84.

अनाशिता (anāśi-tā) *f.* imperishability विशेषज्ञाननाशोऽतस्तान्येवानुविनश्यति। न प्रेत्य संज्ञास्तीत्युक्त आत्मनोऽनाशिता श्रुतेः IṣṭaSi. 187. 3.

[1]**अनाशित्व** (anāśi-tva) *n.* I the state of being what endures or lasts long द्विविधा च तानक्रिया तन्त्र्यां प्रवेशान्निग्रहाच्च।··· निग्रहस्त्वसंस्पर्शः मध्यमस्वरेणैव तु मूर्च्छनानिर्देशः कार्यो भवति अनाशित्वान्मध्यमस्य निग्रहे पर्यग्रहे वा NāṭyaŚā. 28. 33(20); मध्यमस्यानाशित्वमिति तावत् प्रधानं नियतं च AbhinBhā. iv. 18.27 (*on* 28. 33(20); II imperishability अबुद्धिपूर्वकस्तेषां निरोधोऽप्रतिसंख्यया। तौ च द्वावप्यनाशित्वादिष्टावकृतकावपि ŚlokaVār. 6. 23 (735.6); IṣṭaSi. 187. 4; प्रकाशमप्रकाशं वा ज्ञानं तस्य प्रकाशते। विद्यारूपादनाशित्वं न हि तत्त्वं विनश्वरम् ŚivDṛ. 6.46.

[2]**अनाशित्व** (anāśi-tva) *n.* the state of being one who abstains from food, abstinence from food न ज्ञातिभ्यो दया यस्य शुक्लदेहोऽविकल्मषः। हिंसा सा तपसस्तस्य नानाशित्वं तपः स्मृतम् MahāBhā. iii. 200.100 (CP. Ed.) (BhārBhāDī. अनाशित्वम् अशनत्यागः)

अनाशित्वविधि (anāśitva-vidhi) *m.* laying down of imperishable nature 'परमार्थोऽविनाशी 'त्यत्रापि परमार्थमुद्दिश्यानाशित्वविधिर्न त्वनाश्युद्देशेन परमार्थसंज्ञाविधिः GuruCandr. ii. 308.5.

[1]**अनाशिन्** (a-nāśin) *adj.* AI imperishable, eternal, constant अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः। अनाशिनोऽप्रमेयस्य MahāBhā. vi. 24. 18 = BhagGī. 2.18 (Śaṅ. तत्र नित्यस्य अनाशिनः इति द्विविधेनापि नाशेन असंबन्ध अस्येत्यर्थः); अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते ViṣṇuP. ii. 14. 24; तज्जन्मनाशसाक्षित्वादजोऽनाशी स्वयंप्रभः। जायते नश्यतीत्येवं तत्साक्ष्यप्यभिधीयते BṛĀraUBhVā. iii. 4. 157; घटोऽनाशीति मत्पक्षः स च नैवं विहन्यते TaiUBhāVā. 55. 21(2); गते तस्मिन्स भगवान्संयोज्यात्मानमात्मनि।··· अजन्मन्यजरेऽनाशिन्यप्रमेये BrahmP. 211.11; अतो जातमिदं विश्वमजातत्वादनाशि च। स्वरूपत्वात्तु नास्त्येव यच्च भाति चिदेव सा YogVā. iii. 20. 40; नित्यमनाशि ManvaVi. 20. 12 (*on* 1. 11); अव्यात्स्वाम् ··· विश्वभृत्क्रोडभर्तुर्दंष्ट्रेवोच्चैरनाशी हरमुकुटशशीवैकदन्तस्य दन्तः VīraMi. 1. 9 (*on* 1. 1); अनाशी मायया यादृक् स शिवः पुरुषोत्तमः। तथा त्वया[म]व्यये माये प्राज्यं राज्यमुरीकुरु ParamāKā. 26. 59; AII not perishing (in a short time), long-lasting सर्वस्वराणां प्रवरो ह्यनाशी मध्यमः स्मृतः NāṭyaŚā. 28. 65; अक्षयमनाशि ManvaVi. 1076.9 (*on* 8.344); भस्मसाज्जायतां कामं वपुर्यत्पाञ्चभौतिकम्। चेतनस्यास्ति चेदुच्चैस्तदनाशि यशोमयम् ParamāKā. 24. 31; B which does not become lost निक्षेपोपनिधी नित्यं न देयौ प्रत्यनन्तरे। नश्यतो विनिपाते तावनिपाते त्वनाशिनौ ManuSm. 8. 185.

[2]**अनाशिन्** (an-āśin) *adj.* not eating (i. e. starving) तत्रस्थानां हि तेषां वै दुःखितानामनाशिनाम्। तेषां लोकान्तरस्थानां बान्धवैर्नामगोत्रतः।··· दर्भेषु दत्ताः पिण्डास्त्रयस्तु वै। यान्ति तांस्तर्पयन्ते BrahmāṇḍP. i. 28. 85.

अनाशिफलद (anāśiphala-da) *adj.* bestowing imperishable fruit (ब्रह्म चैव प्रजापतिः) ओंकारार्थभूतौ अक्षरौ उपासकानामनाशिफलदौ ManvaVi. 165.27 (*on* 2.84)

अनाशिफला (anāśi-phalā) *adj.* (*f.*) yielding imperishable fruit वाचि प्राणे चान्योऽन्यं होमाभ्यां पञ्चयज्ञनिर्वृत्तिं पश्यन्तः। अक्षयामनाशिफलाम् ManvaVi. 465.12 (*on* 4. 23)

अनाशिष्ठ (an-āśiṣṭha) *adj.* not the fastest, the slowest गर्दभरथेनाश्विना उदजयताम् ··· सर्वेषामेतर्हि वाहनानामनाशिष्ठः AitBr. 17.3(458) (comm. अनाशिष्ठोऽत्यन्तवेगरहितः)

अनाशिस् (an-āśis) *adj.* I free from desire यद्वै नृशंसं तदपथ्यमाहुर्यः सेवते धर्ममनर्थबुद्धिः। अस्वोऽप्यनीशश्च (v. l. अनाशीश्च) तथैव राजंस्तदार्जवं स समाधिस्तदार्थम् MahāBhā. i. 87. 4; न ह्यङ्गोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि। मया व्यवसितः सम्यङ् निर्गुणत्वादनाशिषः BhāgP. xi. 29. 20 (Śrīdhara अनाशिषो निष्कामस्य); II not wished for, undesirable अनाशीः शयने मृत्युर्येषां तेषां स वंशजः RājTa.(Ka.) 7.1364; *n.* abuse, curse (*lit.* non-blessing) बहामखाननयनोत्पाटनेन निजं वपुः। विशामनाशिषां पात्रं जोनराजानकोऽनयत् RājTa.(Śrī.) 4. 371; (Gr.) I non-blessing, non-benediction कारकाद्दत्तश्रुतयोरनाशिषि प्रतिषेधः Vār. 1 *on* P. vi. 2. 148; ङिदनाशिषि CāndraVyā. i. 4. 34 (Vṛtti अनाशीर्विषये लिङो ङिद् यासुड् भवति); सो लोपोऽनन्त्यस्यानाशिषि SaraKaṇṭhā.(Gr.) iii. 1.34; II other than the precative (prescribed in the sense of benediction) वृतो नावानाशीः सिच् परस्मै च SiddhaHe. iv. 4. 35.

अनाशीरक (anāśīr-aka) (Gr.) suffix *aka* not denoting the sense of blessing काप्यनाशीरकेऽइद् अयत् तद् क्षिपादेः MugdhaBo. 4. 6 (40. 19); (comm. आशीरर्थाकवर्जे कापि परेऽकार इकारः स्यात्।··· सर्विका। कारिका।

आशीरके तु जीवका)

अनाशीरर्थ (anāśīr-artha) *adj.* meant for (the sense) other than blessing or benediction अनाशीरर्थं आरम्भः KāśiVṛ. *on* iii. 2.50 = Prasā. ii. 528.6; SiddhāKau. 496A.9 (*on* iii. 2.50)

अनाशीर्क (anāśīr-ka) *adj.* not accompanied by blessing अथ ब्राह्मणोऽनाशीर्केण यज्ञेन यजते TaiS. I. vi. 10.4; BaudhŚS. i. 88.20.

अनाशीर्दा (án-āśīrdā) *adj.* not offering an oblation mixed with milk अनाशीर्दामहमस्मि प्रहन्ता ṚV. x. 27.1 [not praising, ungrateful, PW.; not giving a blessing, MW.]

अनाशीर्भाजन (anāśīr-bhājana) *n.* object of abuse or curse लुब्धः स निजमात्मानमनाशीर्भाजनं व्यधात् RājTa.(Śrī.) 3.106.

अनाशीर्वादिन् (an-āśīrvādin) *adj.* who does not utter blessings अनाशीर्वादी नाभिवन्द्यः VaikhāDS. ii. 10.6.

अनाशीर्विषय (an-āśīrviṣaya) *adj.* not referring to the sense of blessing छन्दस्युभयथेति अनाशीर्विषयस्यापि लिङः आर्धधातुकत्वाद् भूयादिति साधु । स्तीश्वराशीरिति वा NyāySu.(Ja.) 624B.2 (*on* iv. 2.1)

अनाशीःशङ्किता (anāśīś-śaṅkitā) *adj.* (*f.*) apprehensive of non-blessing इत्युक्ते मातृवात्सल्याच्छैलेन्द्रमहिषी तदा । नोदयामास मां मन्दमनाशीःशङ्किता तदा SkandP. i(2). 23.31.

अनाशु (an-āśú) *adj.* [án-āśu, ṚV. (Khila.); AV. xx. 128.10] not swift, slow धन्वंश्चिद् ये अनाशवो जीराश्चिदगिरौकसः । सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः ṚV. i. 135.9 (*but* PW. not having quick horses); अविप्रे चिद्वयो दधदनाशुना चिदर्वता । इन्द्रो जेता हितं धनम् ṚV. vi. 45.2; अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् ṚV. viii. 1.14; AV. xx. 116.2; अमाजुरश्चिद् भवथो युवं भगोऽनाशोश्चिदवितारापमस्य चिद् ṚV. x. 39.3; अनाशुरश्चायामी ṚV. (Khila.) v. 13.6; AV. xx. 128.10; ŚāṅkhāŚS. xii. 21.2.

अनाशु (an-āśu) *adv.* not quickly अन्तरापरिनिर्वायिणस्तावदाश्वनाशुचिरपरिनिर्वाणात् दृष्टान्तत्रयेण AbhidhKoBh. 360.15 (*on* 6.39)

अनाशुग (anāśu-ga) *adj.* not flowing quickly विद्यादुदुम्बरम् । स्थिरं स्त्यानं गुरु स्निग्धं श्वेतरक्तमनाशुगम् AṣṭāSaṁ. i. 297.13 (3.14); AṣṭāHṛ. iii. 14.16.

अनाशुमवत् (ánāśu-mavat) *adj.* not binding speedily आशुमन्ति वा अन्यानि च्छन्दांस्यासन्ननाशुमवन्त्यन्यानि KāṭhS. 23.3 (ii. 77.6)

अनाशुरश्चायामी (ánāśuraścāyāmī) ? AV. xx. 128.11 [VIŚVA.] (better अनाशुरश्च आयामी); cf. **अनाशु**.

अनाशुरश्वायामी (anāśuraśvāyāmī) ? ŚāṅkhāŚS. xii. 21.2 [VIŚVA.] (better अनाशुरश्च आयामी); cf. **अनाशु**.

अनाशुविनाशिन् (an-āśuvināśin) *adj.* not perishing immediately, long-lasting यदनाशुविनाशिनोऽपि केचन भावा भवेयुः ततो विशेषणमाशुविनाशिन इति कल्प्येत TātpaṬ.(Vā.) 550.21 (*on* iii. 2.14)

अनाशौचित्व (anāśauci-tva) *n.* the state of being one who does not observe the period of impurity त्यागभिन्ने त्वनाशौचित्वप्रयुक्तं कर्तृत्वमन्यस्यैव … त्यागमात्रे स्वयं कर्तृत्वमन्यत्र त्वन्यस्यै स्मार्तवदिति तात्पर्यम् BālamBha. iii. 54.5 (*on* 3.17)

अनाशौचिन् (an-āśaucin) *adj.* who does not observe the period of impurity अज्ञातहेत्वनाशौचिभिन्नान्तरेण कृतं कर्माशुचिद्रव्यकृतत्वाद् वा स्यात् BālamBha. iii. 57.31 (*on* 3.17)

अनाश्चर्य (an-āścarya) *adj.* not surprising द्रुपद उवाच । अनाश्चर्यमिदं ब्रह्मन् विक्रान्तेषु महात्मसु । प्रीये त्वयाहम् MahāBhā. i. 128.13; अनाश्चर्यो जयस्तेषां येषां त्वमसि केशव । रक्षिता समरे नित्यम् MahāBhā. vi. 115.64; अनाश्चर्यो जयस्तेषां येषां नाथोऽसि माधव MahāBhā. vii. 123.28; अनाश्चर्यो जयस्तेषां भक्तिर्येषां त्वयि प्रभो MahāBhā. viii. 1224*(29); आश्चर्यं सिन्धुराजस्य वधं जानन्ति पार्थिवाः । अनाश्चर्यं हि तद् त्वत्तस्त्वं हि पार्थ महारथः MahāBhā. viii. 51.45; xii. 148.4; कौसल्या मैथिलीम् … उवाच — । अनाश्चर्यमिदं पुत्रि वचनं तव मैथिलि Rāmā. ii. 908*(3); ii. 1897*(5); *n.* **i** not a wonder, not a miracle अनाश्चर्यो (v. l. अनाश्चर्यं) जयस्तेषां येषां त्वमसि केशव । रक्षिता समरे नित्यम् MahāBhā. vi. 115.64; vii. 123.28 (v. l.); एतान् सुपारगो बोधिसत्त्वो व्यवस्थापयन्नुवाच । अनाश्चर्यं खलु महासमुद्रमध्यमवगाढानामौत्पत्तिकक्षोभपरिक्लेशः JātaMā. 90.2 (14.9); **ii** natural spontaneous quality आश्चर्यं चाप्यनाश्चर्यं समचित्तोपकारिता । प्रतिकारस्तथा शास्तिः स्वावद्यन्यप्रयोगता । पञ्चेमे बोधिसत्त्वस्याश्चर्याद्भुता धर्माः BodhiBhū. 193.2 [DBHS.]

अनाश्चर्यद्वय (an-āścaryadvaya) *n.* not a pair of wonders अनाश्चर्यद्वयं लोके राघवस्यैव दृश्यते । क्षमा कलत्रदोषे च सेतुबन्धश्च सागरे RāmāMañ. 467.18.

अनाश्चर्यविभाग (anāścarya-vibhāga) *m.* section dealing with what are not miracles अनाश्चर्यविभागे श्लोकः MaYānaSū. 160.22 (19.3)

अनाश्मन (an-āśmana) *adj.* not made of stone साश्मप्रचारोऽस्य अनो गुणेनाश्मनोऽपि व्रजेत् कीदृगनाश्मनो वः DvyāśraKā. 20.72.

चरेद् BṛDharmaP. i. 36. 146; **2** not having considered, not paying heed to, not having given thought to इहास्नानादिनियमो वः कुतो ब्रह्मचारिणः। अवधित्वमनाश्रित्य सोऽवसानमपेक्षते ŚlokaVār. 1. 94 (33.1); इत्युक्ताः किंकरास्तेन यमेन सुमहात्मना। अनाश्रित्य वचः कृष्ण सत्राजितमथो गताः BhaviP. 165B.6 (i. 113.29); यद् पुनरर्थान्तरन्यासस्य कार्यकारणगतत्वेन समर्थकत्वमुक्तम्, तद् उक्तलक्षणकाव्यलिङ्गमनाश्रित्य AlaṅkāSa. 148. 8; हीनमूल्येन वेलामनाश्रित्य क्रयं कुर्वन् तस्करो भवति DaṇḍaVi. 329. 3; **3** not having accepted अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद् धनम्। दायादेभ्यो न तद् दद्यात् SmṛtiCan. iv. 642. 5; न च सिद्धान्तमनाश्रित्य कथायां प्रवृत्तिः संभवति SarvaDaKau. 88. 20; चर्व्वस्यासिद्धत्वमनाश्रित्य रोरुत्वं न कृतम् Prasā. ii. 550. 10; (हारीतवचनम् – 'अधरीकृत्य तत् पत्रम् ...') तत्पत्रं प्रमाणत्वेनानाश्रित्य BālamBha. ii. 101. 32 (*on* 2.92)

अनाश्रीयमाण (an–āśrīyamāṇa) *adj.* [*f.* -ā] **1** not being resorted to, not being considered (as a condition of grammatical operation or of any injunction) इदं तर्हि प्रयोजनं विधिमात्रे स्थानिवद्यथा स्यादनाश्रीयमाणायामपि प्रकृतौ MahāBh. i. 143. 16 (*on* i. 1.57); i. 151. 5 (*on* i. 1. 57); न कश्चिदिह बहुत्वे विशेष आश्रीयते सहस्रादूनमधिकं वेति। अनाश्रीयमाणे यथा कृतं तथा साधु ŚābaBh. 1500. 19 (*on* vi. 7. 23); **2** not being accepted अनाश्रीयमाणायामस्यां परिभाषायाम् क्रियमाणेऽपि प्रत्ययसंज्ञासंनियोगेनाद्युदात्तत्वे चिन्नित्कित्स्वतिप्रसङ्गः स्यात् MahāBh. ii. 9. 6 (*on* iii. 1.3); अङ्गप्रधानार्थत्वेऽनाश्रीयमाणे शून्यहृदयवचनमेवैतत् स्यात् TantrVā. 123. 21 (*on* i. 3.7)

अनाश्रीयमाणत्व (anāśrīyamāṇa–tva) *n.* the state of not being accepted भ्रान्तिमान् ... न चैवमतिव्याप्तिः। प्रकृताप्रकृतत्वेन मिथोविरोधिनी जानामीत्यादिवाक्यस्यालंकारतयानाद्रिय(v. 1. श्रीय)माणत्वात् Ekāva. 8. 9 (6) (225. 8)

अनाश्रीयमाणवृत्तिपदार्थ (anāśrīyamāṇa–vṛttipadārtha) *adj.* which has not resorted to the meaning of the constituents undergoing integration (i. e. compound having an idiomatic or specialised meaning) संनिधानेऽप्यनाश्रीयमाणवृत्तिपदार्था लोहितशालिगौरखर इत्यादयो निगद्यन्ते SaraKaṇṭhā. 663.13 (better read अनाश्रीयमाणवर्तिपदार्था)

अनाश्लिष्ट (an–āśliṣṭa) *adj.* which has not stuck to न ह्यनाश्लिष्टम्, अनवमृदितं वा तत्र प्रतिपादयितव्यम् ŚābaBh. 1803. 10 (*on* x. 1. 2)

अनाश्वस् (án–āśvas) *adj.* who has not taken food, fasting यदनाश्वानुपवसेत् पितृदेवत्यः स्यात् ... यदनाश्वानुपवसेत् क्षोधुकः स्यात् TaiS. I. vi. 7. 3-4; नास्य ब्राह्मणोऽनाश्वान् गृहे वसेत् TaiBr. I. i. 4.2; BhārŚS. v. 16. 13; ĀpaŚS. v. 25. 3; HirŚS. vi. 5.17 (531.1); VaikhāŚS. 1.16; BaudhŚS. i. 67. 3; परेहि मृत्योर्गृहान्।... तस्यं स्म तिस्रो रात्रीरनाश्वान् गृहे वसतात् TaiBr. III. xi. 8. 2; न मेऽनाश्वानुत दाश्वान्त्प्रमीत् BāṣkaU. 20; स एतद् व्रतं चरति ... अनाश्वानेतां रात्रिमुपवसति BhārŚS. iv. 4. 5; ix. 9. 7; स्वपन्नभिनिम्रुक्तोऽनाश्वान् वाग्यतो रात्रिमासीत।... स्वपन्नभ्युदितोऽनाश्वान् वाग्यतोऽहस्तिष्ठेत् ĀpaDS. ii(5). 12. 13-14; उपेयिवाननाश्वाननूचानश्च P. iii. 2. 109; JaineVyā. ii. 2. 90; CāndraVyā. i. 2. 75; SaraKaṇṭhā. (Gr.) i. 4. 144; अभिरश्मिमालि विमलस्य धृतजयधृतेरनाशुषः। तस्य भुवि बहुतिथास्तिथयः प्रतिजग्मुरेकचरणं निषीदतः Kirātā. 12.2; नानवाप्तवसुनार्थकाम्यता नाचिकित्सितगदेन रोगिणा। इच्छताशितुमनाशुषा न च प्रत्यगामि तदुपेयुषा सदः ŚiśuVa. 14.49; KātanVṛ. *on* iv. 4.1; ŚākaṭāVyā. i. 4. 82; अनाशुषोऽस्य गात्राणां परं शिथिलताभवत् MahāP. 5.236; 18.74; 25.171; 36. 154; शौर्यैरसेनासीदनाश्वानपि ...। प्रकामपीतसंभुक्तसंकाशो वालिनन्दनः RāmC. 11. 27; वेयिवदनाश्वदनूचानन् SiddhaHe. v. 2. 3; स तथेयुषेऽनाशुष आश्वदत्त द्रविणानि DvyāśraKā. 12. 2; राजा प्रतीक्ष्य मुनिमेकसमामनाश्वान् संभोज्य साधु तमृषिं विसृजन् प्रसन्नम्। ... त्वयि ततोऽपि दृढं रतोऽभूत् Nārāy. ix. 33. 10; *m.* a type of Jaina ascetic (*lit.* not taking food as a religious vow) व्यलीकवेदप्यहतेऽप्यादिदिज्वलत्यनाश्वानपि मन्युना तपन् RāghPāṇ.(Dha.) 1. 7 (comm. अनाश्वान् तपस्वी); यतयोऽनेकधा स्मृताः। निरुक्तिन् ... तेषाम् ... निबोधत।... योऽस्तित्येनेष्वविश्वस्तः शाश्वते पथि तिष्ठितः। समस्तसत्त्वविश्वास्यः सोऽनाश्वानिह गीयते YaśasCam. ii. 411. 18; i. 50.6.

अनाश्वसत् (an–āśvasat) *adj.* not trusting, not relying upon क्षितो इत्यावल्गः ... शांभवो वः शराग्निः।... निदर्शनेऽस्मिन्ननाश्वसतः(?न्तः) समाम्नातलक्षणोदाहरणसंगतिं सम्यक् समीहमानाः समर्पणा उदाहरणान्तरविन्यासं? रसव)दलंकारस्य व्याचख्युः VakroJī. 164. 5.

अनाश्वसनीय (an–āśvasanīya) *adj.* which cannot be relied upon or believed नन्वेवमनुमानमनाश्वा(?श्व)सनीयमेव, न। तदभावात् Kāśi. ii. 41.24 (*on* 5(2). 30); यत्र तु अनुष्ठेयार्थे वृत्त्यन्तरस्यापि योग्यं पदं नास्ति तत्र तद्वाचकस्य पदस्याध्याहारः। यथा 'इषे त्वे'ति मन्त्रे 'छिनद्मी'ति पदस्य ... तत्र अनाश्वसनीयस्य ... कस्यचिदर्थस्याभावात् ŚivārkaMaDī. i. 32. 11 (*on* i. 1. 1)

अनाश्वसनीयत्व (anāśvasanīya–tva) *n.* the state of being unreliable उत्स्वप्नायितकुनाक्षरादीनां तु विशिष्टतात्पर्यविरहेण बोधकत्वेऽप्यनाश्वसनीयत्वात् NyāyPari. 362. 3.

अनाश्वसनीयार्थ (anāśvasanīyārtha) *adj.* whose object is unreliable भावनाबलपरिनिष्पन्नमपि ज्ञानम् अनाश्वा(?श्व)सनीयार्थमेव, अभूतस्यापि भाव्यमानस्यापरोक्षवत् प्रकाशात् Kāśi. i. 218. 4 (*on* 4. 29)

अनाश्वस्त (an–āśvasta) *adj.* not trusting, not relying upon (आश्वस्तस्यैव तत्र अनुष्ठानयोग्यत्वात्, अन्यस्य तु ... अप्रमाणमेव ... शब्दनम्) अन्यस्य अनाश्वस्तस्य, तदिति शेषः Bhāsk. ii. 86. 15 (*on* ii. 3.2); 'उपवासो यदा नित्यः ... आघ्राय पितृसेवितम्।' इति अनेन हि भोजनकार्ये आघ्राणं विधीयते। अन्ये त्वत्रानाश्वस्ताः BālamBha. i. 540. 2 (*on* 1. 249)

अनाश्वस्तता (anāśvasta–tā) *f.* the state of being one who does not trust शङ्कायां हि स्वभार्यास्वप्यनाश्वस्त(ता)मेव दर्शयन्नाह JayaMa. 172. 11 (*on* 2. 9)

अनाश्वास (an–āśvāsa) *m.* non-trust, lack of faith, non-credibility, unreliability (implying doubt or ignorance) प्रमाणविरुद्धं वचनमप्रमाणम् ।... तत्सामान्यादग्निहोत्रादिचोदनास्वप्यनाश्वासः ŚābaBh. 41.7 (*on* i. 1. 5); वृत्तं प्रमाणं बाधकम्। अवृत्तबाधने सर्वत्रानाश्वासः PramāVāSvopVṛ. 8.10; 113. 24; न हि ये यथा यमर्थं विवक्षन्ति ते तथैव तमनु(तिष्ठन्ति) ... लोके सर्वत्रानाश्वासात् HetuBiṬ. 2. 16; 155.19; ननु नो विपरीतार्था धीः प्रतीतिविरोधतः। अनाश्वासाच्च रजतप्रत्ययो रजते स्मृतिः VibhraVi. 58; BrahmSi. 136.19; प्रमाणं श्रुतमर्थेषु सिद्धं द्वीपान्तरादिषु। अनाश्वासं न कुर्वीरन् Laghīya. 1. 26; 1. 27; यो विधिमुत्क्रम्यार्थवादं प्रार्थयते नूनमस्य विधावविश्रम्भः। तत्र चेदनाश्वासोऽर्थवादे कुतः प्रत्यय इति TantrVā. 39.12 (*on* i. 2.21); आत्महाने वा सदसतोरितरेतरापत्तौ सर्वत्रानाश्वास एव TaiUBh. 276.7 (*on* 2.8); अतोऽप्यनाश्वासः शास्त्रार्थानुष्ठाने BṛĀraUBh. 135. 7 (*on* i. 4. 10); मा गमस्त्वमनाश्वासं स जीवं गतवानिति MahāP. 7.165; नन्वेवमपि मानत्वव्याघातः स्याद् क्रियाविधेः। वेदान्तेष्वप्यनाश्वासस्तथा च प्रसजेद् ध्रुवम् BṛĀraUBhVā.(Sambandha.) 161; आयातस्तर्ह्यनाश्वासस्त्वदभ्युपगतावपि BṛĀraUBhVā.(Sambandha.) 389; धर्मादिहेतुकं येऽपि परिणामं प्रचक्षते। सम्यग्ज्ञानेऽपि तुल्यत्वादनाश्वासस्तथा सति BṛĀraUBhVā. i. 4.455; i. 4.1477; iv. 3.568; पक्षान्तराभ्युपगमेनापि प्रत्ययस्थाने पूर्ववदनाश्वासो यथा तथाभिधीयते NaiṣkaSi. 39. 2; दैव्याः क्रियाया अवसरः। अथ तु तस्यामपि व्यभिचारित्वादनाश्वासः सत्यशपथेन व्यवस्था कार्या ManuBh. ii. 75.26 (*on* 8.3); नासत्ख्यातिरनाश्वासान्नान्यथाख्यातिरप्यसौ IṣṭaSi. 41. 7; 41.14; चित्रादिवचसामेवमपचारस्य दर्शनात्। अनाश्वासोऽग्निहोत्रादिचोदनास्वपि जायते NyāyMañ. i. 249. 11; ii. 125. 9; अनाप्तवाक्यं च वक्तुः प्रमाणमूलमपि श्रोतुरप्रमाणमेव, विसंवादबाहुल्यादनाश्वासात् Kāśi. i. 113. 12 (*on* 2.102½); i. 5. 15 (*on* 1. 12); i. 121. 4 (*on* 2. 114-115); iii. 17.22 (*on* 5(4). 12); iii. 174. 10 (*on* 5(7).42); इत्थंभूतस्य तन्त्रस्य विप्लवं यदि शङ्कसे। सर्वत्र स्यादनाश्वासः ĀgaPrā. 66.16; न च ज्ञानस्यार्थव्यभिचारे सर्वत्रानाश्वासः NyāyKa. 181. 17; अयथार्थधीपक्षे धीतोऽर्थनिश्चयरूपोऽनाश्वासः स्यात् NayaVi. 94.1 (*on* i. 1.5); मिथ्याप्रत्ययस्य प्रतिबन्धिचारे सर्वप्रमाणेष्वनाश्वासः Bhām. 18. 11 (*on* i. 1.1); न चैकस्य प्रतिबन्धिचारे सर्वप्रमानेऽनाश्वास इति युक्तम् Bhām. 75.2 (*on* i. 1. 3); 333.16 (*on* ii. 1.3); अनशिष्टस्य कर्मणः सांप्रतिकस्य च फलक्रमानियमादनाश्वासो लोकस्य प्रसक्तः YogBh. 69. 8 (*on* 2. 13); TattvVai. 69. 24 (*on* 2.13); 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति श्रुतौ खादेच्च न मांसमित्येष नार्थ इत्यत्र का प्रमेति प्रसज्यते। तत्रापि न कश्चिदियत्तेत्यनाश्वासः Loc. 58. 7 (*on* 1.21); एतमेव च कालक्रमभाविशास्त्रोच्छेदभाविनमनाश्वासमाशङ्कमानैर्महर्षिभिः प्रतिविहितम् NyāyKuA. i. 133. 3; i. 73. 9; 'पौर्वापर्यापरामृष्टः शब्दोऽन्यां कुरुते मतिम्' इति न्यायेन अनाश्वासात् NyāyKuA. ii(2).70. 7; अप्रामाण्यम् अनाश्वासाद् दृष्टम् NyāyRa. 79. 10 (*on* 2. 110); तत्सामान्यादग्निहोत्रादिचोदनास्वप्यनाश्वास इति भाष्योक्तं प्रयोगं दर्शयति NyāyRa. 497.17 (*on* 5(9). 15) 655. 12 (*on* 5(15).61); तुल्यश्चायमनाश्वासो कुम्भज्ञानेऽपि, कुम्भोऽयमिति बोधोदयेऽपि किमसौ स्मृत्यविकल्पः किं वैकानुभवरूप इति दुर्वारत्वाद् NyāyMa. 76. 1; यथोक्तश्रुत्यर्थस्य अनेकस्मृतिषु परिग्रहदर्शनाद् नानाश्वासः PrakaVi. 954. 28; विष्णुकाम्यायनस्मृत्योश्च ... अनाप्तप्रणीतत्वं शङ्कमानस्य स्वकीयब्राह्मणत्वेऽप्यनाश्वासः स्यात् VedāntKa. 487. 10 (*on* iii. 4.18); श्रुतिप्रामाण्ये ... यदि तत्रानाश्वासः, तदा कैव कथा...पौरुषेयेषु वाक्येषु ŚatDū. 191. 27; न च क्वचिद् स्मृतीनामप्रामाण्ये सर्वत्रानाश्वासः NyāyPari. 404. 4; अनादिवेदप्रवाहप्रामाण्यावधारणेऽपि तन्निर्वाहकेतरानपेक्षमूलभूतप्रमाणाभावेनानाश्वास एव TattvCin. iv(1). 370. 3; यच्चोक्तं विषयव्यभिचारे ज्ञानस्य सर्वत्रानाश्वास इति तदौत्सर्गिकम् NyāySu. (Ja.) 48A. 12 (*on* i. 1.1); दोषाभावादिज्ञानरूपपरीक्षायामनाश्वासे वेदस्यापौरुषेयत्वेन ... सिद्धान्तमभिप्रेतार्थे उपक्रमाद्यनुपपत्तिज्ञाने चानाश्वासः स्याद् NyāyAmṛ. 109B. 6; AdvaiSi. 365. 2; 'ततो वै स प्रजाः पशूनसृजत' इति श्रुतिरेवात्र

प्रमाणम् ··· इति चेत् । न । देवस्य प्रजापतितया अनाश्वासात् YuktiSneha. 109.28 (*on* i. 1.5); 3.35 (*on* i. 1.1); 116.31 (*on* i. 1.5); वेदप्रामाण्येऽप्यनाश्वासः स्यादित्याशङ्कां निराकरोति ŚivārkaMaDī. i. 155.10 (*on* i. 1.3); शान्तं पापम् । कथमनाश्वासः KamVa. 4.44(1); अनाश्वासान्मन्वाद्युक्तं सर्वमेवाप्रमाणं भवेत् MīmāKau. i. 12.18 (*on* i. 3.3); i. 22.11 (*on* i. 3.4); वामदेवादीनां मुक्तत्वश्रवणं काल्पनिकाभिप्रायं, नित्यमुक्तत्वाभिप्रायं वा। न चानाश्वासः। श्रुतेः प्रामाण्यात् SiddhāTa. 4.23; पदपदार्थसंबन्धस्य ··· च स्वरूपतो न वाक्यार्थज्ञानकारणता अपि तु ज्ञानस्यैवेति तदवगमाय ··· क्वचिदाप्तपुरुषस्याप्युपयोग इति न तावन्मात्रेण सर्वत्रानाश्वासो युक्तः BhāṭṭDī. i. 7.6 (*on* i. 1.4); i. 323.10 (*on* iii. 4.8); iii. 296.11 (*on* x. 4.16); कथं मदनेऽप्यनाश्वासः JānaPa. 3.27(4); अस्मास्वपि तत्रभवतोरनाश्वासः JānaPa. 4.46(1); कथमनङ्गशेखरेऽप्यनाश्वासो वेश्याजनस्य ŚṛṅgāSar. 68(1) [AnekāK. 878 gives *anāśvāsa* as a synonym of *apahnava*]

अनाश्वास (an-āśvāsa) *adj.* [*f.*-ā] A not having reliability, unreliable कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान्। आपाययति गोविन्दपादपद्मासवं मधु BhāgP. i. 18.12; मित्रपक्षमनाश्वासं भार्यां चाप्रियवादिनीम्।··· दूरतस्त्यजतः सुखम् Subhāṣi. 2818; B not having consolation ब्रह्मविद्यामनुपदिश्य प्रोषुषि गुरौ तदलाभादनाश्वासमुपकोसलमुज्जीवयितुम् ··· गुरोरग्नयस्तस्मै ब्रह्मस्वरूपमात्रं तदङ्गभूतां चाग्निविद्यामुपदिश्य BrahmSūBh.(Rā.) 253.2 (*on* i. 2.15); हा हताहमनाथाहमनाश्वासा निरास्पदा । दुःखाद् दुःखे निमज्जामि YogVā. iii. 71.7.

अनाश्वासकारण (anāśvāsa-kāraṇa) *n.* reason for the lack of trust धर्मादिकम् ···। शक्यते तु बुद्धर्षभजिनकपिलपशुपतिप्रभृतिप्रणीतागमादवधारयितुम्। न च ·· तेष्वनाश्वासकारणमस्ति NyāySu.(Ja.) 82A.11 (*on* i. 1.1)

अनाश्वासगृहीत (anāśvāsa-gṛhīta) *adj.* overcome by lack of self reliance (असत्कार्यरतोऽधीरः) अधीरः अल्पेऽप्युपघातहेतौ अनाश्वासगृहीतः DīpKa. 87.21 (*on* 3.138)

अनाश्वासता (anāśvāsa-tā) *f.* the state of having no reliability, non-credibility तत्सदृशमिदमित्यस्या अपि बुद्धेर्मृषात्वात्, सर्वत्रानाश्वासतैव BṛĀraUBh. 15.18 (*on* i. 2.1)

अनाश्वासनिरसन (anāśvāsa-nirasana) *n.* removal of non-credibility न ज्ञानत्वावान्तरविशेषमनाश्वासनिरसनक्षममीक्षामहे NyāySu.(Ja.) 43B.5 (*on* i. 1.1); अनाश्वासनिरसनोपायो न ज्ञानेषु कश्चिद् विशेषोऽस्तीति निरस्तम् NyāySu.(Ja.) 48B.1 (*on* i. 1.1)

अनाश्वासनिवृत्ति (anāśvāsa-nivṛtti) *f.* cessation of non-credibility अनाश्वासनिवृत्तये तद्विधं ज्ञानमेवापेक्ष्यते BrahmSi. 144.16.

अनाश्वासप्रसङ्ग (anāśvāsa-prasaṅga) *m.* undesired contingency of unreliability or non-credibility अनुमानविषयेऽपि प्रत्यक्षानुमानविरोधदर्शनादनाश्वासप्रसङ्ग इति चेत् PramāVāSvopVṛ. 9.11; कचिद् गौणः शब्दो दृष्ट इति नैतावता शब्दप्रमाणकेऽर्थे गौणी कल्पना न्याय्या, सर्वत्रानाश्वासप्रसङ्गात् BrahmSūBh.(Śaṅ.) 44.10 (*on* i. 1.7); 617.12 (*on* iii. 3.1); BṛĀraUBh. 15.15 (*on* i. 2.1); कृतविनाशे सति सर्वत्र अनाश्वासप्रसङ्गः GītāBh.(Śaṅ.) 396.4 (*on* 13.23); न हि विरुद्धार्थपदसमभिव्याहारे पदानामभिधानमेवान्यथा नीयते, सर्वशब्दार्थेष्वनाश्वासप्रसङ्गात् ĀgaPrā. 36.9; ĀtmaSi. 29.4; न हि कर्मण्यनुशिष्टा द्वितीया ··· करणमभिधत्त इति युक्तमभिधातुम् । सर्वशब्देष्वनाश्वासप्रसङ्गात् Kāśi. ii. 12.29 (*on* 5(1).15); स्वगोचरव्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसङ्गः Bhām. 15.7 (*on* i. 1.1) = TātpaṬ.(Vā.) 88.9 (*on* i. 1.1); NyāyMa. 60.9; TattvPradī.(Ci.) 61.5; अनेकशाखागतेतिकर्तव्यतापूरणीयत्वादेकस्मिन्नपि कर्मण्यनाश्वासप्रसङ्गादिति चेत् NyāyKuA. i. 132.7; NyāyVārPari. 495.6; न च नरका एव न सन्ति । स्वर्गेऽप्यनाश्वासप्रसङ्गात् Kiraṇā. 57.3; PrakaVi. 539.22; अतिशङ्कायां वेदेऽप्यनाश्वासप्रसङ्गात् ŚrutaPra. ii. 327.28 (*on* ii. 2.42); ii. 356.5 (*on* ii. 3.17); नैतावता सा (ज्ञप्तिः) निवर्तते । इदानींतन्या ज्ञप्तेरेव तत्र प्रमाणत्वात्। इतरथा वर्तमानावभासत्वेऽप्यनाश्वासप्रसङ्गात् NyāyKu. 69.9; द्वितीयपक्षे ··· दोषवत्कर्तृकत्वेनानाश्वासप्रसङ्गः SyādvāMañ. 11(212); न च तन्निरपेक्षम्, श्रुतिवदेव तव तत्राप्यनाश्वासप्रसङ्गात् ŚatDū. 192.1; NyāyPari. 479.22; अभ्युपगतार्थद्वयेऽन्यतरार्थेऽप्रामाण्यप्राप्तावन्यार्थेऽनाश्वासप्रसङ्गात् TattvPrakā. 107A.5 (*on* ii. 3.1); NyāySu.(Ja.) 91B.8 (*on* i. 1.1); बाधितार्थस्मृतिकर्तुः भ्रमप्रमादादिदोषकल्पनादविरुद्धस्मृत्याचारेष्वप्यनाश्वासप्रसङ्गः VīraMi.(Paribhāṣā.) 28.23.

अनाश्वासप्रसञ्जन (anāśvāsa-prasañjana) *n.* undesired contingency of lack of trust यदपि (विषयव्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसञ्जनं तद् बोधकभावेन स्वतःप्रामाण्यं नाव्यभिचारेण) इति व्युत्पादयद्भिर्वृद्धैः परिहृतम् NyāyMa. 75.11.

अनाश्वासम् (anāśvāsam) *adv.* without consolation किमर्थं कोपमाकार्षीर्भक्ते भृत्ये कपीश्वरे । बहुकालमनाश्वासं दुःखमेवानुभूतवान् AdhyāRā. iv. 5.43.

अनाश्वासयत् (an-āśvāsayat) *adj.* not consoling ये पुनः ··· क्षत्रशब्दविडम्बकाः ··· दुः(ख)परंपराधीनमातापितृप्रधानमपि स्वजन(मा ? मना)श्वासयन्तः AvantiKa. 237.4.

अनाश्वासविषयत्व (anāśvāsaviṣaya-tva) *n.* the state of not being an object of reliance आगमोऽस्तीति चेन्न — भावनामात्रमूलत्वेन तस्याप्यनाश्वासविषयत्वात् NyāyKuA. i. 140.2.

अनाश्वासश्वशुरकुल (anāśvāsa-śvaśurakula) *n.* non-believing family of the in-laws तूष्णीं स्थितवति मेघनादे तत्कालसमुत्प्रेक्षितानाश्वासश्वशुरकुलवैक्लव्याद् विलीयमानेव शुचा ·· कथं कथमपि चिरात् कादम्बरी प्रत्युवाच Kād. 327.23.

अनाश्वासादिदोष (anāśvāsādi-doṣa) *m.* defect like unreliability etc. ख्यातेः यथार्थत्वनियमाभावेऽपि अनाश्वासादिदोषाभावात् यथार्थत्वाग्रहो व्यर्थः IṣṭaSi. 46.9.

अनाश्वासापत्ति (anāśvāsāpatti) *f.* undesired contingency of non-credibility न च सा (प्रतीतिः) समवायोत्पत्तिविनाशकृतेति वाच्यं समवायस्य तत्रानुल्लेखात् तस्य नित्यत्वाच्च घटादेरप्यनित्यतायामेवं सत्यनाश्वासापत्तेः Upask. 286.3 (*on* vii. 1.6); अग्निहोत्रादिश्रुतीनामपि वर्णस्वरूपस्य प्रत्यक्षेणावगतावपि अनादिपुरुषागतत्वस्याध्यापकपुरुषाधीनत्वेनानाश्वासापत्तेः MīmāKau. i. 22.13 (*on* i. 3.4)

अनाश्वासापात (anāśvāsāpāta) *m.* undesired contingency of non-credibility मोक्षपर्यन्ता परीक्षास्तीति फलपर्यन्ताद्वैतश्रुतावप्यनाश्वासापातात् Nyāyāmṛ. 137B.6.

अनाश्वासिक (an-āśvāsika) *adj.* unreliable, incredible यदर्थं कर्मसंसर्गः ···। तदनाश्वासिकं मोघं विनाशि चलमध्रुवम् MahāBhā. xii. 211.21 (BhārBhāDī. अविश्वसनीयम्); अनित्या भिक्षवः सर्वसंस्कारा अध्रुवा अनाश्वासिकाः Divyāva. 129.2; नैव हि कश्चित्फलात् परिहीणः कालं करोति ।··· अन्यथा ह्यनाश्वासिकं ब्रह्मचर्यं स्यात् AbhidhKoBh. 378.9 (*on* 6.60); Sphuṭā. ii. 22.16 (*on* 2.14); अनित्येषु ··· धर्मेष्वध्रुवेष्वनाश्वासिकेष्वनुनयचित्तमुत्पादयेत् ŚikṣāSa. 150.9.

अनाश्वासिकता (anāśvāsika-tā) *f.* unreliability [DBHS.]

अनाश्वासिन् (an-āśvāsin) *adj.* dumb-founded (*lit.* not even breathing) तमाप्तो विरहातुरम्। सुहृन्मन्थरको नाम ··· अब्रवीत् । सखे किम् ··· तिष्ठस्यालिखितो यथा।·· अनाश्वासी न शृणोषि न पश्यसि KathāSaSāg. xii. 5.290.

अनाश्वास्य (an-āśvāsya) *ger.* not having consoled यदि ह्यहमिमां देवीं शोकोपहतचेतनाम् । अनाश्वास्य गमिष्यामि दोषवद् गमनं भवेत् Rāmā. v. 28.8; हा नाथ राजन् भवता मामनाश्वास्य दुःखिताम्।··· स्थीयते कथम् MārkP. 8.182.

अनाश्वास्य (an-āśvāsya) *adj.* unreliable तन्मूलान्येव वाक्यान्यप्यन्यत्र दृश्यमानान्यनाश्वास्यमूलानि BālamBha. i. 500.8 (*on* 1.225)

अनाश्विन (an-āśvina) *adj.* other than the (*śastra* addressed) to the Aśvins तस्या एतत् सहस्रं वहतुमन्वाकरोद् यदेतदाश्विनमित्याचक्षतेऽनाश्विनं हैव तद् यदर्वाक्सहस्रम् AitBr. 17.1(452)

अनाष्टमिक (an-āṣṭamika) *adj.* not studying on (both) the eighth lunar days of every month माण्डूकिरेषां तनयाश्च पौत्रा महाशिषोऽनाष्टमिका वितेरुः VāsuVi. 1.64 (comm. आष्टमिकः अष्टम्याम् अधीतवान्)

अनाष्ट्र (a-nāṣṭrá) *adj.* free from evil spirit or destruction, free from devilry, safe, secure अनाष्ट्रं नः पितरस् तत् कृणोत यूपे बद्धं प्र विमुच्यमा? यद् अन्नम् AV.(P.) v. 28.2; VaitāSū. 10.17; त्वं वशी ··· सत्यधर्मा गवेषणः। अनाष्ट्रस् त्वं सर्वास्ती? त्वं भ्रातृव्याणां श्रियं रुह AV.(P.) x. 2.5; तस्याभयेऽनाष्ट्रे निवाते यज्ञमतन्वत ŚatBr. I. i. 1.17; यज्ञमुखादेवैतन्नाष्ट्रा रक्षा॰स्यतोऽपहन्ति।··· यथायं पुरुषः ··· अन्तरिक्षमनुचरति तद् ब्रह्मणैवेतदन्तरिक्षमभयमनाष्ट्रं कुरुते ŚatBr. I. i. 2.4; अथाभयेनानाष्ट्रेण हरन्ति ŚatBr. II. i. 4.18 = III. vi. 3.11; अथाभयेनानाष्ट्रेण पशुं नयन्ति ŚatBr. III. viii. 1.9; III. iii. 4.8; IV. i. 1.20; ŚatBr.(K.) II. i. 2.6; V. i. 1.16; यथायमुरुरभयोऽनाष्ट्रः सूर्याय पन्था एवं मेऽयमुरुरभयोऽनाष्ट्रः पन्था अस्तु ŚatBr. IV. iv. 5.4; ŚatBr.(K.) V. v. 3.3; विजितेऽभयेऽनाष्ट्रे सूयाऽइति ŚatBr. V. ii. 3.7; ŚatBr.(K.) VII. i. 1.6.

अनास् (an-ā́s) *adj.* mouthless (i.e. speechless) अनासो दस्यूँरमृणो वधेन RV. v. 29.10.

अनास (a-nāsa) *adj.* [*f.*-ā] 1 noseless मारुतात्मजः । स ददर्शाविदूरस्था राक्षसीः ··। अनासा अतिनासाश्च तिर्यङ्नासा विनासिकाः Rāmā. v. 15.2;

अनासः स पुरोत्पन्नस्तस्माद् विकृतरूपधृक् BrahmP. 107.3; सः। अथादो ह्यकरोऽनासो ह्यकर्णः PadmP. ii. 62.30; ii not having a projecting portion सायतं समुखपट्टिकम् ··· अनासम्। ··· पार्श्वयोर्बुद्धिरिखं खलु कोष्ठम् IśānŚiPa. ii. 28.36.

अनासक्त (an-āsakta) *adj.* 1 not attached, detached मनो ब्रह्मणि धारयन्। विहरिष्याम्यनासक्तः MahāBhā. xii. 171.32; भाव्यं तत्पुत्रपौत्रैश्च ···। धूत[दे]रयाधनासक्तैः EI. xi. 192.19; गृहस्थश्चाप्यनासक्तः स मुक्तो योगसाधनात् ŚivS. 5.266; (रामः) अनासक्तोऽपि विषयान् बुभुजे प्रियया सह AdhyāRā. vii. 4.15; PrabhāC. 3.17; (भगवान्नाभिनन्दनः ··· जगत्स्वामी) उपास्यमानोऽनासक्तः, संगीतं दिव्यमैक्षत TriṣaŚaPuC. i. 2.734; i. 2.882; iii. 4.7; विषयेषु गरिष्ठोऽपि रागः प्रायो विलीयते। अनासक्तस्य विषयान् यथार्हमुपयुञ्जतः BhaktiRaSi. i. 2.51; (with Loc.) आचार्यस्तु दृष्टादृष्टभोगेष्वनासक्तः UpadeSā. 10.6; KulārT. 13.48; निर्गत्य सदनादनासक्तः सौख्ये कचिदपि पुरा जन्मनि कृती।-- खण्डेन्दोश्चिरमकृत पादार्चनमसौ Vāgbhaṭa. 3.7; विषयेषु मनागप्यनासक्ताः।-- ते शुद्धात्मानः ··· सिध्यन्ति TātpaVṛ. 364.19 (*on* 3.73); कस्मान्न दयसे पतिन्। भक्तमन्यास्वनासक्तम् BalāC. 29.6; वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषु च। तासु तेष्वप्यनासक्तः साक्षाद् भर्गो नराकृतिः Kuval. 20(24); तव चरणसेवारसभरेऽप्यनासक्तं चित्तं भवति बत विष्णोः Nārāy. i. 3.2; VīraMi. 836.16 (*on* 3.59); ii not stuck गव्यं च। ··· अनायमश्मिमात्रसंयोगाद् पिण्डीभूतमनासक्तं च ManuBh. i. 420.23 (*on* 5.6); iii not interested in (चुम्बके ज्ञानलुब्धे च न प्रकाशयन्) चुम्बक इति। श्रीविद्यामूलमात्रजपपरस्तदीयकर्मजालज्ञानरहस्यज्ञानजालयोरनासक्तश्चुम्बकस्तदनुष्ठानरतिहीनः SetuBa. 348.30.

अनासक्तमनस् (anāsakta-manas) *adj.* whose mind is detached राजा ·· अनासक्तमनाः सौख्यं सिषेवे विषयोद्भवम् PārśvC. 2.36; अभुङ्क्त विपुलान् भोगाननासक्तमनाः प्रभुः MadhuVi. 1.72.

अनासक्तवत् (anāsakta-vat) *adv.* as if detached अन्तर्बहिस्तुल्यचेष्टं सदा सस्मितभाषणम्। गृहेऽनासक्तवत् सन्तं स्वयं योग्यो गुरुं भजेत् BṛDharmaP. i. 4.8.

अनासक्ति (an-āsakti) *f.* non-attachment अलोभः कतमः। भवे भवोपकरणेषु वा अनासक्तिः AbhidhSa. 6.14; इष्टेऽर्थेऽनासक्तिर्विरुद्धे चाप्रवृत्तिरिन्द्रियजयः NītiVā. 3.8; (क्षयी रोगी ··· प्रियकलत्रः ·· विलज्ज इत्यगम्याः) प्रियकलत्र इति तस्यान्यत्रानासक्तेः नाप्यर्थदः JayaMa. 311.6 (*on* 1.6); ParāśuKS. 10.78 (286.9)

अनासङ्ग (an-āsaṅga) *adj.* 1 free from attachment, detached गुणागुणमनासङ्गमेककार्यमनन्तरम्। एतद्ब्राह्मण ते वृत्तमाहुः MahāBhā. iii. 203.49; 2 not having constant application (भगवद्रतिः) साधनौघैरनासङ्गैरलभ्या सुचिरादपि BhaktiRaSi. i. 1.18; *m.* non-attachment शम इन्द्रियसंनिकृष्टेऽपि विषयेऽनासङ्गः VīraMi. 884.27 (*on* 3.159)

अनासञ्जनीय (an-āsañjanīya) *adj.* not to be added or applied चन्द्रो यथा स्वतः शुभ्रत्वादनासञ्जनीयधावल्यस्तथा नखाः स्वतोऽरुणत्वादनासञ्जनीयारुण्याः CitraMī. 48.14.

अनासत्ति (an-āsatti) *f.* non-proximity फलवन्ति हि वेदवाक्यानि, फलवत्क्रतुप्रमितिप्रत्यासत्तेः। अफलानि सूत्राणि तेषामनासत्तेः Kāśi. i. 15.17 (*on* 1.38)

अनासन (an-āsana) *n.* absence of sitting अभिजुहुयात् ·· अजकर्णे ···। अभोजनं तस्य। कुशस्तम्बे वा अनासनं तस्मिन् KātyŚS. xxv. 4.7; अनासनं च प्रथमं चालनं चासनस्य च ··· गन्तुकामानां चिह्नानीत्युपलक्षयेत् BhāvPra.(Śā.) 117.1 (5); *adj.* i left without a seat सुहृदः ···। समायाताश्चतुःषष्टिस्तावन्त्येवासनान्यपि। यक्षीकामुकमालोच्य पञ्चषष्टमनासनम्। ··· लज्जितोऽस्मि BṛKathāŚloSaṁ. 17.63; ii not occupying a seat अनासनः शयानो वा ··· न जपेत् LiṅgaP. i. 85.161 = ŚivaP. vii(2). 14.51 (561A. 4)

अनासनयोगविहित (an-āsanayogavihita) *adj.* not settled on a seat (गुरौ) तिष्ठति च (शिष्यः) नासीतानासनयोगविहिते ĀpaDS. i(2). 6.26.

अनासनस्थ (an-āsanastha) *adj.* who has not occupied a seat अस्नात्वानासनस्थो वा ··· कुलपूजां न चाचरेत् KulārT. 11.9.

अनासनस्थित (an-āsanasthita) *adj.* who has not occupied a seat यद्दत्तं विधिवर्जितम्। अनासनस्थितेनापि तज्जलं रुधिरायते VedavyāSm. 3.26.

अनासन्न (an-āsanna) *adj.* i not very near, not very close, being at a distance आस्तावं प्राप्यानासन्नो यजुषोपविशेद् प्रस्तोतारं प्रति LāṭyāŚS. v.10.20 = DrābyŚS. xv. 2.20; (ब्रह्मचारी उपसीदेत) अनासन्नोऽनतिदूरे च ĀpaDS. i(2). 6.21; HirŚS. xxvi. 2.44 (31.4); (अमात्यैः) आसन्नैः सह कार्याणि पश्येत् अनासन्नैः सह पत्रसंप्रेषणेन मन्त्रयेत ArthŚā. i. 76.7 (1.15); हृदयस्थमनासन्नमकामं त्वाम् ··· अजरं विदुः RaghuVa. 10.19; अनासन्ननिःसहनिष्पन्दनिद्राक्लान्तकतिपयकर्णधारम् ··· उर्वीपतिकुमारमद्राक्षम् TilaMañ. 276.15; अनासन्नेष्वर्थेषु दूतो मन्त्री NītiVā. 13.1; आसन्नानासन्नयोर्धिया वायवीयाः प्राप्त्यनपेक्षाः NayaVi. 237.6 (*on* i. 1.17); पर्वताद्यासन्नम् अनासन्नमप्यूषरं मूषिकाद्यासं च क्षेत्रं वर्जयेत् SmṛtiCan. iv. 434.15; कुतः सुतः पुरुस्त्वस्य वयस्यः परमेशितुः। विमानान्वित एवायमनासन्नेऽपि पुष्पके Surath. 3.29; ii (person) not closely related तदश्म सपत्रं वरूतोयेनाप्लुत्य धान्याक्षतं सतिलमालभ्य ततो बर्हिं सुवर्णं गोमयं च स्पृष्ट्वा तत्र स्थित्वानासन्नान् विसृज्य वृद्धाग्रं गृहं प्रविश्य लोकयात्रामासीरन् VaikhāGS. 5.6; iii remote (in time) कालमासन्नमनासन्नं च जानते YogŚā. 5.196; आसन्नकाले पृच्छ्यमानेऽर्थे ··· लङ्लिटौ स्तः। ·· अनासन्ने तु कंसं जघान किम् SiddhāKan. 471B. 2 (*on* iii. 2.117); iv (syntactically) not uninterrupted, not contiguous अनासन्नमपि आसन्नतादशायाम् आसन्नत्वभ्रमेण वा अन्वयबोधसमर्थमेव TattvCin. iv(1). 235.2; iv(2). 378.7; वाक्येनान्वयानुभवजनने आकाङ्क्षायोग्यतासत्तिज्ञानं सहकारि ··· गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादेरनासन्नत्वेन शाब्दबोधानुदयात् BhāṭṭCin. i. 50.4 (*on* i. 1.4)

अनासन्नक्रियेच्छा (anāsanna-kriyecchā) *f.* desire to undertake an action in future अनासन्नक्रियेच्छा संकल्पः PadārthaSaṁ. 261.11 (NyāyKa. अनागतस्यार्थस्य करणेच्छा)

अनासन्नतरुशाखा (anāsanna-taruśākhā) *f.* tree-branch which is not very near (i.e. which is not within one's reach) वादित्राणामारवेण विद्रावितानि प्रासादनासन्नतरुशाखाशिखासु कृतस्थितीनि नाद्यापि निकटीभवन्ति शिखराग्रकोटरकुलायशायीनि पाराप(?व)तपतत्त्रिकुलानि TilaMañ. 157.22.

अनासन्नत्व (anāsanna-tva) *n.* the state of not being (syntactically) contiguous सामान्यतो हेतुहेतुमद्भावानभ्युपगमे चक्रिणमहं पूजयामीत्यादौ चक्रस्येत्यर्थे स्वान्यत्रान्याकाङ्क्षासत्त्वादन्वयापत्तिः। न चानासन्नत्वान्नान्वयः VaiyāBhū. 172.18 (*on* 32)

अनासन्नदेशस्थ (anāsannadeśa-stha) *adj.* staying in a remote place अनासन्नदेशस्थेन कथमिह स्थितायास्तेन सह समागमो भावी भवत्याः इत्येतदेवाविज्ञातमास्ते इत्यभिहिता TilaMañ. 347.8.

अनासन्ननाश (anāsanna-nāśa) *adj.* whose ruin is not near न ह्यनासन्ननाशानामुदेति मलिना मतिः RāmāMañ. 150.8.

अनासन्नपद् (anāsanna-pad) *adj.* who has not resorted to (your) feet त्वमेकः क्लेशदस्तेषामनासन्नपदां तव BhāgP. iii. 20.27.

अनासन्नप्रियत्व (anāsannapriya-tva) *n.* the state of being one whose lover is not near (her) अनासन्नप्रियत्वाद्वासकसज्जाया न स्वाधीनपतिकात्वम् Avalo. 48.15 (*on* 2.23)

अनासन्नबिन्दुपात (anāsanna-bindupāta) *m.* dropping a drop from high above नेत्रमपाङ्गेऽभ्यञ्जनं कृत्वा वामहस्तेनोन्मील्य दक्षिणहस्तेन शुक्त्यवसक्तया पिचुवर्त्या दश द्वादशाष्टौ वा बिन्दून् कनीनकदेशे ह्यङ्गुष्ठादवसेचयेत्। एवमनासन्नबिन्दुपातेनाक्षिताडनाद् रागादयो जायन्ते AṣṭāSaṁ. i. 163.10 (1.32)

अनासन्नमोक्ष (anāsanna-mokṣa) *adj.* whose liberation is not near, whose emancipation is very far एवंविधा धियः। न ह्यनासन्नमोक्षाणां भवन्ति भविनां क्वचित् TriṣaŚaPuC. ii. 1.163.

अनासन्नवर्तिन् (anāsannavart-in) *adj.* not being near (स्वनाभकुशौ) दुष्टभूपालवंशानामप्यनासन्नवर्तिनाम्। कुर्वाणावूष्मणा ग्लानिम् PadmP.(Ra.) 100.65; अनासन्नवर्तिष्वपरयानपात्रेषु यानमत्यन्तशक्लेशमिति मन्यमानस्य मे मनाङ्मन्दायते चित्तम् TilaMañ. 143.6.

अनासन्नाग्नि (anāsannāgni) *adj.* who does not have the fire near him, who is away from the fire स्वेद्यमानस्य वाह्निनोऽनुष्णो वह्निरिति प्रतिज्ञा अनुभवस्थेनैव प्रत्यक्षेण विरुध्यते। अनासन्नाग्नेस्तु सैव प्रतिज्ञा स्मृतिस्थेन प्रत्यक्षेण विरुध्यते Kāśi. iii. 50.3 (*on* 5(4).68)

अनासयित्वा (an-āsayitvā) *ger.* not having fixed नये धियं सम्यगनासयित्वा युक्तः प्रयुक्तो न पराक्रमोऽपि HammīMaKā. 8.82.

अनासव (an-āsava) *m.* not liquor स्फुटमपरं निद्रायाः सरसमचैतन्यकारणं पुंसाम्। अपटलमान्ध्यनिमित्तं मदहेतुरनासवो लक्ष्मीः Kāvyālaṁ.(Ru.) 9.21.

अनासवाख्य (an-āsavākhya) *adj.* not called liquor, not known as liquor असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य। ··· बाल्यात्परं साथ वयः प्रपेदे KumāSaṁ. 1.31 = VakroJī. 215.13 = SaraKaṇṭhā. 319.8. = AlaṁkāSa. 125.5 = SāhiDa. 129.8.

अनासादन (an-āsādana) *n.* non-attaining तस्यैव विशेषस्यास्य कार्योत्पादनानुगुणस्य यः क्रमेणाभिवर्धमानः कार्यस्य जनक इष्यते तस्यैव उत्पत्तिर्न स्यात् प्रथमक्षणोपनिपातिनां परस्परतो विशेषानासादनाद् समानामविवेकाद् अनभ्युपगमाच्च HetuBiṬ. 130.26.

अनासादयत् (an-āsādayat) *adj.* [*f.* -ntī] 1 not reaching, missing यन्त्रतोरणेनाकृष्टकृपाणीव्यग्रपाणिरनासादयन्नेव चन्द्रगुप्तमथ वैरोचकं हतस्तपस्वी बर्बरकः MudrāRā. 2.15 (47); अनासादयतश्चिरं प्रभुबलान्वितम्। पमरात्रमभूदन्दुदिवारात्रं प्रजागरः RājTa.(Ka.) 8.2243; 2 not obtaining, not getting

वयस्य कयापि श्लाघ्ययौवनया प्रियतममनासादयन्त्या जीवितनिरपेक्षयोक्तम् Ratnā. 2.6 (59); न हि ... तस्य अम्बिकासंबन्धमात्रात् तस्याः कामप्युपकारकणिकामनासादयत एवाकस्मात् तथाविधचमत्काराविर्भावः संभाव्यते VyaktiVi. 56. 10; अनुरूपं पतिमनासादयन्त्याः कस्या अपि ...परिदेवितमिदम् KaumuMi. 1.9(1); 1. 19(28); त्यागलीलासुखमनासादयन् खिद्यते मद्वाहुः MudriKu. 5. 11(6); रसालविटपिच्छायामनासादयन् निर्विण्णः कुटजेषु कोकिलयुवा SaduktiKa. 275. 6 = SūktiMu. 14.14 = ŚārṅgaPa. 850; मालती ...। तत्केशालंकृतिसुखमनासादयन्त्यद्य मन्ये खिन्ना MayūSam. 2.28; 2. 49; **3** not finding नृपात्मजा तु मामितस्ततोऽन्विष्यानासादयन्ती ... रुदितवत्यवस्थास्यते DaśKuC. 100. 1; **4** not attaining क्षणिके तण्डुलादिद्रव्ये विशेषो नोत्पद्यते, अनन्तरमप्यसौ मा भूत्। ततो यथा परस्परतो विशेषमनासादयन्तोऽपि क्षणिकाः सहिता एव कुर्वन्ति HetuBiṬ. 128. 17; बहुभिरपि कविकुञ्जरैर्निबध्यमाना बहवः प्रबन्धा मनागप्यन्योऽन्यसंवादनमनासादयन्तं सहृदयहृदयाह्लादकं कमपि वक्रिमाणमादधति VakroJī. 244. 13; यदायमात्मा मनागपि धर्मपरिणतिमनासादयन्नशुभोपयोगपरिणतिमालम्बते तदा ... दुःखसहस्रबन्धमनुभवति TattvPradī.(A.) 14.6 (*on* 1. 12); पीततादिपर्यायेण तूभयत्राप्युत्पत्तिविनाशावनासादयतः ध्रुवत्वम् TattvPradī.(A.) 25. 1 (*on* 1. 18); सा (क्रिया) ... चैतन्यविकारकारणतामनासादयन्ती ... क्षायिक्येव TattvPradī.(A.) 58. 9 (*on* 1. 45); उत्तरस्य पूर्वमनुपमृद्योदयमनासादयतस्तदपबाधात्मैवोदयो न तु पूर्वस्योत्तरबाधात्मा TattvVai. 13. 28 (*on* 1. 8); NyāyRa. 63. 6 (on 2.57); विधय इष्टाभ्युपायतारूपाः स्ववाक्ये चेष्टमनासादयन्तः सापेक्षाः TātpaṬ.(Vā.) 429. 7 (*on* ii. 1. 65); इयमष्टसंख्या ... ग्रहणमात्राङ्गतां च निष्फलत्वादनासादयन्ती चतुःसंख्याद्वयलक्षणार्था विज्ञायते ŚāstrDī. 365. 4 (*on* iv. 1.17); एतत्साद्दृश्यमेतास्वेकां विधामासादयत् नातिरिच्यते। अनासादयन्न पदार्थीभूय स्थातुमुत्सहते NyāyKuA. ii(1). 194. 9; अपरे पुनश्चेतसोऽपि शून्यताङ्गीकारे मनःप्रत्ययमनासादयन्तः सर्वमिदमसदेव विश्वम् ... मन्यन्ते KhaṇḍanKhā. 81.2; तेऽपि कुतीर्थ्याः प्रागुक्तपक्षत्रयेऽपि वस्तुसिद्धिमनासादयन्तः ... त्वच्छासनमेव प्रतिपद्यन्ताम् SyādvāMañ. 19(69); **5** not establishing itself, not getting established यो बुद्धौ साक्षादात्मीयं रूपं निवेशयति स प्रत्यक्षः (अर्थः)। ... तमन्तरेण बुद्धिरात्मानमनासादयन्ती तस्य सत्तां निश्चाययति TātpaṬ.(Vā.) 158. 15 (*on* i. 1. 5)

अनासादयमान (an–āsādayamāna) *adj.* not finding अनासादयमानं तं सीताम् ...। लक्ष्मणो राममत्यर्थमुवाच Rāmā. iii. 59. 12.

अनासादित (an-āsādita) *adj.* **AI** not reached, not approached ते सार्धं यैर्महर्लोकस्तदानासादितस्तु वै। तच्छिष्या ये ह तिष्ठन्ति कल्पदाह उपस्थिते BrahmāṇḍP. i. 5. 121; नगरसमीपेऽन्ये ह्रदा अनासादिताः। तानासाद्य पुनरागमिष्यामः Tantrākhyā. 19. 3; PañcT. 1.61 (67. 9); **AII** not obtained, not acquired देवो हर्षः ... द्वारपालैः प्रणम्यमानश्च ... अनासादितस्वामिदर्शनदूयमानमानसैः ... नरपतिभिर्नीयमाननक्तंदिवम् ... राजकुलं विवेश HarṣaC. 215. 6; न ह्यनासादितार्थविशेषपरिष्वङ्गाः स्वरसेन संविदोऽप्यनुमीयन्ते Kāśi. i. 72. 23 (*on* 2.21); न ह्यनासादितविषयविशेषसंसर्गाः संविदः परस्परतो व्यतिभिद्यन्ते ĀgaPrā. 39. 11; यशोध्वजस्य भूभुजः ... सुवीरो नाम सूनुरनासादितविद्यावृद्धसंयोगसमयत्वात् ... परद्रविणदारादानोदारक्रियः ...क्रीडावने गतः YaśasCam. ii. 302. 19; उदकाहरणादयस्तु तैः स्वकारणादनासादिताः कुतः प्राप्ताः TattvVai. 133. 27 (*on* 3.14); ते हि स्वप्नेऽप्यनासादितसाहित्यसुधारसास्वादचमत्काराः ... लक्षणमस्तीत्येव ... बहुतरमवकरप्रायं प्रयुञ्जते VyaktiVi. 55. 24; सदाशिवस्यापि ... अनासादितशुद्धभावाहंपरामर्शयुक्तत्वं विद्यत एव Bhāsk. i. 15. 7 (*on* i. 1.1); **AIII** not accomplished न ह्यनासादितयागस्वर्गादिसाध्यसाधनसंबन्धविशेषो भावयेदिति शब्दार्थः Kāśi. i. 76. 22 (*on* 2.26); **B** which has not attained लोके च शरीरशब्दो घटादिशब्दवदेकाकारद्रव्यनियतवृत्तिमनासादितः ... द्रव्येष्वगौणः प्रयुज्यमानो दृश्यते BrahmSūBh.(Rā.) 412. 20 (*on* ii. 1.9)

अनासादितकामरस (anāsādita-kāmarasa) *adj.* who has not (yet) obtained the pleasure of sexual love अथ पाण्डुर्मृगयां चरन् मैथुनगतमृषिम् अपश्यन्मृग्यां वर्तमानम्। तथैवाप्लुतमनासादितकामरसमतृप्तं बाणेनाभिजघान MahāBhā. i. 90. 64.

अनासादितगाध (anāsādita-gādha) *adj.* the bottom of which is not reached (i. e. of unfathomable depth) अत्रिणा। अनासादितगाधं च पातालतलमव्ययम् ...। (भगिन्यौ) ददृशाते महार्णवम् MahāBhā. i. 19. 12.

अनासादितजाङ्गुलिप्रसादा (anāsādita-jāṅguliprasādā) *adj.* (*f.*) who has not obtained the favour of a snake-doctor अनासादितजाङ्गुली(?लि)प्रसादा पन्नगाधिनाथमुत्कोपयसि KaumuMi. 4. 2(7)

अनासादिततल (anāsādita-tala) *adj.* the bottom of which has not been reached (i. e. of unfathomable depth) राजा ... जलकुञ्जरैरप्यनासादिततलम् ... तडागमद्राक्षीत् UdaySuKa. 130. 11.

अनासादितदुर्ग (anāsādita-durga) *adj.* not reaching the stronghold गृह्णन् हरिगणं क्षणात्। अनासाहितदुर्गं (v. 1. अनासादितदुर्गं VVRI., 1963) स चक्रे दुर्गान्तरातिथिम् RājTa.(Ka.) 5. 142.

अनासादितदोष (anāsādita-doṣa) *adj.* who has not acquired any sin एकस्तारावलोकस्तु भूत्वा राजेन्द्र मानुषः। ... अनासादितदोषः संश्चिरं साम्राज्यसंपदम्। भुक्त्वावसाने वैराग्यात् स्वयं त्यक्त्वा वनं गतः KathāSaSāg. xvi. 3. 12.

अनासादितनिर्णय (anāsādita-nirṇaya) *adj.* who has not reached to any decision आवेदिते च तस्मिन्न(र्थेऽवगतेऽ)व्यक्तव्यवहारदुश्छेदतया धर्माधिकृतैः संनिरुद्धौ (v. l. तावनासादितनिर्णयैः स्थापितावादिनच्छेदमुभौ राजाधिकारिभिः) PañcT. 1. 158 (159. 2); KathāSaSāg. x. 4. 221.

अनासादितपरपार (anāsādita-parapāra) *adj.* the other shore of which is not reached ऊर्मिमालाभिरप्यनासादितपरपारम् ... अम्भोनिधिमपश्यम् TilaMañ. 122.13.

अनासादितपर्याणा (anāsādita-paryāṇā) *adj.* (*f.*) on which a saddle is not put, not harnessed स तां केनापि न स्पृष्टां दृष्ट्वा यौवनशालिनीम्। ... अनासादितपर्याणां काम्बोजतुरगीमिव। कौतुकाकुलितस्तस्थौ BṛKathāMañ. iii. 1. 246.

अनासादितपूर्व (anāsādita-pūrva) *adj.* not obtained (i. e. experienced) before समुद्रपातसमयेऽप्यनासादितपूर्वेण ... तस्य सकलगात्रस्पर्शेन ... विह्वलतामगच्छम् TilaMañ. 313. 7.

अनासादितप्रकर्ष (anāsādita-prakarṣa) *adj.* which has not acquired any excellence भावनाप्रचयः ... अनासादितप्रकर्षो न स्फुटाभ(?भि)ज्ञानजननाय प्रभवति NyāyKa. 3. 27; SyādvāMañ. 18(47); (भावनाचतुष्टयम्) क्षणभङ्गपक्षे स्थिरैकाधारासंभवात् ... अनासादितप्रकर्षं न स्फुटमभिज्ञानमभिजनयितुं प्रभवति SarvaDaSam. 11. 118.

अनासादितप्रकाशस्वभाव (anāsāditaprakāśa-svabhāva) *adj.* the nature of which has not attained (full) manifestation सर्वः प्रत्यय उपजायमानो नानुल्लिखितशब्दक उपजायते तदुल्लेखविरहिणोऽनासादितप्रकाशस्वभावस्य प्रत्ययस्यानुत्पन्ननिर्विशेषत्वात् NyāyMañ. ii. 99.11.

अनासादितप्रतिक्रियोपाय (anāsādita-pratikriyopāya) *adj.* against whom means of counteraction is not found श्रीशीलादित्यस्तस्यानुजः प्रणतिमेकां परित्यज्य ... अरातिभिरनासादितप्रतिक्रियोपायः EI. viii. 191. 21; viii. 197. 22; i. 86. 16; iv. 77. 15; xxii. 116. 15.

अनासादितफल (anāsādita-phala) *adj.* **I** not accomplishing any purpose इतरथा निरवसानमनासादितफलं को नाम न्यायमारभेत NyāyMañ. i. 10. 5; **II** who has not acquired the fruit उत्पन्ने च क्वचिन्नद्यादिवाक्याद्विज्ञाने तरङ्गिणीतीरमनुसरन्ननासादितफलः प्रवृत्तबाधकप्रत्ययः पुरुषमेवाधिक्षिपति NyāyMañ. i. 145. 25.

अनासादितभङ्गुरश्री (anāsādita-bhaṅguraśrī) *adj.* which has not acquired transitory beauty (i. e. having permanent beauty) अस्य क्षितिनूतनकानना सा न काननासादितभङ्गुरश्रीः। हरति HarVi. 5. 4.

अनासादितभूतल (anāsādita-bhūtala) *adj.* the low-land of which was not reached (स गत्वा पर्वतवरम् ... ददर्श) निरन्तरतरुच्छायासुदूरविनिवारितैः। समन्तादर्ककिरणैरनासादितभूतलम् BrahmāṇḍP. ii. 22.40.

अनासादितमद्यपानशक्तियोग (anāsādita-madyapānaśaktiyoga) *adj.* which has not acquired association with the property of the intoxicating drink यत्रापि मद्यशब्देन प्रतिषेधस्तत्राप्यनासादितमद्यपानशक्तियोगस्य (द्रव्यस्य) नैव प्रतिषेधः ManuBh. ii. 399.3 (*on* 11. 93)

अनासादितयोग्ययोग (anāsādita-yogyayoga) *adj.* not acquiring association with proper persons कुत्राप्यनासादितयोग्ययोगाः। पौरा इवौदार्यमुखा गुणाः स्म ... यस्य पुरे वसन्ति HammīMaKā. 1. 84.

अनासादितराक्षस (anāsādita-rākṣasa) *adj.* which has not reached the demons रामसौमित्रिविशिखैरनासादितराक्षसैः। निर्वृते शस्त्रसंघाते विस्मयोऽभूद्दिवौकसाम् RāmāMañ. 373. 1.

अनासादितवत् (an-āsāditava(n)t) *adj.* who has not found कुमारभीमार्जुनौ ... तम् (कौरवाधमम्) अनासादितवन्तौ VeṇīSaṁ. 6. 74.

अनासादितविग्रह (anāsādita-vigraha) *adj.* who has not entered into war सर्व एव जनः शूरोऽनासादितविग्रहः Hitopa. 3. 39.

अनासादितविश्रमा (anāsādita-viśramā) *adj.* (*f.*) who has not got rest (कृष्णः) विचित्रलीलाहितवेपथूनां तासामनासादितविश्रमाणाम्। तापोपशान्त्यै ... आह्लादनीमद्भिरियेष लीलाम् Yādavā. 8.94.

अनासादितसमीरसारथि (anāsādita-samīrasārathi) *adj.* not having fire (*lit.* not having that which has wind as the charioteer) अनासादितसमीरसारथिमेव वितानवेदिम्, अनुपनततनयजननामसितनयनामवेक्ष्य हृदयसरणिधृतव्यथः परिणीरिदमभाणीत् YātrāPra. 1.26 (7)

अनासादितसहकारिन् (anāsādita–sahakārin) *adj.* which has not

got or obtained the auxiliary cause शिंशपाजन्मकास्तद्विशेषा एव । कम्पकारिणस्तु न तथा किन्त्वागन्तवः(न्तुक)सहकारिण इति चेत् एवं तर्हि तानासाद्य सदृशरूपा अपि केचित् कम्पकारिणः, अनासादितसहकारिणस्तु न तथा NyāyKuA. i. 63.9.

अनासादितसुखकाल (anāsādita-sukhakāla) *adj.* wherein the occasion for pleasure is not found वसुः ··· क्षणमात्रमप्यनासादितसुखकालं पातालमूलं जगाहे YaśasCam. ii. 356.2.

अनासादितसुधांशुबिम्बा (anāsādita-sudhāṁśubimbā) *adj.* (*f.*) which has not got the disc of the moon (risen) अनासादितसुधांशुबिम्बामिव जम्भारिककुभम् ··· अनुपनततनयजननामसितनयनामवेक्ष्य ··· परिणीरिदमभाणीद् YātrāPra. 1.26(4)

अनासादितस्वतन्त्रभाव (anāsādita-svatantrabhāva) *adj.* which has not got independent status एते एव यत्रात्मनि अनासादितस्वतन्त्रभावाः परस्परम् अनुग्राह्यानुग्राहकतां दधति स एषां संकीर्यमाणस्वरूपत्वात् संकरः KāvyPra. 754.2.

अनासादितहरिणपिशित (anāsādita-hariṇapiśita) *adj.* who has not got deer's flesh जरच्छबरः ·- अनासादितहरिणपिशितः ·- तरुतले मुहूर्तमिव व्यलम्बत Kād. 33.1.

अनासादितहिंस (anāsādita-hiṁsa) *adj.* who has not committed (any) killing यशोमतिकुमारः — स्थलबिलजलान्तरालविहारिणां प्राणिनामद्यापि चित्रगुप्तेनापरिमृष्टमानत्वादनासादितहिंसः YaśasCam. ii. 221.5.

अनासादितामिष (anāsāditāmiṣa) *adj.* who has not got meat एकस्तु वृद्धशबरस्तत्रानासादितामिषः । अद्राक्षीत्स तरुम् KathāSaSāg. x. 3.45.

अनासादितालम्बना (anāsāditālambanā) *adj.* (*f.*) which has not obtained any objective basis न हीयं विकल्पबुद्धिः ··· अनासादितालम्बना धर्मिणं व्यवस्थापयति PramāMī. 46.22 (*on* i. 2.16)

अनासादितोत्तरावस्थ (anāsāditottarāvastha) *adj.* which has not acquired the subsequent state (छदिरुपधिबल्वेभ्यः) तेन च द्रव्यस्यानासादितोत्तरावस्थस्याभिधानम् Nyās. ii. 13.19 (*on* v. 1.13)

अनासाद्य (an-āsādya) *ger.* **1** not having obtained, not having acquired, not having experienced **2** not having reached, not having come close **3** not having considered, not having taken into account **4** not having found out **5** not having attained **6** not having placed down **7** not having grasped **8** not having accepted **1** not having obtained, not having acquired, not having experienced सूदः सोऽनासाद्यामिषं क्वचित् । निवेदयामास तदा तस्मै राज्ञे व्यथान्वितः MahāBhā. i. 166.26; न दुःखमनासाद्य शक्यं सुखमवाप्तुम् NyāyBh. 276.16 (*on* iv. 1.58); सामान्यं पुनरनासाद्यापरं नित्यं तत्स्वभावं किमितीन्द्रियमपेक्षते PramāVāSvopVṛ. 48.12; स खलु ··· आगन्तुकं कंचनानासाद्य स्वत एव जनयेत् Bhām. 424.2 (*on* ii. 2.19); न च प्रकारान्तरं विश्लेषालभामहे येनैते परिसंख्यादोषमनासाद्यैव विधिं लभेरन् ŚāstrDī. 374.5 (*on* iv. 2.9); (एषः) कमलरागदाडिममिदं मुहुर्याचितमनासाद्य ·- आलपति UdaySuKa. 49.9; शैवदीक्षामनासाद्य शास्त्रमात्रप्रपाठकः ·- नित्यः ĪśānŚiPa. ii. 11.10(25); भिक्षामनासाद्य बुभुक्षितः ··· तिष्ठति PuruṣPa. 48.20; 134.18; **2** not having reached, not having come close छलो मृगयामचरत् ।·- मृगं चासाद्य (v.l. अनासाद्य) रथेनान्वधावत् MahāBhā. iii. 190.44; अनासाद्य तु वार्ष्णेयं शक्तिः ··· न्यपतद्धरणीपृष्ठे MahāBhā. vi. 100.31; त्वं चैव सौमदत्तिश्च कर्णश्चैव महारथः ।··· गव्यूतिषु त्रिमात्रेषु मामनासाद्य तिष्ठत MahāBhā. vii. 63.14; अनासाद्य तु शैनेयं सा शक्तिः···जगाम···धरणीम् MahāBhā. vii. 93.20; (हनूमान्) अनाधृष्यतमं देवमपि देवर्षिदानवैः । अनासाद्यैव पतितः Rāmā. vi. 19.15; ते शरास्तमनासाद्य ···। रथशक्तिं परामृश्य निपेतुर्धरणीतले Rāmā. vi. 95.9; यन्त्रतोरणेनाकृष्टकृपाणीव्यग्रपाणिरनासादयन्नेव (v.l. °साद्यैव)चन्द्रगुप्ताशया वैरोचकं हततपस्वी वर्वरकः MudrāRā. 2.15(47); मूढाः ··· ईश्वरम् अप्राप्य अनासाद्य ··· यान्ति अधमां गतिम् GītāBh. (Śaṅ.) 463.5 (*on* 16.20); उदन्वन्तमनासाद्य महानद्यः किमासते KāvyālaṅSāSaṁ. 6.8(*9); तमतिदूरान्तरगतमपि दुरात्मानमेषा सीरकोटिरनासाद्य न निवर्तते SubhaDha. 4.14(3); अनासाद्यैव पर्यन्तं महतो महसो मम ।··· चक्राते तौ तपस्ततः BṛKathāMañ. i. 1.26; त्वयि क्षितिमेतां प्रशासति । को वैरस्नेहयोः पारमनासाद्यावसीदति RājTa.(Ka.) 4.108; **3** not having considered, not having taken into account यत्त्वया कथितं पूर्वं मामनासाद्य किंचन । तदद्य कुरु MahāBhā. iv. 55.3; महीपतिः ।·- आहारमप्यनासाद्य तन्मतं न न्यषेवत RājTa.(Ka.) 8.1486; **4** not having found out दुःशलां पश्य ·-। अनासाद्य पदं शिरो भर्तुरनासाद्य धावमानामितस्ततः MahāBhā. xi. 22.16; मित्रगणोऽपि प्राप्तस्तदेव्याः ·- प्राणांस्त्यक्तुं व्यवस्थिताः (ते) Rāmā. v. 33.55; मित्रगणोऽपि ··· प्राणान्वैमुद्देशमनासाद्य च भवन्तम् ··· भर्गमाराध्य निर्गच्छन् DaśKuC. 151.16; प्राणान्वै घातयिष्यामि अनासाद्य च वल्लभाम् NaraP. 63.63; तान् दृष्ट्वा तमनासाद्य दुःखिता सा व्यचिन्तयत् KathāSaSāg. vii. 4.89; **5** not having attained तत्रैतत्स्यात् । चिरवेगे नायके स्त्रियोऽनुरज्यन्ते शीघ्रवेगस्य भावमनासाद्यावसानेऽभ्यसूयिन्यो भवन्ति KāmSū. 79.15 (2.1); **6** not having placed down सादनस्यैतत्प्रयोजनं यदुत्तरग्रहाणां साहित्यसंपादनम्, न ह्यनासाद्यैकमपरो ग्रहीतुं शक्यते ŚāstrDī. 734.7 (*on* x. 5.21); MayūMāli. 734.4 (*on* x. 5.21); **7** not having grasped बुद्ध्या लजन्त्यनासाद्य मूर्खोश्चार्थचर्वणक्षमाः BṛKathāMañ. i. 3.88; सम्यग् रत्नत्रयमुदीरितम् । सर्वोऽपि यदनासाद्य नासादयति निर्वृतिम् YogŚā. 3.155; **8** not having accepted महाराजदूतोऽपि ··· स्वप्रभुसमुचितगौरवपूजार्हमासनमनासाद्य कार्यवशेन भूमावेवोपविष्टः AucīViCa. 20(100)

अनासाद्य (an-āsādya) *adj.* **1** which cannot be found (elsewhere) बभूव तुमुलं युद्धमन्योऽन्यवधकाङ्क्षिणोः । अनासाद्यमचिन्त्यं च वृत्रवासवयोरिव Rāmā. vi. 87.28; **2** not obtainable न हीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः RaghuVa. 3.6; देव ··· सुरेन्द्रेणाप्यनासाद्यमिदं मेलकस्थानमशेषजननयनपरिषदां वस्तु UdaySuKa. 51.22; अनासाद्यं दानैरनुपसरणीयं च तपसा । भवन्तं पश्यन्तः ·- कृतार्थाः ··· पुनरपि NīlaVi. 43.9; **3** inaccessible (हिमालयः) जनैरनासाद्यो महाराजाधिराजवत् BrahmāṇḍP. ii. 22.58.

अनासाद्यमान (an-āsādyamāna) *adj.* not being obtained बहुभिरपि यत्नैरनासाद्यमाने तत्संगमसुखे उद्वेगः NāṭaLaRaK. 2462.

अनासार (an-āsāra) *adj.* not having an ally स्वभूमिः स्वर्तुवृत्तिश्च स्वसैन्यानाम् अदुर्गासारः शत्रुरपार्ष्णिरनासारश्च, ततो यायात् ArthŚā. ii. 343.2 (7.16)

अनासारवर्षण (anāsāra-varṣaṇa) *n.* strengthless or futile rain अनासारवर्षणम् अजागलस्तनसमवस्थं तव गमनागमनम् Jīvān. 106.4 (*but* comm. आसारस्य धारारूपस्य सलिलस्य, वर्षणं शीलं यस्य तत्, तादृशं न भवतीति अनासारवर्षणम् । घनगर्जितमित्यन्तर्भावितविशेष्यमिदं विशेषणम्)

अनासिक (a-nāsiká) *m.* the noseless अनासिकाय स्वाहा TaiS. VII. v. 12.1; *adj.* [*f.*-ā] **1** non-nasal (i.e. beyond nasality) अघोषमव्यञ्जनमस्वरं च अकण्ठताल्वोष्ठमनासिकं च । अरेफजातमुभयोष्ठवर्जितं यदक्षरं न क्षरते कदाचित् AmṛNāU. 25; घोषाक्षरस्वरनिराकृतमप्यकण्ठ्यताल्व्यमव्ययमनासिकमप्रतिष्ठम् ।··· ज्योतिः परं यदमृतं हृदि चाकशीति HarVi. 47.77; **2** noseless (स ददर्शाविदूरस्था राक्षसीः) दीर्घनासां त्वनासिकाम् Rāmā. v. 439*(1); रावणः ··· । संदिदेश ततः सर्वा राक्षसीः — । अनासिकां सिंहमुखीम् Rāmā. v. 20.33; नासिकादिभ्यो विभाषायाः सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो भवति विप्रतिषेधेन ।··· सनासिका अनासिका विद्यमाननासिकेति MahāBh. ii. 224.11 (*on* iv. 1.55); KāśiVṛ. *on* iv 1.57; PadMañ. *on* KāśiVṛ. *on* P. iv. 1.55; ङीषो न भवति ।··· अनासिका JaineVyā. 158.16 (*on* iii. 1.50); CāndraVṛ. *on* ii. 3.68; ŚākaṭāVyā. i. 3.27 [Lexicons give *anāsika* as the meaning of *vikhu*, ParaNā. 1864; ŚabdaRa.(Su.) 3.74; *vikhra*, AbhidhāCin. 450; ParaNā. 1864; ŚabdaRa.(Su.) 3.74; *vikhru*, AbhidhāCin. 450; *vigra*, AbhidhāCin. 450; ParaNā. 1864; ŚabdaRa.(Su.) 3.74; and ŚabdaRaSaK. 32.3 gives *vigra* as the meaning of *anāsika*]; **3** not having the olfactory sense अनासिकमजिह्वं च मनोबुद्धिविवर्जितम् ।··· सर्वोपाधिविनिर्मुक्तं चैतन्यं सर्वगं शिवम् SaurP. 55.23.

अनासिक्य (a-nāsikya) *adj.* not produced through nose, non-nasalised द्विविधश्च स्वरो ज्ञेयोऽनासिक्यः सानुनासिकः ŚaiśiŚi. 19; *n.* other than the city Nāsikya (नासिक्यं नगरमिति) यत्प्रत्यये च सति अनासिक्यमित्यत्र ययतोश्चातदर्थे इत्युत्तरपदान्तोदात्तत्वं प्रसज्येत PradI. v. 62A.22 (*on* vi. 1.63)

अनासितकुटुम्ब (anāsita-kuṭumba) *adj.* wherein the family has not settled अनाशित(v.l. अनासित)कुटुम्बानि प्रभाहीनजनानि च । अलक्ष्मीकानि पश्यामि कुटुम्बिभवनानि Rāmā. ii. 1667*(4)

अनासीन (an-āsīna) *adj.* **A** not sitting मध्यनासीने का स्मरतल्पकल्पनेति भावः Loc. 77.19 (*on* 2.6); निश्चयाधिन्यासन्यनासीन ग्रहोऽग्रेऽपि । मासार्धमासेन स आसनाय मन्येऽनुजो विंशतिदोष्ण इच्छेत् DvyāśraKā. 2.66; केषांचिदनासीनानामपि कथंचिच्चित्तैकाग्र्यसंपादनसंभवेऽपि ··· चित्तैकाग्र्यारोपायान् ·- कश्चिद् वेदविहितस्यैव तदुपायस्य ग्रहीतुमुचितत्वात् ŚivārkaMaDī. ii. 435.15 (*on* iv. 1.7); **B** not sitting (at one place), wandering क्वाप्यं नियमनासीनो वयं क्वासनपक्षयः TriṣaŚaPuC. i. 3.114; ii. 3.329.

अनासृतघट (anāsṛta-ghaṭa) *adj.* **1** whose temples are not flowing with (ichor) सा ··· निरङ्कुशप्रचारैः प्रकटकुम्भकूटधारिभिरप्यनासृतघटैः — करेणुभिर्दुरवतारेण ··· गत्वा राजमार्गेण प्रविश्य राजकुलाभ्यन्तरम् ·- कन्यान्तःपुरमगच्छत् TilaMañ. 367.7; **II** from whom (i.e. from whose head) jars

have not fallen down, TilaMañ. 367. 7.

अनासेक्तुम् (an-āsektum) *inf.* not to be sprinkled, not to be drenched किं विपयान् परिहर्तुं वस्तव्यं मेरुकन्दरेष्वबुधैः। न ह्यद्‌भिरनासेक्तुं धातुषु रोहन्ति पद्मानि VairāŚ.(A.) 9.

अनासेदिवस् (an-āsedivas) *adj.* which has not reached श्रोत्रज्ञता अतिदवीयसि देशेऽभिव्यज्यमानतया श्रोत्रपथमनासेदुषामपि शब्दानां ज्ञातृता Mitā. 399. 21 (*on* 3. 202)

अनासेध (an-āsedha) *m.* A improper restraint यस्त्विन्द्रियानिरोधेनाप्याहारोच्छ्वासनादिभिः। आसेधयेदनासेधैः स दण्ड्यो न त्वतिक्रमी BṛhaspaSm. 26. 167; ŚukraNī. 4(5). 96; B non-interruption अनासेधात् स्वामिनः स्वत्वानपगमात् ... उपभोक्तुः स्वत्वाप्राप्तेः ... हानिरनुपपन्ना Subodhi. 12. 24 (*on* 2. 24); अनासेधेन स्वत्वानपगम उपभोगेन ... हानिकारणाभावः BālamBha. ii. 32. 9 (*on* 2. 24)

अनासेधकाल (an-āsedhakāla) *m.* not a proper time for restraint अन्यथा कुर्वन्नासेद्धेति। अनासेधकाल आसेधं कुर्वन्नित्यर्थः Subodhi. 4. 17 (*on* 2. 5); BālamBha. ii 9. 22 (*on* 2. 5)

अनासेधकालत्व (anāsedhakāla-tva) *n.* the state of not being the proper time for restraint or arrest अनासेध्यानाह कात्यायनः।— वृक्षपर्वतमारूढा हस्त्यश्वरथनौस्थिताः। ... अनासेधकालत्वादित्यभिप्रायः SmṛtiCan. iii. 69. 4.

अनासेधविंशतिवर्षोपभोग (anāsedha-viṃśativarṣopabhoga) *m.* enjoyment for twenty years without any restriction अनासेधविंशतिवर्षोपभोगात् तादृशदशवर्षोपभोगाच्च भूम्याधिक्यवस्तुनो हानिर्वा ... प्रतिपाद्यते Subodhi. 14. 17 (*on* 2. 24); अनासेधविंशतिवर्षोपभोगेन विंशतिवर्षानन्तरं पत्रं निर्दोषम् Subodhi. 15. 17 (*on* 2. 24)

अनासेधा (an-āsedhā) *adj.* (*f.*) unrestrained, unobstructed पपात द्विषतां बलम्। ... सा ...। कारितारिवधा सेनानासेधा वारितारिका ŚiśuVa. 19. 44.

अनासेधोपभोग (anāsedhopabhoga) *m.* enjoyment (of land) without any restriction स्वामिनः समक्षं अनासेधोपभोगे विंशतिवर्षादनन्तरं हानिर्भवति Subodhi. 13. 18 (*on* 2. 24); BālamBha. ii. 31. 33 (*on* 2. 24)

अनासेध्य (an-āsedhya) *adj.* A not to be restrained यस्त्विन्द्रियनिरोधेन व्याहारोच्छ्वसनादिभिः। आसेधयेदनासेध्यं स दण्ड्यः KātySm. 106; Aparā. 606. 25 (*on* 2. 5); VyavaNi. 31. 14; अन्यथा कुर्वन्ननासेध्यमासेधयन्नित्यर्थः Aparā. 607. 20 (*on* 2. 5); SmṛtiCan. iii. 68. 13; DaṇḍaVi. 333. 16; अनासेध्या उक्तास्तेनैव VīraMi.(Vyavahāra.) 42. 9; B not to be subjected to (legal) restraints नौरग्रामान्तर्व्वर्ति वोडणिभट्ट(ट्ट) क्षेत्रम् ... अचाटभटप्रवेस(श)म् अनादेस्य(? श्य)मनासेध्यम् उदकातिस्व(स)र्गेण नमस्यवृत्त्या परमया भक्त्या प्रतिपादितम् EI. xii. 264. 45; मदरजविषयां[तःपाति किं] इञ्छितग्रामः ... अनादेस्यः(श्यः) अनासेध्यः ... सा(शा)सने[न*] प्रतिपादितः EI. xxv. 62. 76.

अनासेवन (an-āsevana) *n.* A [Loc.] in the sense other than practising (penance) निसस्तपतावनासेवने P. viii. 3. 102 (*but* KāśiVṛ. आसेवनं पुनः पुनः करणम्। निष्टपति सुवर्णम्। सकृदग्निं स्पर्शयतीत्यर्थः, अनासेवनमपौनःपुन्यम् Prasā. i. 684. 19; JaineVyā. v. 4. 74); B non-indulgence विप्रः ... प्रतिषिद्धस्यानासेवनात् ... ब्रह्मलोके स्थानविशेषे महिमानं प्राप्नोति ManuBh. i. 417. 10 (*on* 4. 260); (विषयेष्वप्रसक्तिश्च) विषयेषु ... अप्रसक्तिस्तेषां पुनरनासेवनम् ManvaMu. 25. 25 (*on* 1. 89)

अनासेवा (an-āsevā) *f.* [Loc.] in the sense other than practising (penance) निसोऽनासेवायां तपे ŚakaṭāVyā. i. 1. 179 (*but* comm. अनासेवा पुनः पुनः करणम्)

अनासेवित (an-āsevita) *adj.* I not followed, not trodden शिबिरुवाच। नैवाहमेतद् यशसे ददानि। ... पापैरनासेवित एष मार्गो इत्येवमेतत् सकलं करोमि MahāBhā. iii. App. 1. 21(157); II not served, cf. **अनासेवितवृद्धपण्डित**; III not tasted, cf. **अनासेवितमधुर**.

अनासेवितमधुर (anāsevita-madhura) *adj.* sweet though not tasted अनासेवितमधुरैरिव अमृतैः अनालिप्तशीतलैरिव कर्पूरपरागैः ... कटाक्षैरेव जगदखिलं कन्दर्पनिदेशवशमापादयन्तीम् ... कन्यकामुपलेभिरे NīlaVi. 124. 11.

अनासेवितवृद्धपण्डित (anāsevitavṛddha-paṇḍita) *adj.* who is learned but who has not served the wise ones अपरीक्षितकारिणा गृहीतां त्वमनासेवितवृद्धपण्डितेन। अविरोधितनिष्ठुरेण साध्वीं दयितां त्रातुमलं घटस्व राजन् Bhaṭṭi. 10. 40 (comm. अनुपासितज्ञानवृद्धः स चासौ पण्डितश्च तेन पण्डितमन्येनेत्यर्थः)

अनासेव्य (an-āsevya) *adj.* not to be resorted to 'किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः' इत्यर्थपरिसंख्योदाहरणम् ...। त्वद्रीत्या हि द्युसरित्सविधातिरिक्तमनासेव्यमिति बोधेन तस्याः शाब्दत्वात् BālamBha. i. 227. 31 (*on* 1. 81)

अनास्कन्द्य (an-āskandya) *ger.* not becoming dried up (in heart) स्यन्त्वा स्वेदमियं स्कन्त्वा मा गादिति सखीजनैः। अनास्कन्द्याम्बुपस्कद्य पयः प्रस्यन्द्य धार्यते DvyāśraKā. 9. 114 (comm. अपरिशुष्य। स्नेहातिरेकादार्द्रहृदयीभूयेत्यर्थः)

अनास्कन्ध (an-āskandha) *adj.* [prob. w. r. for अनास्कन्न] NidāSū. 103. 11 (6.7)

अनास्कन्न (an-āskanna) *adj.* [*f.* án-āskannā] not covered in copulation सारस्वतीं मेनीमालभेत ... अप्रजदती भवति सर्वत्वायानास्कन्ना संमृद्ध्यै KāṭhS. 12. 13 (i. 175. 14); ऋश्यस्य साम्नि। किं प्रत्यक्षं किं परोक्षम् — अपि वा यथाग्राम एतदङ्गमाचष्टे तद् प्रत्यक्षम्, तस्यैषा स्तुतिः स्यात्। तस्यमिव ते पायुर्ऋजुरनास्कन्ध(? न्न) इति NidāSū. 103. 11 (6. 7)

अनास्त (anāsta) ? AV. (P.) vii. 8. 9.

अनास्तरकर्कश (anāstara-karkaśa) *adj.* uncovered and (hence) rough स्वपिषि हा कि.मनास्तरकर्कशे भुवनवीर चिराय धरातले। ... कथय नाथ कथं न विबुध्यसे Ragh. 19. 57.

अनास्तरिता (an-āstaritā) *adj.* (*f.*) not covered, bare अथ सौदासः ... स्वयमनास्तरितायामुपविश्य भूमौ ... तं महासत्त्वम् (बोधिसत्त्वम्) उवाच JātaMā. 220. 14 (31. 70)

[1]**अनास्तिक** (a-nāstika) *adj.* believer (*lit.* other than non-believer) इत्यशीलाननास्तिकान्। कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते MahāBhā. i. 56. 17; निषेवते प्रशस्तानि निन्दितानि न सेवते। अनास्तिकः श्रद्दधान एतत्पण्डितलक्षणम् MahāBhā. v. 33. 16; अनास्तिकानास्तिकानां प्राणदाः पितरश्च ये। तेऽपि कर्मैव कुर्वन्ति MahāBhā. xii. 12. 4; अहितादनपत्रपस्तसन्नतिमात्रोज्झितभीरनास्तिकः ŚiśuVa. 16. 7; परज्ञानप्रकथनं न देयं यस्य कस्यचित्। श्रद्धानाय दातव्यम् ...। अनास्तिकाय शुद्धाय ŚivaP. v. 26. 23 (436B. 15); अनास्तिकोऽपि श्रुतिबोधितार्थे प्रमाणतामेत्य विराजमाने। ईशस्य कर्तृत्वमनादिसिद्धमाश्चर्यमाश्चर्यमपाकरोति Vidvanmo. 5. 5.

[2]**अनास्तिक** (an-āstika) *adj.* non-believer, other than a believer सत्यधर्मच्युतात्पुंसः क्रुद्धादाशीविषादिव। अनास्तिकोऽप्युद्विजते जनः किं पुनरास्तिकः MahāBhā. i. 69. 15; xii. 12. 4; ŚiśuVa. 16. 7; क नु सद्वत्सलः श्रीमान् क नु विद्वाननास्तिकः RāmC. 11. 65; अनास्तिको वेदवाह्ये ... स्यात् ŚabdaRaSaK. 31. 16.

अनास्तिकत्व (anāstika-tva) *n.* the state of being a believer अनास्तिकत्वात् कृपया भवद्भ्यो वदामि गुह्यं भवसिन्धुसंस्थाः। सर्वेषु भूतेषु च मित्रभावं भजन्तव्यं सर्वगतो हि विष्णुः NaraP. 43. 15.

अनास्तिकप्रभाव (anāstika-prabhāva) *m.* strength of a believer अनास्तिकप्रभावेन पर्वणि प्राप्य मानवः। श्रद्धया ब्राह्मणं चैकं भक्त्या चैव प्रभोजयेत् PadmP. ii. 94. 52.

अनास्तिक्य (an-āstikya) *n.* lack of faith, scepticism, distrust यथस्य रुदतो द्वारि न करोम्यद्य रक्षणम्। अनास्तिक्यं च सर्वेषामस्माकमपि रक्षणे। प्रतितिष्ठेत लोकेऽस्मिन् MahāBhā. i. 205. 15; नानास्तिक्यमवलम्ब्य भ्रान्त्या वा सूत्राणामन्यथार्थत्वं कल्पनीयम् BrahmSūBh.(Bhā.) 246. 14 (*on* iv. 4. 14); अनास्तिक्यमनादरम्। यदीच्छेत्सिद्धिमतुलां स्त्रोभ्य एतद्विवर्जयेत् ParamāKā. 131. 55.

अनास्तीर्ण (an-āstīrṇa) *adj.* [*f.* -ā] not covered (wih a coverlet), bare नानास्तीर्णमनुत्तरप्रच्छदमविशालमसमं वा शयनं प्रपद्येत CaraS. i. 8. 19; किमित्यनास्तीर्णं कठिनशिलातलमध्यास्ते देवी VeṇīSaṃ. 2. 286; कौलिकः ...अनास्तीर्णायामेव खट्वायां निपत्य स्थितः Pañcā. 47. 2; अनास्तीर्णासु शय्यासु क्षणं तस्य दापयेत् Hastyāyur. 679. 11 (4. 23)

अनास्तुत (an-āstuta) *adj.* not praised with chants एतावद्ध वा अस्यैकमङ्गमनास्तुतमास यत्स्फिगौ। अनास्तुतेनैनमङ्गेन स्तुवन्ति JaimiBr. 2. 403.

अनास्तृत (an-āstṛta) *adj.* [*f.* -ā] not covered (with a coverlet), bare कतीनां भदन्त कठिनमनास्तृतम् GiMs. iii(2). 157. 13; iii(2). 157. 15; न च जन्तुमयीं शय्यामधितिष्ठेदनास्तृताम् ViṣṇuP. iii. 11. 112; शकटेऽनास्तृते क्षिप्तः स्वस्यानाचालिताङ्गकः PrabhāC. 202. 15.

अनास्तृतखट्वा (anāstṛta-khaṭvā) *f.* cot not covered (with a coverlet) रथकारः ...। पश्यति च कौलिकमनास्तृतखट्वायां प्रसारितबाहुपादम् Pañcā. 48. 17; तत्रानास्तृतखट्वायां शिष्ये (v. l. सुप्तो)ऽसौ निद्रया विना। दृष्टश्च धनपालेन PrabhāC. 139. 3.

अनास्तृतगुहाशायिन् (anāstṛtaguhāśāy-in) *adj.* sleeping in the cave without having any coverlet अनास्तृतगुहाशायी कालं नयति पार्थिवः MatsyaP. 119. 44.

अनास्तृततल्पक (anāstṛta-talpaka) *m., n.* bed not covered (with a coverlet) अथ वेश्म निजं गत्वा दौर्मनस्येन पूरितः। अवाङ्मुखः स सुष्वाप तदानास्तृततल्पके PrabhāC. 146. 13.

अनास्थ (an-āstha) *adj.* A disinterested, indifferent विहाय राज्यं विषयेष्वनास्थस्तीव्रैः प्रयत्नैरधिगम्य तत्त्वम् BuddhaC. 1. 69; (नन्दः) उद्वेगादपुनर्भवे मनः प्रणिधाय स ययौ शयितवराङ्गनादनास्थः Saund. 2. 65; 7. 35; 17. 6; महतामनास्थमबलाजने मनः RāmC. 20. 38; स वशी भिक्षुर्विनम्रां तां वणिग्वधूम्। कान्तेऽपि वपुषि स्वस्मिन्ननास्थः सिद्धये ययौ KathāSaSāg. vi. 2. 40; B having no hope (गाधिः) शोकपरीतधीः। जहौ स्वदेशम् … । विजहार बहून् देशाननास्थश्चिन्तयान्वितः YogVā. v. 45. 24; मम त्वनास्थमुत्पन्नं यद्दुःखं तद्वदामि ते KathāSaSāg. xiii. 1. 177; C not trusting अनास्थो राजवदने सत्त्वादष्टम्भयोः पुरा। अत्रापरो न निक्षेप्यो राजबीजीति दारदान् RājTa.(Ka.) 8. 2792; (भोजः) अनास्थोऽन्यलवन्येषु दिन्नाग्रामं पुनर्ययौ RājTa.(Ka.) 8. 2951.

अनास्थदुर्विनीत (anāstha-durvinīta) *adj.* taken away through indifference कुर्वाणा पृथुनि वधूर्नितम्बबिम्बे विस्रस्तं वसनमनास्थदुर्विनीतम् HarVi. 17. 58 (comm. हेलया दुष्प्रावृतम्)

अनास्थम् (anāstham) *adv.* without concern भङ्गो न भ्रूलताया-स्तुलितबलतयानास्थमस्थ्नां तु चक्रे CaṇḍīŚ 13.

अनास्था (an-āsthā) *f.* 1 non-care, indifference, non-consideration, non-concern, absence of interest, disregard 2 absence of confidence 3 absence of hope, despair 4 non-fixity 1 non-care, indifference, non-consideration, non-concern, absence of interest, disregard अनास्थैव हि निर्वाणं दुःखमास्थापरिग्रहः MahāU. 4. 111; अनास्थायां कृतास्थायां पूर्वं संसारवृत्तिषु। यथाभिवाञ्छितध्यानाच्चिरमेकतयोहिताद् ŚāṇḍU. 415. 20 (1. 44); चिदेव ध्यातव्या … अविद्यादिरहिता। अनास्थामास्थाय अनवधि सर्वत्र विषये VijñāŚ. 25; तामगौरवभेदेन मुनींश्चापश्यदीश्वरः। स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम् KumāSaṁ. 6. 12; 6. 63; एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु RaghuVa. 2. 57; अनास्था वस्तूनामभिमतगुणानामुपहतौ … अतिधन्योऽनुभवति NāgaSa. 13. 10; ŚārṅgaPa. 3162; जिह्मगदष्टेष्विव शरीरेष्वनास्थां कलयन्तः समं द्विषां धनुषां च जीवाकृष्टिं योधाश्चक्रुः VāsaDa. 295. 3; 'तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीत एवमेवेदं शरीरम्' इति विदुषः शरीरेऽनास्थां दर्शयति BrahmSi. 132. 3; अप्राकृतस्य चरितातिशयस्य भावैरत्यद्भुतैर्मम हृतस्य तथाप्यनास्था MahāvīC. 2. 39; संवर्तकालरजनीषु भयानकासु निस्त्रिंशयष्टिषु कथं भवतामनास्था HarVi. 45. 36; शून्यमूलः प्रपञ्चोऽयं शून्यताशिखरः सखे। सारशून्यतया मध्येऽप्यनास्थास्मिन् मनीषिणाम् RāmC. 31. 102; देवस्याराधनं नित्यम् …। परबाधास्वनास्था च तत्पूजानुपजीवनम्। इत्येषाष्टविधा भक्तिः ParaS. 4. 75; नैरात्म्ये त्वहमेव नास्मि कस्य दुःखमित्यनास्थायां सर्वत्र रागद्वेषरहितस्य प्रवृत्त्यादेरभावे सत्यपवर्गो घटते NyāyKa. 89. 5; क्रव्यादमायया विपर्यस्तप्रकृतेः काकुत्स्थस्य किम्वनास्था संजायते RāmaCam. 5. 22(1); अहं जगच्चैकमिदं सर्वमेवेति यस्य धीः। आस्थानास्थे परित्यज्य संस्थिता स न मज्जति YogVā. iv. 46. 13; v. 24. 17; अस्यापि … निग्रहानुग्रहेष्वनास्था … विहितानां कर्मणामपरित्यागश्चेति संक्षेपः ĪśānŚiPa. ii. 19. 15(18); त्वं मा कृथा मानद मय्यनास्थाम् Rāvaṇā. 12. 85; 16. 68; अलंकारेषु तथ्येषु यद्यनास्था मनीषिणाम् Candrā. 5. 125; मालाकारोपनीतेषु पुष्पाकल्पेष्वनेकशः। तासां दूरमनास्थाभूत् PāṇḍaC. 1. 575; 9. 292; लिङ्गानामनुकीर्तनमुपलक्षणार्थमिति दर्शयितुं कार्पासास्थिकीर्तने मनोरनास्था SmṛtiCan. iv. 535. 16; iv. 563. 9; न निहन्मि यमं गृहीतदण्डं धनदे किंनरराजदूत्यनास्था Surath. 8. 43; व्यावहारिकसत्त्वे श्रुतेरनास्था VedāntKa. 182. 19 (*on* i. 3. 35); अधुनैकादशाङ्गयस्ति सुधर्मस्वामिभाषिता। बालस्त्रीमूढमूर्खादिजनानुग्रहणाय सः। प्राकृतां तामिहाकार्षीदनास्थात्र कथं हि वः PrabhāC. 58. 18; निम्नं स्त्रीजन्म तत्रापि वैधव्यं नव्यदुःखकृत्। दौःस्थ्यं स्थानमनास्थाया दास्यं हास्यकरं जने ŚāliC. 1. 48; वधूनाम्। अपत्रपायाः समयेऽपि यस्यामभूदनास्था परमार्थतोऽपि Yādavā. 11. 47; पृथुरयमहं कृशीयान् गम्यो नास्याहमित्यनास्थैषा SūktiRa. 99. 22; Subhāṣi. 2865; बाह्येषु गन्धादिष्वान्तरेषु रूपादिस्कन्धेषु सत्स्वपि तत्रानास्थामुत्पादयितुं सर्वं शून्यमिति प्राथमिकान् विनयानचकथद् भगवान् SarvaDaSaṁ. 2. 325; अनास्थां खलु तात्कालिकीमभ्युपगमेन द्योतयन्ति NyāySu.(Ja.) 331A. 8 (*on* ii. 2. 3); ईश्वरः … व्यालं हारीचिकीर्षति। अनास्थां तु सुवर्णेषु युष्मासु विदधाति सः RājTa.(Jo.) 234; इहसिद्धमिदं महतां धनेष्वनास्था गुणेषु कृपणत्वम् Subhāṣi. 248; रामे तटान्तवसतौ कुशतल्पशायिन्यद्यापि नाम भवतो भगवन्ननास्था AlaṅkāŚe. 2. 3(31); [Inst.] indifferently, inadvertently, with no consideration, carelessly कालश्च कलनोद्युक्तः सर्वभावाननारतम्। अनास्थयेति भावानां यदभावनमान्तरम् AkṣU. 25; निपीड्य तरसा तेन मुक्ताः काममनास्थया। उपाययुर्विलक्षत्वं विद्विषो न शिलीमुखाः ŚiśuVa. 19. 18; जामदग्न्यः खल्वसौ …व्यपदिशति नः शैवप्रीत्या कथंचिदनास्थया MahāvīC. 2. 11; पतङ्गसंभावनयावमुन्मुखः पतङ्गवीथीनृपभो जिगीषति। अनास्थयैवायमधो विलोकते शरावकल्पा(? ल्पां) शरभो वसुंधराम् RāmC. 5. 77; 28. 95; शब्दभेदेऽर्थविकल्पविलासिता एवाश्रित्वादथ इति। इदं च बाह्यनिराकरणपरतयानास्थयोक्तम् Kāśi. ii. 82. 16 (*on* 5(2). 167); ननु लक्षणमतिव्यापि, 'वन्ध्यासुतो याति' इत्यतोऽपि शब्दाद्धीः शाब्दं स्यात्।… अनास्थया 'याति' इत्युदाहृतम् NayaVi. 143. 4 (*on* i. 1. 5); फलावेत्येतदेवाभिमतमङ्गत्वं त्वनभिमतमेवेति दर्शयति — 'अङ्गत्वे नास्ति प्रमाणम्' — तदभिधानं त्वनास्थया TantrRa. 28. 12; 162. 5; शब्दग्रहणं चार्थनिराकरणपरतयानास्थयोक्तम् NyāyRa. 258. 17 (*on* 5(2). 167); 533. 15 (*on* 5(11). 91); 683. 9 (*on* 5 (16). 9); संगीता मरसंगीतौ क्वचित् स्वगुणकीर्तनाम्। (राजा) द्व्यवज्ञनास्थया चक्रे नाम्रपत्तिमवस्थितिम् DvyāśraKā. 13. 7 (comm. स्वगुणेष्ववहेलया); अद्य श्वो वा भृशममुं त्यजामीति स चिन्तयन्। संसारवासे विदेहस्यायौवास्यादनास्थया TriṣaŚaPuC. iii. 8. 7; अनास्थया सूनकरप्रसारिणीं ददर्श दूनः स्थलपद्मिनीं नलः NaiṣC. 1. 88; राजकीयं (लेख्यं) पञ्चविधं चतुर्विधमित्यनास्थयोक्तमिति मन्तव्यम् SmṛtiCan. iii. 132. 6; iii. 237. 1; iv. 595. 11; v. 345. 13; अनास्थया समीक्ष्यास्य ददौ नोत्तरमध्यसौ PrabhāC. 106. 26; उपेक्षमाणेऽपि गुरावनास्थया शरीरकादौ सुखमात्मनीश्वरैः। नोपेक्षणीयम् … दुःखं विनेयैः ŚaṅkaDigVi.(Mā.) 16. 7; वस्त्विल्यादिकं तु भाष्योत्तमनास्थयानूदितम् GuruCandr. i. 394. 9; वार्तिके प्रसङ्गापादनमनास्थयैवेति द्रष्टव्यम् MīmāKau. iii(2). 85. 12 (*on* ii. 1. 12); केचित्तु अध्याहृतस्याप्युच्चारणमस्त्येव याज्ञिकानां तदननुष्ठानं त्वनास्थयेत्याहुः MayūMāli. 118. 16 (*on* ii. 1. 16-17); 167. 19 (*on* ii. 3. 6); 254. 16 (*on* iii. 3. 11); 773. 26; (*on* x. 8. 2); 2 absence of confidence यस्यानास्था वेदवाक्ये मन्दं हसति संततम् BrahmVaiP. ii. 31. 49 = DevīBhāP. ix. 35. 49; यस्य लोकायतोपप्लुतमतेर्द्विवर्गमात्रनिष्ठस्य वेदोदितेषु चतुर्ष्वप्यनास्था ŚatDū. 54. 4; 3 absence of hope, despair नार्यो राजगृहं गत्वा प्रलापातेषु भर्तृषु। मेनिरे दिवसं लब्धमनास्था नित्यमन्यथा RājTa.(Ka.) 8. 174; 4 non-fixity (of alternative which is flexible and may include additional similar items also) अथ बृहस्पतिः — साक्षिलेख्यानुमानेन सम्यग् दिव्येन वा जितः … वाकारोऽनास्थायाम् DaṇḍaVi. 69. 3; 87. 8; 226. 4; प्रातिभासिकमेव रजतं प्रतियोगीत्यर्थः। तच्च स्वरूपेण पारमार्थिकत्वेन वेत्यनास्थायां वा शब्दः AdvaiSi. 124. 1; (न तत्सुतस्तत्सुतो वा) वाशब्दोऽनास्थायाम्, तेन प्रपौत्रादिसंग्रहः VīraMi. 445. 18 (*on* 2. 28); (वनाद् गृहाद् वा कृत्वेष्टिम् … मोक्षे मनः कुर्यात्) वनाद् वानप्रस्थाश्रमाद् गृहाद् गृहस्थाश्रमाद् वाशब्देनानास्थावाचिना ब्रह्मचर्याश्रमाद् वा … मोक्षे संन्यासाश्रमे मनः कुर्यात् VīraMi. 833. 7 (*on* 3. 56); VīraMi. (Āhnika.) 31. 11.

अनास्थागर्वसंभव (anāsthāgarva-sambhava) *adj.* resulting from indifference and arrogance इष्टानां भावानां प्रणयेऽपि अनास्थागर्वसंभवः पादप्रहारः प्रियस्य कृतागसः NāṭaLaRaK. 2674.

अनास्थागोचर (an-āsthāgocara) *m.* not the object of desire नित्यत्वं सत्यत्वं तद्यस्यास्ति तन्नित्यं सत्यं तथा चास्थागोचरः। अनित्यत्वमसत्यत्वं तद्यस्यास्ति तदनित्यमनृतं, तथा चानास्थागोचरः Bhām. 52. 2 (*on* i. 1. 1)

अनास्थान (an-āsthāná) *adj.* not having firm or stable base अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे। यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् ṚV. i. 116. 5; [having or yielding no basis or fulcrum (as the sea), MW.; unfit for a fixed seat (as water), APTE]; *n.* improper place सर्वोज्ज्वलं तवैवैतन्मुखेन्दौ शोभते वचः। अन्धकायस्य जगतामनास्थाने तु पातितम् BṛKathāMañ. ix. 2. 866.

अनास्थापद (anāsthā-pada) *n.* object of non-concern, thing not to be relied on तदेव च जीवितं प्राणधारणरूपत्वात्प्राणवृत्तेश्च चाञ्चल्यादनास्थापदमिति Loc. 128. 19 (*on* 3. 1)

अनास्थापर (anāsthā-para) *adj.* [*f.* -ā] intent on disregarding असावनास्थापरयावधीरितः सरोरुहिण्या शिरसा नमन्नपि। उपैति शुष्यन् कलमः सहाम्भसा मनोभुवा तप्त इवाभिपाण्डुताम् Kirātā. 4. 34 (comm. अनादरपरया); चित्तस्मिन्निश्चयमस्ति दोषकणिका वक्ता यदस्मादृशः सन्तः सच्चरितानुरक्तरसिकास्तस्यामनास्थापराः PāṇḍaC. 18. 279.

अनास्थापित (an-āsthāpita) *adj.* to whom the *āsthāpana-basti* (i. e. a sort of enema) is not given अवम्यास्तु गर्भिणीसुकुमारान्यकार्यव्यग्र' … 'शङ्खकर्णपार्श्वशूलिनोऽनास्थापितश्च कृमिकोष्ठ इति AṣṭāSaṁ. i. 137. 13 (1. 27)

अनास्थाप्य (an-āsthāpya) *adj.* not fit to be given the *āsthāpana-basti* (i. e. a sort of enema) अनास्थाप्यास्तु अजीर्णातिस्निग्ध' -- 'मधुमेहकुष्ठार्ताः CaraS. viii. 2. 14 (1941 Ed.); अनास्थाप्यास्त्वतिस्निग्धोत्क्लिष्टदोष' -- 'मेहार्ता गर्भिणी चाप्यवृत्ताष्टममासा AṣṭāSaṁ. i. 145. 18 (1. 28); भीरुश्चैवाप्यनास्थाप्यः श्वासी यश्च मतङ्गजः Hastyāyur. 603. 16 (4. 5)

अनास्थाब्धि (anāsthābdhi) *m.* ocean of indifference (to the ultimate reality) ब्रह्मानन्दमनास्थाब्धौ मनो विषयविद्रुमितम्। उदरामरसंकाशमातङ्गमिव कर्दमात् YogVā. iv. 42. 50.

अनास्थामन्थरा (anāsthā-mantharā) *adj.* (*f.*) dull due to indifference अहं तु साभिलाषोऽपि दर्शिताशीकधीरतः। अवोचं स्मितसंकीर्णामनास्थामन्थरां गिरम् BṛKathāŚloSaṁ. 17. 168.

अनास्थामात्र (anāsthā-mātra) *n.* mere indifference आस्थामात्र-मनन्तानां दुःखानामाकरं विदुः । अनास्थामात्रमभितः सुखानामालयं विदुः MahāU. 5. 84.

अनास्थाय (an-āsthāya) *ger.* not having considered सर्वास्वपि दर्शनस्थितिषु काममस्माकीनाः खण्डनयुक्तयः प्रगल्भन्ते यासामीश्वरपरवशां विश्वव्यवस्थामनास्थाय निरसनमशक्यम् KhaṇḍanKhā. 229. 21.

अनास्थारूप (anāsthā-rūpa) *adj.* of the nature of indifference उक्तनिष्कर्षाकथनबीजं त्वस्य 'देवराच्च सुतोत्पत्तिरिति' कलिवर्ज्येषु गणनात् अनास्थारूपमेव BālamBha. ii. 168.23 (*on* 2. 127)

अनास्थावचन (anāsthā-vacana) *n.* statement made without any care (i e careless or loose statement) (प्रत्यभिज्ञानमित्यत्वे ···| अनादराय, न ह्यस्मात् प्रकृतं मम दुष्यति) यत्विदमनास्थावचनं, 'न हि ते प्रत्यक्षे यदि ते प्रत्यक्षे नित्ये एवे'ति NyāyRa. 827. 19 (*on* 6. 382)

अनास्थावत् (anāsthā-va(n)t) *adj.* possessing disregard, indifferent 'अतिः पूजायाम्' इति स्मरणादत्यन्तं पूज्यतमाश्रमिभ्यः साधनचतुष्टयसंपत्तिमहिम्ना स्वेषु देहादिष्वपि जीवनभोगादिष्वनास्थावद्भ्यः (उपदिष्टम्) ŚvetāU-Bh. 246. 6 (*on* 6. 21)

अनास्थावश (anāsthā-vaśa) *m.* [Abl.] due to indifference सोऽहम् ··· शान्तस्त्वन्नगराद्विरक्तहृदयः प्रास्थामनास्थावशात् Jīvān. 305.6.

अनास्थावाद (anāsthā-vāda) *m.* statement made without any care (i. e. careless or loose statement) भाष्ये तु 'पूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णो वाचकः' इत्यनास्थावादः NayaVi. 181.2 (*on* i. 1.5)); न चात्मैवाज्ञानहानिर्वेति वैदिकं वचनं, येन तन्मात्राद्दर्थसिद्धिः। अनास्थावादस्त्वयम्, आचार्यस्यापि स्खलितमेव वा NyāyMa. 357. 4; यत्तु तत्रोदाहरिष्यते सोऽनास्थावादो द्रष्टव्यः PadMañ. on KāśiVṛ. *on* P. i. 4.7; *on* P. ii. 3.46; भोक्तुः पूर्वागमाद्योत्पथतां भोक्तुर्देश्य कस्वामिकृतत्यागाद्देत्यत्र न नो ग्रह इति । ··· यश्चात्र न नो ग्रह इत्यनास्थावादः सोऽप्ययुक्तः VīraMi.(Vyavahāra.) 162. 16; अप्रामाण्यं वेत्यनास्थावादः । सर्वथित्वेन प्रामाण्योपपत्तावप्रामाण्यायोगात् MayūMāli. 383.1 (*on* iv. 3. 7); 655. 7 (*on* x. 1.9); 779. 6 (*on* x. 8.7)

अनास्थाशिथिल (anāsthā-śithila) *adj.* relaxed due to lack of interest निध्यायन्तः सरोमाञ्चं मात्रान् गगनचारिणः। विमानेषु मनश्चक्रुरनास्थाशिथिलं मुहुः PāṇḍaC. 5.437.

अनास्थित (an-āsthita) *adj.* I not attained अनास्थितं ते पितृभिरन्यैरप्यङ्ग कर्हिचित् । आतिष्ठ जगतां वन्द्यं तद्विष्णोः परमं पदम् BhāgP. iv. 12. 26; II not mounted (i. e. not controlled) द्विरदायुतसारदुर्दमं द्रुतविद्रावितदिग्धतङ्गजम् । असुरादिभिरप्यनास्थितं सुरसेनापरभागदर्शिनम् ।··· अवमत्य तुरङ्गदानवम् Yādavā. 9. 22 (comm. अनास्थितम् अनारूढम् ··· अवशंवदमिति यावत्)

अनास्थेय (an-ästheya) *adj.* not to be considered इति वाक्यमक्षपादपक्षपातेनोक्तमित्यनास्थेयम् NyāyPari. 3. 11.

अनास्थोत्तानहस्त (anāsthottānahasta) *adj.* who has extended or raised his hand casually अनास्थोत्तानहस्तेन ततः स्मित्वा मयोदितम् । नैवेदमतिदुर्ज्ञानं किं मुधेवाकुलौ युवाम् BṛKathāŚloSam. 18. 374.

अनास्पद (an-āspada) *adj.* 1A having no ground, baseless यस्माच्चक्षुःस्पर्शनाभ्यां तद्विशिष्टः प्रत्ययो भवति । अनास्पदस्तर्हि प्रतिषेधः घटादावपि तद्विशिष्टप्रत्ययदर्शनात् NyāyVār. 76. 6 (*on* i. 1. 14); यदिदं भवताभिधीयते एकदेशग्रहणादेतस्य ग्रहणमेकदेशाग्रहणाच्चाग्रहणमित्ययमनास्पदो विकल्पः NyāyVār. 218. 9 (*on* ii. 1.30); यदैव वस्तु(सत्) तदैव गोत्वेनाभिसंबध्यत इत्यनास्पदो विकल्पः NyāyVār. 322. 14 (*on* ii. 2.65); क्षणिकाक्षणिकत्वादिविकल्पस्तेष्वनास्पदः। तदा वस्त्वेव येन स्यात्क्षणिकं यदिवान्यथा TattvSaṁ. 386; 2616; 1B devoid of an objective basis यद्युपलब्धमपि न गोचरीभवति, अनास्पदमेवेदमभ्युपगतं भवति Bṛha. 339. 4 (*on* i. 1. 20) (comm. अनास्पदं निर्विषयमेवेदम् 'नास्ति' इति ज्ञानमभ्युपगतं भवति); 2 having no place (मयः) परिगृह्य सर्वां ममानधामय हेमां भुवनेष्वनास्पदः । अधिवस्तुमलक्षितं परैः बिलमेतन्मतिमान्विनिर्ममे RāmC. 13.26; *n.* improper object, unfit object तेनानास्पदमात्मीयप्रतापोत्कर्षरागिणा । चक्रेऽनङ्गप्रतापस्य चे(?वे)ङ्गिभूपाङ्गनाजनः VikraDeC. 4. 29; (अद्राक्षुरपि तत्र ते) अनास्पदं कविगिराम् ··· दुग्धोदं नाम रत्नाकरम् NīlaVi. 49.4.

अनास्पदता (anāspada-tā) *f.* the state of not being the abode सर्वथा दुःखक्लेशस्याप्यनास्पदतया स्थितः। संसारवासवैराग्यं स भेजे तत्त्वविद्वरः TriṣaŚaPuC. iii. 6.8.

अनास्पदत्व (anāspada-tva) *n.* the state of being siteless आयुश्चिरमितरेषां तु ह्यनिरनास्पदत्वात् BhaktiSū.(Śa.) iii. 2.5.

अनास्पृष्ट (an-āspṛṣṭa) *adj.* A which has not touched or reached अग्नीनाधास्यमानो योऽश्वत्थः शमीगर्भो भूमिं मूलेनास्पृष्टस्तस्यारणी आहरेत्। अनास्पृष्ट इत्येकेषाम् BhārŚS. v. 1. 1; B not touched by ततस्तमाश्रमम् ··· । ददृशुः पाण्डवाः — । तमसा रहितं पुण्यमनामृ(v. l. स्पृ)ष्टं रवेः करैः MahāBhā. iii. 145.24.

अनास्माक (an-āsmāká) *adj.* not belonging to us अनास्माकं देवपीयुं पियारुं (बधान) AV. xix. 57. 4; xix. 57. 5; अनास्माकस्त्वदेवपीयुः इति व्यवसाना पञ्चपदा परशाक्वरातिजगतीति BṛSarvāAnu. 10.31 (19. 57)

[1]**अनास्य** (a-nāsya) *adj.* not having a nose-cord or nose-string उस्रावेतम् ··· अनास्यौ ब्रह्मचोदनौ KapiKaS. 2. 1 (15. 1)

[2]**अनास्य** (an-āsya) *adj.* not having the mouth अनास्यं वाप्यनोष्ठं वा जायते चेद् विद्रूलकम्। ··· एतदत्स्नुतं नाम राष्ट्रे राज्यक्षयंकरम् AVPari. 72(6). 4.

अनास्यप्रवेशिन् (an-āsyapraveśin) *adj.* which cannot enter the mouth क्रीडनकानि खलु कुमारस्य ··· अनास्यप्रवेशीनि ··· स्युः CaraS. iv. 8.63 (1941 Ed.)

अनास्यविहरण (an-āsyaviharaṇa) *n.* [Loc.] in the sense other than 'opening of the mouth' आङो दोऽनास्यविहरणे P. i. 3.20.

अनास्रव (an-āsrava) *adj.* [*f.* -ā] 1 (Buddh.) not having outflow (towards worldly objects), free from evil influence or sin or depravity, not having relation with vices, undefiled, pure अहोऽस्य ज्ञानं विपुलम् अनास्रवम् SaddhaPuṇ. 10.18; अथेमे संशयप्राप्ता वशीभूता अनास्रवाः SaddhaPuṇ. 24. 22; 95. 29; यानि कानिचिद् देवमनुष्यसर्वश्रावकप्रत्येकबुद्धकुशलानि सास्रवाण्यनास्रवाणि वा, सर्वाणि तानि बोधिचित्तोत्पादवशिराजमहामणिरत्नस्य मूल्यं न क्षमन्ते GaṇḍVyū. 400. 28; सास्रवानास्रवा धर्माः संस्कृतासंस्कृताश्च ये AbhisaAlaṅ. 1.41; अनास्रवाणां सर्वेषामेकैकेनापि संग्रहात् । एकक्षणावबोधोऽयं ज्ञेयो दानादिना मुनेः AbhisaAlaṅ. 7.1; सर्वधर्मा इति महामते यदुत कुशलाकुशलाः ··· सास्रवानास्रवा उपात्तानुपात्ताः LaṅkāSū. 6. 8(6) (95. 20); कथमनास्रवम् — सास्रवविपर्ययेणानास्रवम् AbhidhSa. 18.9; अनास्रवे धातौ अविच्छिन्नाः जिनक्रियाः MaYānaSū. 37.15 (9. 20); सास्रवानास्रवा धर्माः संस्कृता मार्गवर्जिताः AbhidhK. 1.4; 1.5; मनः । ··· अनास्रवं द्विधा AbhidhK. 2.66; प्रातिमोक्षान्विता अष्टौ —। अनास्रवेणार्यसत्त्वाः AbhidhK. 4. 17; ध्यानभूम्यैव लभ्यते अनास्रवः (संवरः) AbhidhK. 4. 26; 4. 44; 4.88; सास्रवानास्रवं ज्ञानम् — । अनास्रवं द्विधा AbhidhK. 7.2; 8. 6; 8. 14; यस्मिन् रूपेऽवीतानागतप्रत्युत्पन्नो नोत्पद्यतेऽनुनयो वा प्रतिघो वा यावद् यस्मिन् विज्ञाने । इम उच्यन्तेऽनास्रवा धर्माः AbhidhKoBh. 196.12 (*on* 4.4); स एवानास्रवो धातुरचिन्त्यः कुशलो ध्रुवः Triṁśi. 30; (प्रज्ञामला) अमलेत्यनास्रवा, मलानामास्रवपर्यायत्वात् Sphuṭā. i. 9.7 (*on* 1.2); ii. 71. 25 (*on* 2. 38); या निर्लेपतया निरुत्तरपदं सर्वप्रपञ्चोज्झिता प्रज्ञापारमितादिसंवृतिपदैराख्यायतेऽनास्रवा BodhiCaPañ. 167.3; 2 (Jain.) not having defilement of Karmic inflow, free from defilement of Karmic inflow श्रमणाः शुद्धोपयुक्ताः शुभोपयुक्ताश्च भवन्ति समये । तेष्वपि शुद्धोपयुक्ता अनास्रवाः सास्रवाः शेषाः TattvPradī.(A.) 338.7 (*on* 3. 45); TātpaVṛ. 339. 13 (*on* 3. 45); *m.* purity अनास्रवेण हीयन्ते क्लेशाः AbhidhK. 8. 21.

अनास्रवकलाप (anāsrava-kalāpa) *m.* aggregate of pure (mental states) यदा सास्रवचित्तसमनन्तरमनास्रवमनास्रवचित्तसमनन्तरं वा सास्रवचित्तमुत्पद्यते। तदा किंपूर्वकः सास्रवकलापोऽनास्रवकलापो वा शक्तिमान् Sphuṭā. ii. 69. 3 (*on* 2. 36)

अनास्रवगोचर (anāsrava-gocara) *adj.* the object of which is pure (अनुशयाः) मिथ्यादृग्विमती ताभ्यां युक्ताविद्या च केवला। निरोधमार्गदृग्घेयाः षडनास्रवगोचराः AbhidhK. 5.14; 5. 31.

अनास्रवचित्त (anāsrava-citta) *n.* pure mind सास्रवचित्तसमनन्तरमनास्रवमनास्रवचित्तसमनन्तरं वा सास्रवचित्तमुत्पद्यते Sphuṭā. ii. 69. 1 (*on* 2. 36)

अनास्रवत्वाभाव (anāsravatvābhāva) *m.* lack or absence of purity, impurity पृथग्जनत्वं कतमत्। आर्यधर्माणामलाभ इत्यनेन शास्त्रपाठेनानास्रवत्वाभावमप्राप्तेर्दर्शयति Sphuṭā. ii. 74.4 (*on* 2. 40)

अनास्रवधातु (anāsrava-dhātu) *m.* sphere or world not having outflow अनास्रवधातुगाम्भीर्ये षोडश श्लोकाः MaYānaSū. 37. 19 (9. 21)

अनास्रवध्यानव्यवकिरण (anāsravadhyāna-vyavakiraṇa) *n.* intermixing of the pure meditation तस्य त्वधिमात्रस्यैवानास्रवध्यानव्यवकिरणेन मृदुमध्याधिमात्राधिमात्रतराधिमात्रतमभेदभिन्नेन पुनः पञ्च स्थानान्तराणि Sphuṭā. iii. 3. 18 (*on* 3. 2)

अनास्रवपक्ष (anāsrava-pakṣa) *m.* class or category of pure (elements) ते तर्हीह चक्षुरादयो वैमाषिकैः क्व पक्षे निक्षेप्तव्याः। किं सास्रवपक्षे अथानास्रवपक्ष इति Sphuṭā. i. 16. 7 (*on* 1.5)

अनास्रवप्रकार (anāsrava-prakāra) *adj.* of the pure variety सवितर्कविचारमाप शान्तं प्रथमं ध्यानमनास्रवप्रकारम् BuddhaC. 5.10.

अनास्रवबीज (anāsrava-bīja) *n.* seed of the pure (mental state)

सास्रवबीजं चानास्रवेऽनास्रवबीजं च सास्रवे चेतसि वर्तेत इति सांकर्यदोषः प्रसज्यत इति Sphuṭā. ii. 68. 9 (*on* 2. 36)

अनास्रवमार्ग (anāsrava-mārga) *m.* pure path यदसावार्यमार्गसामर्थ्याद् अक्रियानियमं प्रतिलभते तच्चानास्रवमार्गसंनिश्रयलाभादनास्रवं स्यात् AbhidhKoBh. 199. 2 (*on* 4. 4); यः सत्यालम्बनत्वान्निर्वेधभागीयजातीयः सामान्यमनस्कारो भावनां गच्छति । अनास्रवमार्गोत्पत्तिकाले प्राप्यत इत्यर्थः Sphuṭā. ii. 185. 10 (*on* 2. 72); ii. 185. 15 (*on* 2. 72); iv. 99. 10 (*on* 4. 93)

अनास्रववासना (anāsrava-vāsanā) *f.* impression of the non-outflows क्षणिकं पुनर्महामते आलयविज्ञानं तथागतगर्भसंशब्दितं मनःसहितं प्रवृत्तिविज्ञानवासनाभिः क्षणिकमनास्रववासनाभिरक्षणिकम् LaṅkāSū. 6. 8(16) (95. 30)

अनास्रववियोगाप्ति (anāsrava-viyogāpti) *f.* pure acquisition of the disconnection (from this world) अनास्रववियोगाप्तेर्भवाग्रविकलीकृतेः । हेतुद्वयसमुद्घातात् परिज्ञा AbhidhK. 5. 63.

अनास्रवसंवर (anāsrava-saṁvara) *m.* pure restraint अनास्रवसंवरसंगृहीतं कर्म कतमत् । सत्यदर्शनेन अनास्रवमनस्कारबलेन प्रतिलब्धा अनास्रवा विरतिः AbhidhSa. 58. 1; मौलेभ्यः सर्वकालेभ्यो ध्यानानास्रवसंवरौ AbhidhK. 4. 35; त्रिविधः संवरः ···अनास्रवसंवरोऽनास्रवं शीलम् AbhidhKoBh. 205. 17 (*on* 4. 13); 83. 25 (*on* 2. 51); के पुनस्ते (धर्माः) । चित्तचैत्ता अनास्रवसंवरा जात्यादयश्च चित्तविप्रयुक्ता इति Sphuṭā. i. 9. 10 (*on* 1. 2); i. 34. 11 (*on* 1. 11)

अनास्रवसमाधि (anāsrava-samādhi) *m.* pure concentration तद् (चित्तं) द्विविधं सास्रवसमाधिसंभूतं ध्यानसंवरस्वभावम् । अनास्रवसमाधिसंभूतमनास्रवसंवरस्वभावम् Sphuṭā. i. 34. 11 (*on* 1. 11); iv. 19. 1 (*on* 4. 6)

अनास्रवसास्रवप्रकारभेद (anāsravasāsravaprakāra-bheda) *m.* distinction into the varieties of pure and impure (अमलं त्रयम्) इति । अमलमेव त्रयमित्यवधार्यते । ननु चायमनास्रवसास्रवप्रकारभेद उक्तो धातुनिर्देशे Sphuṭā. ii. 11. 25 (*on* 2. 9)

अनास्रवानुगुण (anāsravānuguṇa) *adj.* appropriate to the pure (mental state) (शुद्धकम्) क्लेशोत्पत्तिस्वभूम्यूर्ध्वानास्रवानुगुणं हि तद् AbhidhK. 8. 17.

अनास्रवालम्बन (anāsravālambana) *adj.* having the support of the pure (mental state) एते षडनास्रवालम्बनाः । शेषाः सास्रवालम्बनाः AbhidhKoBh. 288. 7 (*on* 5. 14); षडेव ह्यनुशया अनास्रवालम्बनाः पठ्यन्ते । ते च निरोधमार्गालम्बना एव Sphuṭā. i. 14. 22 (*on* 1. 4)

अनास्रवोर्ध्वविषय (anāsravordhva-viṣaya) *adj.* having for objects the *anāsrava* (i.e. purity) and the *ūrdhva* (*-bhūmi*) (i. e. higher stage of development) नानास्रवोर्ध्वविषयाः (Bhāṣya अनास्रवालम्बना अनुशया नैवालम्बनतोऽनुशेरते । नाप्यूर्ध्वभूम्यालम्बनाः) AbhidhK. 5. 18.

अनास्राव (an-āsrāvá) *adj.* free from flux आदङ्गा कुविदङ्गा शतं या भेषजानि ते । तेषामसि त्वमुत्तममनास्रावमरोगणम् AV. ii. 3. 2; AV.(P.) i. 8. 2; xix. 33. 14; xix. 52. 16; xx. 33. 8 [*but* PW., MW. not causing pain or suffering]; *m.* absence of oozing out (of fluids or bodily discharges) तत्र सम्यग्दग्धे विकारोपशमो लाघवमनास्रावश्च SuśruS. i. 11. 26.

अनास्रावित (an-āsrāvita) *adj.* not drained off एवमपि चरुशब्दस्यानास्रावितान्तरूष्मपक्वौदने याज्ञिकैः प्रयुज्यमानत्वेनास्त्यपि वाक्यशेषे प्रयोगद्वयबलात् स्थाल्योदनयोः संदेह एव MayūMāli. 36. 7 (*on* i. 3. 5)

अनास्राविन् (an-āsrāvin) *adj.* not discharging any fluid विशदं लघ्वनास्रावि क्रियापटु सुनिर्मलम् । संशान्तोपद्रवं नेत्रम् SuśruS. vi. 18. 75.

अनास्वाद (an-āsvāda) *m.* non-tasting, non-relishing अनास्वादश्च विज्ञेयो विशेषः षोडशात्मकः । विशेषमार्गो मार्गेभ्यो येनान्येभ्यो विशिष्यते AbhisaAlaṅ. 4. 26; MaYānaSu. 160. 15 (19. 2) [*m.* want of taste, insipidity; *adj.* without taste, insipid, MW., Apte]

अनास्वादन (an-āsvādana) *n.* [w. r. for आस्वादन, Kuiper Ed.] GopāKeCan. 82. 15.

अनास्वादनीयत्व (anāsvādanīya-tva) *n.* the state of not being appreciable or enjoyable अन्ये तु क्लिष्टा एव रागाभावे रसस्याभासत्वं प्रतिजानते । न तदुपपद्यते । पुरुषेऽपि रागाभावे रसस्यानास्वादनीयत्वात् RasāSu. 203. 20 (2. 263½)

अनास्वादप्रसङ्गतस् (anāsvādaprasaṅga-tas) *adv.* due to the undesired contingency of non-appreciation or non-enjoyment केचिद् समानबलयोरनयोः (रसयोः) संकरं विदुः ।··· तुल्यत्वे पूर्वमास्वादः कतरस्येत्यनिश्चयात् । स्पर्धापरत्वादुभयोरनास्वादप्रसङ्गतः RasāSu. 200. 8 (2. 254)

अनास्वादयत् (an-āsvādayat) *adj.* not relishing or eating कुतोऽप्ययमेवमागत्यागत्य ··· नवपाकमधुराणि नाभिवाञ्छितफलानि सर्वतो विलुप्य स्वयमनास्वादयन्नये कुत्रचिद्याति UdaySuKa. 127. 9.

अनास्वादयितुम् (an-āsvādayitum) *inf.* not to taste यथा ह्यनास्वादयितुं न शक्यं जिह्वातलस्थं मधु वा विषं वा ArthŚā. i. 165. 1 (2. 9)

अनास्वादित (an-āsvādita) *adj.* A not realised यो वा वेत्त्यखिलं त्रिकालचरितं त्रैलोक्यगर्भस्थितं द्रव्यं पर्ययवत्स्वभावसहितं चान्यैरनास्वादितम् । नत्वा तं परमेश्वरम् ··· जिनं वक्ष्यामि KalyāKā. 4. 1; B not tasted, not enjoyed वरमनास्वादितमेवामृतम्, न तु सकृत्पीत्वा पुनरलाभदुःखम् NalaCam. 5. 2(30); अनास्वादितगोविन्दपदाम्बुजरजोरसः । मनोरथपथातीतं स्फीतं नाकलयेत्पदम् SkandP. iv. 19. 110; PadmP. iv. 84. 16; C not experienced अनिर्वाच्यं नवं मुग्धविदग्धमधुरं रतम् । अनास्वादितमन्याभ्यः सिषेवे स तया सह KathāSaSāg. viii. 7. 158.

अनास्वादितकादम्बरीरस (anāsvādita-kādambarīrasa) *adj.* who has not tasted the wine distilled from Kadamba flowers यो यादवकुमारोऽपि भूत्वा अनास्वादितकादम्बरीरसः स एतस्य गुणो दोषो वा क्रियताम् BālBhā. 1. 62(1)

अनास्वादितकामरस (anāsvādita-kāmarasa) *adj.* who has not enjoyed the pleasure of the sexual act अथ पाण्डुः ··· ऋषिम् ···। तथैवाप्लुतमनास्वा(v. l. स्वा)दितकामरसमतृप्तं बाणेनाभिजघान MahāBhā. i. 90. 64.

अनास्वादिततद्भोग (anāsvādita-tadbhoga) *adj.* who has not experienced the (sexual) enjoyment with her अनास्वादिततद्भोगस्तत्कान्तां तु जहौ नृपः KathāSaSāg. xii. 24. 51.

अनास्वादिततिक्त (anāsvādita-tikta) *adj.* who has not tasted the bitter things (before) अनास्वादिततिक्तस्य शिशोस्तिक्तस्मरणानुपपत्तेः कथं तिक्तो गुड इति प्रत्यय इति चेन्न । जन्मान्तरानुभूतत्वात् NyāySu.(Ja.) 44B. 1 (*on* i. 1. 1)

अनास्वादिततिक्तरस (anāsvādita-tiktarasa) *adj.* who has not experienced the bitter taste (before) अनास्वादिततिक्तरसस्य बालस्य मधुरे तिक्तावभासो जन्मान्तरानुभवजन्यसंस्कारहेतुक इति प्रतिपादयता ··· तिक्तरसस्यैन्द्रियकत्वस्फुटीकरणात् SiddhāLeSaṁ. 204. 7.

अनास्वादितत्व (anāsvādita-tva) *n.* the state of not being tasted (before) वयमेतद्रसाभिप्रायं कथयिष्यामः । परमनास्वादितत्वात् भवान्न मानयिष्यति । अतो भवान् पूर्वमास्वादयतु PurāPraSaṁ. 37. 20.

अनास्वादितपूर्व (anāsvādita-pūrva) *adj.* [*f.* -ā] not tasted or partaken before मोदकान्प्रददुस्तस्मै भक्ष्यांश्च विविधाञ्शुभान् । तानि चास्वाद्य तेजस्वी फलानीति स्म मन्यते । अनास्वादितपूर्वाणि Rāmā. i. 9. 21; i. 309*(73); पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितम् RaghuVa. 3. 54; अनास्वादितपूर्वा सा भक्षिता मुनिना (भिक्षा) MatsyaP. 185. 36; वद भद्र कुतः प्राप्तं मांसमेतत्त्वयेदृशम् । अनास्वादितपूर्वोऽयं रसो यस्यातिपेशलः PadmP.(Ra.) 22. 140.

अनास्वादितभोग (anāsvādita-bhoga) *adj.* who has not enjoyed sensual pleasures सदेहा वास्त्वदेहा वा मुक्तता विषये न च । अनास्वादितभोगस्य कुतो भोज्यानुभूतयः YogVā. ii. 4. 2.

अनास्वादितरस (anāsvādita-rasa) *adj.* the flavour of which is not (yet) tasted मधु नवमनास्वादितरसम् । अखण्डं पुण्यानां फलमिव च तद्रूपमनघम् Śāk. 2. 11; ŚatTrayī. 203; SaraKaṇṭhā. 426. 9; ŚārṅgaPa. 3271; Subhāṣi. 1332.

अनास्वादितविषयरस (anāsvādita-viṣayarasa) *adj.* who has not (yet) experienced the taste of sensual pleasures अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य Kād. 103. 16.

अनास्वादितविषाददैन्य (anāsvādita-viṣādadainya) *adj.* who has not (at all) experienced affliction and sadness अथ स बोधिसत्त्वः स्वधैर्यावष्टम्भादनास्वादितविषाददैन्यस्तस्यामप्यवस्थायाम् ··· परान्पातितुम् ··· न प्रसेहे JātaMā. 23. 25 (5. 7)

अनास्वादितसंभोग (anāsvādita-sambhoga) *adj.* who has not enjoyed sensual pleasures अनास्वादितसंभोगाः पतन्तु तव शत्रवः । बालवैधव्यदग्धानां कुलस्त्रीणां स्तना इव Subhāṣi. 2426.

अनास्वाद्य (an-āsvādya) *ger.* A not having tasted or partaken स संहृत्य च तत्सर्वं अनास्वाद्य च तद्धविः । तोषयामास देवांश्च पितॄंश्च द्विजसत्तमः MahāBhā. xii. 358*(1); अनाराध्य कालीमनास्वाद्य गौडीमृते मन्त्रतन्त्रादिना शब्दचौर्यादि । प्रबन्धं प्रगल्भं प्रकर्तुं प्रवक्तुं विरिञ्चिप्रपञ्चे मदन्यः कविः कः PadyaVe. 786; B not having enjoyed न च पूर्वमनास्वाद्य शक्यन्ते विषया नरैः । परित्यक्तुम् ParaS. 30. 116; अनास्वाद्येदमानन्दं जगद्राज्यशतान्यपि । समास्वादयता नेह किंचिदास्वादितं भवेद् YogVā. v. 34. 75.

अनास्वाद्य (an-āsvādya) *adj.* I not possible to be eaten विज्ञापयामो देवस्य दर्शनम्, अनालेप्यं चन्दनम् ··· अनास्वाद्यं रसायनम्, अक्षौद्रं मधु

NalaCam. 5. 15(9); साधुपाकेऽप्यनास्वाद्यं भोज्यं निर्लवणं यथा। तथैव नीरसं काव्यम् Vāgbhaṭa. 5. 1; **2** not to be enjoyed अनास्वाद्यमविक्रेयमनादेयमनीप्सितम्। दत्तं निरुपकारं यद् वन्ध्यदानेन तेन किम् DarpDa. 6.17; **3** not possible to be appreciated or relished भावयन्ति चित्तवृत्तय एवालौकिकाः -- स्वात्मानं लौकिकदशायामनास्वाद्यमप्यास्वाद्यं कुर्वन्ति Kāvyānu.(He.) 100.5; साधुपाकेऽप्यनास्वाद्यं भोज्यं निर्लवणं यथा। तथैव नीरसं काव्यम् Vāgbhaṭa. 5. 1; **4** not possible to be tasted वायोः पुनरयं स्वभावः ... कटुकः ... वेगवान् स्पर्शवांश्च लघुरनास्वाद्यः, तस्य नोपलभ्यते रसः, इति प्रत्यनीकम्योऽस्यानुमेयो रसः Hastyāyur. 389. 17 (3. 6)

अनास्वाद्यतापत्ति (anāsvādyatāpatti) *f.* undesired contingency of being what is not possible to be appreciated इत्थमविरोधसंपादनेनापि निबध्यमानो रसो रसशब्देन शृङ्गारादिशब्दैर्वा नाभिधातुमुचितः, अनास्वाद्यतापत्तेः RasGaṅ. 62. 11.

अनास्वाद्यत्व (anāsvādya-tva) *n.* the state of being what cannot be appreciated or relished, non-relishability किं नामेयद्व्यङ्ग्यत्वम्। आस्वाद्यव्यङ्ग्यत्वम्, अनास्वाद्यव्यङ्ग्यत्वम् वा। ... यदि चास्वाद्यत्वं तदाक्षुद्रत्वमेव। क्षुद्रतायामनास्वाद्यत्वात् SāhiDa. 248. 5; भट्टनायकास्तु ताटस्थ्येन रसप्रतीतावनास्वाद्यत्वम् RasGaṅ. 28.9; 30.14.

अनास्वाद्यव्यङ्ग्यत्व (anāsvādyavyaṅgya-tva) *n.* nature of having suggested meaning which cannot be appreciated or relished किं नामेयद्व्यङ्ग्यत्वम्। अनास्वाद्यव्यङ्ग्यत्वम्, आस्वाद्यव्यङ्ग्यत्वं वा SāhiDa. 248.3.

अनाहंकारिकत्व (anāhaṅkārika-tva) *n.* the state of not being evolved from the 'I-consciousness' अन(v. l. ना MUSS. and TSS. Eds.)हंकारिकत्वं च चक्षुरादेः प्रसज्यते ŚlokaVār. 5(4). 107 (381. 1); संहतात्मकत्वं हि शयनादावनाहंकारिकत्वेन व्याप्तं दृष्टम् Kāśi. iii. 70. 9 (*on* 5(4). 106)

अनाहत (an-āhata) *adj.* [*f.* -ā] **1AI** untrodden **II** unobstructed **B** indestructible **C** not uttered falsely, truthful **2** (mystic subtle sound) not produced by striking **3A** (musical instrument) not played upon (i. e. not beaten, struck or blown) **B** not struck (i. e. not pulled) **4A** not hit, not wounded (in battle) **B** not struck **C** not hit or broken, intact **5A** unbeaten, unbleached **B** (metal) unhammered, not struck **1AI** untrodden एमं पन्थाम् अरुक्षाम सुगं स्वस्तिवाहनम्। यत्र विश्वान् परि द्विषो वृणक्ति निन्दितेष्वान्तमेत्यनाहतः AV.(P.) ii. 31. 4; **1AII** unobstructed (भगवतस्तस्य -- शक्तिः) बुधैः प्रोक्ता ...। तथानाहतशीर्ष्णी चानाहतोऽभ्युदयो यतः AhirbuS. 3. 14; तदन्तर्धानसामर्थ्यमभूत् तेषामनाहतम् TriṣaŚaPuC. i. 1. 861; iii. 1.172; PadyaVe. 44; **1B** indestructible अथ ब्रह्मपदानां च लक्षणं चावधारय। ... सद्ब्रह्म सुप्रतिष्ठित[?]अनाहतः-(?त)। ... अज संपूर्णषाड्गुण्य अचिन्त्याद्भुत केवल PauṣkS. 19. 38; नारायणः परं ब्रह्म सर्वावासमनाहतम्। पूर्णस्तिमितषाड्गुण्यम् AhirbuS. 5. 2; **1C** not uttered falsely, truthful कृतस्मितेनौजसिकोऽथ शक्रः क्षितीश्वरः साहसिकोऽथ शौरिणा। अनाहतामौयत गाम् VāsuVi. 1. 53 (comm. अनाहतां सत्यार्थाम्); **2** (mystic subtle sound) not produced by striking अनाहतं तु यच्छब्दं तस्य शब्दस्य यत्परम्। तत्परं विन्दते यस्तु स योगी छिन्नसंशयः DhyānBiU. 3; अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः। ध्वनेरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः MaṇḍBrU. 5. 1 (352.8); YogŚiU. 6. 21; DevIBhāP. vii. 35.41; अनाहतो हतश्चैव स नादो द्विविधो मतः SaṁgIMa. i. 1. 4; SaṁgIRa. i. 22. 6 (1(2). 3); i. 61. 12 (1(2). 165); SaṁgIMa. i. 1.5; अनाहतमनुच्चार्यं शब्दब्रह्म शिवं परम्। ध्यायन्ते देवि सततं सुधिया यत्नतः प्रिये ŚivaP. v. 26.38 (437A. 11); यावत्क्षणं क्षणार्धं स्वरूपपरिचिन्तनं क्रियते। तावद्दक्षिणकर्णे त्वनाहतः श्रूयते शब्दः PraboSu. 144; भेरीमृदङ्गशङ्खाद्याहतनादे मनः क्षणं रमते। किं पुनरनाहतेऽस्मिन् मधुमधुरेऽखण्डिते स्वच्छे PraboSu. 146; मान्त्यमी पद्मकोषाः। निभृतमनुभवन्तोऽनाहतं नादमन्तर्विजितपवनवेगाः किं नु योगाधिरूढाः KaṁVa. 4.29; ब्रह्मग्रन्थेर्भवेद्भेदो ह्यानन्दः शून्यसंभवः। विचित्रः क्वणको देहेऽनाहतः श्रूयते ध्वनिः HaṭPra. 4. 70; 4. 100; हृदयपरमाकाशे स्फुरतः ... अनाहतस्य नादस्य अनुसंधानेन भस्मितनिखिलकश्मलो मूलं मनसा दशवारमावर्त्य NityoNi. 134. 16; **3A** (musical instrument) not played upon (i. e. not beaten, struck or blown) राहुर्भ्रसति चन्द्रार्कौ -- निर्गिरन्ते तृणाचैव तु सायकाः। अनाहतानि वाद्यन्ते नदन्ते शब्दमातुरम् AVPari. 67(6).5; भेर्यो मृदङ्गाः पटहा वाद्यन्ते वाप्यनाहताः। आहताश्च न वाद्यन्ते AVPari. 70B(2).2; 71(15).8; धार्तराष्ट्रस्य सैन्येषु भेरीणां नास्ति निस्वनः। अनाहताः पाण्डवानां नदन्ति पटहाः किल MahāBhā. v. 141. 19; अनाहता दुन्दुभयो विनेदुर्भृशनिस्वनाः MahāBhā. v. 183.24; vi. 2. 27; xii. 221. 89; xiv. 81. 15; अनाहता दुन्दुभयो देवानां प्राणदन् दिवि HariVaṁ. 48. 16; MatsyaP. 135.44; कारकाद्दत्तश्रुतयोरनाशिषि प्रतिषेधो वक्तव्यः। अनाहतो नदति देवदत्तः MahāBh. iii. 137.7 (*on* vi. 2.148); Prasā. ii. 778.24; SiddhāKau. 651A. 3 (*on* vi. 2.148); विमलरुचि भृशं नभो दुन्दुभेर्ध्वनिरखिलमनाहतस्यानशे Kirātā. 18.17; अनाहतान्यपि मङ्गलतूर्याणि रेणुः HarṣaC. 184. 13; अनाहताः पृथुध्वाना दध्वनुर्दिविजानकाः MahāP. 13.7; कृताभिषेकस्य नलस्य निस्वनाननाहता दुन्दुभयोऽपि चक्रिरे NalaCam. 4. 28; ViṣṇuDhaP. ii. 142. 2; अङ्कमारोपितायां च तन्त्र्यो यस्यामनाहताः। मधुरं निस्वनेयुस्तां विपां घोषवतीमिति BṛKathāŚloSaṁ. 5. 141; **3B** not struck (i. e. not pulled) अनालब्धं जृम्भति गाण्डिवं धनुरनालब्धा (v. l. °रनाहता) कम्पति मे धनुर्ज्या MahāBhā. v. 47. 96; **4A** not hit, not wounded (in battle) न तस्योरसि नो मूर्ध्नि न काये न भुजद्वये। अन्तरं पाण्डवश्रेष्ठ पश्यामि न हतं शरैः (v. l. यदनाहतम्) MahāBhā. iii. 22. 7; गोमायुरेष सेनाया रुवन्मध्येऽनुधावति। अनाहतश्च निष्क्रान्तो महद्वेदयते भयम् MahāBhā. iv 41. 22; iv. App. I. 45(70); किमयकानां (v. l. अनाहतानाम्) ये लोकाः सुहृदस्तानव्रजन्तु नः MahāBhā. v. 131.37; रणसंकटे। पृष्ठं दत्त्वाथ ये ...। अनाहता निवर्तन्ते ...। ते दुष्कृतं प्रपद्यन्ते MahāBhā. xiii. App. I. 15(1200); नानाहतोऽस्मभिः कश्चिच्छिलाभिश्चाप्यताडितः। नानिरुद्धो द्रुमगणैर्देवोऽदृश्यत संयुगे HariVaṁ. 36. 28; ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणम्। रामस्त्वनाहतोऽप्यासीद्विदीर्णहृदयः शुचा RaghuVa. 12. 77; **4B** not struck प्रत्यासन्नं कांचिदम्भोजनालैरालोक्यैव प्रेयसा हन्यमानाम्। विभ्रल्लन्या वक्त्रमावद्धकोपृत्ताम्रच्छायं विव्यथेऽनाहतापि HarVi. 18. 71; **4C** not hit or broken, intact प्रहारादेव घटस्याभावः। यत्त्वनाहतमनपसारं च भावान्तरमभावरूपेणावगम्यते तत् कथमसद् भविष्यति Kāśi. iii. 197. 12 (*on* 5(8).8); स्वयं विचित्रं स्फुरति चिदण्डकमनाहतम् YogVā. iii. 14. 64 (comm. अच्छिन्नगर्भम्); **5A** unbeaten, unbleached पटम्। ... नवं शुक्लमनाहतम्। प्रक्षाल्य JayāS. 20. 3; ज्योतिपिकप्रधानं सुब्रह्मण्यनामानं ब्रह्मण्यशिरोमणिः -- कन्चुकोष्णीषसारसनानाहतराङ्कवप्रावृतक्षौमसुल्यैर्वसनैः ... सम्यक् संभावयामास ĀnandRa. 6.7(5); **5B** (metal) unhammered, not struck हेमरूप्यं च तन्मूल्यमाहतानाहतं शुचि। ताम्रकुम्भयुगन्यस्तम् BṛKathāŚloSaṁ. 22.218; YogVā. iv. 47. 56; [not multiplied, PW., MW., APTE]

अनाहत (an-āhata) *n.* **1** the fourth of the mystic *cakras* or circles located in the heart स्वाधिष्ठानं त्रिः प्रदक्षिणीकृत्य मणिपूरकं गत्वा अनाहतमतिक्रम्य HaṁsU. 1.3(4); विचित्रघोषसंयुक्तानाहते श्रूयते ध्वनिः SaubhāLaU. 654.17; अनाहताख्यं यच्चक्रं दलैः षोडशभिर्युतम् YogKuU. 1.69; मूलाधारं स्वाधिष्ठानं मणिपूरं तृतीयकम्। अनाहतं विशुद्धं च आज्ञाचक्रं च षष्ठकम् YogKuU. 3. 10; मणिपूरं नाभिदेशं हृदयस्थमनाहतम् YogKuU. 3. 11; द्वादशारं महाचक्रं हृदये चाप्यनाहतम् YogŚiU. 1. 173 = 5. 9; मूलाधारानाहतभ्रूमध्ये स्थिताः अकारोकारमकाराः ĀgniveGS. ii. 4. 12 (75. 8); BrahmVaiP. i. 13.13; iv. 110. 10; महेश्वरहृदो जातं चक्रं चैवमनाहतम् SkandP. vi. 254. 33; मूलाधारलिङ्गनाभिष्वनाहतविशुद्धयोः। आज्ञाभालतलब्रह्मरन्ध्रेष्वेवं प्रविन्यसेत् KulārT. 4. 105; शब्दब्रह्ममयं(? यः) शब्दा(?ब्दो)-नाहतं (?तम्) तत्र दृश्यते। अनाहताख्यं तत्पद्मं मुनिभिः परिकीर्तितम् DevIBhāP. vii. 35. 41; हृदयेऽनाहतं नाम चतुर्थं पङ्कजं भवेत् ŚivS. 5 114; PañcaRā. (Nā.) i. 3. 70; ii. 8. 6; ii. 8. 13; हृदयेऽनाहतं चक्रं शिवस्य प्रणवाकृतेः SaṁgIRa. i. 53. 5 (1(2). 126); आधारः कन्दमित्युक्तं स्वाधिष्ठानं च जन्मभूः। नाभिस्तु मणिपूराख्यं हृदयं विद्ध्यनाहतम् ŚārṅgaPa. 4298; अनाहते देवि भजन्ति ये त्वामन्तः स्थितिस्त्वन्नगरे तु तेषाम् ŚaṅkaDigVi.(Mā.) 12.35 (comm. अनाहतसंज्ञे द्वादशदले पिङ्गलवर्णे चक्रे); मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञासहस्रारेषु ... स्थिता गणपतिब्रह्मविष्णुरुद्रजीवात्मपरमात्मानः ŚaṅkaVi.(Ā.) 109.6; अनाहते द्वादशारे प्रवालरुचिसंनिभे। कादिठान्तदलैर्युक्ते योगिनां हृदयंगमे TantrSā. (K.) 75. 14; तस्योर्ध्वे हृदि पङ्कजं सुललितं बन्धूककान्त्युज्ज्वलं काद्यैर्द्वादशवर्णकैरुपहितं सिन्दूररागान्वितैः। नाम्नानाहतसंज्ञकम् ṢaṭCakraNi. 22; PadyaVe. 44; प्रलयाग्निनिभं प्रथमं मूलाधारादनाहतं स्पृशति। तस्मादाज्ञाचक्रम् VarivaRaha. 20; 44; मूलाधारादुत्थिता देवी मणिपूरे प्रलक्षा भवति। ताम् ... अनाहतं नीत्वा LalitāSaBh. 54. 17 (*on* 88); 55. 23 (*on* 91); 117. 21 (*on* 151); 171. 5 (*on* 208); मूलाधारे वह्निमण्डलमनाहते सूर्यमण्डलमाज्ञाचक्रे चन्द्रमण्डलं चेति त्रयं निर्भिद्य SetuBa. 269.2; 225. 11; **2** heart as the seat of *anāhatacakra* हंसः ... स्वाहेत्यनाहते न्यसेत् HaṁsṢoU. 474.15; नाभावनाहते शुद्धौ लम्बिकाग्रे भ्रुवोऽन्तरे। -- चक्रं तु भावयेत् NityāṢoḍa. 6. 25; न्यासान् मन्त्री तनौ कुर्यात् ...। अनाहते भुजद्वन्द्वे जठरे नाभिमण्डले। स्वाधिष्ठाने ŚāraTi. 12.101 (comm. अनाहते हृदये); अनाहताख्ये हृद्देशे सिन्दूरारुणपङ्कजे। राकिनीम् -- पूजयेत् TantrRā. 16. 68; 26. 7; अनाहतात्पदाद्वा सर्वतः समतां गतम्। निर्गतं तु स्मरेद्देवम् LakṣmIT. 38. 7; आनन्दलक्षणमनाहतनाम्नि देशे नादात्मना परिणतं तव रूपमीशे। ... शंसन्ति DevIPañ. 4.19; **3** mystic subtle sound not produced by striking कस्येदमचिराद्याति अभिव्यक्तिमनाहतम्। भव्यानामुपदेशार्थं येनेदं व्यञ्जितं बहिः PauṣkS. 35. 68; नासाग्रे प्रणवः शून्यमनाहतमिति

त्रयम्। ध्यायन् गुणाष्टकं लब्ध्वा ज्ञानमाप्नोति निर्मलम् YogŚā. 8. 60; *m.* 1 one of the epithets of Śiva (नमोऽस्तु) सांख्याय चैव योगाय व्यापिने दीक्षिताय च। अनाहताय शर्वाय मन्येशाय यमाय च। रोधसे चेकितानाय ब्रह्मिष्ठाय महर्षये MatsyaP. 47. 140; 2 mystic subtle sound considered to be a deity ततोऽनक्षरतां प्राप्तमनुचार्यं विचिन्तयेत्। निशाकरकलाकारं सूक्ष्मं भास्करभास्वरम्। अनाहताभिधं देवं विस्फुरन्तं विचिन्तयेत् YogŚā. 8. 25; [Kośas give *anāhata* as a synonym of the following words - *niṣpravāṇi*, AmaK. 1297; AbhidhāCin. 671; ParyāŚaRa. 689; *tantraka*, AmaK. 1297; AbhidhāCin 671; ParyāŚaRa. 689; KalpaK. 52.287; *navāmbara*, AmaK. 1297; *āhata*, ŚabdaBhePra.(Pu.) 6. 38; *navam vāsah*, Abhidhā-Cin. 671; KalpaK. 52. 287; *ahata*, *niṣpravaṇa*, *niṣpravāṇi*, KalpaK. 52. 287; *navam vastram*, ParaNā. 2272; also the following as meanings of *anāhata - navāmbara*, ParyāMu. 22. 9; *āhata*, ŚabdaBhe-Pra.(Mā.) 1.12; *purātanavastra*, ViśvaLoK. 151. 192; *navavastra*, ViśvaLoK. 151. 192; *guṇita*, ŚabdaRa.(Su.) 6. 71; *mṛṣārthaka*, Śabda-Ra.(Su.) 6. 71; *tāḍitaka*, ŚabdaRa.(Su.) 6. 71]

अनाहतकमल (anāhata-kamala) *n.* mystic lotus (called) *anāhata* (i. e. one of the six mystic lotuses in the body) (भानुमण्डलमध्यस्था) भानुमण्डलस्य सूर्यमण्डलस्य मध्ये तिष्ठतीति तथा। ... भानुमण्डलमनाहतकमलं वा LalitāSaBh. 81. 17 (*on* 116)

अनाहतगति (anāhata-gati) *adj.* having unrestrained movement पुरुषः -- । कदाचिल्लीलया लोलं विमानमधिरोहति। अनाहतगतिः कान्तं विहर्तुममलं मनः YogVā. iv. 23. 35.

अनाहतचक्र (anāhata-cakra) *n.* mystic circle (called) *anāhata* (शृङ्गाररससंपूर्णा) शृङ्गपदेन द्विसंख्या। अपरपदेन दलम्। रसाः षट्। द्विदलषट्कं द्वादशदलम्। अनाहतचक्रमिति यावत् LalitāSaBh. 101. 18 (*on* 133)

अनाहततूर्यशब्द (anāhatatūrya-śabda) *m.* sound of an unstruck musical instrument कपोतकोलूकमधूनि यस्य समाश्रयन्ते ध्वजचामराणि। छत्रायुधादीनि च सोऽभियोज्यो यस्याथवानाहततूर्यशब्दः YogYā. 3.6.

अनाहतदल (anāhata-dala) *n.* petal of the mystic lotus (called) *anāhata* अनाहतदले पूर्वेऽष्टमे चैकादशे तथा। द्वादशे च स्थितो जीवो गीतादेः सिद्धिमृच्छति SaṃgīRa. i. 56.9 (1(2). 140)

अनाहतध्वनत् (anāhata-dhvanat) *adj.* resounding without being struck तेनानुमोदितेन भरतमुनिना स्वयमागत्य सुत्रितमनाहतध्वनन्मेघमुरजमनोहरम् TilaMañ. 57. 12.

अनाहतध्वनि (anāhata-dhvani) *m.* mystic subtle sound produced without striking or beating दृश्यते तव मुखाम्बुजं शिवे श्रूयते स्फुटमनाहतध्वनिः TripuMāPūSt.(Śaṅ.) 114; महारात्रे बुद्ध्वा स्वहृदयपरमाकाशे ध्वनन्तमनाहतध्वनिमूर्जितानन्ददायकमवमृश्य ParaśuKS. 7. 2 (208. 3); पूजयेत् परया भक्त्या मानसैरुपचारकैः। ... धूपं प्राणान् प्रकल्पयेत्। ... अनाहतध्वनिं घण्टां वायुतत्त्वं च चामरम् MahNirvāT. 5. 146; (दहरान्तरसंतर्पणादालोकनतत्परः) दहरं हृदयाकाशं तस्मान्तरे मध्ये संतर्पतो नादस्य सर्वमन्त्रप्रकृतिभूतस्यानाहतध्वनेरालोकने श्रवणानुसंधाने तत्पर आसक्तः SetuBa. 276. 20.

अनाहतध्वनियुत (anāhatadhvani-yuta) *adj.* accompanied by the mystic sound produced without beating or striking अनाहतध्वनियुतं हंसं यो वेद हृद्गतम्। स्वप्रकाशचिदानन्दं स हंस इति गीयते BrahmViU. 20.

अनाहतनाद (anāhata-nāda) *m.* A a sound produced otherwise than by beating [MW.]; B sound *om* [MW., APTE]

अनाहतपटह (anāhata-paṭaha) *adj.* where the drums were not beaten सुरपतिः ... अमुखरमुरजमनाहतपटहम् ... आगत्य पुनर्नगरम् ... शयनागारमेव जगाम तां रजनीम् NīlaVi. 14. 13.

अनाहतप्रतिभता (anāhatapratibha-tā) *f.* the state of being one who has unimpeded intuitive wisdom स प्राकृतभाषया ह र ड इ इति विज्ञापयामास। -- अनाहतप्रतिभतया तद्वचनच्छलमाकलय्य कपर्दिनोक्तम् PrabaCin. 89. 25.

अनाहतमण्डलस्थ (anāhatamaṇḍala-stha) *adj.* located in the mystic circle (called) *anāhata* कुलकुण्डलिनी ... अनाहतमण्डलस्थं रविं भित्वा ... स्वस्थानमायाति SetuBa. 141.19.

अनाहतमति (anāhata-mati) *adj.* having unobstructed intelligence पुत्रं देहि गुणोपेतम् ...। अनाहतमतिर्वीरः संग्रामेष्वपराजितः। एवंगुणः सुरश्रेष्ठ यस्माद्वंशः प्रजायते PadmP. ii. 103. 130.

अनाहतमन्त्र (anāhata-mantra) *m.* sacred formula in the form of mystic subtle sound produced without striking कामादिवृत्तिदहनम्। काठिन्यदृढकौपीनम्। चीराजिनवासः। अनाहतमन्त्रः। अक्रिययैव जुष्टम् NirvāU. 347.10; *adj.* (Brahman) for which the automatic or unstruck sound is the mystic formula काठिन्यदृढकौपीनम्। चि(? ची)राजिनवासः। अनाहतमन्त्रमक्रिययैव जुष्टम् NirvāU. 149. 6 (Adyar Ed. 1929) (Upaniṣad-brahmayogin अनाहतमन्त्रं तुरीयोंकारं च, तुर्योंकारस्य तुर्यतुर्यत्वेन केनाप्यनाहतत्वात् -- । अनाहतमन्त्रं तुर्यतुर्यं ब्रह्म)

अनाहतमूर्ति (anāhata-mūrti) *adj.* having the form of mystic subtle sound produced without striking विषोत्तीर्णा नाडी नादमयी सैव मातृका जाता। अखिलमनाहतमूर्तिः उत्तीर्णस्वरूपिणी तरति काशयति नानानादप्रपञ्चरूपेण मातृकादेवी PratyabhiHṛ. 197. 26 (Adyar Ed.)

अनाहतयुत (anāhata-yuta) *adj.* accompanied by the mystic subtle sound produced without striking यद्वा मन्त्राधिपं धीमानूर्ध्वाधोरेफसंयुतम्। कलाबिन्दुसमाक्रान्तमनाहतयुतं तथा। -- स्मरेत् YogŚā. 8. 18.

अनाहतरव (anāhata-rava) *m.* mystic subtle sound produced without striking अनाहतरवोत्तरम् --। ग्रहीतुमिव ... परं ब्रह्म तद् विशन्ति करणान्यहो हृदि HammīMaMa. 5.12 (? 13)

अनाहतलक्षण (anāhata-lakṣaṇa) *adj.* whose sign or banner is unbeaten स प्रज्ञाततमोऽप्येकस्तदानाहतलक्षणः। भीष्मोऽप्यशान्तनवतां विदधार नदन्रणे HarVi. 43. 16 (comm. अनाहतं लक्षणं ध्वजो यस्य)

अनाहतशक्ति (anāhata-śakti) *adj.* having unimpeded power कायस्थो नाम गणः ... अष्टमूर्तेर्भगवतो जलमयीं मूर्तिमधिष्ठितस्यासन्नसहचरत्वेन काये स्थितत्वात् कायस्थ इति जलैरनाहतशक्तेः प्रणवास्पदमम्बुरासीत् UdaySuKa. 10. 24.

अनाहतशब्द (anāhata-śabda) *m.* mystic subtle sound produced without striking प्रत्यहमनाहतशब्द ऊर्ध्वो भवति स्म SiṃhāDvā. App. 241. 0(11); 241.0(19)

अनाहतशीर्ष्णी (ánāhataśírṣṇ-ī) *adj.* (*f.*) whose head (i. e. beginning) is unobstructed or inviolable मन्द्रा स्वर्वाच्यदितिरनाहतशीर्ष्णी वाग्जुष्टा सोमस्य तृप्यतु TaiS. III. ii. 5. 1 (Sāy. अनाहतशीर्ष्णी शिरःशब्देन प्राधान्यात् प्रारम्भो लक्ष्यते अप्रतिबद्धप्रारम्भेत्यर्थः); MānŚS. 80.22; *f.* one of the epithets of the power of Viṣṇu (*lit.* whose rise is unimpeded) (भगवतस्तस्य -- शक्तिः) अनाहतशीर्ष्णी चानाहतोऽभ्युदयो यतः। -- स्तीर्यते AhirbuS. 3. 14.

अनाहतसंप्रहारहेल (anāhatasamprahāra-hela) *adj.* having ease in giving inviolable strokes ये मन्दराद्रिमपि ...। उत्पाट्य पाणिभिरनाहतसंप्रहारहेला विरेजुरुपपादितशक्तिकलाः HarVi. 37. 7.

अनाहतसिद्धिदा (anāhatasiddhi-dā) *adj.* (*f.*) bestowing unobstructed supreme perfection कण्ठचक्रं चतुरङ्गुलं तत्र वामे इडा चन्द्रनाडी दक्षिणे पिङ्गला सूर्यनाडी तन्मध्ये सुषुम्नां श्वेतवर्णां ध्यायेत्। य एवं वेदानाहतसिद्धिदा भवति SaubhāLaU. 118. 11 (Adyar Ed. 1925)

अनाहतस्वधर्म (anāhata-svadharma) *adj.* who has not violated one's own duties अनाहतस्वधर्मान् स विलोक्य वणिजस्ततः। आदिशत् तान् नृपः सर्वान् यज्ञसत्राणि वर्जितुम् BallāC. 110. 1.

अनाहतस्वरूप (anāhata-svarūpa) *n.* [Inst.] in the form of the mystic subtle sound produced without striking प्रणवः --। अनाहतस्वरूपेण ज्ञानिनामूर्ध्वगो भवेत् YogCūU. 79.

